Samskrit for Specific Purpose Series - 3

गीतायाः भाषा

संस्कृतं पठ्यताम्

चतुर्थः भागः - २

Learn Samskrit

THE LANGUAGE OF GITA

Part - 4.2

संस्कृतसंवर्धनप्रतिष्ठानम्

Samskrit for Specific Purpose Series - 3

गीतायाः भाषा

संस्कृतं पठ्यताम्

चतुर्थः भागः - २

Learn Samskrit

THE LANGUAGE OF GITA

PART - 4.2

ONGC-CSR Supported Project of

Samskrit Promotion Foundation

ओएनजीसी ONGC

संस्कृतसंवर्धनप्रतिष्ठानम्

देहली

प्रकाशनम्
संस्कृतसंवर्धनप्रतिष्ठानम्
११२०४/५, वेदभवनम्, गौशालामार्गः
देहली - ११०००६

© प्रकाशकस्य एव

प्रथममुद्रणम् - २०१७
द्वितीयमुद्रणम् - २०२१

मुद्रणम्
प्रिन्टैक इन्टरनेशनल
ए-६/डी, झिलमिल इंडस्ट्रियल एरिया,
दिल्ली - ११००९५

परामर्शसमितिः

डॉ. चान्दकिरणसलूजा
चमूकृष्णशास्त्री (पद्मश्रीः)
डॉ. विश्वासः

लेखकाः

आचार्य अनूप शर्मा
अश्विनी राजेश लङ्के
सौ. श्रद्धा उपाध्ये
श्रीदेव झा

ISBN -978-81-944709-5-3

Learn Samskrit - THE LANGUAGE OF GITA (PART - 4.2)
Fourth level text book to learn Samskrit through Gita.

Publisher - Samskrit Promotion Foundation
11204/5, Vedabhavanam, Gaushala Marg, Delhi-110006
Email: info@samskritpromotion.in
Pages - 6+330
Second Print - 2021
Printed at : Printech International
A-6/D, Jhilmil Industrial Area, Delhi-110095

Preface

The richness and vibrance of the Samskrit language is a fact acknowledged by scholars and intellectuals across the world. Over millennia, Samskrit has been the principal vehicle of the knowledge traditions and practices of Bharat, or India. This continuum of the language not only helped create innumerable branches of knowledge, but also resulted in an unmatched corpus of classical texts in every conceivable domain of human endeavor, thus laying the very foundations for the development and spectacular rise of the Bharatiya civilization.

However, in recent centuries, Samskrit became tagged as just a 'religious language', an impression that remains in the minds of many people throughout the world even to this day. This situation is due to several reasons: (१) while our day-to-day affairs were in our individual 'mother tongue', Samskrit remained restricted to the conduct of our religious ceremonies and programs; (२) over the last two centuries or so, there were concerted efforts to alienate Samskrit from our mainstream education; and (३) for a long time, there has been a deliberate campaign of disinformation regarding Samskrit, either because of ignorance or because of ulterior motives.

The truth is simple: Samskrit is the unparalled medium, the original language that has articulated all knowledge and wisdom in our region since eternity. The language of science and medicine has been Samskrit. The language of literature has been Samskrit. The language of philosophy and religion has been Samskrit. The language of the arts and music has been Samskrit. It is no wonder that mankind's first astronomical observations were recorded in Samskrit. Again, Samskrit is the only language that truly reveals the secrets of Yoga or Ayurveda.

Yet, we are confronted today with a peculiar situation. While there are countless works in Samskrit on a wide range of subjects, innumerable original works still remain unpublished. To make matters worse, even the published Samskrit literature is seen and studied only through the lens of religion. In order to bridge the disconnect between Samskrit and modern times, the need of the hour is the editing and publishing of ancient Samskrit texts, knowledge retrieval and dissemination, and research and re-interpretation. All this in Samskrit itself --- not in translation, as the essence can easily be lost. The challenges for Bharat are major, but shouldering the responsibilites would not only be life-fulfilling, but also offer our younger generation bright career opportunities and a great future in Samskrit studies.

Today, adult beginners of Samskrit are learning the language for specific purposes: e.g., to access the original texts on Yoga, Ayurveda, Vedanta, as well as the eternal repositories of wisdom such as the Arthashastra, the Vedas, the Upanishads, the Bhagavad-Gita. The vocabulary, verbal repertoire, syntax, semantics, etc., of every discipline differ from one to the other.

With such specific requirements, many modern-day learners find that the conventional language-centered approach is a roundabout route to accessing their information needs. This new Samskrit for Specific Purpose (SSP) series is uniquely tailored for them, offering a more focused methodology. Unlike the traditionally available Samskrit learning materials or courses, this SSP series is uniquely designed to facilitate the study of the target language through the target subject, and the study of the target subject through the target language.

The SSP series can be useful for all irrespective of age groups and occupations for both self-learning and classroom teaching. The SSP series course books herald a new era in Samskrit learning/education, and are supplemented with audio, video and e-learning modules. The approach of 'Samskrit through Samskrit' is extremely crucial. You can, and will, easily learn Samskrit directly, without the crutch of, say, English. Thus, in the broader context, Samskrit through Samskrit (STS) and Samskrit for Specific Purpose (SSP) will together provide a highly effective learning platform for even first-time learners.

In conclusion, a brief word of advice: although learners may feel, at the outset, that their intention to learn Samskrit is only to read and understand the target subject, they must keep in mind that sound/speech (listening and speaking) is the primary medium of a language. The practice of listening and speaking should precede the practice of the reading and writing.

The SSP series is designed to introduce Samskrit through simple conversations, to make learning both interesting and meaningful, followed with graded lessons. The series will not only make learners function adequately in Samskrit, but will also enable them eventually to read, comprehend and undertake studies in Samskrit in their specific interest area at a higher level.

SPF acknowledges and thanks Dr. H R Vishwasa, Mangalore for his guidance and advice in preparation of books of Bhagavad Gita Series.

अनुक्रमणिका

क्र०	अध्यायः	अध्यायनाम	पृष्ठसंख्या
१.	अथ चतुर्थोऽध्यायः	ज्ञानकर्मसंन्यासयोगः	१
२.	अथ पञ्चमोऽध्यायः	कर्मसंन्यासयोगः	७२
३.	अथ षष्ठोऽध्यायः	ध्यानयोगः	१२३
४.	अथ सप्तमोऽध्यायः	ज्ञानविज्ञानयोगः	२०४
५.	अथ अष्टमोऽध्यायः	अक्षरब्रह्मयोगः	२५९
६.	सम्पूर्ण-श्रीमद्भगवद्गीतायाः अकारादिक्रमेण पादानुक्रमणिका		३०७

सङ्केताक्षरसूची

अ.	अकारान्तः	र.	रकारान्तः (रेफान्तः)
आ.	आकारान्तः	म.	मकारान्तः
इ.	इकारान्तः	न.	नकारान्तः
ई.	ईकारान्तः	ध.	धकारान्तः
उ.	उकारान्तः	ज.	जकारान्तः
ऊ.	ऊकारान्तः	द.	दकारान्तः
ऋ.	ऋकारान्तः	चका.	चकारान्तः
ओ.	ओकारान्तः	त.	तकारान्तः
पुं.	पुंलिङ्गः	प.	पकारान्तः
नपुं.	नपुंसकलिङ्गः	श.	शकारान्तः
स्त्री.	स्त्रीलिङ्गः	सका.	सकारान्तः
प्र.	प्रथमा विभक्तिः	आत्म.	आत्मनेपदम्
द्वि.	द्वितीया विभक्तिः	पर.	परस्मैपदम्
तृ.	तृतीया विभक्तिः	लट्.	लट् लकारः

च.	चतुर्थी विभक्तिः	लिट्.	लिट् लकारः
पं.	पञ्चमी विभक्तिः	लोट्.	लोट् लकारः
ष.	षष्ठी विभक्तिः	लङ्.	लङ् लकारः
स.	सप्तमी विभक्तिः	विधिलिङ्.	विधिलिङ् लकारः
सम्बो.	सम्बोधनम्	लुङ्.	लुङ् लकारः
एक.	एकवचनम्	लृङ्.	लृङ् लकारः
द्विव.	द्विवचनम्	प्रपु.	प्रथमपुरुषः
बहु.	बहुवचनम्	मपु.	मध्यमपुरुषः
सर्व.	सर्वनामपदम्	उपु.	उत्तमपुरुषः
ह.	हकारान्तः	क्रियावि.	क्रियाविशेषणम्
व.	वकारान्तः		
ऽ	एतस्य नाम अवग्रहचिह्नम्, अकारं दर्शयितुम् एतत् चिह्नं स्थापितम् अस्ति ।		

उपसर्गाः

प्र	परा	अप	सम्	अनु	अव
निस्	निर्	दुस्	दुर्	वि	आङ्
नि	अधि	अपि	अति	सु	उद्
अभि	प्रति	परि	उप		

एते उपसर्गाः सन्ति । एतेषां प्रयोगः सर्वदा धातोः आदौ भवति ।
पदपरिचये व्याकरणांशे वा 'प्र' इत्यादयः ये शब्दाः लिखिताः सन्ति ते उपसर्गाः इति ज्ञातव्यम् ।

अस्मिन् ग्रन्थे क्रियापदं यस्मिन् पदे प्रयुक्तम् अस्ति तस्मिन् एव पदिनि धातोः निर्देशः कृतः अस्ति । अर्थात् प्रयोगं दृष्ट्वा पदनिर्देशः अस्ति ।

अथ चतुर्थोऽध्यायः

४

ज्ञानकर्मसंन्यासयोगः

श्रीभगवानुवाच - इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥४.१॥

पदच्छेदः -

श्रीभगवान्, उवाच - इमम्, विवस्वते, योगम्, प्रोक्तवान्, अहम्, अव्ययम् ।
विवस्वान्, मनवे, प्राह, मनुः, इक्ष्वाकवे, अब्रवीत् ॥

अन्वयः - अहं विवस्वते इमम् अव्ययं योगं प्रोक्तवान् । विवस्वान् मनवे प्राह । इक्ष्वाकवे मनुः अब्रवीत् ।

पदार्थः - अहम् = अहम्, विवस्वते = सूर्याय, इमम् = एनम्, अव्ययम् = अविनाशिनम्, योगम् = योगमार्गम्, प्रोक्तवान् = कथितवान्, विवस्वान् = सूर्यः, मनवे = मनुसंज्ञकाय राज्ञे, प्राह = अवदत्, मनुः = मनुः, इक्ष्वाकवे = इक्ष्वाकुनाम्ने राज्ञे, अब्रवीत् = अकथयत् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहम्	अस्मद्- द. सर्व. प्र. एक.	विवस्वते	विवस्वत्- त. पुं. च. एक.
इमम्	इदम्- म. सर्व. पुं. द्वि. एक. (विशेषणम्)	अव्ययम्	अ. पुं. द्वि. एक. (विशेषणम्)
योगम्	अ. पुं. द्वि. एक. (विशेष्यम्)	प्रोक्तवान्	प्रोक्तवत्- त. पुं. प्र. एक.
विवस्वान्	विवस्वत्- त. पुं. प्र. एक.	मनवे	उ. पुं. च. एक.
प्राह	प्र + ब्रू (ब्रूञ् - व्यक्तायां वाचि) पर. कर्तरि लट्. प्रपु. एक.	मनुः	उ. पुं. प्र. एक.
इक्ष्वाकवे	उ. पुं. च. एक.	अब्रवीत्	ब्रू (ब्रूञ् - व्यक्तायां वाचि) पर. कर्तरि लङ्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः मनुरिक्ष्वाकवे — मनुः + इक्ष्वाकवे — विसर्गसन्धिः (रेफः) ।
इक्ष्वाकवेऽब्रवीत् — इक्ष्वाकवे + अब्रवीत् — पूर्वरूपसन्धिः ।

(ख) समासः अव्ययम् — न विद्यते व्ययः यस्य सः अव्ययः, तम् - बहुव्रीहिः ।

(ग) कृदन्तः योगम् — युज् (युजिर् - योगे) + घञ्, तम् ।
प्रोक्तवान् — प्र + वच् (वच - परिभाषणे) + क्तवतु (कर्तरि) ।

भावस्पष्टीकरणम् -

प्रोक्तवान् ।	
कः प्रोक्तवान् ?	**अहं** प्रोक्तवान् ।
अहं **कस्मै** प्रोक्तवान् ?	अहं **विवस्वते** प्रोक्तवान् ।
अहं विवस्वते **कं** प्रोक्तवान् ?	अहं विवस्वते **योगं** प्रोक्तवान् ।
अहं विवस्वते **कं** योगं प्रोक्तवान् ?	अहं विवस्वते **इमं** योगं प्रोक्तवान् ।
अहं विवस्वते इमं **कीदृशं** योगं प्रोक्तवान् ?	अहं विवस्वते इमम् **अव्ययं** योगं प्रोक्तवान् ।
अहं विवस्वते इमम् अव्ययं योगं प्रोक्तवान् । **विवस्वान् किम् अकरोत् ?**	अहं विवस्वते इमम् अव्ययं योगं प्रोक्तवान् । **विवस्वान् प्राह ।**
अहं विवस्वते इमम् अव्ययं योगं प्रोक्तवान् । विवस्वान् **कस्मै** प्राह ?	अहं विवस्वते इमम् अव्ययं योगं प्रोक्तवान् । विवस्वान् **मनवे** प्राह ।
अहं विवस्वते इमम् अव्ययं योगं प्रोक्तवान् । विवस्वान् मनवे प्राह । **मनुः किम् अकरोत् ?**	अहं विवस्वते इमम् अव्ययं योगं प्रोक्तवान् । विवस्वान् मनवे प्राह । **मनुः अब्रवीत् ।**
अहं विवस्वते इमम् अव्ययं योगं प्रोक्तवान् । विवस्वान् मनवे प्राह । मनुः **कस्मै** अब्रवीत् ?	अहं विवस्वते इमम् अव्ययं योगं प्रोक्तवान् । विवस्वान् मनवे प्राह । मनुः **इक्ष्वाकवे** अब्रवीत् ।

तात्पर्यम् - एतम् अविनाशिनं योगमार्गम् अहं कल्पादौ सूर्याय उक्तवान् । सूर्यः स्वपुत्राय मनवे अब्रवीत् । मनुः स्वपुत्राय इक्ष्वाकवे अवदत् ।

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ॥४.२॥

पदच्छेदः - एवम्, परम्पराप्राप्तम्, इमम्, राजर्षयः, विदुः ।
सः, कालेन, इह, महता, योगः, नष्टः, परन्तप ॥

अन्वयः - परन्तप ! एवं परम्पराप्राप्तम् इमं राजर्षयः विदुः । महता कालेन सः योगः इह नष्टः ।

पदार्थः - परन्तप = शत्रुञ्जय ! एवम् = इत्थम्, परम्पराप्राप्तम् = सम्प्रदायात् आगतम्, इमम् = अमुम्, राजर्षयः = राजश्रेष्ठाः, विदुः = जानन्ति, महता = दीर्घेण, कालेन = समयेन, सः = एषः (पूर्वोक्तः), योगः = योगः, इह = अत्र, नष्टः = लुप्तः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
परन्तप	अ. पुं. सम्बो. एक.	एवम्	अव्ययम्
परम्पराप्राप्तम्	अ. पुं. द्वि. एक. (विशेषणम्)	इमम्	इदम्- म. सर्व. पुं. द्वि. एक. (विशेषणम्)
राजर्षयः	इ. पुं. प्र. बहु.	विदुः	विद् (विद - ज्ञाने) पर. कर्तरि लट्. प्रपु. बहु.
महता	महत्- त. पुं. तृ. एक. (विशेषणम्)	कालेन	अ. पुं. तृ. एक. (विशेष्यम्)
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	योगः	अ. पुं. प्र. एक. (विशेष्यम्)
इह	अव्ययम्	नष्टः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	राजर्षयो विदुः	राजर्षयः + विदुः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	स कालेन	सः + कालेन	विसर्गसन्धिः (लोपः) ।
	कालेनेह	कालेन + इह	गुणसन्धिः ।
	योगो नष्टः	योगः + नष्टः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
(ख) समासः	परम्पराप्राप्तम्	परम्परया प्राप्तं परम्पराप्राप्तम् - तृतीयातत्पुरुषः ।	
	राजर्षयः	राजानः ऋषयः इव राजर्षयः - कर्मधारयः ।	
	परन्तप	परान् शत्रून् तापयति इति परन्तपः, तत्सम्बुद्धौ - कर्तरि खच् उपपदसमासः ।	
(ग) कृदन्तः	प्राप्तम्	प्र + आप् (आप्लृ - व्याप्तौ) क्त (कर्मणि)	
	योगः	युज् (युजिर् - योगे) + घञ् ।	
	नष्टः	नश् (णश - अदर्शने) क्त (कर्तरि) ।	

भावस्पष्टीकरणम् -

विदुः ।	
के विदुः ?	**राजर्षयः** विदुः ।
कं राजर्षयः विदुः ?	**इमं** (योगम्) राजर्षयः विदुः ।
कीदृशम् इमं राजर्षयः विदुः ?	**परम्पराप्राप्तम्** इमं राजर्षयः विदुः ।
कथं परम्पराप्राप्तम् इमं राजर्षयः विदुः ?	**एवं** परम्पराप्राप्तम् इमं राजर्षयः विदुः ।
नष्टः ।	
कः नष्टः ।	**योगः** नष्टः ।

कः योगः नष्टः ?	सः योगः नष्टः ।
सः योगः कुत्र नष्टः ?	सः योगः इह नष्टः ।
केन सः योगः इह नष्टः ?	कालेन सः योगः इह नष्टः ।
कियता कालेन सः योगः इह नष्टः ?	महता कालेन सः योगः इह नष्टः ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	परन्तप !

तात्पर्यम् - इत्थं परामपराप्राप्तम् एतं योगं राजर्षयः जानन्ति स्म । परन्तु महान् कालः अतीतः इति हेतोः अयं योगः नष्टः अभवत् ।

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥४.३॥

पदच्छेदः - सः, एव, अयम्, मया, ते, अद्य, योगः, प्रोक्तः, पुरातनः ।
भक्तः, असि, मे, सखा, च, इति, रहस्यम्, हि, एतद्, उत्तमम् ॥

अन्वयः - पुरातनः सः एव अयं योगः अद्य मया ते प्रोक्तः । हि मे भक्तः असि इति सखा च इति एतत् उत्तमं रहस्यं (त्वम्) प्रोक्तः ।

पदार्थः - पुरातनः = प्राचीनः, सः एव = पूर्वोक्तः एव, अयम् = एषः, योगः = ज्ञानयोगः, अद्य = इदानीम्, मया = भगवता, ते = तुभ्यम्, प्रोक्तः = कथितः, हि = यस्मात्, मे = मम, भक्तः असि = आराधकः असि इति, सखा च = मम मित्रं च इति, एतत् = इदम्, उत्तमम् = उत्कृष्टम्, रहस्यम् = गोप्यम्, (प्रोक्तम्) ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पुरातनः	अ. पुं. प्र. एक. (विशेषणम्)	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
एव	अव्ययम्	अयम्	इदम्- म. सर्व. पुं. प्र. एक. (विशेषणम्)
योगः	अ. पुं. प्र. एक. (विशेष्यम्)	अद्य	अव्ययम्
मया	अस्मद्- द. सर्व. तृ. एक.	ते	युष्मद्- द. सर्व. च. एक.
प्रोक्तः	अ. पुं. प्र. एक. (विशेषणम्)	हि	अव्ययम्
मे	अस्मद्- द. सर्व. ष. एक.	भक्तः	अ. पुं. प्र. एक.
असि	अस् (अस - भुवि) पर. कर्तरि लट्. मपु. एक.	इति	अव्ययम्

सखा	सखि- इ. पुं. प्र. एक.	च	अव्ययम्
एतत्	एतद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	उत्तमम्	अ. नपुं. प्र. एक. (विशेषणम्)
रहस्यम्	अ. नपुं. प्र. एक. (विशेष्यम्)		

व्याकरणम् -

(क) सन्धिः	स एव	सः + एव	विसर्गसन्धिः (लोपः)।
	एवायम्	एव + अयम्	सवर्णदीर्घसन्धिः।
	तेऽद्य	ते + अद्य	पूर्वरूपसन्धिः।
	भक्तोऽसि	भक्तः + असि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	चेति	च + इति	गुणसन्धिः।
	ह्येतत्	हि + एतत्	यण्सन्धिः।
	एतदुत्तमम्	एतत् + उत्तमम्	जश्त्वसन्धिः।
(ख) कृदन्तः	योगः	युज् (युजिर् - योगे) + घञ्।	
	प्रोक्तः	प्र + वच् (वच - परिभाषणे) + क्त (कर्मणि)।	
	भक्तः	भज् (भज - सेवायाम्) + क्त।	
(ग) तद्धितान्तः	पुरातनः	पुरा + ट्युल् (भव इत्यर्थे) पुरा भवः इत्यर्थः।	
	रहस्यम्	रहस् + यत् (रहसि भवम्)।	
	उत्तमम्	उद् + तमप् (अतिशयार्थे) (बहुषु अन्यतमस्मिन्)।	

भावस्पष्टीकरणम् -

त्वं प्रोक्तः।	
कस्मै त्वं प्रोक्तः ?	**ते** (त्वं) प्रोक्तः।
केन ते प्रोक्तः ?	**मया** ते प्रोक्तः।
कदा मया ते प्रोक्तः ?	**अद्य** मया ते प्रोक्तः।
कः अद्य मया ते प्रोक्तः ?	**योगः** अद्य मया ते प्रोक्तः।
कीदृशः असौ योगः अद्य मया ते प्रोक्तः ?	**पुरातनः सः एव** योगः अद्य मया ते प्रोक्तः।
त्वं प्रोक्तः।	
किं त्वं प्रोक्तः ?	**रहस्यं** (त्वं) प्रोक्तः।

किं रहस्यं त्वं प्रोक्तः ?	एतत् रहस्यं त्वं प्रोक्तः ।
एतत् **कीदृशं** रहस्यं त्वं प्रोक्तः ?	एतत् **उत्तमं** रहस्यं त्वं प्रोक्तः ।
किमर्थम् एतत् उत्तमं रहस्यं त्वं प्रोक्तः ?	**भक्तोऽसि इति** एतत् उत्तमं रहस्यं त्वं प्रोक्तः ।
भक्तोऽसि इति, **पुनश्च किमर्थम्** एतत् उत्तमं रहस्यं त्वं प्रोक्तः ?	भक्तोऽसि इति, **सखा च इति**, एतत् उत्तमं रहस्यं त्वं प्रोक्तः ।

तात्पर्यम् - तमेव प्राचीनम् अत्युत्कृष्टं रहस्यम् इमं योगम् इदानीं भवन्तम् उक्तवान्, यतः भवान् मद्भक्तः मित्रं च अस्ति ।

अर्जुन उवाच - **अपरं भवतो जन्म परं जन्म विवस्वतः ।**
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥४.४॥

पदच्छेदः -

अर्जुनः, उवाच - अपरम्, भवतः, जन्म, परम्, जन्म, विवस्वतः ।
कथम्, एतत्, विजानीयाम्, त्वम्, आदौ, प्रोक्तवान्, इति ॥

अन्वयः - भवतः जन्म अपरम्, विवस्वतः जन्म परम् । (तस्मात्) त्वम् आदौ एतत् प्रोक्तवान् इति कथं विजानीयाम् ?

पदार्थः - भवतः = तव, जन्म = जननम्, अपरम् = उत्तरकालिकम्, विवस्वतः = सूर्यस्य, जन्म = जननम्, परम् = पूर्वकालिकम्, त्वम् = भवान्, आदौ = प्रथमतः, एतत् = इमं विषयम्, प्रोक्तवान् इति = कथितवान् इति, कथम् = केन प्रकारेण, विजानीयाम् = ज्ञातुं शक्नुयाम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भवतः	भवत्- त. सर्व. पुं. ष. एक.	जन्म	जन्मन्- न. नपुं. प्र. एक. (विशेष्यम्)
अपरम्	अ. सर्व. नपुं. प्र. एक. (विशेषणम्)	विवस्वतः	विवस्वत्- त. पुं. ष. एक.
परम्	अ. सर्व. नपुं. प्र. एक. (विशेषणम्)	त्वम्	युष्मद्- द. सर्व. प्र. एक.
आदौ	इ. पुं. स. एक.	एतत्	एतद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
प्रोक्तवान्	प्रोक्तवत्- त. पुं. प्र. एक. (विशेषणम्)	इति	अव्ययम्
कथम्	अव्ययम्	विजानीयाम्	वि + जन् (ज्ञा - अवबोधने) पर. कर्तरि विधिलिङ्. उपु. एक.

व्याकरणम् -

(क) सन्धिः	भवतो जन्म	भवतः + जन्म	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	एतद्विजानीयाम्	एतत् + विजानीयाम्	जश्त्वसन्धिः।
(ख) समासः	अपरम्	न परम् अपरम् - नञ्तत्पुरुषः।	
(ग) कृदन्तः	प्रोक्तवान्	प्र + वच् (वच - परिभाषणे)। क्तवतु (कर्तरि)।	

भावस्पष्टीकरणम् -

जन्म।	
कस्य जन्म ?	**भवतः** जन्म।
भवतः जन्म **कीदृशम्** ?	भवतः जन्म **अपरम्**।
भवतः जन्म अपरम्। **परं जन्म कस्य** ?	भवतः जन्म अपरम्। **परं जन्म विवस्वतः**।
भवतः जन्म अपरम्। परं जन्म विवस्वतः। **ततः किम्** ?	भवतः जन्म अपरम्। **परं जन्म विवस्वतः**। (तस्मात्) **विजानीयाम्**।
भवतः जन्म अपरम्। परं जन्म विवस्वतः। (तस्मात्) **किं** विजानीयाम् ?	भवतः जन्म अपरम्। परं जन्म विवस्वतः। तस्मात् **एतत्** विजानीयाम्।
भवतः जन्म अपरम्। परं जन्म विवस्वतः। तस्मात् **किम्** एतत् विजानीयाम् ?	भवतः जन्म अपरम्। परं जन्म विवस्वतः। तस्मात् **प्रोक्तवान् इति** एतत् विजानीयाम्।
भवतः जन्म अपरम्। परं जन्म विवस्वतः। तस्मात् **कः** प्रोक्तवान् इति एतत् विजानीयाम् ?	भवतः जन्म अपरम्। परं जन्म विवस्वतः। तस्मात् **त्वं** प्रोक्तवान् इति एतत् विजानीयाम्।
भवतः जन्म अपरम्। परं जन्म विवस्वतः। तस्मात् त्वं **कदा** प्रोक्तवान् इति एतत् विजानीयाम् ?	भवतः जन्म अपरम्। परं जन्म विवस्वतः। तस्मात् त्वम् **आदौ** प्रोक्तवान् इति एतत् विजानीयाम्।
भवतः जन्म अपरम्। परं जन्म विवस्वतः। तस्मात् त्वम् आदौ प्रोक्तवान् इति एतत् **कथं** विजानीयाम् ?	

तात्पर्यम् - भवतः जन्म इदानीन्तनं (अस्मिन् युगे) दृश्यते। सूर्यस्य जन्म तु अतिप्राचीनम् (कल्पादौ) इति श्रूयते। एवं स्थिते भवान् सूर्याय इमं योगं प्रोक्तवान् इति अहं कथं विश्वसिमि ?

श्रीभगवानुवाच - **बहूनि मे व्यतीतानि जन्मानि तव चार्जुन।**
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥४.५॥

पदच्छेदः -

श्रीभगवान्, उवाच - बहूनि, मे, व्यतीतानि, जन्मानि, तव, च, अर्जुन ।
तानि, अहम्, वेद, सर्वाणि, न, त्वम्, वेत्थ, परन्तप ॥

अन्वयः - परन्तप, अर्जुन ! बहूनि मे तव च जन्मानि व्यतीतानि । तानि जन्मानि सर्वाणि अहं वेद । त्वं न वेत्थ ।

पदार्थः - परन्तप = अर्जुन ! बहूनि = अनेकानि, मे तव च = मम ते च, जन्मानि = जनूंषि, व्यतीतानि = अतिक्रान्तानि, तानि सर्वाणि = तानि असंख्येयानि जनूंषि, अहं वेद = अहं जानामि, त्वम् = भवान्, न वेत्थ = न जानासि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
परन्तप	अ. पुं. सम्बो. एक.	अर्जुन	अ. पुं. सम्बो. एक.
बहूनि	उ. नपुं. प्र. बहु.	मे	अस्मद्- द. सर्व. ष. एक.
तव	युष्मद्- द. सर्व. ष. एक.	च	अव्ययम्
जन्मानि	जन्मन्- न. नपुं. प्र. बहु. (विशेष्यम्)	व्यतीतानि	अ. नपुं. प्र. बहु. (विशेषणम्)
तानि	तद्- द. सर्व. नपुं. द्वि. बहु. (विशेषणम्)	सर्वाणि	सर्व- अ. सर्व. नपुं. द्वि. बहु. (विशेषणम्)
अहम्	अस्मद्- द. सर्व. प्र. एक.	वेद	विद् (विद ज्ञाने) पर. कर्तरि लट्. उपु. एक.
त्वम्	युष्मद्- द. सर्व. प्र. एक.	न	अव्ययम्
वेत्थ	विद् (विद - ज्ञाने) पर. कर्तरि लट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः	चार्जुन	च + अर्जुन	सवर्णदीर्घसन्धिः ।
	तान्यहम्	तानि + अहम्	यण्सन्धिः ।
(ख) समासः	परन्तप	परान् शत्रून् तापयति इति परन्तपः, तत्सम्बुद्धौ - कर्तरि खच् उपपदसमासः ।	
(ग) कृदन्तः	व्यतीतानि	वि + अति + इ (इण् - गतौ) + क्त (कर्तरि) ।	

भावस्पष्टीकरणम् -

व्यतीतानि ।	
कानि व्यतीतानि ?	**जन्मानि व्यतीतानि ।**

कति जन्मानि व्यतीतानि ?	**बहूनि** जन्मानि व्यतीतानि ।
बहूनि **कस्य कस्य च** जन्मानि व्यतीतानि ?	बहूनि **मे तव च** जन्मानि व्यतीतानि ।
बहूनि मे तव च जन्मानि व्यतीतानि । **तेन किम् ?**	बहूनि मे तव च जन्मानि व्यतीतानि । **वेद** ।
बहूनि मे तव च जन्मानि व्यतीतानि । **कः** वेद ?	बहूनि मे तव च जन्मानि व्यतीतानि । **अहं** वेद ।
बहूनि मे तव च जन्मानि व्यतीतानि । **कानि** अहं वेद ?	बहूनि मे तव च जन्मानि व्यतीतानि । **तानि सर्वाणि** अहं वेद ।
बहूनि मे तव च जन्मानि व्यतीतानि । तानि सर्वाणि अहं वेद । **कः न वेत्ति** ?	बहूनि मे तव च जन्मानि व्यतीतानि । तानि सर्वाणि अहं वेद । **त्वं न वेत्थ** ।
अस्मिन् श्लोके सम्बोधनपदे के ?	**अर्जुन, परन्तप** !

तात्पर्यम् - हे अर्जुन ! मम तव च बहूनि जन्मानि अभवन् । परन्तु तानि सर्वाणि जन्मानि भवान् ज्ञातुं न शक्नोति । अहं तु जानामि ।

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥४.६॥

पदच्छेदः - अजः, अपि, सन्, अव्ययात्मा, भूतानाम्, ईश्वरः, अपि, सन् ।
प्रकृतिम्, स्वाम्, अधिष्ठाय, सम्भवामि, आत्ममायया ॥

अन्वयः - अजः अपि अव्ययात्मा सन् भूतानाम् ईश्वरः सन् स्वां प्रकृतिम् अधिष्ठाय आत्ममायया सम्भवामि ।

पदार्थः - अजः = जन्मरहितः, अव्ययात्मा = अविनाशी, सन् अपि = भवन् अपि, भूतानाम् = प्राणिनाम्, ईश्वरः = प्रभुः, सन् अपि = भवन् अपि, स्वाम् = स्वकीयाम्, प्रकृतिम् = शक्तिम्, अधिष्ठाय = अवलम्ब्य, आत्ममायया = स्वमायया, सम्भवामि = उद्भवामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अजः	अ. पुं. प्र. एक. (विशेषणम्)	अपि	अव्ययम्
अव्ययात्मा	अव्ययात्मन्- न. पुं. प्र. एक. (विशेष्यम्)	सन्	सत्- त. पुं. प्र. एक.
भूतानाम्	अ. नपुं. ष. बहु.	ईश्वरः	अ. पुं. प्र. एक.
स्वाम्	आ. स्त्री. द्वि. एक. (विशेषणम्)	प्रकृतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)

अधिष्ठाय	ल्यबन्तम् अव्ययम्	आत्ममायया	आ. स्त्री. तृ. एक.
सम्भवामि	सम् + भू (भू - सत्तायाम्) पर. कर्तरि लट्. उपु. एक.		

व्याकरणम् -

(क) सन्धिः

अजोऽपि	अजः + अपि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
सन्नव्ययात्मा	सन् + अव्ययात्मा	ङमुडागमसन्धिः।
ईश्वरोऽपि	ईश्वरः + अपि	विसर्गसन्धिः, (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
सम्भवाम्यात्ममायया	सम्भवामि + आत्ममायया	यण्सन्धिः।

(ख) समासः

अजः	न जायते इति अजः - (नञ्समासः) कर्तरि डप्रत्ययः, उपपदसमासः।
अव्ययात्मा	अव्ययः आत्मा यस्य सः अव्ययात्मा - बहुव्रीहिः।
आत्ममायया	आत्मनः माया आत्ममाया, तया - षष्ठीतत्पुरुषः।

(ग) कृदन्तः

सन्	अस् (अस - भुवि) + शतृ (कर्तरि)।
भूतानाम्	भू (भू - सत्तायाम्) + क्त (कर्तरि), तेषाम्।
प्रकृतिम्	प्र + कृ (डुकृञ् - करणे) + क्तिन्, ताम्।
अधिष्ठाय	अधि + स्था (ष्ठा - गतिनिवृत्तौ) + ल्यप्।

भावस्पष्टीकरणम् -

सम्भवामि।	
कया सम्भवामि ?	**आत्ममायया** सम्भवामि।
किं कृत्वा आत्ममायया सम्भवामि ?	**अधिष्ठाय** आत्ममायया सम्भवामि।
काम् अधिष्ठाय आत्ममायया सम्भवामि ?	**प्रकृतिम्** अधिष्ठाय आत्ममायया सम्भवामि।
कीदृशीं प्रकृतिम् अधिष्ठाय आत्ममायया सम्भवामि ?	**स्वां** प्रकृतिम् अधिष्ठाय आत्ममायया सम्भवामि।
कीदृशः अपि स्वां प्रकृतिम् अधिष्ठाय आत्ममायया सम्भवामि ?	**अजः अपि** स्वां प्रकृतिम् अधिष्ठाय आत्ममायया सम्भवामि।
अजः अपि **पुनः कीदृशः** सन् स्वां प्रकृतिम् अधिष्ठाय आत्ममायया सम्भवामि ?	अजः अपि **अव्ययात्मा सन्** स्वां प्रकृतिम् अधिष्ठाय आत्ममायया सम्भवामि।

अजः अपि अव्ययात्मा सन् **पुनश्च कीदृशः** सन् स्वां प्रकृतिम् अधिष्ठाय आत्ममायया सम्भवामि ?	अजः अपि अव्ययात्मा सन् **ईश्वरः सन्** स्वां प्रकृतिम् अधिष्ठाय आत्ममायया सम्भवामि ।
अजः अपि अव्ययात्मा सन् **केषाम्** ईश्वरः सन् स्वां प्रकृतिम् अधिष्ठाय आत्ममायया सम्भवामि ?	अजः अपि अव्ययात्मा सन् **भूतानाम्** ईश्वरः सन् स्वां प्रकृतिम् अधिष्ठाय आत्ममायया सम्भवामि ।

तात्पर्यम् - अहं देहतः स्वरूपतः च उत्पत्तिनाशरहितः । तस्मात् ईश्वरोऽहं स्वाधीनप्रकृत्या वसुदेवादीन् निर्माय तेभ्यः प्रादुर्भवामि ।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥४.७॥

पदच्छेदः - यदा, यदा, हि, धर्मस्य, ग्लानिः, भवति, भारत ।
अभ्युत्थानम्, अधर्मस्य, तदा, आत्मानम्, सृजामि, अहम् ॥

अन्वयः - भारत ! यदा यदा हि धर्मस्य ग्लानिः, अधर्मस्य च अभ्युत्थानं भवति तदा अहम् आत्मानं सृजामि ।

पदार्थः - भारत = अर्जुन ! यदा यदा = यस्मिन् यस्मिन् काले, धर्मस्य = धर्मस्य, ग्लानिः = हानिः, अधर्मस्य = अधर्मस्य, अभ्युत्थानम् = वर्धनम्, भवति = सम्पद्यते, तदा = तस्मिन् काले, अहम् = अहम्, आत्मानम् = स्वम्, सृजामि = प्रकाशयामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	यदा	अव्ययम्
हि	अव्ययम्	धर्मस्य	अ. पुं. ष. एक.
ग्लानिः	इ. स्त्री. प्र. एक.	अधर्मस्य	अ. पुं. ष. एक.
च	अव्ययम्	अभ्युत्थानम्	अ. नपुं. प्र. एक.
भवति	भू (भू - सत्तायाम्) पर. कर्तरि लट्. प्रपु. एक.	तदा	अव्ययम्
अहम्	अस्मद्- द. सर्व. प्र. एक.	आत्मानम्	आत्मन्- न. पुं. द्वि. एक.
सृजामि	सृज् (सृज - विसर्गे) पर. कर्तरि लट्. उपु. एक.		

व्याकरणम् -

(क) सन्धिः	ग्लानिर्भवति	ग्लानिः + भवति	विसर्गसन्धिः (रेफः) ।
	तदात्मानम्	तदा + आत्मानम्	सवर्णदीर्घसन्धिः ।
	सृजाम्यहम्	सृजामि + अहम्	यण्सन्धिः ।
(ख) कृदन्तः	अभ्युत्थानम्	अभि + उद् + स्था (ष्ठा - गतिनिवृत्तौ) + ल्युट् (भावे) ।	
(ग) तद्धितान्तः	भारत	भरत + अण् (अपत्यार्थे) तत् सम्बुद्धौ, भरतस्य गोत्रापत्यं पुमान् ।	

भावस्पष्टीकरणम् -

भवति ।	
का भवति ?	**ग्लानिः** भवति ।
कस्य ग्लानिः भवति ?	**धर्मस्य** ग्लानिः भवति ।
धर्मस्य ग्लानिः **पुनश्च किं** भवति ?	धर्मस्य ग्लानिः **अभ्युत्थानं च** भवति ।
धर्मस्य ग्लानिः **कस्य** च अभ्युत्थानं भवति ?	धर्मस्य ग्लानिः **अधर्मस्य** च अभ्युत्थानं भवति ।
यदा यदा धर्मस्य ग्लानिः अधर्मस्य च अभ्युत्थानं भवति तदा **कं** सृजामि ?	यदा यदा धर्मस्य ग्लानिः अधर्मस्य च अभ्युत्थानं भवति तदा **आत्मानं** सृजामि ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भारत !**

तात्पर्यम् - हे अर्जुन ! यदा यदा धर्मस्य हानिः अधर्मस्य आधिक्यं च सम्भवति तदा अहम् आत्मानं लोकाय प्रकाशयामि । निराकारोऽपि साकारः भविष्यामि । (निर्गुणः अपि अहं सगुणो भूत्वा भक्तानां रञ्जनाय धर्मस्य रक्षणाय च भूमौ अवतरामि ।)

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥४.८॥

पदच्छेदः - परित्राणाय, साधूनाम्, विनाशाय, च, दुष्कृताम् ।
धर्मसंस्थापनार्थाय, सम्भवामि, युगे, युगे ॥

अन्वयः - साधूनां परित्राणाय, दुष्कृतां विनाशाय, धर्मसंस्थापनार्थाय च युगे युगे सम्भवामि ।

पदार्थः - साधूनाम् = सज्जनानाम्, परित्राणाय = संरक्षणाय, दुष्कृताम् = दुर्जनानाम्, विनाशाय = मारणाय, धर्मसंस्थापनार्थाय च = धर्मप्रतिष्ठापनाय च, युगे युगे = प्रतियुगम्, सम्भवामि = उद्भवामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
साधूनाम्	उ. पुं. ष. बहु.	परित्राणाय	अ. नपुं. च. एक.
दुष्कृताम्	दुष्कृत्- त. पुं. ष. बहु.	च	अव्ययम्
विनाशाय	अ. पुं. च. एक.	धर्मसंस्थापनार्थाय	अ. नपुं. च. एक.
युगे	अ. नपुं. स. एक.	सम्भवामि	सम् + भू (भू - सत्तायाम्) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) समासः धर्मसंस्थापनार्थाय — धर्मस्य संस्थापनं धर्मसंस्थापनम् - षष्ठीतत्पुरुषः ।
धर्मसंस्थापनाय इदं धर्मसंस्थापनार्थम्, तस्मै -चतुर्थीतत्पुरुषः ।

(ख) कृदन्तः परित्राणाय — परि + त्रै (त्रैङ् - पालने) + ल्युट् (भावे), तस्मै ।
विनाशाय — वि + नश् (णश - अदर्शने) + घञ्, तस्मै ।
दुष्कृताम् — दुस् + कृ + क्विप् (कर्तरि) दुष्कृत्, तेषाम् ।

भावस्पष्टीकरणम् -

सम्भवामि ।	
कदा कदा सम्भवामि ?	**युगे युगे** सम्भवामि ।
किमर्थं युगे युगे सम्भवामि ?	**परित्राणाय** युगे युगे सम्भवामि ।
केषां परित्राणाय युगे युगे सम्भवामि ?	**साधूनां** परित्राणाय युगे युगे सम्भवामि ।
साधूनां परित्राणाय, **पुनश्च किमर्थं** युगे युगे सम्भवामि ?	साधूनां परित्राणाय, **विनाशाय च** युगे युगे सम्भवामि ।
साधूनां परित्राणाय, **केषां** विनाशाय च युगे युगे सम्भवामि ?	साधूनां परित्राणाय, **दुष्कृतां** विनाशाय च युगे युगे सम्भवामि ।
साधूनां परित्राणाय दुष्कृतां विनाशाय च **पुनश्च किमर्थं** युगे युगे सम्भवामि ?	साधूनां परित्राणाय दुष्कृतां विनाशाय च **धर्मसंस्थापनार्थाय** युगे युगे सम्भवामि ।

तात्पर्यम् - सत्पुरुषाणां संरक्षणाय, दुर्जनानां विनाशाय धर्मस्य च संस्थापनार्थाय प्रत्येकं युगे अपि अहम् अवतरामि ।

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥४.९॥

पदच्छेदः - जन्म, कर्म, च, मे, दिव्यम्, एवम्, यः, वेत्ति, तत्त्वतः ।
त्यक्त्वा, देहम्, पुनर्जन्म, न, एति, माम्, एति, सः, अर्जुन ॥

अन्वयः - अर्जुन ! यः मे दिव्यं जन्म कर्म च तत्त्वतः वेत्ति सः देहं त्यक्त्वा पुनर्जन्म न एति । माम् एति ।

पदार्थः - अर्जुन = हे अर्जुन ! यः = यः पुरुषः, मे = मम, दिव्यम् = अलौकिकम्, जन्म = जननम्, कर्म च = क्रियां च, तत्त्वतः = यथार्थम्, वेत्ति = जानाति, सः = सः पुरुषः, देहम् = शरीरम्, त्यक्त्वा = विसृज्य, पुनर्जन्म = पुनर्जन्म, न एति = न प्राप्नोति, माम् = माम्, एति = लभते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुन	अ. पुं. सम्बो. एक.	यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
मे	अस्मद्- द. सर्व. ष. एक.	दिव्यम्	अ. नपुं. द्वि. एक. (विशेषणम्)
जन्म	जन्मन्- न. नपुं. द्वि. एक. (विशेष्यम्)	कर्म	कर्मन्- न. नपुं. द्वि. एक. (विशेष्यम्)
च	अव्ययम्	तत्त्वतः	अव्ययम्
वेत्ति	विद् (विद - ज्ञाने) पर. कर्तरि लट्. प्रपु. एक.	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
देहम्	अ. पुं. द्वि. एक.	त्यक्त्वा	क्त्वान्तम् अव्ययम्
पुनर्जन्म	पुनर्जन्मन्- न. नपुं. द्वि. एक.	न	अव्ययम्
एति	इ (इण् - गतौ) पर. कर्तरि लट्. प्रपु. एक.	माम्	अस्मद्- द. सर्व. द्वि. एक.

व्याकरणम् -

(क) सन्धिः	यो वेत्ति	यः + वेत्ति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	पुनर्जन्म	पुनः + जन्म	विसर्गसन्धिः (रेफः) ।
	नैति	न + एति	वृद्धिसन्धिः ।
	सोऽर्जुन	सः + अर्जुन	विसर्गसन्धिः, (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
(ख) कृदन्तः	त्यक्त्वा	त्यज् (त्यज - हानौ) + क्त्वा ।	
	देहम्	दिह् (दिह - उपचये) + घञ्, तम् ।	

(ग) तद्धितान्तः दिव्यम् दिव् + यत् (भवार्थे) । दिवि भवम् ।

तत्त्वतः तत्त्व + तसिल् ।

भावस्पष्टीकरणम् -

वेत्ति ।	
किं किं वेत्ति ?	**जन्म कर्म च** वेत्ति ।
कीदृशं जन्म कर्म च वेत्ति ?	**दिव्यं** जन्म कर्म च वेत्ति ।
दिव्यं **कस्य** जन्म कर्म च वेत्ति ?	दिव्यं **मे** जन्म कर्म च वेत्ति ।
दिव्यं मे जन्म कर्म च **कथं** वेत्ति ?	दिव्यं मे जन्म कर्म च **तत्त्वतः** वेत्ति ।
यः दिव्यं मे जन्म कर्म च तत्त्वतः वेत्ति **तस्य किं भवति** ?	**यः** दिव्यं मे जन्म कर्म च तत्त्वतः वेत्ति **सः न एति** ।
यः दिव्यं मे जन्म कर्म च तत्त्वतः वेत्ति सः **किं** न एति ?	यः दिव्यं मे जन्म कर्म च तत्त्वतः वेत्ति सः **पुनर्जन्म** न एति ।
यः दिव्यं मे जन्म कर्म च तत्त्वतः वेत्ति सः **किं कृत्वा** पुनर्जन्म न एति ?	यः दिव्यं मे जन्म कर्म च तत्त्वतः वेत्ति सः **त्यक्त्वा** पुनर्जन्म न एति ।
यः दिव्यं मे जन्म कर्म च तत्त्वतः वेत्ति सः **कं** त्यक्त्वा पुनर्जन्म न एति ?	यः दिव्यं मे जन्म कर्म च तत्त्वतः वेत्ति सः **देहं** त्यक्त्वा पुनर्जन्म न एति ।
यः दिव्यं मे जन्म कर्म च तत्त्वतः वेत्ति सः देहं त्यक्त्वा पुनर्जन्म न एति । **कं पुनः एति** ?	यः दिव्यं मे जन्म कर्म च तत्त्वतः वेत्ति सः देहं त्यक्त्वा पुनर्जन्म न एति । **(प्रत्युतः) माम् एति** ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अर्जुन** !

तात्पर्यम् - हे अर्जुन ! मम एतत् जन्म कर्म च अलौकिकम् इति यः पुरुषः यथार्थं जानाति सः शरीरत्यागे सति पुनर्जन्म न प्राप्नोति । अर्थात् मम नित्यं (सनातनं) धाम गच्छति ।

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥४.१०॥

पदच्छेदः - वीतरागभयक्रोधाः, मन्मयाः, माम्, उपाश्रिताः ।
बहवः, ज्ञानतपसा, पूताः, मद्भावम्, आगताः ॥

अन्वयः - वीतरागभयक्रोधाः मन्मयाः माम् उपाश्रिताः ज्ञानतपसा पूताः बहवः मद्भावम् आगताः ।

पदार्थः - वीतरागभयक्रोधाः = विनष्टरागभीतिकोपाः, मन्मयाः = मत्स्वरूपाः, माम् = माम्, उपाश्रिताः = उपगताः, ज्ञानतपसा = ज्ञानरूपतपश्चर्यया, पूताः = पवित्राः, बहवः = असङ्ख्यकाः, मद्भावम् = मद्रूपम्, आगताः = सम्प्राप्ताः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
वीतरागभयक्रोधाः	अ. पुं. प्र. बहु. (विशेषणम्)	मन्मयाः	अ. पुं. प्र. बहु. (विशेषणम्)
माम्	अस्मद्- द. सर्व. द्वि. एक.	उपाश्रिताः	अ. पुं. प्र. बहु. (विशेषणम्)
ज्ञानतपसा	ज्ञानतपस्- सको. नपुं. तृ. एक.	पूताः	अ. पुं. प्र. बहु. (विशेषणम्)
बहवः	उ. पुं. प्र. बहु.	मद्भावम्	अ. पुं. द्वि. एक.
आगताः	अ. पुं. प्र. बहु. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः वीतरागभयक्रोधा मन्मयाः

वीतरागभयक्रोधाः + मन्मयाः विसर्गसन्धिः (लोपः) ।

मन्मया माम् — मन्मयाः + माम् — विसर्गसन्धिः (लोपः) ।

बहवो ज्ञानतपसा — बहवः + ज्ञानतपसा — विसर्गसन्धिः, (सकारः) रेफः, उकारः, गुणः ।

पूता मद्भावम् — पूताः + मद्भावम् — विसर्गसन्धिः (लोपः) ।

(ख) समासः वीतरागभयक्रोधाः — रागः च भयं च क्रोधः च रागभयक्रोधाः - द्वन्द्वः ।

वीताः रागभयक्रोधाः येभ्यः ते वीतरागभयक्रोधाः - बहुव्रीहिः ।

ज्ञानतपसा — ज्ञानम् एव तपः ज्ञानतपः, तेन - कर्मधारयः ।

मद्भावम् — मम भावः मद्भावः, तम् - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः रागः — रञ्ज् (रञ्ज - रागे) + घञ् ।

भयम् — भी (ञिभी - भये) + अच् ।

क्रोधः — क्रुध् (क्रुध - क्रोधे) + घञ् ।

उपाश्रिताः — उप + आङ् + श्रि (श्रिञ् - सेवायाम्) + क्त (कर्तरि) ।

ज्ञानम् — ज्ञा (ज्ञा - अवबोधने) + ल्युट् ।

पूताः — पू (पूञ् - पवने) + क्त (कर्मणि) ।

भावः — भू (भू - सत्तायाम्) + णिच् + अच् ।

आगताः — आ + गम् (गम्लृ - गतौ) + क्त (कर्तरि) ।

भावस्पष्टीकरणम् -

आगताः ।	
कम् आगताः ?	**मद्भावम्** आगताः ।
के मद्भावम् आगताः ?	**बहवः** मद्भावम् आगताः ।
कीदृशाः बहवः मद्भावम् आगताः ?	**वीतरागभयक्रोधाः** बहवः मद्भावम् आगताः ।
वीतरागभयक्रोधाः **पुनश्च कीदृशाः** बहवः मद्भावम् आगताः ?	वीतरागभयक्रोधाः **मन्मयाः** बहवः मद्भावम् आगताः ।
वीतरागभयक्रोधाः मन्मयाः **पुनश्च कीदृशाः** बहवः मद्भावम् आगताः ?	वीतरागभयक्रोधाः मन्मयाः **उपाश्रिताः** बहवः मद्भावम् आगताः ।
वीतरागभयक्रोधाः मन्मयाः **कम्** उपाश्रिताः बहवः मद्भावम् आगताः ?	वीतरागभयक्रोधाः मन्मयाः **माम्** उपाश्रिताः बहवः मद्भावम् आगताः ।
वीतरागभयक्रोधाः मन्मयाः माम् उपाश्रिताः **पुनश्च कीदृशाः** बहवः मद्भावम् आगताः ?	वीतरागभयक्रोधाः मन्मयाः माम् उपाश्रिताः **पूताः** बहवः मद्भावम् आगताः ।
वीतरागभयक्रोधाः मन्मयाः माम् उपाश्रिताः **केन** पूताः बहवः मद्भावम् आगताः ?	वीतरागभयक्रोधाः मन्मयाः माम् उपाश्रिताः **ज्ञानतपसा** पूताः बहवः मद्भावम् आगताः ।

तात्पर्यम् - आसक्तिं भयं क्रोधं च विना अनन्यभावनया मयि विश्वस्ताः मम च शरणम् आगताः ज्ञानरूपेण तपसा पवित्राः असङ्ख्यकाः मम स्वरूपं प्राप्तवन्तः ।

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥४.११॥

पदच्छेदः - ये, यथा, माम्, प्रपद्यन्ते, तान्, तथा, एव, भजामि, अहम् ।
मम, वर्त्म, अनुवर्तन्ते, मनुष्याः, पार्थ, सर्वशः ॥

अन्वयः - पार्थ ! ये मां यथा प्रपद्यन्ते तथा एव तान् अहं भजामि । मनुष्याः सर्वशः मम वर्त्म अनुवर्तन्ते ।

पदार्थः - पार्थ = अर्जुन ! ये = ये मानवाः, माम् = माम्, यथा = येन प्रकारेण, प्रपद्यन्ते = सेवन्ते, तथा एव = तेन एव प्रकारेण, तान् = तान् मानवान्, अहम् = अहम्, भजामि = अनुगृह्णामि, मनुष्याः = मनुजाः, सर्वशः = सर्वथा, मम = मे, वर्त्म = मार्गम्, अनुवर्तन्ते = अनुसरन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	ये	यद्- द. सर्व. पुं. प्र. बहु.
माम्	अस्मद्- द. सर्व. द्वि. एक.	यथा	अव्ययम्
प्रपद्यन्ते	प्र + पद् (पद - गतौ) आत्म. कर्तरि लट्. प्रपु. बहु.	तथा	अव्ययम्
एव	अव्ययम्	तान्	तद्- द. सर्व. पुं. द्वि. बहु.
अहम्	अस्मद्- द. सर्व. प्र. एक.	भजामि	भज् (भज - सेवायाम्) पर. कर्तरि लट्. उपु. एक.
मनुष्याः	अ. पुं. प्र. बहु.	सर्वशः	अव्ययम्
मम	अस्मद्- द. सर्व. ष. एक.	वर्त्म	वर्त्मन्- न. नपुं. द्वि. एक.
अनुवर्तन्ते	अनु + वृत् (वृतु - वर्तने) आत्म. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः	तांस्तथा	तान् + तथा	सत्वसन्धिः, रेफः, विसर्गः, अनुस्वारः, सकारश्च ।
	तथैव	तथा + एव	वृद्धिसन्धिः ।
	भजाम्यहम्	भजामि + अहम्	यण्सन्धिः ।
	वर्त्मानुवर्तन्ते	वर्त्म + अनुवर्तन्ते	सवर्णदीर्घसन्धिः ।
(ख) तद्धितान्तः	मनुष्याः	मनु (षुक्) + यत् (अपत्यार्थे), मनोः अपत्यानि पुमांसः ।	
	पार्थ	पृथा + अण् (अपत्यार्थे) तत्सम्बुद्धौ, पृथायाः अपत्यं पुमान् ।	
	सर्वशः	सर्व + शस् (प्राकारार्थे) ।	

भावस्पष्टीकरणम् -

प्रपद्यन्ते ।	
कं प्रपद्यन्ते ?	**मां प्रपद्यन्ते ।**
ये यथा मां प्रपद्यन्ते तथा तेषां किं भवति ?	**ये यथा मां प्रपद्यन्ते तान् तथैव अहं भजामि ।**
अनुवर्तन्ते ।	
किम् अनुवर्तन्ते ?	**वर्त्म अनुवर्तन्ते ।**

कस्य वर्त्म अनुवर्तन्ते ?	**मम** वर्त्म अनुवर्तन्ते ।
कथं मम वर्त्म अनुवर्तन्ते ?	**सर्वशः** मम वर्त्म अनुवर्तन्ते ।
के सर्वशः मम वर्त्म अनुवर्तन्ते ?	**मनुष्याः** सर्वशः मम वर्त्म अनुवर्तन्ते ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ !**

तात्पर्यम् - पार्थ ! ये मां यथा भजन्ति तान् अहं तथा एव अनुगृह्णामि । एतत् रहस्यं ज्ञात्वा बुद्धिमान् मनुष्यसमूहः सर्वप्रकारेण मम मार्गमनुसृत्य चलति ।

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥४.१२॥

पदच्छेदः - काङ्क्षन्तः, कर्मणाम्, सिद्धिम्, यजन्ते, इह, देवताः ।
क्षिप्रम्, हि, मानुषे, लोके, सिद्धिः, भवति, कर्मजा ॥

अन्वयः - कर्मणां सिद्धिं काङ्क्षन्तः इह देवताः यजन्ते । (तेषाम्) हि मानुषे लोके कर्मजा सिद्धिः क्षिप्रं भवति ।

पदार्थः - कर्मणाम् = व्यापाराणाम्, सिद्धिम् = फलप्राप्तिम्, काङ्क्षन्तः = अभिलषन्तः, इह = अस्मिन् लोके, देवताः = देवान्, यजन्ते = पूजयन्ति, मानुषे लोके = मानवानां लोके, हि = यस्मात्, कर्मजा = कर्मसम्भवा, सिद्धिः = फलप्राप्तिः, क्षिप्रम् = शीघ्रम्, भवति = जायते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कर्मणाम्	कर्मन्- न. नपुं. ष. बहु.	सिद्धिम्	इ. स्त्री. द्वि. एक.
काङ्क्षन्तः	काङ्क्षत्- त. पुं. प्र. बहु. (विशेषणम्)	इह	अव्ययम्
देवताः	आ. स्त्री. द्वि. बहु.	यजन्ते	यज् (यज - देवपूजासङ्गति-करणदानेषु) आत्म. कर्तरि लट्. प्रपु. बहु.
हि	अव्ययम्	मानुषे	अ. पुं. स. एक. (विशेषणम्)
लोके	अ. पुं. स. एक. (विशेष्यम्)	कर्मजा	आ. स्त्री. प्र. एक.
सिद्धिः	इ. स्त्री. प्र. एक.	क्षिप्रम्	अ. नपुं. द्वि. एक. (क्रियाविशेषणम्)
भवति	भू (भू - सत्तायाम्) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	यजन्त इह	यजन्ते + इह	यान्तवान्तादेशसन्धिः, यलोपः, प्रकृतिभावः।
	सिद्धिर्भवति	सिद्धिः + भवति	विसर्गसन्धिः (रेफः)।
(ख) समासः	कर्मजा	कर्मणः जायते - कर्तरि डप्रत्ययः, उपपदसमासः। स्त्रीत्वे टाप्।	
(ग) कृदन्तः	काङ्क्षन्तः	काङ्क्ष् (काक्षि - काङ्क्षायाम्) + शतृ (कर्तरि)।	
	सिद्धिम्	सिध् (षिधु - संराद्धौ) + क्तिन् (भावे), ताम्।	
	लोके	लोक् (लोकृ - दर्शने) + घञ्, तस्मिन्।	
(घ) तद्धितान्तः	मानुषे	मनु + (षुक्) + अञ् तस्मिन्, मनोः जातः मानुषः।	

भावस्पष्टीकरणम् -

यजन्ते।	
के यजन्ते ?	**काङ्क्षन्तः** यजन्ते।
कां काङ्क्षन्तः यजन्ते ?	**सिद्धिं** काङ्क्षन्तः यजन्ते।
केषां सिद्धिं काङ्क्षन्तः यजन्ते ?	**कर्मणां** सिद्धिं काङ्क्षन्तः यजन्ते।
कर्मणां सिद्धिं काङ्क्षन्तः **काः** यजन्ते ?	कर्मणां सिद्धिं काङ्क्षन्तः **देवताः** यजन्ते।
कर्मणां सिद्धिं काङ्क्षन्तः **कुत्र** देवताः यजन्ते ?	कर्मणां सिद्धिं काङ्क्षन्तः **इह** देवताः यजन्ते।
कर्मणां सिद्धिं काङ्क्षन्तः इह देवताः यजन्ते। **तस्मात् तेषां किं भवति** ?	कर्मणां सिद्धिं काङ्क्षन्तः इह देवताः यजन्ते। **(तेषाम्) हि भवति**।
कर्मणां सिद्धिं काङ्क्षन्तः इह देवताः यजन्ते। तेषां हि **का** भवति ?	कर्मणां सिद्धिं काङ्क्षन्तः इह देवताः यजन्ते। तेषां हि **सिद्धिः** भवति।
कर्मणां सिद्धिं काङ्क्षन्तः इह देवताः यजन्ते। तेषां हि **कीदृशी** सिद्धिः भवति ?	कर्मणां सिद्धिं काङ्क्षन्तः इह देवताः यजन्ते। तेषां हि **कर्मजा** सिद्धिः भवति।
कर्मणां सिद्धिं काङ्क्षन्तः इह देवताः यजन्ते। तेषां हि **कुत्र** कर्मजा सिद्धिः भवति ?	कर्मणां सिद्धिं काङ्क्षन्तः इह देवताः यजन्ते। तेषां हि **लोके** कर्मजा सिद्धिः भवति।
कर्मणां सिद्धिं काङ्क्षन्तः इह देवताः यजन्ते। तेषां हि **कस्मिन्** लोके कर्मजा सिद्धिः भवति ?	कर्मणां सिद्धिं काङ्क्षन्तः इह देवताः यजन्ते। तेषां हि **मानुषे** लोके कर्मजा सिद्धिः भवति।
कर्मणां सिद्धिं काङ्क्षन्तः इह देवताः यजन्ते। तेषां हि मानुषे लोके कर्मजा सिद्धिः **कथं** भवति ?	कर्मणां सिद्धिं काङ्क्षन्तः इह देवताः यजन्ते। तेषां हि मानुषे लोके कर्मजा सिद्धिः **क्षिप्रं** भवति।

तात्पर्यम् - कर्मप्रधाने अस्मिन् लोके कर्मणां फलमिच्छन्तः मनुष्याः देवान् पूजयन्ति, यतः कर्मणां सिद्धिः शीघ्रं भवति। परन्तु आत्मसिद्धिः न भवति। तदर्थं माम् एव भज।

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्॥४.१३॥

पदच्छेदः - चातुर्वर्ण्यम्, मया, सृष्टम्, गुणकर्मविभागशः।
तस्य, कर्तारम्, अपि, माम्, विद्धि, अकर्तारम्, अव्ययम्॥

अन्वयः - गुणकर्मविभागशः मया चातुर्वर्ण्यं सृष्टम्। तस्य कर्तारम् अपि अकर्तारम् अव्ययं मां विद्धि।

पदार्थः - गुणकर्मविभागशः = गुणानां कर्मणां च भेदेन, मया = मया, चातुर्वर्ण्यम् = चत्वारः वर्णाः, सृष्टम् = उत्पादिताः, तस्य = चातुर्वर्ण्यविभागस्य, कर्तारम् = स्रष्टारम्, अकर्तारम् अपि = अस्रष्टारम् अपि, अव्ययम् = अविनाशिनम्, मां विद्धि = मां जानीहि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
गुणकर्मविभागशः	अव्ययम्	मया	अस्मद्- द. सर्व. तृ. एक.
चातुर्वर्ण्यम्	अ. नपुं. प्र. एक. (विशेष्यम्)	सृष्टम्	अ. नपुं. प्र. एक. (विशेषणम्)
तस्य	तद्- द. सर्व. पुं. ष. एक. (विशेषणम्)	कर्तारम्	ऋ. पुं. द्वि. एक. (विशेषणम्)
अपि	अव्ययम्	अकर्तारम्	ऋ. पुं. द्वि. एक. (विशेषणम्)
अव्ययम्	अ. पुं. द्वि. एक. (विशेषणम्)	माम्	अस्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)
विद्धि	विद् (विद - ज्ञाने) पर. कर्तरि लोट्. मपु. एक		

व्याकरणम् -

(क) सन्धिः विद्ध्यकर्तारम् विद्धि + अकर्तारम् यण्सन्धिः।

(ख) समासः गुणकर्मविभागशः गुणाः च कर्माणि च गुणकर्माणि -द्वन्द्वः।
गुणकर्मणां विभागः गुणकर्मविभागः, तेन - षष्ठीतत्पुरुषः।
अकर्तारम् न कर्ता अकर्ता, तम् - नञ्तत्पुरुषः।
अव्ययम् न विद्यते व्ययः यस्य सः अव्ययः, तम् - नञ्बहुव्रीहिः।

(ग) कृदन्तः सृष्टम् सृज् (सृज - विसर्गे) + क्त (कर्मणि)।
कर्तारम् कृ (डुकृञ् - करणे) + तृच् (कर्तरि), तम्।

(घ) तद्धितान्तः चातुर्वर्ण्यम् — चतुर्वर्ण + ष्यञ् (स्वार्थे)।
गुणकर्मविभागशः — गुणकर्मविभाग + शस् (तृतीयाविभक्त्यन्तात् स्वार्थे) गुणकर्मविभागेन इत्यर्थः।

भावस्पष्टीकरणम् -

सृष्टम्।	
किं सृष्टम्?	**चातुर्वर्ण्यं** सृष्टम्।
केन चातुर्वर्ण्यं सृष्टम्?	**मया** चातुर्वर्ण्यं सृष्टम्।
कथं मया चातुर्वर्ण्यं सृष्टम्?	**गुणकर्मविभागशः** मया चातुर्वर्ण्यं सृष्टम्।
गुणकर्मविभागशः मया चातुर्वर्ण्यं सृष्टम्। **तेन किम्**?	गुणकर्मविभागशः मया चातुर्वर्ण्यं सृष्टम्। **(तेन) विद्धि**।
गुणकर्मविभागशः मया चातुर्वर्ण्यं सृष्टम्। **कं** विद्धि?	गुणकर्मविभागशः मया चातुर्वर्ण्यं सृष्टम्। **मां** विद्धि।
गुणकर्मविभागशः मया चातुर्वर्ण्यं सृष्टम्। **कीदृशं** मां विद्धि?	गुणकर्मविभागशः मया चातुर्वर्ण्यं सृष्टम्। **अव्ययं** मां विद्धि।
गुणकर्मविभागशः मया चातुर्वर्ण्यं सृष्टम्। **पुनश्च कीदृशम्** अव्ययं मां विद्धि?	गुणकर्मविभागशः मया चातुर्वर्ण्यं सृष्टम्। **कर्तारम् अपि अकर्तारम्** अव्ययं मां विद्धि।
गुणकर्मविभागशः मया चातुर्वर्ण्यं सृष्टम्। **कस्य** कर्तारम् अपि अकर्तारम् अव्ययं मां विद्धि?	गुणकर्मविभागशः मया चातुर्वर्ण्यं सृष्टम्। **तस्य** कर्तारम् अपि अकर्तारम् अव्ययं मां विद्धि।

तात्पर्यम् - गुणानां कर्मणां च विभेदानुसारेण ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः इति चत्वारः वर्णाः मया कृताः। तस्य चातुर्वर्ण्यविभागस्य यद्यपि अहं कर्ता तथापि अहम् अकर्ता अनश्वरः च अस्मि। तदेतत् जानीहि।

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥४.१४॥

पदच्छेदः - न, माम्, कर्माणि, लिम्पन्ति, न, मे कर्मफले, स्पृहा।
इति, माम्, यः, अभिजानाति, कर्मभिः, न, सः, बध्यते ॥

अन्वयः - मां कर्माणि न लिम्पन्ति। कर्मफले मे स्पृहा न अस्ति इति यः माम् अभिजानाति सः कर्मभिः न बध्यते।

पदार्थः - माम् = माम्, कर्माणि = व्यापाराः, न लिम्पन्ति = न स्पृशन्ति, कर्मफले = कर्मसिद्धौ, मे = मम, स्पृहा न अस्ति इति = आशा नास्ति इति, यः माम् = यः माम्, अभिजानाति = वेत्ति, सः = सः पुरुषः, कर्मभिः = क्रियाभिः, न बध्यते = बद्धः न भवति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
माम्	अस्मद्- द. सर्व. द्वि. एक.	कर्माणि	कर्मन्- न. नपुं. प्र. बहु.
न	अव्ययम्	लिम्पन्ति	लिप् (लिप - उपदेहे) पर. कर्तरि लट्. प्रपु. बहु.
कर्मफले	अ. नपुं. स. एक.	मे	अस्मद्- द. सर्व. ष. एक.
स्पृहा	आ. स्त्री. प्र. एक.	अस्ति	अस् (अस - भुवि) पर. कर्तरि लट्. प्रपु. एक.
इति	अव्ययम्	यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
अभिजानाति	अभि + जा (ज्ञा - अवबोधने) पर. कर्तरि लट्. प्रपु. एक.	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
कर्मभिः	कर्मन्- न. नपुं. तृ. बहु.	बध्यते	बन्ध् (बन्ध - बन्धने) पर. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः

	योऽभिजानति	यः + अभिजानति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	कर्मभिर्न	कर्मभिः + न	विसर्गसन्धिः (रेफः)।
	स बध्यते	सः + बध्यते	विसर्गसन्धिः (लोपः)।

(ख) समासः कर्मफले — कर्मणां फलं कर्मफलम्, तस्मिन् - षष्ठीतत्पुरुषः।

(ग) कृदन्तः स्पृहा — स्पृह् (स्पृह - ईप्सायाम्) + अङ् + टाप्।

भावस्पष्टीकरणम् -

न लिम्पन्ति, न स्पृहा।	
कानि न लिम्पन्ति, **कस्मिन्** न स्पृहा ?	**कर्माणि** न लिम्पन्ति, **कर्मफले** न स्पृहा।
कर्माणि **कं** न लिम्पन्ति, कर्मफले **कस्य** न स्पृहा ?	कर्माणि **मां** न लिम्पन्ति, कर्मफले **मे** न स्पृहा।
कर्माणि मां न लिम्पन्ति, कर्मफले मे न स्पृहा **इति किं करोति** ?	कर्माणि मां न लिम्पन्ति, कर्मफले मे न स्पृहा **इति अभिजानाति**।
कर्माणि मां न लिम्पन्ति, कर्मफले मे न स्पृहा इति **कम्** अभिजानाति ?	कर्माणि मां न लिम्पन्ति, कर्मफले मे न स्पृहा इति **माम्** अभिजानाति।
कर्माणि मां न लिम्पन्ति, कर्मफले मे न स्पृहा इति **यः** माम् अभिजानाति **तस्य किं भवति** ?	कर्माणि मां न लिम्पन्ति, कर्मफले मे न स्पृहा इति यः माम् अभिजानाति **सः न बध्यते**।

कर्माणि मां न लिम्पन्ति, कर्मफले मे न स्पृहा इति यः माम् अभिजानाति सः कैः न बध्यते ?	कर्माणि मां न लिम्पन्ति, कर्मफले मे न स्पृहा इति यः माम् अभिजानाति सः **कर्मभिः** न बध्यते ।

तात्पर्यम् - संसारिणाम् अहं कर्ता इति अभिमानः भवति अपि च तेषां कर्मसु कर्मणां फलेषु च स्पृहा भवति, किन्तु मयि तादृशः अहङ्कारभावः नास्ति इति कारणेन तानि कर्माणि मयि लिप्ताः न भवन्ति । इति एतादृशं मां यः जानाति सः अपि देहोत्पत्तिनिमित्तकैः कर्मभिः लिप्तः न भवति ।

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥४.१५॥

पदच्छेदः - एवम्, ज्ञात्वा, कृतम्, कर्म, पूर्वैः, अपि, मुमुक्षुभिः ।
कुरु, कर्म, एव, तस्मात्, त्वम्, पूर्वैः, पूर्वतरम्, कृतम् ॥

अन्वयः - एवं ज्ञात्वा पूर्वैः मुमुक्षुभिः अपि कर्म कृतम् । तस्मात् त्वं पूर्वैः कृतं पूर्वतरं कर्म एव कुरु ।

पदार्थः - एवम् = इत्थम्, ज्ञात्वा = विज्ञाय, पूर्वैः = प्राचीनैः, मुमुक्षुभिः अपि = मोक्षार्थिभिः अपि, कर्म कृतम् = कर्म आचरितम्, तस्मात् = ततः, पूर्वैः = प्राचीनैः, कृतम् = आचरितम्, कर्म एव = क्रियाम् एव, पूर्वतरम् = अतिशयेन पूर्वम्, कुरु = आचर ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
एवम्	अव्ययम्	ज्ञात्वा	क्त्वान्तम् अव्ययम्
पूर्वैः	अ. सर्व. पु. तृ. बहु. (विशेषणम्)	मुमुक्षुभिः	उ. पुं. तृ. बहु. (विशेष्यम्)
अपि	अव्ययम्	कर्म	कर्मन्- न. नपुं. प्र. एक. (विशेष्यम्)
कृतम्	अ. नपुं. प्र. एक. (विशेषणम्)	तस्मात्	तद्- द. सर्व. नपुं. पं. एक. (विशेषणम्)
पूर्वैः	अ. सर्व. पुं. तृ. बहु. (विशेषणम्)	कृतम्	अ. नपुं. प्र. एक. (विशेषणम्)
पूर्वतरम्	अ. सर्व. नपुं. द्वि. एक. (विशेषणम्)	कर्म	कर्मन्- न. नपुं. द्वि. एक. (विशेष्यम्)
एव	अव्ययम्	कुरु	कृ (डुकृञ् - करणे) पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः

पूर्वैरपि	पूर्वैः + अपि	विसर्गसन्धिः (रेफः) ।
कर्मैव	कर्म + एव	वृद्धिसन्धिः ।

(ख) कृदन्तः ज्ञात्वा ज्ञा (ज्ञा - अवबोधने) + क्त्वा ।
कृतम् कृ (डुकृञ् - करणे) + क्त (कर्मणि) ।
मुमुक्षुभिः मुच् (मुच्लृ - मोक्षणे) + सन् (इच्छार्थे) + उ (कर्तरि) तैः, मोक्तुम् इच्छवः ।

(ग) तद्धितान्तः पूर्वतरम् पूर्व + तरप् । (अतिशये) अतिशयेन पूर्वम् ।

भावस्पष्टीकरणम् -

कृतम् ।	
किं कृतम् ?	**कर्म** कृतम् ।
कैः कर्म कृतम् ?	**मुमुक्षुभिः** कर्म कृतम् ।
कीदृशैः मुमुक्षुभिः कर्म कृतम् ?	**पूर्वैः अपि** मुमुक्षुभिः कर्म कृतम् ।
किं कृत्वा पूर्वैः अपि मुमुक्षुभिः कर्म कृतम् ?	**एवं** ज्ञात्वा पूर्वैः अपि मुमुक्षुभिः कर्म कृतम् ।
एवं ज्ञात्वा पूर्वैः अपि मुमुक्षुभिः कर्म कृतम् । **तेन किम्** ?	एवं ज्ञात्वा पूर्वैः अपि मुमुक्षुभिः कर्म कृतम् । **तस्मात् त्वं कुरु** ।
एवं ज्ञात्वा पूर्वैः अपि मुमुक्षुभिः कर्म कृतम् । तस्मात् त्वं **किं** कुरु ?	एवं ज्ञात्वा पूर्वैः अपि मुमुक्षुभिः कर्म कृतम् । तस्मात् त्वं **कर्म एव** कुरु ।
एवं ज्ञात्वा पूर्वैः अपि मुमुक्षुभिः कर्म कृतम् । तस्मात् त्वं **कीदृशं** कर्म एव कुरु ?	एवं ज्ञात्वा पूर्वैः अपि मुमुक्षुभिः कर्म कृतम् । तस्मात् त्वं **कृतं** कर्म एव कुरु ।
एवं ज्ञात्वा पूर्वैः अपि मुमुक्षुभिः कर्म कृतम् । तस्मात् त्वं **कैः** कृतं कर्म एव कुरु ?	एवं ज्ञात्वा पूर्वैः अपि मुमुक्षुभिः कर्म कृतम् । तस्मात् त्वं **पूर्वैः** कृतं कर्म एव कुरु ।
एवं ज्ञात्वा पूर्वैः अपि मुमुक्षुभिः कर्म कृतम् । तस्मात् त्वं पूर्वैः कृतं **कीदृशं** कर्म एव कुरु ?	एवं ज्ञात्वा पूर्वैः अपि मुमुक्षुभिः कर्म कृतम् । तस्मात् त्वं पूर्वैः कृतं **पूर्वतरं** कर्म एव कुरु ।

तात्पर्यम् - कर्मफलेच्छारहितं पुरुषं कर्माणि न लिम्पन्ति । इत्थं ज्ञात्वा प्राचीनकाले मुमुक्षुभिः पुरुषैः कर्म आचरितम् । अतः भवान् अपि प्राचीनैः यथा कर्म कृतं तथा कर्म आचरेत् ।

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥४.१६॥

पदच्छेदः - किम्, कर्म, किम्, अकर्म, इति, कवयः, अपि, अत्र, मोहिताः ।
तत्, ते, कर्म, प्रवक्ष्यामि, यत्, ज्ञात्वा, मोक्ष्यसे, अशुभात् ॥

अन्वयः - किं कर्म किम् अकर्म इति कवयः अपि अत्र मोहिताः। तत् ते कर्म प्रवक्ष्यामि यत् ज्ञात्वा अशुभात् मोक्ष्यसे।

पदार्थः - किम् = किम्, कर्म = कर्मस्वरूपम्, किम् = किम्, अकर्म इति = अकर्मस्वरूपम् इति, कवयः अपि = विद्वांसः अपि, अत्र = अस्मिन् विषये, मोहिताः = मोहं गताः, तत् = तस्मात्, ते = तव, कर्म = कर्मस्वरूपम्, प्रवक्ष्यामि = कथयिष्यामि, यत् = यत्कर्म, ज्ञात्वा = विदित्वा, अशुभात् = संसारात्, मोक्ष्यसे = विमुच्यसे।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
किम्	अव्ययम्	कर्म	कर्मन्- न. नपुं. प्र. एक.
अकर्म	अकर्मन्- न. नपुं. प्र. एक.	इति	अव्ययम्
कवयः	इ. पुं. प्र. बहु. (विशेष्यम्)	अपि	अव्ययम्
अत्र	अव्ययम्	मोहिताः	अ. पुं. प्र. बहु. (विशेषणम्)
तत्	तद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	ते	युष्मद्- द. सर्व. च. एक.
कर्म	कर्मन्- न. नपुं. द्वि. एक. (विशेष्यम्)	प्रवक्ष्यामि	प्र. वच् (वच - परिभाषणे) पर. कर्तरि लृट्. उपु. एक.
यत्	यद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	ज्ञात्वा	क्त्वान्तम् अव्ययम्
अशुभात्	अ. नपुं. पं. एक.	मोक्ष्यसे	मुच् (मुच्लृ - मोक्षणे) आत्म. कर्तरि लृट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	अकर्मेति	अकर्म + इति	गुणसन्धिः।
	कवयोऽपि	कवयः + अपि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	अप्यत्र	अपि + अत्र	यण्सन्धिः।
	यज्ज्ञात्वा	यत् + ज्ञात्वा	जश्त्वसन्धिः।
	मोक्ष्यसेऽशुभात्	मोक्ष्यसे + अशुभात्	पूर्वरूपसन्धिः।
(ख) समासः	अकर्म	न कर्म अकर्म - नञ्तत्पुरुषः।	
	अशुभात्	न शुभम् अशुभम्, तस्मात् - नञ्तत्पुरुषः।	
(ग) कृदन्तः	मोहिताः	मुह् (मुह - वैचित्ये) + क्त (कर्मणि)।	
	ज्ञात्वा	ज्ञा (ज्ञा - अवबोधने) + क्त्वा।	

भावस्पष्टीकरणम् -

मोहिताः ।	
के मोहिताः ?	**कवयः** मोहिताः ।
कथं कवयः अपि मोहिताः ?	**किं कर्म किम् अकर्म इति** कवयः अपि मोहिताः ।
किं कर्म किम् अकर्म इति कवयः **अपि कुत्र** मोहिताः ?	किं कर्म किम् अकर्म इति कवयः **अपि अत्र** मोहिताः ।
किं कर्म किम् अकर्म इति कवयः अपि अत्र मोहिताः । **तेन किम्** ?	किं कर्म किम् अकर्म इति कवयः अपि अत्र मोहिताः । **तत् प्रवक्ष्यामि** ।
किं कर्म किम् अकर्म इति कवयः अपि अत्र मोहिताः । तत् **किं** प्रवक्ष्यामि ?	किं कर्म किम् अकर्म इति कवयः अपि अत्र मोहिताः । तत् **कर्म** प्रवक्ष्यामि ।
किं कर्म किम् अकर्म इति कवयः अपि अत्र मोहिताः । तत् **कस्मै** कर्म प्रवक्ष्यामि?	किं कर्म किम् अकर्म इति कवयः अपि अत्र मोहिताः । तत् **ते** कर्म प्रवक्ष्यामि ।
किं कर्म किम् अकर्म इति कवयः अपि अत्र मोहिताः । तत् ते कर्म प्रवक्ष्यामि । **एतेन किम्** ?	किं कर्म किम् अकर्म इति कवयः अपि अत्र मोहिताः । तत् ते कर्म प्रवक्ष्यामि । **मोक्ष्यसे** ।
किं कर्म किम् अकर्म इति कवयः अपि अत्र मोहिताः । तत् ते कर्म प्रवक्ष्यामि । **कस्मात्** मोक्ष्यसे ?	किं कर्म किम् अकर्म इति कवयः अपि अत्र मोहिताः । तत् ते कर्म प्रवक्ष्यामि । **अशुभात्** मोक्ष्यसे ।
किं कर्म किम् अकर्म इति कवयः अपि अत्र मोहिताः । तत् ते कर्म प्रवक्ष्यामि । **किं कृत्वा** अशुभात् मोक्ष्यसे ?	किं कर्म किम् अकर्म इति कवयः अपि अत्र मोहिताः । तत् ते कर्म प्रवक्ष्यामि । **ज्ञात्वा** अशुभात् मोक्ष्यसे ।
किं कर्म किम् अकर्म इति कवयः अपि अत्र मोहिताः । तत् ते कर्म प्रवक्ष्यामि । **किं** ज्ञात्वा अशुभात् मोक्ष्यसे ?	किं कर्म किम् अकर्म इति कवयः अपि अत्र मोहिताः । तत् ते कर्म प्रवक्ष्यामि । **यत् (कर्म)** ज्ञात्वा अशुभात् मोक्ष्यसे ।

तात्पर्यम् - किं कर्तव्यं किम् अकर्तव्यम् इति विषये विद्वांसः अपि भ्रान्ताः सन्ति । अतः तत् गूढं रहस्यं तव कृते कथयामि । यत् ज्ञात्वा अकल्याणात् (संसारात्) विमुक्तः भविष्यसि ।

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥४.१७॥

पदच्छेदः - कर्मणः, हि, अपि, बोद्धव्यम्, बोद्धव्यम्, च, विकर्मणः ।
अकर्मणः, च, बोद्धव्यम्, गहना, कर्मणः, गतिः ॥

अन्वयः - कर्मणः अपि (स्वरूपम्) बोद्धव्यम्। अकर्मणः च स्वरूपं बोद्धव्यम्। विकर्मणः अपि च स्वरूपं बोद्धव्यम्। तस्मात् कर्मणः गतिः गहना।

पदार्थः - कर्मणः अपि = कर्मणः स्वरूपमपि, बोद्धव्यम् = ज्ञातव्यम्, अकर्मणः च = कर्माभावस्य स्वरूपमपि, विकर्मणः अपि च = निषिद्धकर्मणः स्वरूपमपि, कर्मणः = कर्मस्वरूपस्य, गतिः = ज्ञानम्, गहना = क्लिष्टम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कर्मणः	कर्मन्- न. नपुं. ष. एक.	अपि	अव्ययम्
बोद्धव्यम्	अ. नपुं. प्र. एक. (विशेषणम्)	अकर्मणः	अकर्मन्- न. नपुं. ष. एक.
च	अव्ययम्	विकर्मणः	विकर्मन्- न. नपुं. ष. एक.
कर्मणः	कर्मन्- न. नपुं. ष. एक.	गतिः	इ. स्त्री. प्र. एक. (विशेष्यम्)
गहना	आ. स्त्री. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः
- कर्मणो हि — कर्मणः + हि — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
- ह्यपि — हि + अपि — यण्सन्धिः।
- अकर्मणश्च — अकर्मणः + च — विसर्गसन्धिः (सकारः) श्चुत्वम्।
- कर्मणो गतिः — कर्मणः + गतिः — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।

(ख) समासः
- अकर्मणः — न कर्म अकर्म, तस्य - नञ्तत्पुरुषः।

(ग) कृदन्तः
- बोद्धव्यम् — बुध् (बुध - अवगमने) + तव्यत् (कर्मणि)।
- गहना — गाह् (गाहू - विलोडने) + ल्युट् + टाप्।
- गतिः — गम् (गम्लृ - गतौ) + क्तिन् (भावे)।

भावस्पष्टीकरणम् -

गहना।	
का गहना ?	**गतिः गहना।**
कस्य गतिः गहना ?	**कर्मणः गतिः गहना।**
कथं कर्मणः गतिः गहना ?	**बोद्धव्यं (तस्मात्) कर्मणः गतिः गहना।**
किं बोद्धव्यं (यस्मात्) कर्मणः गतिः गहना ?	**कर्मणः (स्वरूपं) बोद्धव्यम्। (तस्मात्) कर्मणः गतिः गहना।**

कर्मणः (स्वरूपं) बोद्धव्यम्। **पुनश्च किं बोद्धव्यम्** ? (यस्मात्) कर्मणः गतिः गहना ?	कर्मणः स्वरूपं बोद्धव्यम्। **विकर्मणः स्वरूपं बोद्धव्यम्**। (तस्मात्) कर्मणः गतिः गहना।
कर्मणः स्वरूपं बोद्धव्यम्। विकर्मणः स्वरूपं बोद्धव्यम्। **पुनश्च किं बोद्धव्यम्** ? (यस्मात्) कर्मणः गतिः गहना ?	कर्मणः स्वरूपं बोद्धव्यम्। विकर्मणः स्वरूपं बोद्धव्यम्। **अकर्मणः स्वरूपं च बोद्धव्यम्**। (तस्मात्) कर्मणः गतिः गहना।

तात्पर्यम् - कर्म विहितम्, निषिद्धं विधिनिषेधरहितं च इति त्रिविधम्। एतस्य त्रिविधस्यापि कर्मणः स्वरूपं यथावत् ज्ञातव्यम्। किन्तु एतत् अत्यन्तं क्लेशेन अवगन्तव्यम्।

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत्॥४.१८॥

पदच्छेदः - कर्मणि, अकर्म, यः, पश्येत्, अकर्मणि, च, कर्म, यः।
सः, बुद्धिमान्, मनुष्येषु, सः, युक्तः, कृत्स्नकर्मकृत्॥

अन्वयः - यः कर्मणि अकर्म, अकर्मणि च कर्म पश्येत्, सः मनुष्येषु बुद्धिमान् युक्तः सः कृत्स्नकर्मकृत्।

पदार्थः - यः = यः पुरुषः, कर्मणि = व्यापारे, अकर्म = व्यापाराभावम्, अकर्मणि = व्यापाराभावे, कर्म च = व्यापारं च, पश्येत् = वीक्षेत, सः = सः पुरुषः, मनुष्येषु = मानवेषु, बुद्धिमान् = धीमान्, युक्तः = समाहितः, सः = सः पुरुषः, कृत्स्नकर्मकृत् = सकलकर्मकर्ता।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	कर्मणि	कर्मन्- न. नपुं. स. एक.
अकर्म	कर्मन्- न. नपुं. द्वि. एक.	अकर्मणि	अकर्मन्- न. नपुं. स. एक.
च	अव्ययम्	कर्म	कर्मन्- न. नपुं. द्वि. एक.
पश्येत्	पश्य (दृशिर् - प्रेक्षणे) पर. कर्तरि लिङ्. प्रपु. एक.	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
मनुष्येषु	अ. पुं. स. बहु.	बुद्धिमान्	बुद्धिमत्- त. पुं. प्र. एक. (विशेषणम्)
युक्तः	अ. पुं. प्र. एक. (विशेषणम्)	कृत्स्नकर्मकृत्	कृत्स्नकर्मकृत्- त. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	कर्मण्यकर्म	कर्मणि + अकर्म	यण्सन्धिः ।
	पश्येदकर्मणि	पश्येत् + अकर्मणि	जश्त्वसन्धिः ।
	स बुद्धिमान्	सः + बुद्धिमान्	विसर्गसन्धिः (लोपः) ।
	स + युक्तः	सः + युक्तः	विसर्गसन्धिः (लोपः) ।
(ख) समासः	अकर्म	न कर्म अकर्म - नञ्तत्पुरुषः ।	
	कृत्स्नकर्मकृत्	कृत्स्नं कर्म कृत्स्नकर्म - कर्मधारयः । कृत्स्नकर्म करोति इति कृत्स्नकर्मकृत् - कर्तरि क्विप् उपपदसमासश्च ।	
(ग) कृदन्तः	युक्तः	युज् (युजिर् - योगे) + क्त (कर्मणि) ।	
(घ) तद्धितान्तः	बुद्धिमान्	बुद्धि + मतुप् । बुद्धिः अस्य अस्मिन् वा अस्ति ।	
	मनुष्यः	मनु + षुक् + यत् (अपत्यार्थे) । मनोः अपत्यम् इति ।	

भावस्पष्टीकरणम् -

पश्येत् ।	
किं पश्येत् ?	**अकर्म** पश्येत् ।
कुत्र अकर्म पश्येत् ?	**कर्मणि** अकर्म पश्येत् ।
कर्मणि अकर्म पश्येत् । **अकर्मणि च किं पश्येत्** ?	कर्मणि अकर्म पश्येत् । **अकर्मणि च कर्म पश्येत्** ।
यः कर्मणि अकर्म पश्येत् । **यः** अकर्मणि च कर्म **सः कीदृशः** ?	**यः** कर्मणि अकर्म पश्येत् । यः अकर्मणि च कर्म **सः बुद्धिमान्** ।
यः कर्मणि अकर्म पश्येत् । यः अकर्मणि च कर्म सः **केषु** बुद्धिमान् ?	यः कर्मणि अकर्म पश्येत् । यः अकर्मणि च कर्म सः **मनुष्येषु** बुद्धिमान् ।
यः कर्मणि अकर्म पश्येत् । यः अकर्मणि च कर्म सः मनुष्येषु बुद्धिमान् । सः **पुनश्च कीदृशः** ?	यः कर्मणि अकर्म पश्येत् । यः अकर्मणि च कर्म सः मनुष्येषु बुद्धिमान् । सः **कृत्स्नकर्मकृत्** ।
यः कर्मणि अकर्म पश्येत् । यः अकर्मणि च कर्म सः मनुष्येषु बुद्धिमान् । **कीदृशः** सः कृत्स्नकर्मकृत् ?	यः कर्मणि अकर्म पश्येत् । यः अकर्मणि च कर्म सः मनुष्येषु बुद्धिमान् । **युक्तः** सः कृत्स्नकर्मकृत् ।

तात्पर्यम् - यः पुरुषः कर्मसु अकर्म पश्यति यः पुरुषः अकर्मसु च कर्म पश्यति सः मनुष्येषु बुद्धिमान् । सः समाधिस्थः, सः एव सकलकर्मकर्ता ।

यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥४.१९॥

पदच्छेदः - यस्य, सर्वे, समारम्भाः, कामसङ्कल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणम्, तम्, आहुः, पण्डितम्, बुधाः ॥

अन्वयः - यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः बुधाः ज्ञानाग्निदग्धकर्माणं तं पण्डितम् आहुः ।

पदार्थः - यस्य = यस्य पुरुषस्य, सर्वे = सकलाः, समारम्भाः = कर्माणि, कामसङ्कल्पवर्जिताः = फलापेक्षया तत्करणेच्छया च वर्जितानि, बुधाः = ज्ञानिनः, ज्ञानाग्निदग्धकर्माणम् = ज्ञानानल-भस्मीभूतकर्माणम्, तम् = तं मानवम्, पण्डितम् = विद्वांसम्, आहुः = वदन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यस्य	यद्- द. सर्व. पुं. ष. एक. (विशेषणम्)	सर्वे	अ. सर्व. पुं. प्र.बहु. (विशेषणम्)
समारम्भाः	अ. पुं. प्र. बहु. (विशेष्यम्)	कामसङ्कल्पवर्जिताः	अ. पुं. प्र. बहु. (विशेषणम्)
बुधाः	अ. पुं. प्र. बहु. (विशेष्यम्)	ज्ञानाग्निदग्धकर्माणम्	ज्ञानाग्निदग्धकर्मन्- न. पुं. द्वि. एक. (विशेषणम्)
तम्	तद्- द. सर्व. पुं. द्वि. एक. (विशेषणम्)	पण्डितम्	अ. पुं. द्वि. एक. (विशेष्यम्)
आहुः	ब्रू (ब्रूञ् - व्यक्तायां वाचि) पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) समासः

कामसङ्कल्पवर्जिताः — कामाश्च सङ्कल्पाश्च कामसङ्कल्पाः - द्वन्द्वः ।
कामसङ्कल्पैः वर्जिताः कामसङ्कल्पवर्जिताः - तृतीयातत्पुरुषः ।

ज्ञानाग्निदग्धकर्माणम् — ज्ञानम् एव अग्निः ज्ञानाग्निः - कर्मधारयः ।
ज्ञानाग्निना दग्धानि ज्ञानाग्निदग्धानि - तृतीयातत्पुरुषः । ज्ञानाग्निदग्धानि कर्माणि यस्य सः ज्ञानाग्निदग्धकर्मा, तम् - बहुव्रीहिः ।

(ख) कृदन्तः

समारम्भाः — सम् + आ + रभ् (रभ - राभस्ये) + घञ् ।
कामः — कम् (कमु - कान्तौ) + घञ् ।
सङ्कल्पः — सम् + कृप् (कृपू - सामर्थ्ये) + घञ् ।
वर्जिताः — वृज् (वृजी - वर्जने) + क्त (कर्मणि) ।

ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट् ।
दग्धः	दह् (दह - भस्मीकरणे) + क्त (कर्मणि) ।
बुधाः	बुध् (बुध - अवगमने) + क ।

भावस्पष्टीकरणम् -

समारम्भाः ।	
कति समारम्भाः ?	**सर्वे** समारम्भाः ।
सर्वे समारम्भाः **कीदृशाः** ?	सर्वे समारम्भाः **कामसङ्कल्पवर्जिताः** ।
यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः तं **कीदृशम्** आहुः ?	यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः तं **पण्डितम्** आहुः ।
यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः **कीदृशं** तं पण्डितम् आहुः ?	यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः **ज्ञानाग्निदग्धकर्माणं** तं पण्डितम् आहुः ।
यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः **के** ज्ञानाग्निदग्धकर्माणं तं पण्डितम् आहुः ?	यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः **बुधाः** ज्ञानाग्निदग्धकर्माणं तं पण्डितम् आहुः ।

तात्पर्यम् - यस्य कर्माणि सर्वथा शास्त्रसम्मतानि फलापेक्षारहितानि च सन्ति तस्य पुरुषस्य कर्माणि ज्ञानरूपेण वह्निना भस्मीभूतानि भवन्ति । तादृशं पुरुषं ज्ञानिनः पण्डितं प्रवदन्ति । (कामः = फलाभिलाषः, सङ्कल्पः = करणेच्छा ।)

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ॥४.२०॥

पदच्छेदः - त्यक्त्वा, कर्मफलासङ्गम्, नित्यतृप्तः, निराश्रयः ।
कर्मणि, अभिप्रवृत्तः, अपि, न, एव, किञ्चित्, करोति, सः ॥

अन्वयः - नित्यतृप्तः निराश्रयः कर्मफलासङ्गं त्यक्त्वा कर्मणि अभिप्रवृत्तः अपि सः किञ्चित् न एव करोति ।

पदार्थः - नित्यतृप्तः = सदा सन्तुष्टः, निराश्रयः = निरालम्बः, कर्मफलासङ्गम् = कर्मफलासक्तिम्, त्यक्त्वा = विहाय, कर्मणि = व्यापारे, अभिप्रवृत्तः अपि = संयुक्तः अपि, सः = सः पुरुषः, किञ्चित् = किमपि कर्म, न एव करोति = न आचरति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
नित्यतृप्तः	अ. पुं. प्र. एक. (विशेषणम्)	निराश्रयः	अ. पुं. प्र. एक. (विशेषणम्)
कर्मफलासङ्गम्	अ. पुं. द्वि. एक.	त्यक्त्वा	क्त्वान्तम् अव्ययम्
कर्मणि	कर्मन्- न. नपुं. स. एक.	अभिप्रवृत्तः	अ. पुं. प्र. एक. (विशेषणम्)
अपि	अव्ययम्	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
किञ्चित्	अव्ययम्	न	अव्ययम्
एव	अव्ययम्	करोति	कृ (डुकृञ् करणे) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	नित्यतृप्तो निराश्रयः	नित्यतृप्तः + निराश्रयः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	कर्मण्यभिप्रवृत्तः	कर्मणि + अभिप्रवृत्तः	यण्सन्धिः।
	अभिप्रवृत्तोऽपि	अभिप्रवृत्तः + अपि	विसर्गसन्धिः, (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च।
	नैव	न + एव	वृद्धिसन्धिः।

(ख) समासः	कर्मफलासङ्गं	कर्मणः फलं कर्मफलम् - षष्ठीतत्पुरुषः। कर्मफले आसङ्गः कर्मफलासङ्गः, तम् - सप्तमीतत्पुरुषः।
	नित्यतृप्तः	नित्यं तृप्तः नित्यतृप्तः - सुप्समासः।
	निराश्रयः	निर्गतः आश्रयः यस्मात् सः निराश्रयः - बहुव्रीहिः।
(ग) कृदन्तः	त्यक्त्वा	त्यज् (त्यज - हानौ) + क्त्वा।
	आसङ्गः	आ + सञ्ज् (षञ्ज - सङ्गे) + घञ्।
	तृप्तः	तृप् (तृप - तृप्तौ (प्रीणने अपि अस्ति) +क्त (कर्मणि)।
	निराश्रयः	निर् + आङ् + श्रि (श्रिञ् - सेवायाम्) + अच्।
	अभिप्रवृत्तः	अभि + प्र + वृत् (वृतु - वर्तने) + क्त (कर्तरि)।

भावस्पष्टीकरणम् -

न एव करोति।	
किं न एव करोति ?	**किञ्चित्** न एव करोति।
कः किञ्चित् (कर्म) न एव करोति ?	**सः** किञ्चित् न एव करोति।

कीदृशः अपि सः किञ्चित् न एव करोति ?	**अभिप्रवृत्तः अपि सः** किञ्चित् न एव करोति ।
कस्मिन् अभिप्रवृत्तः अपि सः किञ्चित् न एव करोति ?	**कर्मणि** अभिप्रवृत्तः अपि सः किञ्चित् न एव करोति ।
किं कृत्वा कर्मणि अभिप्रवृत्तः अपि सः किञ्चित् न एव करोति ?	**त्यक्त्वा** कर्मणि अभिप्रवृत्तः अपि सः किञ्चित् न एव करोति ।
कं त्यक्त्वा कर्मणि अभिप्रवृत्तः अपि सः किञ्चित् न एव करोति ?	**कर्मफलासङ्गं** त्यक्त्वा कर्मणि अभिप्रवृत्तः अपि सः किञ्चित् न एव करोति ।
कः कर्मफलासङ्गं त्यक्त्वा कर्मणि अभिप्रवृत्तः अपि सः किञ्चित् न एव करोति ?	**निराश्रयः** कर्मफलासङ्गं त्यक्त्वा कर्मणि अभिप्रवृत्तः अपि सः किञ्चित् न एव करोति ।
कीदृशः निराश्रयः कर्मफलासङ्गं त्यक्त्वा कर्मणि अभिप्रवृत्तः अपि सः किञ्चित् न एव करोति ?	**नित्यतृप्तः** निराश्रयः कर्मफलासङ्गं त्यक्त्वा कर्मणि अभिप्रवृत्तः अपि सः किञ्चित् न एव करोति ।

तात्पर्यम् - यः पुरुषः संसारबन्धं विना सदा परमानन्दपरमात्मनि सदासन्तुष्टः भूत्वा फलासक्तिं विहाय कर्मसु प्रवृत्तः दृश्यते सः वस्तुतः कर्मशून्यः एव ।

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥४.२१॥

पदच्छेदः - निराशीः, यतचित्तात्मा, त्यक्तसर्वपरिग्रहः ।
शारीरम्, केवलम्, कर्म, कुर्वन्, न, आप्नोति, किल्विषम् ॥

अन्वयः - निराशीः यतचित्तात्मा त्यक्तसर्वपरिग्रहः केवलं शारीरं कर्म कुर्वन् अपि किल्विषं न आप्नोति ।

पदार्थः - निराशीः = निष्कामः, यतचित्तात्मा = नियतान्तःकरणेन्द्रियः, त्यक्तसर्वपरिग्रहः = विसृष्ट-सकलव्यापारः, केवलम् = मुख्यम्, शारीरम् = शरीरस्थितिमात्रप्रयोजनम्, कर्म = व्यापारम्, कुर्वन् अपि = आचरन् अपि, किल्विषम् = पापम्, न आप्नोति = न प्राप्नोति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
निराशीः	निराशिस्- सका. पुं. प्र. एक. (विशेषणम्)	यतचित्तात्मा	यतचित्तात्मन्- न. पुं. प्र. एक. (विशेषणम्)
त्यक्तसर्वपरिग्रहः	अ. पुं. प्र. एक. (विशेषणम्)	केवलम्	अ. नपुं. द्वि. एक. (विशेषणम्)

शारीरम्	अ. नपुं. द्वि. एक. (विशेषणम्)	कर्म	कर्मन्- न. नपुं. द्वि. एक. (विशेष्यम्)
कुर्वन्	कुर्वत्- त. पुं. प्र. एक. (विशेषणम्)	किल्बिषम्	अ. नपुं. द्वि. एक.
न	अव्ययम्	आप्नोति	आप् (आप्लृ व्याप्तौ) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः निराशीर्यतचित्तात्मा — निराशीः + यतचित्तात्मा — विसर्गसन्धिः (रेफः)।
नाप्नोति — न + आप्नोति — सवर्णदीर्घसन्धिः।

(ख) समासः निराशीः — निर्गताः आशिषः यस्मात् सः निराशीः - बहुव्रीहिः।
यतचित्तात्मा — चित्तं च आत्मा च चित्तात्मानौ - द्वन्द्वः।
यतौ चित्तात्मानौ येन सः यतचित्तात्मा - बहुव्रीहिः।
त्यक्तसर्वपरिग्रहः — सर्वः परिग्रहः सर्वपरिग्रहः - कर्मधारयः।
त्यक्तः सर्वपरिग्रहः येनः सः त्यक्तसर्वपरिग्रहः - बहुव्रीहिः।

(ग) कृदन्तः यतम् — यम् (यम - उपरमे) +क्त (कर्मणि)।
चित्तम् — चित् (चिती - संज्ञाने) + क्त (कर्तरि)।
त्यक्तम् — त्यज् (त्यज - हानौ) + क्त (कर्मणि)।
परिग्रहः — परि + ग्रह् (ग्रह - उपादाने) + अप्।
कुर्वन् — कृ (डुकृञ् - करणे) + शतृ (कर्तरि)।

(घ) तद्धितान्तः शारीरम् — शरीर + अण् (इदमर्थे) शरीरस्य इदं शारीरम्।

भावस्पष्टीकरणम् -

न आप्नोति।	
किं न आप्नोति ?	**किल्बिषं** न आप्नोति।
किं कुर्वन्नपि किल्बिषं न आप्नोति ?	**कर्म कुर्वन्नपि** किल्बिषं न आप्नोति।
कीदृशं कर्म कुर्वन्नपि किल्बिषं न आप्नोति ?	**केवलं शारीरं** कर्म कुर्वन्नपि किल्बिषं न आप्नोति।
कः केवलं शारीरं कर्म कुर्वन्नपि किल्बिषं न आप्नोति ?	**निराशीः** केवलं शारीरं कर्म कुर्वन्नपि किल्बिषं न आप्नोति।
निराशीः **पुनश्च कीदृशः** केवलं शारीरं कर्म कुर्वन्नपि किल्बिषं न आप्नोति ?	निराशीः **यतचित्तात्मा** केवलं शारीरं कर्म कुर्वन्नपि किल्बिषं न आप्नोति।

निराशीः यतचित्तात्मा **पुनश्च कीदृशः** केवलं शारीरं कर्म कुर्वन्नपि किल्विषं न आप्नोति ?	निराशीः यतचित्तात्मा **त्यक्तसर्वपरिग्रहः** केवलं शारीरं कर्म कुर्वन्नपि किल्विषं न आप्नोति ।

तात्पर्यम् - समस्तभोग्यविषयेषु आकाङ्क्षारहितः सकलव्यापारवर्जितः पुरुषः शरीरनिर्वहणाय कर्म करोति चेदपि सः पापं न प्राप्नोति ।

यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥४.२२॥

पदच्छेदः - यदृच्छालाभसन्तुष्टः, द्वन्द्वातीतः, विमत्सरः ।
समः, सिद्धौ, असिद्धौ, च, कृत्वा, अपि, न, निबध्यते ॥

अन्वयः - विमत्सरः द्वन्द्वातीतः यदृच्छालाभसन्तुष्टः सिद्धौ असिद्धौ च समः (कर्म) कृत्वा अपि न निबध्यते ।

पदार्थः - विमत्सरः = वैरशून्यः, द्वन्द्वातीतः = सुखदुःखादिद्वन्द्वशून्यः, यदृच्छालाभसन्तुष्टः = अप्रार्थितोपस्थितेन सन्तुष्टः, सिद्धौ = प्रयोजनस्य लाभे, असिद्धौ च = तस्य अलाभे अपि, समः = तुल्यमनस्कः, कृत्वा अपि = कर्म विधाय अपि, न निबध्यते = न बद्धो भवति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
विमत्सरः	अ. पुं. प्र. एक. (विशेषणम्)	द्वन्द्वातीतः	अ. पुं. प्र. एक. (विशेषणम्)
यदृच्छालाभसन्तुष्टः	अ. पुं. प्र. एक. (विशेषणम्)	सिद्धौ	इ. स्त्री. स. एक.
असिद्धौ	इ. स्त्री. स. एक.	च	अव्ययम्
समः	अ. पुं. प्र. एक.	कृत्वा	क्त्वान्तम् अव्ययम्
अपि	अव्ययम्	न	अव्ययम्
निबध्यते	नि बन्ध् (बन्ध - बन्धने) पर. कर्मणि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः यदृच्छालाभसन्तुष्टो द्वन्द्वातीतः

यदृच्छालाभसन्तुष्टः + द्वन्द्वातीतः

विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

	द्वन्द्वातीतो विमत्सरः	द्वन्द्वातीतः + विमत्सरः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	सिद्धावसिद्धौ	सिद्धौ + असिद्धौ	यान्तवान्तादेशसन्धिः।
	कृत्वापि	कृत्वा + अपि	सवर्णदीर्घसन्धिः।
(ख) समासः	यदृच्छालाभसन्तुष्टः	यदृच्छया लाभः यदृच्छालाभः - तृतीयातत्पुरुषः। यदृच्छालाभेन सन्तुष्टः यदृच्छालाभसन्तुष्टः - तृतीयातत्पुरुषः।	
	द्वन्द्वातीतः	द्वन्द्वम् अतीतः द्वन्द्वातीतः - द्वितीयातत्पुरुषः।	
	विमत्सरः	विगतः मत्सरः यस्मात् सः विमत्सरः - बहुव्रीहिः।	
	असिद्धौ	न सिद्धिः असिद्धिः, तस्याम् - नञ्तत्पुरुषः।	
(ग) कृदन्तः	सन्तुष्टः	सम् + तुष् (तुष - प्रीतौ) + क्त (कर्तरि)।	
	अतीतः	अति + इ (इण् - गतौ) + क्त (कर्तरि)।	
	सिद्धौ	सिध् (षिधु - संराद्धौ) + क्तिन्, तस्याम्।	
	कृत्वा	कृ (डुकृञ् - करणे) + क्त्वा।	

भावस्पष्टीकरणम् -

न निबध्यते।	
कः न निबध्यते ?	**यदृच्छालाभसन्तुष्टः** न निबध्यते।
यदृच्छालाभसन्तुष्टः **पुनश्च कीदृशः** न निबध्यते ?	यदृच्छालाभसन्तुष्टः **द्वन्द्वातीतः** न निबध्यते।
यदृच्छालाभसन्तुष्टः द्वन्द्वातीतः **पुनश्च कीदृशः** न निबध्यते ?	यदृच्छालाभसन्तुष्टः द्वन्द्वातीतः **विमत्सरः** न निबध्यते।
यदृच्छालाभसन्तुष्टः द्वन्द्वातीतः विमत्सरः **पुनश्च कीदृशः** न निबध्यते ?	यदृच्छालाभसन्तुष्टः द्वन्द्वातीतः विमत्सरः **समः** न निबध्यते।
यदृच्छालाभसन्तुष्टः द्वन्द्वातीतः विमत्सरः **कस्यां कस्यां** च समः न निबध्यते ?	यदृच्छालाभसन्तुष्टः द्वन्द्वातीतः विमत्सरः **सिद्धौ असिद्धौ च** समः न निबध्यते।
यदृच्छालाभसन्तुष्टः द्वन्द्वातीतः विमत्सरः सिद्धौ असिद्धौ च समः **कीदृशोऽपि** न निबध्यते ?	यदृच्छालाभसन्तुष्टः द्वन्द्वातीतः विमत्सरः सिद्धौ असिद्धौ च समः **कृत्वा अपि** न निबध्यते।

तात्पर्यम् - निरपेक्षत्वात् यावत् उपस्थितं भवति तावता एव सन्तुष्टः, हर्षशोकादिद्वन्द्वात् दूरे स्थितः, मदमत्सरासूयाविहीनः, सिद्धौ असिद्धौ निर्विकारः च, एतादृशः कर्मयोगी कर्माणि कृत्वापि बद्धः न भवति।

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥४.२३॥

पदच्छेदः - गतसङ्गस्य, मुक्तस्य, ज्ञानावस्थितचेतसः ।
यज्ञाय, आचरतः, कर्म, समग्रम्, प्रविलीयते ॥

अन्वयः - गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः यज्ञाय आचरतः कर्म समग्रं प्रविलीयते ।

पदार्थः - गतसङ्गस्य = निष्कामस्य, मुक्तस्य = रागादिमुक्तस्य, ज्ञानावस्थितचेतसः = ज्ञानार्थं यतमानस्य, यज्ञाय आचरतः = यागाय एव आचरतः जनस्य, कर्म = कर्म, समग्रम् = समस्तम्, प्रविलीयते = विनश्यति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
गतसङ्गस्य	अ. पुं. ष. एक. (विशेषणम्)	मुक्तस्य	अ. पुं. ष. एक. (विशेषणम्)
ज्ञानावस्थितचेतसः	ज्ञानावस्थितचेतस्- सका. पुं. ष. एक. (विशेषणम्)	यज्ञाय	अ. पुं. च. एक.
आचरतः	आचरत्- त. पुं. ष. एक. (विशेषणम्)	कर्म	कर्मन्- न. नपुं. द्वि. एक. (विशेष्यम्)
समग्रम्	अ. नपुं. द्वि. एक. (विशेषणम्)	प्रविलीयते	प्र + वि + ली (लीङ् - श्लेषणे) आत्म. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः यज्ञायाचरतः — यज्ञाय + आचरतः — सवर्णदीर्घसन्धिः ।

(ख) समासः गतसङ्गस्य — गतः सङ्गः यस्मात् सः गतसङ्गः, तस्य - बहुव्रीहिः ।
ज्ञानावस्थितचेतसः — ज्ञाने अवस्थितं ज्ञानावस्थितम् - सप्तमीतत्पुरुषः ।
ज्ञानावस्थितं चेतः यस्य सः ज्ञानावस्थितचेताः, तस्य - बहुव्रीहिः ।

(ग) कृदन्तः गतः — गम् (गम्लृ - गतौ) + क्त (कर्तरि) ।
सङ्गस्य — सञ्ज् (षञ्ज - सङ्गे) + घञ् ।
ज्ञानम् — ज्ञा (ज्ञा - अवबोधने) + ल्युट् ।
अवस्थितः — अव + स्था (ष्ठा - गतिनिवृत्तौ) + क्त ।
मुक्तस्य — मुच् (मुच्लृ - मोक्षणे) + क्त (कर्तरि) तस्य ।
आचरतः — आ + चर् (चर - गतिभक्षणयोः) + शतृ (कर्तरि), तस्य ।

भावस्पष्टीकरणम् -

प्रविलीयते ।	
किं प्रविलीयते ?	**कर्म** प्रविलीयते ।
कर्म **कियत्** प्रविलीयते ?	कर्म **समग्रं** प्रविलीयते ।
किं कुर्वतः कर्म समग्रं प्रविलीयते ?	**आचरतः** कर्म समग्रं प्रविलीयते ।
कस्मै आचरतः कर्म समग्रं प्रविलीयते ?	**यज्ञाय** आचरतः कर्म समग्रं प्रविलीयते ।
कीदृशस्य यज्ञाय आचरतः कर्म समग्रं प्रविलीयते ?	**गतसङ्गस्य** यज्ञाय आचरतः कर्म समग्रं प्रविलीयते ।
गतसङ्गस्य **पुनश्च कीदृशस्य** यज्ञाय आचरतः कर्म समग्रं प्रविलीयते ?	गतसङ्गस्य **मुक्तस्य** यज्ञाय आचरतः कर्म समग्रं प्रविलीयते ।
गतसङ्गस्य मुक्तस्य **पुनश्च कीदृशस्य** यज्ञाय आचरतः कर्म समग्रं प्रविलीयते ?	गतसङ्गस्य मुक्तस्य **ज्ञानावस्थितचेतसः** यज्ञाय आचरतः कर्म समग्रं प्रविलीयते ।

तात्पर्यम् - यः आसक्तिरहितः देहाभिमानविहीनः ममताशून्यः सततं परमात्मज्ञाने स्थिरमानसः च अस्ति यः च ब्रह्मार्थं कर्म आचरति तस्य समग्रमपि कर्म विनश्यति ।

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥४.२४॥

पदच्छेदः - ब्रह्म, अर्पणम्, ब्रह्म, हविः, ब्रह्माग्नौ, ब्रह्मणा, हुतम् ।
ब्रह्म, एव, तेन, गन्तव्यम्, ब्रह्मकर्मसमाधिना ॥

अन्वयः - अर्पणं ब्रह्म । ब्रह्माग्नौ ब्रह्मणा हुतं हविः ब्रह्म । ब्रह्मकर्मसमाधिना तेन गन्तव्यं ब्रह्म एव ।

पदार्थः - अर्पणम् = समर्पणसाधनं स्रुगादि, ब्रह्म = परमात्मा, ब्रह्माग्नौ = परमात्मरूपे अग्नौ, ब्रह्मणा = यजमानरूपेण परमात्मना, हुतम् = दत्तम्, हविः = आज्यादिकं वस्तु, ब्रह्म = परमात्मा, ब्रह्मकर्मसमाधिना = कर्मरूपपरमात्मनिष्ठेन, तेन = यजमानेन, गन्तव्यम् = प्राप्तव्यम्, ब्रह्म एव = परमात्मा एव ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्पणम्	अ. नपुं. प्र. एक. (विशेषणम्)	ब्रह्म	ब्रह्मन्- न. नपुं. प्र. एक. (विशेष्यम्)

ब्रह्माग्नौ	इ. पुं. स. एक.	ब्रह्मणा	ब्रह्मन्- न. नपुं. तृ. एक.
हुतम्	अ. नपुं. प्र. एक. (विशेषणम्)	हविः	हविस्- स. नपुं. प्र. एक. (विशेष्यम्)
ब्रह्मकर्मसमाधिना	इ. पुं. तृ. एक. (विशेष्यम्)	तेन	तद्- द. सर्व. पुं. तृ. एक. (विशेषणम्)
गन्तव्यम्	अ. नपुं. प्र. एक. (विशेषणम्)	एव	अव्ययम्

व्याकरणम् -

(क) सन्धिः	ब्रह्मार्पणम्	ब्रह्म + अर्पणम्	सवर्णदीर्घसन्धिः।
	हविर्ब्रह्माग्नौ	हविः + ब्रह्माग्नौ	विसर्गसन्धिः (रेफः)।
	ब्रह्मैव	ब्रह्म + एव	वृद्धिसन्धिः।
(ख) समासः	ब्रह्माग्नौ	ब्रह्म एव अग्निः ब्रह्माग्निः, तस्मिन् - कर्मधारयः।	
	ब्रह्मकर्मसमाधिना	ब्रह्म एव कर्म ब्रह्मकर्म - कर्मधारयः।	
		ब्रह्मकर्मणि समाधिः यस्य सः ब्रह्मकर्मसमाधिः, तेन - बहुव्रीहिः।	
(ग) कृदन्तः	अर्पणम्	ऋ (ऋ - गतिप्रापणयोः) णिच् + ल्युट् (करणे) अर्प्यते अनेन इति अर्पणं स्रुगादि।	
	हुतम्	हु (हु - दानादनयोः) + क्त (कर्मणि)।	
	गन्तव्यम्	गम् (गम्लृ - गतौ) + तव्यत् (कर्मणि)।	

भावस्पष्टीकरणम् -

ब्रह्म।	
अर्पणं किम्?	**अर्पणं ब्रह्म।**
अर्पणं ब्रह्म, **पुनः हविः किम्?**	अर्पणं ब्रह्म, **हविः ब्रह्म।**
अर्पणं ब्रह्म, **कीदृशं** हविः ब्रह्म?	अर्पणं ब्रह्म, **हुतं** हविः ब्रह्म।
अर्पणं ब्रह्म, **केन** हुतं हविः ब्रह्म?	अर्पणं ब्रह्म, **ब्रह्मणा** हुतं हविः ब्रह्म।
अर्पणं ब्रह्म, ब्रह्मणा **कुत्र** हुतं हविः ब्रह्म?	अर्पणं ब्रह्म, ब्रह्मणा **ब्रह्माग्नौ** हुतं हविः ब्रह्म।
अर्पणं ब्रह्म, ब्रह्मणा ब्रह्माग्नौ हुतं हविः ब्रह्म। **पुनश्च गन्तव्यं किम्?**	अर्पणं ब्रह्म, ब्रह्मणा ब्रह्माग्नौ हुतं हविः ब्रह्म। **गन्तव्यं ब्रह्मैव।**
अर्पणं ब्रह्म, ब्रह्मणा ब्रह्माग्नौ हुतं हविः ब्रह्म। **केन** गन्तव्यं ब्रह्मैव?	अर्पणं ब्रह्म, ब्रह्मणा ब्रह्माग्नौ हुतं हविः ब्रह्म। **ब्रह्मकर्मसमाधिना** तेन गन्तव्यं ब्रह्मैव।

तात्पर्यम् - अत्र यत् समर्पणसाधनं वर्तते तत् ब्रह्म, यः अग्निः तत् ब्रह्म, यः यजमानः तत् ब्रह्म, यत् तेन हुतम् आज्यादि तदपि ब्रह्म, यत् समर्पणं तदपि ब्रह्म, तत्र अवहितेन पुरुषेण प्राप्तव्यमपि ब्रह्मैव। एवं सर्वं खलु इदं ब्रह्म। न तदतिरिक्तं किञ्चिदपि वस्तु इह वर्तते।

दैवमेवापरे यज्ञं योगिनः पर्युपासते।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥४.२५॥

पदच्छेदः - दैवम्, एव, अपरे, यज्ञम्, योगिनः, पर्युपासते।
ब्रह्माग्नौ, अपरे, यज्ञम्, यज्ञेन, एव, उपजुह्वति ॥

अन्वयः - अपरे योगिनः दैवम् एव यज्ञं पर्युपासते। अपरे ब्रह्माग्नौ यज्ञेन एव यज्ञम् उपजुह्वति।

पदार्थः - अपरे = अन्ये, योगिनः = कर्मिणः, दैवम् एव = देवसम्बन्धिनम् एव, यज्ञम् = यागम्, पर्युपासते = आचरन्ति, अपरे = अन्ये, ब्रह्माग्नौ = परमात्मरूपे ज्वलने, यज्ञेन एव = आत्मना एव, यज्ञम् = आत्मानम्, उपजुह्वति = समर्पयन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अपरे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)	योगिनः	योगिन्- न. पुं. प्र. बहु. (विशेष्यम्)
दैवम्	अ. पुं. द्वि. एक.	एव	अव्ययम्
यज्ञम्	अ. पुं. द्वि. एक.	पर्युपासते	परि + उप + आस् (आस - उपवेशने) आत्म. कर्तरि लट्. प्रपु. बहु.
अपरे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)	ब्रह्माग्नौ	इ. पुं. स. एक.
यज्ञेन	अ. पुं. तृ. एक.	यज्ञम्	अ. पुं. द्वि. एक.
उपजुह्वति	उप + हु (हु - दानादनयोः) पर. कर्तरि लट्, प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः	एवापरे	एव + अपरे	सवर्णदीर्घसन्धिः।
	ब्रह्माग्नावपरे	ब्रह्माग्नौ + अपरे	यान्तवान्तादेशसन्धिः।
	यज्ञेनैव	यज्ञेन + एव	वृद्धिसन्धिः।
	एवोपजुह्वति	एव + उपजुह्वति	गुणसन्धिः।
(ख) तद्धितान्तः	दैवम्	देव + अण् (इदमर्थे)। देवस्य अयम्, तम्।	
	योगिनः	योग + इनि (मतुबर्थे) योगः एषाम् एषु वा अस्ति।	

भावस्पष्टीकरणम् -

पर्युपासते।	
कं पर्युपासते ?	यज्ञं पर्युपासते।
कीदृशं यज्ञं पर्युपासते ?	दैवं यज्ञं पर्युपासते।
के दैवं यज्ञं पर्युपासते ?	योगिनः दैवं यज्ञं पर्युपासते।
के योगिनः दैवं यज्ञं पर्युपासते ?	अपरे योगिनः दैवं यज्ञं पर्युपासते।
उपजुह्वति।	
कम् उपजुह्वति ?	यज्ञम् उपजुह्वति।
केन एव यज्ञम् उपजुह्वति ?	यज्ञेन एव यज्ञम् उपजुह्वति।
कस्मिन् यज्ञेन एव यज्ञम् उपजुह्वति ?	ब्रह्माग्नौ यज्ञेन एव यज्ञम् उपजुह्वति।
के ब्रह्माग्नौ यज्ञेन एव यज्ञम् उपजुह्वति ?	अपरे ब्रह्माग्नौ यज्ञेन एव यज्ञम् उपजुह्वति।

तात्पर्यम् - कर्मयोगिनः देवसम्बन्धिनं यज्ञं कुर्वन्ति। ज्ञानयोगिनः तु परब्रह्माग्नौ आत्मना एव आत्मानं जुह्वति।

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥४.२६॥

पदच्छेदः - श्रोत्रादीनि, इन्द्रियाणि, अन्ये, संयमाग्निषु, जुह्वति।
शब्दादीन्, विषयान्, अन्ये, इन्द्रियाग्निषु, जुह्वति ॥

अन्वयः - अन्ये श्रोत्रादीनि इन्द्रियाणि संयमाग्निषु जुह्वति। अन्ये शब्दादीन् विषयान् इन्द्रियाग्निषु जुह्वति।

पदार्थः - अन्ये = इतरे, श्रोत्रादीनि = श्रोत्रप्रभृतीनि, इन्द्रियाणि = ज्ञानेन्द्रियाणि, संयमाग्निषु = नियमवह्निषु, जुह्वति = प्रक्षिपन्ति, अन्ये = अपरे, शब्दादीन् = शब्दप्रभृतीन्, विषयान् = विषयान्, इन्द्रियाग्निषु = इन्द्रियरूपवह्निषु, जुह्वति = प्रक्षिपन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अन्ये	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)	श्रोत्रादीनि	अ. नपुं. द्वि. बहु. (विशेषणम्)
इन्द्रियाणि	अ. नपुं. द्वि. बहु. (विशेष्यम्)	संयमाग्निषु	इ. पुं. स. बहु.
जुह्वति	हु (हु दानादनयोः) पर. कर्तरि लट्. प्रपु. बहु.	शब्दादीन्	इ. पुं. द्वि. बहु. (विशेषणम्)
विषयान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	इन्द्रियाग्निषु	इ. पुं. स. बहु.

व्याकरणम् -

(क) सन्धिः	श्रोत्रादीनीन्द्रियाणि	श्रोत्रादीनि + इन्द्रियाणि	सवर्णदीर्घसन्धिः ।
	इन्द्रियाण्यन्ये	इन्द्रियाणि + अन्ये	यण्सन्धिः ।
	अन्य इन्द्रियाग्निषु	अन्ये + इन्द्रियाग्निषु	यान्तवान्तादेशसन्धिः, यलोपः ।
(ख) समासः	श्रोत्रादीनि	श्रोत्रम् आदिः येषां तानि श्रोत्रादीनि, तानि - बहुव्रीहिः ।	
	शब्दादीन्	शब्दः आदिः येषां ते शब्दादयः, तान् - बहुव्रीहिः ।	
	संयमाग्निषु	संयमाः एव अग्नयः संयमाग्नयः, तेषु - कर्मधारयः ।	
	इन्द्रियाग्निषु	इन्द्रियाणि एव अग्नयः इन्द्रियाग्नयः, तेषु - कर्मधारयः ।	
(ग) कृदन्तः	संयमः	सम् + यम् (यम उपरमे) + अप् ।	

भावस्पष्टीकरणम् -

जुह्वति ।	
केषु जुह्वति ?	**इन्द्रियाग्निषु** जुह्वति ।
कान् इन्द्रियाग्निषु जुह्वति ?	**विषयान्** इन्द्रियाग्निषु जुह्वति ।
किमादीन् विषयान् इन्द्रियाग्निषु जुह्वति ?	**शब्दादीन्** विषयान् इन्द्रियाग्निषु जुह्वति ।
के शब्दादीन् विषयान् इन्द्रियाग्निषु जुह्वति ?	**अन्ये** शब्दादीन् विषयान् इन्द्रियाग्निषु जुह्वति ।
जुह्वति ।	
केषु जुह्वति ?	**संयमाग्निषु** जुह्वति ।
कानि संयमाग्निषु जुह्वति ?	**श्रोत्रादीनि इन्द्रियाणि** संयमाग्निषु जुह्वति ।
के श्रोत्रादीनि इन्द्रियाणि संयमाग्निषु जुह्वति ?	**अन्ये** श्रोत्रादीनि इन्द्रियाणि संयमाग्निषु जुह्वति ।

तात्पर्यम् - केचन भगवत्पूजात्वेन श्रोत्रादीन्द्रियाणां निग्रहं कुर्वन्ति । केचन तत्पूजात्वेन अनिषिद्धविषयान् इन्द्रियैः भुञ्जते ।

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥४.२७॥

पदच्छेदः - सर्वाणि, इन्द्रियकर्माणि, प्राणकर्माणि, च, अपरे ।
आत्मसंयमयोगाग्नौ, जुह्वति, ज्ञानदीपिते ॥

अन्वयः - अपरे सर्वाणि इन्द्रियकर्माणि प्राणकर्माणि च ज्ञानदीपिते आत्मसंयमयोगाग्नौ जुह्वति ।

पदार्थः - अपरे = अन्ये, सर्वाणि = सकलानि, इन्द्रियकर्माणि = इन्द्रियव्यापारान्, प्राणकर्माणि च = प्राणव्यापारान् च, ज्ञानदीपिते = आत्मज्ञानप्रज्वालिते, आत्मसंयमयोगाग्नौ = चित्तनियन्त्रण-रूपयोगवह्नौ, जुह्वति = प्रक्षिपन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अपरे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)	सर्वाणि	अ. सर्व. नपुं. द्वि. बहु. (विशेषणम्)
इन्द्रियकर्माणि	इन्द्रियकर्मन्- न. नपुं. द्वि. बहु. (विशेष्यम्)	प्राणकर्माणि	प्राणकर्मन्- न. नपुं. द्वि. बहु. (विशेष्यम्)
च	अव्ययम्	ज्ञानदीपिते	अ. पुं. स. एक. (विशेषणम्)
आत्मसंयमयोगाग्नौ	इ. पुं. स. एक. (विशेष्यम्)	जुह्वति	हु (हु दानादनयोः) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः	सर्वाणीन्द्रियकर्माणि	सर्वाणि + इन्द्रियकर्माणि	सवर्णदीर्घसन्धिः ।
	चापरे	च + अपरे	सवर्णदीर्घसन्धिः ।
(ख) समासः	इन्द्रियकर्माणि	इन्द्रियाणां कर्माणि इन्द्रियकर्माणि - षष्ठीतत्पुरुषः ।	
	प्राणकर्माणि	प्राणानां कर्माणि प्राणकर्माणि - षष्ठीतत्पुरुषः ।	
	आत्मसंयमयोगाग्नौ	आत्मसंयमः एव योगाग्निः आत्मसंयमयोगाग्निः, तस्मिन् - कर्मधारयः ।	
	ज्ञानदीपिते	ज्ञानेन दीपितः ज्ञानदीपितः, तस्मिन् - तृतीयातत्पुरुषः ।	
(ग) कृदन्तः	संयमः	सम् + यम् (यम - उपरमे) + अप् ।	
	योगः	युज् (युजिर् - योगे) + घञ् ।	
	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट् ।	
	दीपिते	दीप् (दीपी - दीप्तौ) + क्त (कर्तरि), तस्मिन् ।	

भावस्पष्टीकरणम् -

जुह्वति ।	
कस्मिन् जुह्वति ?	**आत्मसंयमयोगाग्नौ** जुह्वति ।
कीदृशे आत्मसंयमयोगाग्नौ जुह्वति ?	**ज्ञानदीपिते** आत्मसंयमयोगाग्नौ जुह्वति ।
कानि ज्ञानदीपिते आत्मसंयमयोगाग्नौ जुह्वति ?	**इन्द्रियकर्माणि** ज्ञानदीपिते आत्मसंयमयोगाग्नौ जुह्वति ।

इन्द्रियकर्माणि **पुनश्च** **कानि** ज्ञानदीपिते आत्मसंयमयोगाग्नौ जुह्वति ?	इन्द्रियकर्माणि **प्राणकर्माणि** ज्ञानदीपिते आत्मसंयमयोगाग्नौ जुह्वति ।
कति इन्द्रियकर्माणि प्राणकर्माणि ज्ञानदीपिते आत्मसंयमयोगाग्नौ जुह्वति ?	**सर्वाणि** इन्द्रियकर्माणि प्राणकर्माणि ज्ञानदीपिते आत्मसंयमयोगाग्नौ जुह्वति ।
के सर्वाणि इन्द्रियकर्माणि प्राणकर्माणि ज्ञानदीपिते आत्मसंयमयोगाग्नौ जुह्वति ?	**अपरे** सर्वाणि इन्द्रियकर्माणि प्राणकर्माणि ज्ञानदीपिते आत्मसंयमयोगाग्नौ जुह्वति ।

तात्पर्यम् - अन्ये केचन सर्वाणि इन्द्रियाणां कर्माणि तथा प्राणानां समस्ताः क्रियाः ज्ञानेन प्रकाशमाने चित्तसंयमनरूपो यः योगः तादृशे अग्नौ प्रक्षिपन्ति ।

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥४.२८॥

पदच्छेदः - द्रव्ययज्ञाः, तपोयज्ञाः, योगयज्ञाः, तथा, अपरे ।
स्वाध्यायज्ञानयज्ञाः, च, यतयः, संशितव्रताः ॥

अन्वयः - केचन द्रव्ययज्ञाः अन्ये तपोयज्ञाः अन्ये योगयज्ञाः तथा अपरे स्वाध्यायज्ञानयज्ञाः च संशितव्रताः यतयः भवन्ति ।

पदार्थः - (केचन) द्रव्ययज्ञाः = द्रव्यविनियोगरूपो यज्ञः येषां तादृशाः, (अन्ये) तपोयज्ञाः = तपोरूपो यज्ञः येषां तादृशाः, अन्ये योगयज्ञाः = योगरूपो यज्ञः येषां तादृशाः, तथा = एवम्, अपरे = अन्ये, स्वाध्यायज्ञानयज्ञाः च = वेदाध्ययनम् एव यज्ञः येषां तादृशाः च, संशितव्रताः = तीक्ष्णव्रताः, यतयः = नियमशीलाः (भवन्ति) ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
द्रव्ययज्ञाः	अ. पुं. प्र. बहु. (विशेषणम्)	तपोयज्ञाः	अ. पुं. प्र. बहु. (विशेषणम्)
योगयज्ञाः	अ. पुं. प्र. बहु. (विशेषणम्)	तथा	अव्ययम्
अपरे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)	स्वाध्यायज्ञानयज्ञाः	अ. पुं. प्र. बहु. (विशेषणम्)
च	अव्ययम्	संशितव्रताः	अ. पुं. प्र. बहु.
यतयः	इ. पुं. प्र. बहु. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	द्रव्ययज्ञास्तपोयज्ञाः	द्रव्ययज्ञाः + तपोयज्ञाः	विसर्गसन्धिः (सकारः)।
	तपोयज्ञा योगयज्ञाः	तपोयज्ञाः + योगयज्ञाः	विसर्गसन्धिः (लोपः)।
	योगयज्ञास्तथा	योगयज्ञाः + तथा	विसर्गसन्धिः (सकारः)।
	तथापरे	तथा + अपरे	सवर्णदीर्घसन्धिः।
	स्वाध्यायज्ञानयज्ञाश्च	स्वाध्यायज्ञानयज्ञाः + च	विसर्गसन्धिः, (सकारः) श्चुत्वम्।
(ख) समासः	द्रव्ययज्ञाः	द्रव्यम् एव यज्ञः येषां ते द्रव्ययज्ञाः - बहुव्रीहिः।	
	तपोयज्ञाः	तपः एव यज्ञः येषां ते तपोयज्ञाः - बहुव्रीहिः।	
	योगयज्ञाः	योगः एव यज्ञः येषां ते योगयज्ञाः - बहुव्रीहिः।	
	स्वाध्यायज्ञानयज्ञाः	स्वाध्यायस्य ज्ञानम्, स्वाध्याय ज्ञानम् - षष्ठीतत्पुरुषः। स्वाध्यायज्ञानम् एव यज्ञः येषां ते स्वाध्यायज्ञानयज्ञाः - बहुव्रीहिः।	
	संशितव्रताः	संशितं व्रतं येषां ते संशितव्रताः - बहुव्रीहिः।	
(ग) कृदन्तः	योगः	युज् (युजिर् - योगे) + घञ्।	
	स्वाध्यायः	सु + आङ् + अधि + इ (इङ् - अध्ययने) + घञ् (भावे)।	
	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट्।	
	यतयः	यम् (यम - उपरमे) + क्तिन्।	

भावस्पष्टीकरणम् -

भवन्ति। (अध्याहृतम्)	
के भवन्ति ?	**यतयः** भवन्ति।
कीदृशाः यतयः भवन्ति ?	**संशितव्रताः** यतयः भवन्ति।
संशितव्रताः (केचन) यतयः **कीदृशाः** भवन्ति।	संशितव्रताः केचन यतयः **द्रव्ययज्ञाः** भवन्ति।
संशितव्रताः केचन यतयः द्रव्ययज्ञाः, (अन्ये) **कीदृशाः** भवन्ति ?	संशितव्रताः केचन यतयः द्रव्ययज्ञाः अन्ये **तपोयज्ञाः** भवन्ति।
संशितव्रताः केचन यतयः द्रव्ययज्ञाः, अन्ये तपोयज्ञाः, तथा अपरे **कीदृशाः** भवन्ति ?	संशितव्रताः केचन यतयः द्रव्ययज्ञाः, अन्ये तपोयज्ञाः, **तथा अपरे योगयज्ञाः** भवन्ति।
संशितव्रताः केचन यतयः द्रव्ययज्ञाः, अन्ये तपोयज्ञाः, तथा अपरे योगयज्ञाः, (अन्ये पुनः) **कीदृशाः** भवन्ति ?	संशितव्रताः केचन यतयः द्रव्ययज्ञाः, अन्ये तपोयज्ञाः, तथा अपरे योगयज्ञाः, अन्ये पुनः **स्वाध्यायज्ञानयज्ञाः च** भवन्ति।

तात्पर्यम् - केचन शिवार्पणबुद्ध्या लोकोद्धाराय द्रव्याणि उपयुञ्जते। अन्ये स्वधर्मपालनरूपं तपोयज्ञं कुर्वन्ति। केचन

चित्तवृत्तिनिरोधार्थं प्राणायामादिस्वरूपं यज्ञम् आचरन्ति। अन्ये कठिनव्रताः भगवत्साक्षात्कारविषययुक्तं वेदाध्ययन-शास्त्रज्ञानरूपयज्ञं निर्वहन्ति।

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥४.२९॥

पदच्छेदः - अपाने, जुह्वति, प्राणम्, प्राणे, अपानम्, तथा, अपरे।
प्राणापानगती, रुद्ध्वा, प्राणायामपरायणाः ॥

अन्वयः - प्राणायामपरायणाः अपरे प्राणापानगती रुद्ध्वा प्राणम् अपाने जुह्वति, तथा प्राणे अपानं जुह्वति।

पदार्थः - प्राणायामपरायणाः = प्राणायामतत्पराः, अपरे = इतरे, प्राणापानगती = प्राणापानवायुगमने, रुद्ध्वा = निरुध्य (कुम्भकः), प्राणम् = प्राणवायुम् (पूरकः), अपाने = अपानवायौ, जुह्वति = समर्पयन्ति, तथा = एवम्, प्राणे = प्राणवायौ, अपानम् = अपानवायुम्, जुह्वति = समर्पयन्ति (रेचकः)।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
प्राणायामपरायणाः	अ. पुं. प्र. बहु. (विशेषणम्)	अपरे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)
प्राणापानगती	इ. स्त्री. द्वि. द्विव.	रुद्ध्वा	क्त्वान्तम् अव्ययम्
प्राणम्	अ. पुं. द्वि. एक.	अपाने	अ. पुं. स. एक.
जुह्वति	हु (हु दानादनयोः) पर. कर्तरि लट्. प्रपु. बहु.	तथा	अव्ययम्
प्राणे	अ. पुं. स. एक.	अपानम्	अ. पुं. द्वि. एक.

व्याकरणम् -

(क) सन्धिः प्राणेऽपानम् — प्राणे + अपानम् — पूर्वरूपसन्धिः।
तथापरे — तथा + अपरे — सवर्णदीर्घसन्धिः।

(ख) समासः प्राणापानगती — प्राणश्च अपानश्च प्राणापानौ - द्वन्द्वः। प्राणापानयोः गती प्राणापानगती, ते - षष्ठीतत्पुरुषः।
प्राणायामपरायणाः — प्राणायामः परायणं येषां ते प्राणायामपरायणाः - बहुव्रीहिः।

(ग) कृदन्तः अपाने — अप + अन् (अन - प्राणने) अच् (पचाद्यच्), तस्मिन्।
प्राणम् — प्र + अन् (अन - प्राणने) अच् (पचाद्यच्), तम्।
प्राणिति अनेन इति करणे घञ् वा।
गतिः — गम् (गम्लृ - गतौ) + क्तिन्।

रुद्ध्वा	रुध् (रुधिर् - आवरणे) + क्त्वा ।
प्राणायामः	प्र + अन् +आङ् + यम् (यम - उपरमे), घञ् ।

भावस्पष्टीकरणम् -

जुह्वति ।	
के जुह्वति ?	**अपरे** जुह्वति ।
कीदृशाः अपरे जुह्वति ?	**प्राणायामपरायणाः** अपरे जुह्वति ।
प्राणायामपरायणाः अपरे **कं** जुह्वति ?	प्राणायामपरायणाः अपरे **प्राणं** जुह्वति ।
प्राणायामपरायणाः अपरे प्राणं **कुत्र** जुह्वति ?	प्राणायामपरायणाः अपरे प्राणम् **अपाने** जुह्वति ।
प्राणायामपरायणाः अपरे प्राणम् अपाने जुह्वति, **तथा अन्यत् किं कुर्वन्ति** ?	प्राणायामपरायणाः अपरे प्राणम् अपाने जुह्वति, **तथा अपानं जुह्वति** ।
प्राणायामपरायणाः अपरे प्राणम् अपाने जुह्वति, तथा अपानं **कुत्र** जुह्वति ?	प्राणायामपरायणाः अपरे प्राणम् अपाने जुह्वति, तथा अपानं **प्राणे** जुह्वति ।
प्राणायामपरायणाः अपरे **किं कृत्वा** प्राणम् अपाने जुह्वति, तथा अपानं प्राणे जुह्वति ?	प्राणायामपरायणाः अपरे **रुद्ध्वा** प्राणम् अपाने जुह्वति, तथा अपानं प्राणे जुह्वति ।
प्राणायामपरायणाः अपरे **के** रुद्ध्वा प्राणम् अपाने जुह्वति, तथा अपानं प्राणे जुह्वति ?	प्राणायामपरायणाः अपरे **प्राणापानगती** रुद्ध्वा प्राणम् अपाने जुह्वति, तथा अपानं प्राणे जुह्वति ।

तात्पर्यम् - केचन प्राणायामपरायणाः योगिनः अपानवायौ प्राणवायुं समर्पयन्ति। इतरे प्राणवायौ अपानवायुं समर्पयन्ति। एवं प्रकारेण कुम्भक-रेचक-पूरकादिक्रमेण प्राणायामं कुर्वन्तः आत्मसंयमनं कुर्वन्ति ।

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥४.३०॥

पदच्छेदः - अपरे, नियताहाराः, प्राणान्, प्राणेषु, जुह्वति ।
सर्वे, अपि, एते, यज्ञविदः, यज्ञक्षपितकल्मषाः ॥

अन्वयः - अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति । एते सर्वे अपि यज्ञविदः यज्ञक्षपितकल्मषाः ।

पदार्थः - अपरे = अन्ये, नियताहाराः = परमिताहाराः, प्राणान् = प्राणवायून्, प्राणेषु = प्राणेषु, जुह्वति = क्षिपन्ति, एते = इमे, सर्वे अपि = समे अपि, यज्ञविदः = यज्ञवेत्तारः, यज्ञक्षपितकल्मषाः = यज्ञविनाशितपापाः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अपरे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)	नियताहाराः	अ. पुं. प्र. बहु. (विशेषणम्)
प्राणान्	अ. पुं. द्वि. बहु.	प्राणेषु	अ. पुं. स. बहु.
जुह्वति	हु (हु - दानादनयोः) पर. कर्तरि लट्. प्रपु. बहु.	एते	एतद्- द. सर्व. पुं. प्र. बहु.
सर्वे	अ. सर्व. पुं. प्र. बहु.	अपि	अव्ययम्
यज्ञविदः	यज्ञविद्- द. पुं. प्र. बहु. (विशेष्यम्)	यज्ञक्षपितकल्मषाः	अ. पुं. प्र. बहु. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः सर्वेऽपि — सर्वे + अपि — पूर्वरूपसन्धिः।

अप्येते — अपि + एते — यण्सन्धिः।

यज्ञविदो यज्ञक्षपितकल्मषाः — यज्ञविदः + यज्ञक्षपितकल्मषाः — विसर्गसन्धिः, (सकारः) रेफः, उकारः, गुणः।

(ख) समासः यज्ञविदः — यज्ञं वेत्ति इति यज्ञवित् - कर्तरि क्विप् उपपद-समासः।

यज्ञक्षपितकल्मषाः — यज्ञेन क्षपितं यज्ञक्षपितम् - तृतीयातत्पुरुषः, यज्ञक्षपितं कल्मषं येषां ते यज्ञक्षपितकल्मषाः - बहुव्रीहिः।

(ग) कृदन्तः नियतः — नि + यम् (यम - उपरमे) + क्त (कर्तरि)।

आहारः — आङ् + हृ (हृञ् - हरणे) + घञ्।

प्राणान् — प्र + + अन् (अन - प्राणने) अच् (पचाद्यच्), तान्।

भावस्पष्टीकरणम् -

जुह्वति।	
के जुह्वति ?	**अपरे** जुह्वति।
अपरे **कीदृशाः** जुह्वति ?	अपरे **नियताहाराः** जुह्वति।
अपरे नियताहाराः **कान्** जुह्वति ?	अपरे नियताहाराः **प्राणान्** जुह्वति।
अपरे नियताहाराः **केषु** प्राणान् जुह्वति ?	अपरे नियताहाराः **प्राणेषु** प्राणान् जुह्वति।
यज्ञक्षपितकल्मषाः।	

के यज्ञक्षपितकल्मषाः ?	**एते** यज्ञक्षपितकल्मषाः ।
कति एते यज्ञक्षपितकल्मषाः ?	**सर्वेऽपि** एते यज्ञक्षपितकल्मषाः ।
सर्वेऽपि एते **कीदृशाः** यज्ञक्षपितकल्मषाः ?	सर्वेऽपि एते **यज्ञविदः** यज्ञक्षपितकल्मषाः ।

तात्पर्यम् - अन्ये योगिनः नियताहारं सेवमानाः प्राणायामपरायणाः अपादानादिगतिं रुद्ध्वा प्राणान् प्राणेषु जुह्वति ।

यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥४.३१॥

पदच्छेदः - यज्ञशिष्टामृतभुजः, यान्ति, ब्रह्म, सनातनम् ।
न, अयम्, लोकः, अस्ति, अयज्ञस्य, कुतः, अन्यः, कुरुसत्तम ॥

अन्वयः - कुरुसत्तम ! यज्ञशिष्टामृतभुजः सनातनं ब्रह्म यान्ति । अयज्ञस्य अयं लोकः नास्ति । अन्यः कुतः ।

पदार्थः - कुरुसत्तम = कुरुश्रेष्ठ ! यज्ञशिष्टामृतभुजः = यज्ञे सुधातुल्यं शिष्टं भुञ्जानाः, सनातनम् = शाश्वतम्, ब्रह्म = परमात्मानम्, यान्ति = प्राप्नुवन्ति, अयज्ञस्य = यज्ञहीनस्य, अयं लोकः = एषः भूलोकः, नास्ति = न विद्यते, अन्यः = परलोकः, कुतः = कथम् ? (भवति)

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कुरुसत्तम	अ. पुं. सम्बो. एक.	यज्ञशिष्टामृतभुजः	यज्ञशिष्टामृतभुज्- ज. पुं. प्र. बहु. (विशेषणम्)
सनातनम्	अ. नपुं. द्वि. एक. (विशेषणम्)	ब्रह्म	ब्रह्मन्- न. नपुं. द्वि. एक. (विशेष्यम्)
यान्ति	या (या - प्रापणे) पर. कर्तरि लट्. प्रपु. बहु.	अयज्ञस्य	अ. पुं. ष. एक. (विशेषणम्)
अयम्	इदम्- म. सर्व. पुं. प्र. एक. (विशेषणम्)	लोकः	अ. पुं. प्र. एक. (विशेष्यम्)
अन्यः	अ. सर्व. पुं. प्र. एक. (विशेषणम्)	कुतः	अव्ययम्

व्याकरणम् -

(क) सन्धिः	यज्ञशिष्टामृतभुजो यान्ति	यज्ञशिष्टामृतभुजः + यान्ति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	नायम्	न + अयम्	सवर्णदीर्घसन्धिः ।

	लोकोऽस्ति	लोकः + अस्ति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	अस्त्ययज्ञस्य	अस्ति + अयज्ञस्य	यण्सन्धिः।
	कुतोऽन्यः	कुतः + अन्यः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।

(ख) समासः	यज्ञशिष्टामृतभुजः	यज्ञस्य शिष्टम्, यज्ञशिष्टम् - षष्ठीतत्पुरुषः। यज्ञशिष्टम् एव अमृतम् यज्ञशिष्टामृतम् - कर्मधारयः। यज्ञशिष्टामृतं भुञ्जते इति यज्ञशिष्टामृतभुजः - कर्तरि क्विप् उपपदसमासश्च।
	अयज्ञस्य	न विद्यते यज्ञः यस्य सः अयज्ञः, तस्य - नञ्बहुव्रीहिः।
(ग) कृदन्तः	शिष्टः	शिष् (शिष्लृ - विशेषणे) + क्त (कर्तरि)।
	अमृतम्	मृ (मृङ् - प्राणत्यागे) + क्त (कर्तरि)।
	लोकः	लोक् (लोकृ - दर्शने) + घञ्।
(घ) तद्धितान्तः	सनातनम्	सना + ट्युल् (भव इत्यर्थे)। सदा भवम् इत्यर्थः।
	कुतः	किम् + तसिल्।
	कुरुसत्तमः	कुरु + सत् + तमप् (अतिशयेन) बहुषु अन्यतमः।

भावस्पष्टीकरणम् -

यान्ति।	
किं यान्ति ?	**ब्रह्म** यान्ति।
कीदृशं ब्रह्म यान्ति ?	**सनातनं** ब्रह्म यान्ति।
के सनातनं ब्रह्म यान्ति ?	**यज्ञशिष्टामृतभुजः** सनातनं ब्रह्म यान्ति।
नास्ति।	
कः नास्ति ?	**लोकः** नास्ति।
कः लोकः नास्ति ?	**अयं** लोकः नास्ति।
कस्य अयं लोकः नास्ति ?	**अयज्ञस्य** अयं लोकः नास्ति।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कुरुसत्तम !**

तात्पर्यम् - अर्जुन ! यज्ञस्य अमृततुल्यं शिष्टं सेवमानाः योगिनः सनातनं परं ब्रह्म प्राप्नुवन्ति। तथा ये न यजन्ते तेषाम् अस्मिन् लोके अपि सुखं नास्ति। किं पुनः परलोके ?

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥४.३२॥

पदच्छेदः - एवम्, बहुविधाः, यज्ञाः, विततः, ब्रह्मणः, मुखे ।
कर्मजान्, विद्धि, तान्, सर्वान्, एवम्, ज्ञात्वा, विमोक्ष्यसे ॥

अन्वयः - एवं बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः । तान् सर्वान् कर्मजान् विद्धि । एवं ज्ञात्वा विमोक्ष्यसे ।

पदार्थः - एवम् = इत्थम्, बहुविधाः = नैकप्रकाराः, यज्ञाः = यागाः, ब्रह्मणः = वेदस्य, मुखे = आदौ, विततः = विवृताः, तान् सर्वान् = तान् सकलान्, कर्मजान् = कर्मोद्भवान्, विद्धि = जानीहि, एवम् = इत्थम्, ज्ञात्वा = बुद्ध्वा, विमोक्ष्यसे = मोक्षं प्राप्स्यसि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
एवम्	अव्ययम्	बहुविधाः	अ. पुं. प्र. बहु. (विशेषणम्)
यज्ञाः	अ. पुं. प्र. बहु. (विशेष्यम्)	ब्रह्मणः	ब्रह्मन्- न. नपुं. ष. एक.
मुखे	अ. नपुं. स. एक.	विततः	अ. पुं. प्र. बहु. (विशेषणम्)
तान्	तद्- द. सर्व. पुं. द्वि. बहु. (विशेषणम्)	सर्वान्	अ. सर्व. पुं. द्वि. बहु. (विशेषणम्)
कर्मजान्	अ. पुं. द्वि. बहु. (विशेषणम्)	विद्धि	विद् (विद - ज्ञाने) पर. कर्तरि लोट्. मपु. एक.
ज्ञात्वा	क्त्वान्तम् अव्ययम्	विमोक्ष्यसे	वि + मुच् (मुच्लृ - मोक्षणे) आत्म. कर्तरि लृट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	बहुविधा यज्ञाः	बहुविधाः + यज्ञाः	विसर्गसन्धिः (लोपः) ।
	यज्ञा विततः	यज्ञाः + विततः	विसर्गसन्धिः (लोपः) ।
	वितता ब्रह्मणः	विततः + ब्रह्मणः	विसर्गसन्धिः (लोपः) ।
	ब्रह्मणो मुखे	ब्रह्मणः + मुखे	विसर्गसन्धिः, (सकारः) रेफः, उकारः, गुणः ।
(ख) समासः	कर्मजान्	कर्मणः जायते इति कर्मजः, तान् - कर्तरि डप्रत्ययः उपपदसमासः ।	
(ग) कृदन्तः	विततः	वि + तन् (तनु - विस्तारे) + क्त (कर्मणि) ।	
	ज्ञात्वा	ज्ञा (ज्ञा - अवबोधने) + क्त्वा ।	

भावस्पष्टीकरणम् -

विततः ।	
कुत्र विततः ?	**मुखे** विततः ।
कस्य मुखे विततः ?	**ब्रह्मणः** मुखे विततः ।
के ब्रह्मणः मुखे विततः ?	**यज्ञाः** ब्रह्मणः मुखे विततः ।
कतिविधाः यज्ञाः ब्रह्मणः मुखे विततः ?	**बहुविधाः** यज्ञाः ब्रह्मणः मुखे विततः ।
कथं बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः ?	**एवं** बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः ।
एवं बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः । **तेन किं करणीयम् ।**	एवं बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः । **तेन विद्धि ।**
एवं बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः । **कान्** विद्धि ?	एवं बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः । **तान्** विद्धि ।
एवं बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः । तान् **कति** विद्धि ?	एवं बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः । तान् **सर्वान्** विद्धि ।
एवं बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः । तान् सर्वान् **कीदृशान्** विद्धि ?	एवं बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः । तान् सर्वान् **कर्मजान्** विद्धि ।
एवं बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः । तान् सर्वान् कर्मजान् विद्धि । **तेन मम किम्** ?	एवं बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः । तान् सर्वान् कर्मजान् विद्धि । **विमोक्ष्यसे** ।
एवं बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः । तान् सर्वान् कर्मजान् विद्धि । **किं कृत्वा** विमोक्ष्यसे ?	एवं बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः । तान् सर्वान् कर्मजान् विद्धि । **ज्ञात्वा** विमोक्ष्यसे ।
एवं बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः । तान् सर्वान् कर्मजान् विद्धि । **कथं** ज्ञात्वा विमोक्ष्यसे ?	एवं बहुविधाः यज्ञाः ब्रह्मणः मुखे विततः । तान् सर्वान् कर्मजान् विद्धि । **एवं** ज्ञात्वा विमोक्ष्यसे ।

तात्पर्यम् - एवम् अनेकप्रकारकाः यज्ञाः वेदस्य आदिमे भागे कर्मकाण्डे विवृताः सन्ति । तान् सर्वान् कर्मणः एव उत्पन्नान् अवगच्छ । यदि अनेन प्रकारेण यथार्थं जानासि तर्हि निष्कामकर्मयोगद्वारा संसारबन्धनात् मुक्तः भवसि ।

श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥४.३३॥

पदच्छेदः - श्रेयान्, द्रव्यमयात्, यज्ञात्, ज्ञानयज्ञः, परन्तप ।
सर्वम्, कर्म, अखिलम्, पार्थ, ज्ञाने, परिसमाप्यते ॥

अन्वयः - परन्तप ! द्रव्यमयात् यज्ञात् ज्ञानयज्ञः श्रेयान् । पार्थ ! सर्वं कर्म ज्ञाने अखिलं परिसमाप्यते ।

पदार्थः - परन्तप = शत्रुतापक ! द्रव्यमयात् = द्रव्यसाध्यात्, यज्ञात् = यागात्, ज्ञानयज्ञः = आत्मज्ञानरूपो यज्ञः, श्रेयान् = वरीयान्, पार्थ = अर्जुन ! सर्वम् = समस्तम्, कर्म = यज्ञरूपं कर्म, ज्ञाने = आत्मज्ञाने, अखिलम् = फलसहितम्, परिसमाप्यते = पर्यवस्यति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
परन्तप	अ. पुं. सम्बो. एक.	द्रव्यमयात्	अ. पुं. पं. एक.
यज्ञात्	अ. पुं. पं. एक.	ज्ञानयज्ञः	अ. पुं. प्र. एक. (विशेष्यम्)
श्रेयान्	श्रेयस्- सका. पुं. प्र. एक. (विशेषणम्)	पार्थ	अ. पुं. सम्बो. एक.
सर्वम्	अ. सर्व. नपुं. प्र. एक. (विशेषणम्)	कर्म	कर्मन्- न. नपुं. प्र. एक. (विशेष्यम्)
अखिलम्	अ. नपुं. प्र. एक. (विशेषणम्)	परिसमाप्यते	परि + सम् + आप् (आप्लृ - व्याप्तौ) पर. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः द्रव्यमयाद्यज्ञात् — द्रव्यमयात् + यज्ञात् — जश्त्वसन्धिः ।
यज्ञाज्ज्ञानयज्ञः — यज्ञात् + ज्ञानयज्ञः — जश्त्वसन्धिः, श्चुत्वसन्धिः ।
कर्माखिलम् — कर्म + अखिलम् — सवर्णदीर्घसन्धिः ।

(ख) समासः ज्ञानयज्ञः — ज्ञानम् एव यज्ञः ज्ञानयज्ञः - कर्मधारयः ।
परन्तप — परान् शत्रून् तापयति इति परन्तपः, तत्सम्बुद्धौ - कर्तरि खच् उपपदसमासः ।
अखिलम् — न खिलम् अखिलम् - नञ्तत्पुरुषः ।

(ग) कृदन्तः ज्ञाने — ज्ञा (ज्ञा - अवबोधने) + ल्युट्, तस्मिन् ।

(घ) तद्धितान्तः श्रेयान् — प्रशस्य + ईयसुन् (अतिशयार्थे) । श्र इति आदेशः ।
द्रव्यमयात् — द्रव्य + मयट् (स्वरूपार्थे) तस्मात् । द्रव्यस्वरूपः इत्यर्थः ।
पार्थ — पृथा + अण् (अपत्यार्थे), तत्सम्बुद्धौ पृथायाः अपत्यं पुमान् ।

भावस्पष्टीकरणम् -

श्रेयान् ।	
कः श्रेयान्	**ज्ञानयज्ञः श्रेयान् ।**
कस्मात् ज्ञानयज्ञः श्रेयान् ?	**यज्ञात् ज्ञानयज्ञः श्रेयान् ।**
कीदृशात् यज्ञात् ज्ञानयज्ञः श्रेयान् ?	**द्रव्यमयात् यज्ञात् ज्ञानयज्ञः श्रेयान् ।**

परिसमाप्यते।	
कथं परिसमाप्यते ?	**अखिलं** परिसमाप्यते।
कुत्र अखिलं परिसमाप्यते ?	**ज्ञाने** अखिलं परिसमाप्यते।
किं ज्ञाने अखिलं परिसमाप्यते	**कर्म** ज्ञाने अखिलं परिसमाप्यते।
कियत् कर्म ज्ञाने अखिलं परिसमाप्यते ?	**सर्वं** कर्म ज्ञाने अखिलं परिसमाप्यते।
अस्मिन् श्लोके सम्बोधनपदे के ?	**परन्तप, पार्थ !**

तात्पर्यम् - हे अर्जुन ! सांसारिकवस्तुभिः सिद्धात् यज्ञात् आत्मज्ञानरूपो यज्ञः श्रेष्ठः भवति। यतः सर्वाणि कर्माणि ज्ञाने एव परिसमाप्तिं गच्छन्ति, फलत्वात्।

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥४.३४॥

पदच्छेदः - तत्, विद्धि, प्रणिपातेन, परिप्रश्नेन, सेवया।
उपदेक्ष्यन्ति, ते, ज्ञानम्, ज्ञानिनः, तत्त्वदर्शिनः ॥

अन्वयः - तत् प्रणिपातेन परिप्रश्नेन सेवया च विद्धि। तत्त्वदर्शिनः ज्ञानिनः ते ज्ञानम् उपदेक्ष्यन्ति।

पदार्थः - तत् = ज्ञानम्, प्रणिपातेन = नमस्कारेण, परिप्रश्नेन = नानाविधया पृच्छया, सेवया (च) = शुश्रूषया च, विद्धि = जानीहि, तत्त्वदर्शिनः = यथार्थद्रष्टारः, ज्ञानिनः = आत्मज्ञानिनः, ते = तुभ्यम्, ज्ञानम् = आत्मज्ञानम्, उपदेक्ष्यन्ति = वदिष्यन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तत्	तद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	प्रणिपातेन	अ. पुं. तृ. एक.
परिप्रश्नेन	अ. पुं. तृ. एक.	सेवया	आ. स्त्री. तृ. एक.
विद्धि	विद् (विद ज्ञाने) पर. कर्तरि लोट्. मपु. एक.	तत्त्वदर्शिनः	तत्वदर्शिन्- न. पुं. प्र. बहु. (विशेषणम्)
ज्ञानिनः	ज्ञानिन्- न. पुं. प्र. बहु. (विशेष्यम्)	ते	युष्मद्- द. सर्व. च. एक.
ज्ञानम्	अ. नपुं. द्वि. एक.	उपदेक्ष्यन्ति	दिश् (दिश - अतिसर्जने) पर. कर्तरि लृट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः	तद्विद्धि	तत् + विद्धि	जश्त्वसन्धिः ।
	ज्ञानिनस्तत्वदर्शिनः	ज्ञानिनः + तत्वदर्शिनः	विसर्गसन्धिः (सकारः) ।
(ख) समासः	तत्त्वदर्शिनः	तत्त्वं पश्यन्ति इति तत्त्वदर्शिनः - ताच्छीलिके कर्तरि णिनिः उपपदसमासः ।	
(ग) कृदन्तः	प्रणिपातेन	प्र + नि + पत् (पत्लृ - गतौ), घञ्, तेन ।	
	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट् ।	
(घ) तद्धितान्तः	ज्ञानिनः	ज्ञान + इनि (मतुबर्थे) । ज्ञानम् एषाम् एषु वा अस्ति ।	

भावस्पष्टीकरणम् -

उपदेक्ष्यन्ति ।	
किम् उपदेक्ष्यन्ति ?	**ज्ञानम्** उपदेक्ष्यन्ति ।
के ज्ञानम् उपदेक्ष्यन्ति ?	**ज्ञानिनः** ज्ञानम् उपदेक्ष्यन्ति ।
कीदृशाः ज्ञानिनः ज्ञानम् उपदेक्ष्यन्ति ?	**तत्त्वदर्शिनः** ज्ञानिनः ज्ञानम् उपदेक्ष्यन्ति ।
तत्त्वदर्शिनः ज्ञानिनः **कस्मै** ज्ञानम् उपदेक्ष्यन्ति ?	तत्त्वदर्शिनः ज्ञानिनः **ते** ज्ञानम् उपदेक्ष्यन्ति ।
विद्धि ।	
केन विद्धि ?	**प्रणिपातेन** विद्धि ।
प्रणिपातेन, **पुनश्च केन** विद्धि ?	प्रणिपातेन, **परिप्रश्नेन** विद्धि ।
प्रणिपातेन, परिप्रश्नेन **पुनश्च कया** विद्धि ?	प्रणिपातेन, परिप्रश्नेन **सेवया च** विद्धि ।
किं प्रणिपातेन, परिप्रश्नेन सेवया च विद्धि ?	**तत्** प्रणिपातेन, परिप्रश्नेन सेवया च विद्धि ।

तात्पर्यम् - भवान् नमस्कारेण, किं सत्यम् ? किम् असत्यम् ? इत्यादिना नानाविधेन प्रश्नेन शुश्रूषया च तत् ज्ञानं प्राप्नोतु । तत्त्वं जानन्तः पुरुषाः भवते आत्मज्ञानम् उपदिशन्ति ।

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥४.३५॥

पदच्छेदः - यत्, ज्ञात्वा, न, पुनः, मोहम्, एवम्, यास्यसि, पाण्डव ।
येन, भूतानि, अशेषेण, द्रक्ष्यसि, आत्मनि, अथो, मयि ॥

अन्वयः - पाण्डव ! यत् ज्ञात्वा पुनः मोहम् एवं न यास्यसि । येन आत्मनि भूतानि अशेषेण द्रक्ष्यसि । अथो मयि । (तत् ज्ञानं तत्त्वदर्शिनः ते उपदेक्ष्यन्ति ।)

पदार्थः - पाण्डव = पाण्डुपत्र ! यत् ज्ञात्वा = यत् विज्ञाय, पुनः = भूयः, मोहम् = व्यामोहम्, एवम् = इत्थम्, न यास्यसि = न गमिष्यसि, येन = येन ज्ञानेन, आत्मनि = स्वस्मिन्, भूतानि = प्राणिनः, अशेषेण = समग्रम्, द्रक्ष्यसि = पश्यसि, अथो = अनन्तरम्, मयि = भगवति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पाण्डव	अ. पुं. सम्बो. एक.	यत्	यद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
ज्ञात्वा	क्त्वान्तम् अव्ययम्	पुनः	अव्ययम्
मोहम्	अ. पुं. द्वि. एक.	एवम्	अव्ययम्
न	अव्ययम्	यास्यसि	या (या प्रापणे) पर. कर्तरि लृट्. मपु. एक.
येन	यद्- द. सर्व. नपुं. तृ. एक. (विशेषणम्)	आत्मनि	आत्मन्- न. पुं. स. एक.
भूतानि	अ. नपुं. द्वि. बहु.	अशेषेण	अ. नपुं. तृ. एक.
द्रक्ष्यसि	दृश् (दृशिर् - प्रेक्षणे) पर. कर्तरि लृट्. मपु. एक.	अथो	अव्ययम्
मयि	अस्मद्- द. सर्व. स. एक.		

व्याकरणम् -

(क) सन्धिः	यज्ज्ञात्वा	यत् + ज्ञात्वा	श्चुत्वसन्धिः, जश्त्वसन्धिः ।
	पुनर्मोहम्	पुनः + मोहम्	विसर्गसन्धिः (रेफः) ।
	भूतान्यशेषेण	भूतानि + अशेषेण	यण्सन्धिः ।
	द्रक्ष्यस्यात्मनि	द्रक्ष्यसि + आत्मनि	यण्सन्धिः ।
(ख) समासः	अशेषेण	न शेषः अशेषः, तेन - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	ज्ञात्वा	ज्ञा (ज्ञा - अवबोधने) + क्त्वा ।	
	मोहम्	मुह् (मुह - वैचित्त्ये) + घञ्, तम् ।	
	भूतानि	भू (भू - सत्तायाम्) + क्त (कर्तरि), तानि ।	
(घ) तद्धितान्तः	पाण्डव	पाण्डु + अण् (अपत्यार्थे) तत्सम्बुद्धौ, पाण्डोः अपत्यं पुमान् ।	

भावस्पष्टीकरणम् -

न यास्यसि ।	
कं न यास्यसि ?	**पुनः मोहं न यास्यसि ।**

किं कृत्वा पुनः मोहं न यास्यसि ?	**ज्ञात्वा** पुनः मोहं न यास्यसि ।
ज्ञात्वा पुनः मोहं **कथं** न यास्यसि ?	ज्ञात्वा पुनः मोहम् **एवं** न यास्यसि ।
द्रक्ष्यसि ।	
कानि द्रक्ष्यसि ?	**भूतानि** द्रक्ष्यसि ।
भूतानि **कुत्र** द्रक्ष्यसि ?	भूतानि **आत्मनि** द्रक्ष्यसि ।
भूतानि आत्मनि **कथं** द्रक्ष्यसि ?	भूतानि आत्मनि **अशेषेण** द्रक्ष्यसि ।
भूतानि आत्मनि **अथो कुत्र** अशेषेण द्रक्ष्यसि ?	भूतानि आत्मनि **अथो मयि** अशेषेण द्रक्ष्यसि ।
केन भूतानि आत्मनि अथो मयि अशेषेण द्रक्ष्यसि ?	**येन** भूतानि आत्मनि अथो मयि अशेषेण द्रक्ष्यसि ।
यत् ज्ञात्वा पुनः मोहम् एवं न यास्यसि, **येन** भूतानि आत्मनि अथो मयि अशेषेण द्रक्ष्यसि तादृशं **किम्** ?	**यत्** ज्ञात्वा पुनः मोहम् एवं न यास्यसि, **येन** भूतानि आत्मनि अथो मयि अशेषेण द्रक्ष्यसि तादृशं **ज्ञानम्** ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पाण्डव !**

तात्पर्यम् - अर्जुन ! येन ज्ञानेन भवान् पुनः एतादृशं मोहजालं न आप्नोति, येन आत्मज्ञानेन समवायबुद्ध्या स्वस्मिन् मयि च सर्वान् जीवान् द्रष्टुं शक्नोति तादृशं ज्ञानं तत्त्वदर्शिनः ते उपदेक्ष्यन्ति ।

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥४.३६॥

पदच्छेदः - अपि, चेत्, असि, पापेभ्यः, सर्वेभ्यः, पापकृत्तमः ।
सर्वम्, ज्ञानप्लवेन, एव, वृजिनम्, सन्तरिष्यसि ॥

अन्वयः - अपि चेत् सर्वेभ्यः पापेभ्यः पापकृत्तमः असि (तदा) सर्वं वृजिनं ज्ञानप्लवेन एव सन्तरिष्यसि ।

पदार्थः - अपि चेत् = यदि पुनः, सर्वेभ्यः = सकलेभ्यः, पापेभ्यः = पापकारिभ्यः, पापकृत्तमः = पापिष्ठः, असि = भवसि, (तदा) सर्वम् = तदा समस्तम्, वृजिनम् = पापम्, ज्ञानप्लवेन एव = ज्ञानोडुपेन एव, सन्तरिष्यसि = अतिक्रमिष्यसि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अपि	अव्ययम्	चेत्	अव्ययम्
सर्वेभ्यः	अ. सर्व. पुं. पं. बहु. (विशेषणम्)	पापेभ्यः	अ. नपुं. पं. बहु. (विशेष्यम्)

पापकृत्तमः	अ. पुं. प्र. एक. (विशेषणम्)	असि	अस् (अस भुवि) पर. कर्तरि लट्. मपु. एक.
सर्वम्	अ. सर्व. नपुं. द्वि. एक. (विशेषणम्)	वृजिनम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
ज्ञानप्लवेन	अ. पुं. तृ. एक.	एव	अव्ययम्
सन्तरिष्यसि	सम् + तॄ (तॄ प्लवनसन्तरणयोः) पर. कर्तरि लृट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः	चेदसि	चेत् + असि	जश्त्वसन्धिः।
	ज्ञानप्लवेनैव	ज्ञानप्लवेन + एव	वृद्धिसन्धिः।
(ख) समासः	ज्ञानप्लवेन	ज्ञानम् एव प्लवः ज्ञानप्लवः, तेन - कर्मधारयः।	
(ग) कृदन्तः	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट्।	
	प्लवः	प्लु (प्लुङ् - गतौ) + अप्।	
(घ) तद्धितान्तः	पापकृत्तमः	पापकृत् + तमप् (अतिशये)। अतिशयेन पापकृत् इत्यर्थः।	

भावस्पष्टीकरणम् -

असि।	
कीदृशः असि ?	**पापकृत्तमः** असि।
केभ्यः पापकृत्तमः असि ?	**पापेभ्यः** पापकृत्तमः असि।
कतिभ्यः पापेभ्यः पापकृत्तमः असि ?	**सर्वेभ्यः** पापेभ्यः पापकृत्तमः असि।
अपि चेत् सर्वेभ्यः पापेभ्यः पापकृत्तमः असि **(तदा) किं करिष्यसि** ?	अपि चेत् सर्वेभ्यः पापेभ्यः पापकृत्तमः असि **(तदा) सन्तरिष्यसि।**
अपि चेत् सर्वेभ्यः पापेभ्यः पापकृत्तमः असि तदा **किं** सन्तरिष्यसि ?	अपि चेत् सर्वेभ्यः पापेभ्यः पापकृत्तमः असि तदा **वृजिनं** सन्तरिष्यसि।
अपि चेत् सर्वेभ्यः पापेभ्यः पापकृत्तमः असि तदा **कियत्** वृजिनं सन्तरिष्यसि ?	अपि चेत् सर्वेभ्यः पापेभ्यः पापकृत्तमः असि तदा **सर्वं** वृजिनं सन्तरिष्यसि।
अपि चेत् सर्वेभ्यः पापेभ्यः पापकृत्तमः असि तदा सर्वं वृजिनं **केन** सन्तरिष्यसि ?	अपि चेत् सर्वेभ्यः पापेभ्यः पापकृत्तमः असि तदा सर्वं वृजिनं **ज्ञानप्लवेनैव** सन्तरिष्यसि।

तात्पर्यम् - भवान् सर्वेषां पापिनाम् अपेक्षया अधिकं पापं कृतवान् चेदपि ज्ञानरूपया नौकया निस्सन्देहं तं पापरूपं समुद्रं तरिष्यति ।

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥४.३७॥

पदच्छेदः - यथा, एधांसि, समिद्धः, अग्निः, भस्मसात्, कुरुते, अर्जुन ।
ज्ञानाग्निः, सर्वकर्माणि, भस्मसात्, कुरुते, तथा ॥

अन्वयः - अर्जुन ! यथा समिद्धः अग्निः एधांसि भस्मसात् कुरुते तथा ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते ।

पदार्थः - अर्जुन = अर्जुन ! यथा = येन प्रकारेण, समिद्धः = सन्दीप्तः, अग्निः = वह्निः, एधांसि = काष्ठानि, भस्मसात् = भस्ममयानि, कुरुते = करोति, तथा = तेन प्रकारेण, ज्ञानाग्निः = ज्ञानरूपः अग्निः, सर्वकर्माणि = निखिलकर्माणि, भस्मसात् = भस्ममयानि, कुरुते = विदधाति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुन	अ. पुं. सम्बो. एक.	यथा	अव्ययम्
समिद्धः	अ. पुं. प्र. एक. (विशेषणम्)	अग्निः	इ. पुं. प्र. एक. (विशेष्यम्)
एधांसि	एधस्- सका. नपुं. द्वि. बहु.	भस्मसात्	अव्ययम्
कुरुते	कृ (डुकृञ् करणे) आत्म. कर्तरि लट्. प्रपु. एक.	तथा	अव्ययम्
ज्ञानाग्निः	इ. पुं. प्र. एक.	सर्वकर्माणि	सर्वकर्मन्- न. नपुं. द्वि. बहु.

व्याकरणम् -

(क) सन्धिः	यथैधांसि	यथा + एधांसि	वृद्धिसन्धिः ।
	समिद्धोऽग्निः	समिद्धः + अग्निः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
	अग्निर्भस्मसात्	अग्निः + भस्मसात्	विसर्गसन्धिः (रेफः) ।
	कुरुतेऽर्जुन	कुरुते + अर्जुन	पूर्वरूपसन्धिः ।
(ख) समासः	ज्ञानाग्निः	ज्ञानम् एव अग्निः ज्ञानाग्निः - कर्मधारयः ।	
	सर्वकर्माणि	सर्वाणि कर्माणि सर्वकर्माणि - कर्मधारयः ।	
(ग) कृदन्तः	समिद्धः	सम् + इन्ध् (ञिइन्धी - दीप्तौ) + क्त (कर्तरि) ।	
	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) +ल्युट् ।	

भावस्पष्टीकरणम् -

कुरुते ।	
किं कुरुते ?	**भस्मसात्** कुरुते ।
कानि भस्मसात् कुरुते ?	**एधांसि** भस्मसात् कुरुते ।
कः एधांसि भस्मसात् कुरुते ?	**अग्निः** एधांसि भस्मसात् कुरुते ।
कथम्भूतः अग्निः एधांसि भस्मसात् कुरुते ?	**समिद्धः** अग्निः एधांसि भस्मसात् कुरुते ।
यथा समिद्धः अग्निः एधांसि भस्मसात् कुरुते **तथा किं भवति** ?	यथा समिद्धः अग्निः एधांसि भस्मसात् कुरुते **तथा कुरुते** ।
यथा समिद्धः अग्निः एधांसि भस्मसात् कुरुते तथा **कः** कुरुते ?	यथा समिद्धः अग्निः एधांसि भस्मसात् कुरुते तथा **ज्ञानाग्निः** कुरुते ।
यथा समिद्धः अग्निः एधांसि भस्मसात् कुरुते तथा ज्ञानाग्निः **किं** कुरुते ?	यथा समिद्धः अग्निः एधांसि भस्मसात् कुरुते तथा ज्ञानाग्निः **भस्मसात्** कुरुते ।
यथा समिद्धः अग्निः एधांसि भस्मसात् कुरुते तथा ज्ञानाग्निः **कानि** भस्मसात् कुरुते ?	यथा समिद्धः अग्निः एधांसि भस्मसात् कुरुते तथा ज्ञानाग्निः **सर्वकर्माणि** भस्मसात् कुरुते ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अर्जुन** !

तात्पर्यम् - अर्जुन ! यथा प्रज्वलन् अग्निः काष्ठानि भस्मसात् करोति तथा ज्ञानाग्निः सर्वाण्यपि कर्माणि भस्मीकरोति ।

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥४.३८॥

पदच्छेदः - न, हि, ज्ञानेन, सदृशम्, पवित्रम्, इह, विद्यते ।
तत्, स्वयम्, योगसंसिद्धः, कालेन, आत्मनि, विन्दति ॥

अन्वयः - ज्ञानेन सदृशं पवित्रम् इह न हि विद्यते । तत् स्वयं योगसंसिद्धः कालेन आत्मनि विन्दति ।

पदार्थः - ज्ञानेन = ब्रह्मज्ञानेन, सदृशम् = तुल्यम्, पवित्रम् = पावनम्, इह = अत्र, नहि विद्यते = नास्ति तत् = ज्ञानम्, स्वयम् = आत्मना एव, योगसंसिद्धः = समाधिनिष्ठः, कालेन = महता समयेन, आत्मनि = स्वस्मिन्, विन्दति = लभते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ज्ञानेन	अ. नपुं. तृ. एक.	सदृशम्	अव्ययम्
पवित्रम्	अ. नपुं. प्र. एक.	इह	अव्ययम्
न	अव्ययम्	हि	अव्ययम्
विद्यते	विद् (विद - सत्तायाम्) आत्म. कर्तरि लट्. प्रपु. एक.	तत्	तद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)
स्वयम्	अव्ययम्	योगसंसिद्धः	अ. पुं. प्र. एक. (विशेषणम्)
कालेन	अ. पुं. तृ. एक.	आत्मनि	आत्मन्- न. पुं. स. एक.
विन्दति	विद् (विद्लृ लाभे) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	कालेनात्मनि	कालेन + आत्मनि	सवर्णदीर्घसन्धिः ।
(ख) समासः	योगसंसिद्धः	योगेन संसिद्धः योगसंसिद्धः - तृतीयातत्पुरुषः ।	
(ग) कृदन्तः	ज्ञानेन	ज्ञा (ज्ञा - अवबोधने) + ल्युट्, तेन ।	
	पवित्रम्	पू (पूञ् - पवने) + इत्र ।	
	संसिद्धः	सम् + सिध् (षिधु - संराद्धौ) + क्त (कर्तरि) ।	
	कालेन	कल् (कल - संख्याने) + अच् (पचाद्यच्), तेन ।	

भावस्पष्टीकरणम् -

न विद्यते ।	
किं न विद्यते ?	**पवित्रं** न विद्यते ।
कीदृशं पवित्रं न विद्यते ?	**सदृशं** पवित्रं न विद्यते ।
केन सदृशं पवित्रं न विद्यते ?	**ज्ञानेन** सदृशं पवित्रं न विद्यते ।
ज्ञानेन सदृशं पवित्रं **कुत्र** न विद्यते ?	ज्ञानेन सदृशं पवित्रम् **इह** न विद्यते ।
ज्ञानेन सदृशं पवित्रम् इह न विद्यते । तत् **कथं (केन)** विन्दति ?	ज्ञानेन सदृशं पवित्रम् इह न विद्यते तत् **कालेन** विन्दति ।
ज्ञानेन सदृशं पवित्रम् इह न विद्यते **कीदृशः** तत् कालेन विन्दति ?	ज्ञानेन सदृशं पवित्रम् इह न विद्यते **योगसंसिद्धः** तत् कालेन विन्दति ।

ज्ञानेन सदृशं पवित्रम् इह न विद्यते तत् **केन** योगसंसिद्धः कालेन विन्दति ?	ज्ञानेन सदृशं पवित्रम् इह न विद्यते तत् **स्वयं** योगसंसिद्धः कालेन विन्दति ।
ज्ञानेन सदृशं पवित्रम् इह न विद्यते तत् स्वयं योगसंसिद्धः कालेन **कुत्र** विन्दति ?	ज्ञानेन सदृशं पवित्रम् इह न विद्यते तत् स्वयं योगसंसिद्धः कालेन **आत्मनि** विन्दति ।

तात्पर्यम् - इह लोके ज्ञानेन समं पवित्रम् अन्यत् न किञ्चित् विद्यते । फलापेक्षां विना कर्म कुर्वन् पुरुषः गच्छता कालेन चित्तशुद्धिम् अवाप्य स्वयमेव आत्मनि तत् ज्ञानं प्राप्नोति ।

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥४.३९॥

पदच्छेदः - श्रद्धावान्, लभते, ज्ञानम्, तत्परः, संयतेन्द्रियः ।
ज्ञानम्, लब्ध्वा, पराम्, शान्तिम्, अचिरेण, अधिगच्छति ॥

अन्वयः - संयतेन्द्रियः तत्परः श्रद्धावान् ज्ञानं लभते । ज्ञानं लब्ध्वा अचिरेण परां शान्तिम् अधिगच्छति ।

पदार्थः - संयतेन्द्रियः = जितेन्द्रियः, तत्परः = ज्ञानपरः, श्रद्धावान् = आस्थावान्, ज्ञानम् = आत्मज्ञानम्, लभते = प्राप्नोति, ज्ञानम् = आत्मज्ञानम्, लब्ध्वा = प्राप्य, अचिरेण = शीघ्रम्, पराम् = उत्कृष्टाम्, शान्तिम् = शमम्, अधिगच्छति = प्राप्नोति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
संयतेन्द्रियः	अ. पुं. प्र. एक. (विशेषणम्)	तत्परः	अ. पुं. प्र. एक. (विशेषणम्)
श्रद्धावान्	श्रद्धावत्- त. पुं. प्र. एक. (विशेषणम्)	ज्ञानम्	अ. नपुं. द्वि. एक.
लभते	लभ् (डुलभष् - प्राप्तौ) आत्म. कर्तरि लट्. प्रपु. एक.	लब्ध्वा	क्त्वान्तम् अव्ययम्
अचिरेण	अ. नपुं. तृ. एक.	पराम्	आ. स्त्री. द्वि. एक. (विशेषणम्)
शान्तिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)	अधिगच्छति	अधि + गम् (गम्लृ गतौ) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः श्रद्धावाँल्लभते श्रद्धावान् + लभते परसवर्णसन्धिः ।
अचिरेणाधिगच्छति अचिरेण + अधिगच्छति सवर्णदीर्घसन्धिः ।

(ख) समासः	संयतेन्द्रियः	संयतानि इन्द्रियाणि येन सः संयतेन्द्रियः - बहुव्रीहिः ।
	अचिरेण	न चिरम् अचिरम्, तेन - नञ्तत्पुरुषः ।
(ग) कृदन्तः	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट् ।
	संयतः	सम् + यम् (यम - उपरमे) क्त (कर्तरि) ।
	लब्ध्वा	लभ् (डुलभष् - प्राप्तौ) + क्त्वा ।
	शान्तिम्	शम् (शमु - उपशमने) + क्तिन्, ताम् ।
(घ) तद्धितान्तः	श्रद्धावान्	श्रद्धा + मतुप् । श्रद्धा अस्य अस्मिन् वा अस्ति ।

भावस्पष्टीकरणम् -

लभते ।	
किं लभते ?	**ज्ञानं** लभते ।
कः ज्ञानं लभते ?	**श्रद्धावान्** ज्ञानं लभते ।
कीदृशः श्रद्धावान् ज्ञानं लभते ?	**तत्परः** श्रद्धावान् ज्ञानं लभते ।
पुनश्च कीदृशः तत्परः श्रद्धावान् ज्ञानं लभते ?	**संयतेन्द्रियः** तत्परः श्रद्धावान् ज्ञानं लभते ।
संयतेन्द्रियः तत्परः श्रद्धावान् ज्ञानं लभते । **तेन किम्** ?	संयतेन्द्रियः तत्परः श्रद्धावान् ज्ञानं लभते । तेन **अधिगच्छति** ।
संयतेन्द्रियः तत्परः श्रद्धावान् ज्ञानं लभते । तेन **काम्** अधिगच्छति ?	संयतेन्द्रियः तत्परः श्रद्धावान् ज्ञानं लभते । तेन **शान्तिम्** अधिगच्छति ।
संयतेन्द्रियः तत्परः श्रद्धावान् ज्ञानं लभते । तेन **कीदृशीं** शान्तिम् अधिगच्छति ?	संयतेन्द्रियः तत्परः श्रद्धावान् ज्ञानं लभते । तेन **परां** शान्तिम् अधिगच्छति ।
संयतेन्द्रियः तत्परः श्रद्धावान् ज्ञानं लभते । तेन **कदा** परां शान्तिम् अधिगच्छति ?	संयतेन्द्रियः तत्परः श्रद्धावान् ज्ञानं लभते । तेन **अचिरेण** परां शान्तिम् अधिगच्छति ।
संयतेन्द्रियः तत्परः श्रद्धावान् ज्ञानं लभते । तेन **किं कृत्वा** अचिरेण परां शान्तिम् अधिगच्छति ?	संयतेन्द्रियः तत्परः श्रद्धावान् ज्ञानं लभते । तेन **लब्ध्वा** अचिरेण परां शान्तिम् अधिगच्छति ।
संयतेन्द्रियः तत्परः श्रद्धावान् ज्ञानं लभते । तेन **किं** लब्ध्वा अचिरेण परां शान्तिम् अधिगच्छति ?	संयतेन्द्रियः तत्परः श्रद्धावान् ज्ञानं लभते । तेन **ज्ञानं** लब्ध्वा अचिरेण परां शान्तिम् अधिगच्छति ।

तात्पर्यम् - ज्ञानमार्गे आसक्तः श्रद्धावान् च जितेन्द्रियः आत्मज्ञानं प्राप्नोति । आत्मज्ञानं प्राप्य एव सः मुक्तिरूपां परमशान्तिम् अधिगच्छति ।

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥४.४०॥

पदच्छेदः - अज्ञः, च, अश्रद्दधानः, च, संशयात्मा, विनश्यति।
न, अयम्, लोकः, अस्ति, न, परः, न, सुखम्, संशयात्मनः ॥

अन्वयः - अज्ञः च अश्रद्दधानः च संशयात्मा विनश्यति। संशयात्मनः अयं लोकः न, अस्ति, परः न, सुखं च न।

पदार्थः - अज्ञः च = अज्ञानी च, अश्रद्दधानः च = श्रद्धाविहीनः च, संशयात्मा = संशयमनस्कः, विनश्यति = प्रणश्यति, संशयात्मनः = संशयचित्तस्य, अयं लोकः नास्ति = एषः लोकः न विद्यते, परः न = परलोकः न, सुखं च न = सन्तोषः अपि न विद्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अज्ञः	अ. पुं. प्र. एक. (विशेषणम्)	च	अव्ययम्
अश्रद्दधानः	अ. पुं. प्र. एक. (विशेषणम्)	संशयात्मा	संशयात्मन्- न. पुं. प्र. एक. (विशेषणम्)
विनश्यति	वि + नश् (णश अदर्शने) पर. कर्तरि लट्. प्रपु. एक.	संशयात्मनः	संशयात्मन्- न. पुं. ष. एक. (विशेषणम्)
अयम्	इदम्- म. सर्व. पुं. प्र. एक. (विशेषणम्)	लोकः	अ. पुं. प्र. एक. (विशेष्यम्)
न	अव्ययम्	अस्ति	अस् (अस भुवि) पर. कर्तरि लट्. प्रपु. एक.
परः	अ. सर्व. पुं. प्र. एक. (विशेषणम्)	सुखम्	अ. नपुं. प्र. एक.

व्याकरणम् -

(क) सन्धिः

अज्ञश्च	अज्ञः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
चाश्रद्दधानः	च + अश्रद्दधानः	सवर्णदीर्घसन्धिः।
अश्रद्दधानश्च	अश्रद्दधानः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
नायम्	न + अयम्	सवर्णदीर्घसन्धिः।
लोकोऽस्ति	लोकः + अस्ति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
परो न	परः + न	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।

(ख) समासः

अज्ञः	न ज्ञः अज्ञः - नञ्तत्पुरुषः।
अश्रद्दधानः	न श्रद्दधानः अश्रद्दधानः - नञ्तत्पुरुषः।
संशयात्मा	संशयः आत्मनि यस्य सः संशयात्मा - बहुव्रीहिः।

(ग) कृदन्तः ज्ञः — ज्ञा (ज्ञा - अवबोधने) क (कर्तरि) ।

अश्रद्दधानः — श्रत् + धा (डुधाञ् - धारणपोषणयोः) + शानच् ।

लोकः — लोक् (लोकृ - दर्शने) + घञ् ।

भावस्पष्टीकरणम् -

विनश्यति ।	
कः विनश्यति ?	**अज्ञः** विनश्यति ।
अज्ञः **पुनश्च कः** विनश्यति ?	अज्ञः च **अश्रद्दधानः च** विनश्यति ।
अज्ञः च अश्रद्दधानः च **कीदृशः** विनश्यति ?	अज्ञः च अश्रद्दधानः च **संशयात्मा** विनश्यति ।
न अस्ति ।	
कस्य न अस्ति ?	**संशयात्मनः** न अस्ति ।
संशयात्मनः **कः** न अस्ति ?	संशयात्मनः **अयं** लोकः न अस्ति ।
संशयात्मनः अयं लोकः न अस्ति, **पुनश्च कः न** ?	संशयात्मनः अयं लोकः न अस्ति, **परः न** ।
संशयात्मनः अयं लोकः न अस्ति, परः न, **पुनश्च किं** न ?	संशयात्मनः अयं लोकः न अस्ति, परः न, **सुखं च न** ।

तात्पर्यम् - यस्य आत्मविषयकं ज्ञानं नास्ति, यस्य च तत्र श्रद्धा नास्ति तयोरेव संशयः भवति । संशये सति मुक्तिरूपं फलं न प्राप्नोति । तादृशस्य संशयात्मनः अयं लोकः न सुखदायकः, नापि परलोकः । तस्य च अस्मिन् संसारे क्लेशानुभवः एव गतिः ।

योगसंन्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ॥४.४१॥

पदच्छेदः - योगसंन्यस्तकर्माणम्, ज्ञानसञ्छिन्नसंशयम् ।
आत्मवन्तम्, न, कर्माणि, निबध्नन्ति, धनञ्जय ॥

अन्वयः - धनञ्जय ! योगसंन्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम् आत्मवन्तं कर्माणि न निबध्नन्ति ।

पदार्थः - धनञ्जय = अर्जुन ! योगसंन्यस्तकर्माणम् = आत्मज्ञानसंत्यक्तकर्माणम्, ज्ञानसञ्छिन्नसंशयम् = आत्मज्ञानविनष्टसन्देहम्, आत्मवन्तम् = आत्मनिष्ठम्, कर्माणि = यज्ञादीनि, न निबध्नन्ति = न लिम्पन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
धनञ्जय	अ. पुं. सम्बो. एक.	योगसंन्यस्तकर्माणम्	योगसंन्यस्तकर्मन्- न. पुं. द्वि. एक. (विशेषणम्)
ज्ञानसञ्छिन्नसंशयम्	अ. पुं. द्वि. एक. (विशेषणम्)	आत्मवन्तम्	आत्मवत्- त. पुं. द्वि. एक. (विशेषणम्)
न	अव्ययम्	कर्माणि	कर्मन्- न. नपुं. द्वि. एक.
निबध्नन्ति	नि + बन्ध् (बन्ध - बन्धने) पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) समासः
- योगसंन्यस्तकर्माणम् — योगेन संन्यस्तानि योगसंन्यस्तानि - तृतीयातत्पुरुषः। योगसंन्यस्तानि कर्माणि यस्य सः योगसंन्यस्तकर्मा, तम् - बहुव्रीहिः।
- ज्ञानसञ्छिन्नसंशयम् — ज्ञानेन सञ्छिन्नः ज्ञानसञ्छिन्नः - तृतीयातत्पुरुषः। ज्ञानसञ्छिन्नः संशयः यस्य सः ज्ञानसञ्छिन्नसंशयः, तम् - बहुव्रीहिः।
- धनञ्जय — धनं जयति इति धनञ्जयः, तत्सम्बुद्धौ - कर्तरि खश् उपपदसमासश्च।

(ख) कृदन्तः
- योगः — युज् (युजिर् - योगे) + घञ्।
- संन्यस्तः — सम् + नि + अस् (असु - क्षेपणे) + क्त (कर्मणि)।
- ज्ञानम् — ज्ञा (ज्ञा - अवबोधने) + ल्युट्।
- सञ्छिन्नः — सम् + छिद् (छिदिर् - द्वैधीकरणे) + क्त (कर्तरि)।

(ग) तद्धितान्तः
- आत्मवन्तम् — आत्मा + मतुप्,। आत्मा अस्य अस्मिन् वा अस्ति इति आत्मवान्, तम्।

भावस्पष्टीकरणम् -

न निबध्नन्ति।	
कानि न निबध्नन्ति ?	**कर्माणि** न निबध्नन्ति।
कं कर्माणि न निबध्नन्ति ?	**योगसंन्यस्तकर्माणं** कर्माणि न निबध्नन्ति।
योगसंन्यस्तकर्माणं **पुनश्च कीदृशं** कर्माणि न निबध्नन्ति ?	योगसंन्यस्तकर्माणं **ज्ञानसञ्छिन्नसंशयं** कर्माणि न निबध्नन्ति।
योगसंन्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयं **पुनश्च कीदृशं** कर्माणि न निबध्नन्ति ?	योगसंन्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम् **आत्मवन्तं** कर्माणि न निबध्नन्ति।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**धनञ्जय !**

तात्पर्यम् - धनञ्जय ! यः सर्वाणि कर्माणि समत्वबुद्धियोगेन भगवदर्पितानि करोति, यस्य च संशयाः आत्मज्ञानप्राप्त्या नष्टाः सन्ति, तं जितेन्द्रियं पुरुषं कर्माणि न लिम्पन्ति । अन्यान् तु लिम्पन्ति ।

तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥४.४२॥

पदच्छेदः - तस्मात्, अज्ञानसम्भूतम्, हृत्स्थम्, ज्ञानासिना, आत्मनः ।
छित्त्वा, एनम्, संशयम्, योगम्, आतिष्ठ, उत्तिष्ठ, भारत ॥

अन्वयः - भारत ! तस्मात् अज्ञानसम्भूतम् आत्मनः हृत्स्थम् एनं संशयं ज्ञानासिना छित्त्वा उत्तिष्ठ । योगम् आतिष्ठ ।

पदार्थः - भारत = अर्जुन ! तस्मात् = ततः हेतोः, अज्ञानसम्भूतम् = अविवेकजनितम्, आत्मनः = स्वस्य, हृत्स्थम् = बुद्धिस्थितम्, एनम् = अमुम्, संशयम् = सन्देहम्, ज्ञानासिना = ज्ञानरूपेण खड्गेन, छित्त्वा = विदार्य, उत्तिष्ठ = उत्थितः भव, योगम् = कर्मयोगम्, आतिष्ठ = आचर ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	तस्मात्	तद्- द. सर्व. पुं. पं. एक. (विशेषणम्)
अज्ञानसम्भूतम्	अ. पुं. द्वि. एक. (विशेषणम्)	आत्मनः	आत्मन्- न. पुं. ष. एक.
हृत्स्थम्	अ. पुं. द्वि. एक. (विशेषणम्)	एनम्	एतद्- द. सर्व. पुं. एक. (विशेषणम्)
संशयम्	अ. पुं. द्वि. एक. (विशेष्यम्)	ज्ञानासिना	इ. पुं. तृ. एक.
छित्त्वा	क्त्वान्तम् अव्ययम्	उत्तिष्ठ	उद् + स्था (ष्ठा - गतिनिवृत्तौ) पर. कर्तरि लोट्. मपु. एक.
योगम्	अ. पुं. द्वि. एक.	आतिष्ठ	आ + तिष्ठ (ष्ठा - गतिनिवृत्तौ) पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः

तस्मादज्ञानसम्भूतम्	तस्मात् + अज्ञानसम्भूतम्	जश्त्वसन्धिः ।
ज्ञानासिनात्मनः	ज्ञानासिना + आत्मनः	सवर्णदीर्घसन्धिः ।
छित्त्वैनम्	छित्त्वा + एनम्	वृद्धिसन्धिः ।
आतिष्ठोत्तिष्ठ	आतिष्ठ + उत्तिष्ठ	गुणसन्धिः ।

(ख) समासः

अज्ञानसम्भूतम् — न ज्ञानम् अज्ञानम् - नञ्तत्पुरुषः ।
अज्ञानात् सम्भूतः अज्ञानसम्भूतः, तम् - पञ्चमीतत्पुरुषः ।

हृत्स्थम् — हृदि तिष्ठति इति हृत्स्थः, तम् - कर्तरि डप्रत्ययः उपपदसमासः ।

	ज्ञानासिना	ज्ञानम् एव असिः ज्ञानासिः, तेन - कर्मधारयः ।
(ग) कृदन्तः	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट् ।
	सम्भूतम्	सम् + भू (भू - सत्तायाम्) + क्त (कर्मणि) ।
	छित्त्वा	छिद् (छिदिर् - द्वैधीकरणे) + क्त्वा ।
(घ) तद्धितान्तः	भारत	भरत + अण् (अपत्यार्थे) भरतस्य गोत्रापत्यं पुमान्, तत्सम्बुद्धौ ।

भावस्पष्टीकरणम् -

उत्तिष्ठ ।	
किं कृत्वा उत्तिष्ठ ?	**छित्त्वा** उत्तिष्ठ ।
केन छित्त्वा उत्तिष्ठ ?	**ज्ञानासिना** छित्त्वा उत्तिष्ठ ।
कं ज्ञानासिना छित्त्वा उत्तिष्ठ ?	**संशयं** ज्ञानासिना छित्त्वा उत्तिष्ठ ।
कं संशयं ज्ञानासिना छित्त्वा उत्तिष्ठ ?	**एनं** संशयं ज्ञानासिना छित्त्वा उत्तिष्ठ ।
कुत्रत्यम् एनं संशयं ज्ञानासिना छित्त्वा उत्तिष्ठ ?	**हृत्स्थम्** एनं संशयं ज्ञानासिना छित्त्वा उत्तिष्ठ ।
कस्य हृत्स्थम् एनं संशयं ज्ञानासिना छित्त्वा उत्तिष्ठ ?	**आत्मनः** हृत्स्थम् एनं संशयं ज्ञानासिना छित्त्वा उत्तिष्ठ ।
कीदृशम् आत्मनः हृत्स्थम् एनं संशयं ज्ञानासिना छित्त्वा उत्तिष्ठ ?	**अज्ञानसम्भूतम्** आत्मनः हृत्स्थम् एनं संशयं ज्ञानासिना छित्त्वा उत्तिष्ठ ।
कस्मात् अज्ञानसम्भूतम् आत्मनः हृत्स्थम् एनं संशयं ज्ञानासिना छित्त्वा उत्तिष्ठ ?	**तस्मात्** अज्ञानसम्भूतम् आत्मनः हृत्स्थम् एनं संशयं ज्ञानासिना छित्त्वा उत्तिष्ठ ।
तस्मात् अज्ञानसम्भूतम् आत्मनः हृत्स्थम् एनं संशयं ज्ञानासिना छित्त्वा उत्तिष्ठ । **ततः किम्** ?	तस्मात् अज्ञानसम्भूतम् आत्मनः हृत्स्थम् एनं संशयं ज्ञानासिना छित्त्वा उत्तिष्ठ । **आतिष्ठ** ।
तस्मात् अज्ञानसम्भूतम् आत्मनः हृत्स्थम् एनं संशयं ज्ञानासिना छित्त्वा उत्तिष्ठ । **कम्** आतिष्ठ ?	तस्मात् अज्ञानसम्भूतम् आत्मनः हृत्स्थम् एनं संशयं ज्ञानासिना छित्त्वा उत्तिष्ठ । **योगम्** आतिष्ठ ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भारत** !

तात्पर्यम् - हे भारत ! अतः अज्ञानेन समुत्पन्नं बुद्धिस्थितं संशयं ज्ञानरूपेण खड्गेन छित्त्वा निष्कामकर्म आचर। युद्धार्थं च सन्नद्धो भव ।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानकर्मसंन्यासयोगो नाम चतुर्थोऽध्यायः ॥४॥

चतुर्थाध्यायस्य सारः

तृतीयाध्याये विवृतस्य कर्मयोगस्य त्रेतायुगस्य परम्परां कृष्णः अस्य अध्यायस्य आरम्भे वदति - "एतं कर्मयोगं युगादौ अहं विवस्वते उक्तवान्, विवस्वान् मनवे, मनुः इक्ष्वाकवे च उक्तवान्। एवं परम्परया प्राप्तम् इमं राजर्षयः जानन्ति। परं महता कालेन सः योगः नष्टः" इति। अर्जुनस्य मनसि शङ्का आगता। सः पृच्छति - "विवस्वतः जन्म भवतः पूर्वम् अभवत्, तथापि तं भवान् कथं बोधितवान् ?' इति।

कृष्णः वदति - "मम भवतः च बहूनि जन्मानि अतीतानि। तानि सर्वाणि अहं जानामि, भवान् न जानाति। स्वयं जन्मरहितः अपि अहं कदाचित् आत्ममायया सम्भवामि। साधूनां रक्षणाय, दुर्जनानां विनाशाय, धर्मस्य स्थापनाय च प्रतियुगम् अहं जन्म धारयामि। यदा धर्मस्य ग्लानिः भवति अधर्मस्य च आधिक्यं भवति तदा अहम् आत्मानं सृजामि। मम एतत् दिव्यं जन्म कर्म च यः पुरुषः यथार्थं जानाति सः शरीरत्यागानन्तरं पुनर्जन्म न प्राप्नोति। भक्ताः मां यथा भजन्ति तथा अहं तान् अनुगृह्णामि। एतत् रहस्यं ज्ञात्वा मनुष्याः सर्वशः मम मार्गस्य अनुसरणं कुर्वन्तु। गुणानां कर्मणां च विभेदानुसारेण ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रः चेति चतुरः वर्णान् अहं कृतवान्। यद्यपि अहम् एवं कृतवान् तथापि अहम् अकर्ता अस्मि। यतः मां कर्माणि न लिम्पन्ति। कर्मफले मम स्पृहा न भवति। एवं मम स्वरूपं यः जानाति सः अपि कर्मभिः न लिप्यते। एतत् ज्ञात्वा प्राचीनकाले मुमुक्षवः पुरुषाः कर्म आचरितवन्तः। त्वमपि तथैव कुरु" ।

कर्मणां स्वरूपं कर्मनाशस्य उपायं च बोधयितुं सः अग्रे कथयति - "किं कर्तव्यम्, किं च अकर्तव्यम् इति विषये विदुषाम् अपि भ्रान्तिः अस्ति। विहितम्, निषिद्धम्, विधिनिषेधरहितं च इति त्रिविधं कर्म भवति। एतस्य त्रिविधस्यापि कर्मणः स्वरूपं यथावत् सर्वैः ज्ञातव्यम्। किन्तु एतत् अत्यन्तं क्लेशेन अवगम्यते। यः पुरुषः कर्मसु अकर्म पश्यति, अकर्मसु च कर्म पश्यति सः मनुष्येषु बुद्धिमान् भवति। सः समाधिस्थः सः सकलकर्मकर्ता च। यः शास्त्रसम्मतानि फलापेक्षारहितानि च कर्माणि करोति ज्ञानरूपेण वह्निना तस्य पुरुषस्य कर्माणि भस्मीभवन्ति। तादृशं पुरुषं ज्ञानिनः पण्डितं प्रवदन्ति। यः संसारबन्धं विना सदा सन्तुष्टः भूत्वा फलासक्तिं विहाय कर्मसु प्रवर्तते सः वस्तुतः कर्मशून्यः एव। समस्तभोग्यविषयेषु आकाङ्क्षारहितः सकलव्यापारवर्जितः पुरुषः शरीरनिर्वहणाय कर्म करोति चेदपि सः तेन पापं न प्राप्नोति। यः आसक्तिरहितः देहाभिमानविहीनः ममताशून्यः सन् सततं परमात्मज्ञाने स्थिरमानसः च अस्ति, यः च ब्रह्मार्थं कर्म आचरति तस्य समग्रमपि कर्म विनश्यति। तादृशः ज्ञानी यदा यज्ञं करोति तदा अर्पणं, हविः, अग्निः, हुतं चेति सर्वमपि 'ब्रह्म' एव इति चिन्तयति। अतः सः समाधिना ब्रह्म प्राप्नोति"।

अग्रे कृष्णः कर्त्रनुगुणं यज्ञस्य कांश्चन प्रकारान् तत्फलं च उक्तवान्। यथा - "कर्मयोगिनः देवसम्बन्धिनं यज्ञं कुर्वन्ति। ज्ञानयोगिनः तु परब्रह्माग्नौ आत्मना एव आत्मानं जुह्वति। केचन शिवार्पणबुद्ध्या लोकोद्धाराय द्रव्याणि उपयुञ्जते। अन्ये स्वधर्मपालनरूपं तपोयज्ञं कुर्वन्ति। केचन चित्तवृत्तिनिरोधार्थं प्राणायामादिस्वरूपं यज्ञम् आचरन्ति। अन्ये कठिनव्रताः भगवत्साक्षात्कार-विषययुक्तं वेदाध्ययन-शास्त्रज्ञानरूपयज्ञं निर्वहन्ति। यज्ञस्य अमृततुल्यं शिष्टं सेवमानाः योगिनः सनातनं परं ब्रह्म प्राप्नुवन्ति। एवम् अनेकप्रकारकाः यज्ञाः वेदस्य आदिमे भागे कर्मकाण्डे विवृताः सन्ति। ते सर्वे कर्मणः एव उत्पन्नाः इति ज्ञातव्यम्। यः एतत् जानाति सः संसारबन्धनात् मुक्तः भवति। सांसारिकवस्तुभिः सिद्धात् यज्ञात् आत्मज्ञानरूपः यज्ञः श्रेयान् भवति। यतः सर्वाणि कर्माणि ज्ञाने एव परिसमाप्तिं गच्छन्ति। जनकादयः

मुमुक्षवः अपि तत् ज्ञात्वा एव कर्माणि कृतवन्तः । तथा अर्जुनः अपि कुर्यात् । तिलादीनां हविर्दानेन यः यज्ञः क्रियते सः द्रव्ययज्ञः । संयमाग्नौ कामक्रोधादीनां ज्वालनं ततोऽपि श्रेयान् यज्ञः उच्यते ।

ततः सः अर्जुनं वदति - "येन ज्ञानेन भवान् पुनः एतादृशं मोहजालं न आप्नोति, समवायबुद्ध्या स्वस्मिन् मयि च सर्वान् जीवान् द्रष्टुं शक्नोति तादृशं ज्ञानं तत्त्वदर्शिनः ते उपदेक्ष्यन्ति । प्रज्वलन् अग्निः काष्ठानि यथा भस्मसात् करोति तथा ज्ञानाग्निः सर्वाण्यपि कर्माणि भस्मीकरोति । ज्ञानमार्गे आसक्तः श्रद्धावान् च जितेन्द्रियः आत्मज्ञानं प्राप्नोति । आत्मज्ञानं प्राप्य एव सः मुक्तिरूपां परमशान्तिम् अधिगच्छति । अतः अज्ञानेन समुत्पन्नं संशयं ज्ञानरूपेण खड्गेन. छित्त्वा निष्कामकर्म आचर । युद्धार्थं च सन्नद्धो भव इति" ।

अस्मिन् अध्याये कर्मणा सह ज्ञानस्य अनिवार्यता वर्णिता अस्ति इति कारणेन अस्य अध्यायस्य नाम 'ज्ञानकर्मसंन्यासयोगः' इति अस्ति ।

****

अथ पञ्चमोऽध्याय:

कर्मसंन्यासयोग:

५

अर्जुन उवाच - **संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि।**
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥५.१॥

पदच्छेदः -

अर्जुनः, उवाच - संन्यासम्, कर्मणाम्, कृष्ण, पुनः, योगम्, च, शंससि।
यत्, श्रेयः, एतयोः, एकम्, तत्, मे, ब्रूहि, सुनिश्चितम् ॥

अन्वयः - कृष्ण ! कर्मणां संन्यासं पुनः योगं च शंससि। एतयोः यत् श्रेयः तत् सुनिश्चितम् एकं मे ब्रूहि।

पदार्थः - कृष्ण = हे कृष्ण ! कर्मणाम् = यज्ञादीनाम्, संन्यासम् = परित्यागम्, पुनः = भूयः, योगं च = तेषामेव परिग्रहम्, शंससि = ब्रवीषि, एतयोः = अनयोः, यत् श्रेयः = यत् हितम्, सुनिश्चितम् = निर्णीतम्, तत् = तत्, एकम् = एकमेव, मे ब्रूहि = मां वद।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कृष्ण	अ. पुं. सम्बो. एक.	कर्मणाम्	कर्मन्- न. नपुं. ष. बहु.
संन्यासम्	अ. पुं. द्वि. एक.	पुनः	अव्ययम्
योगम्	अ. पुं. द्वि. एक.	च	अव्ययम्
शंससि	शंस् (शंसु - स्तुतौ) पर. कर्तरि लट्. मपु. एक.	एतयोः	एतद्- द. सर्व. पुं. स. द्विव. (विशेषणम्)
यत्	यद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	श्रेयः	श्रेयस्- सका. नपुं. प्र. एक. (विशेष्यम्)
तत्	तद्- द. नपुं. द्वि. एक. (विशेषणम्)	सुनिश्चितम्	अ. पुं. द्वि. एक. (विशेषणम्)
एकम्	अ. सर्व. पुं. द्वि. एक. (विशेषणम्)	मे	अस्मद्- द. सर्व. च. एक.
ब्रूहि	ब्रू (ब्रूञ् व्यक्तायां वाचि) पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः

पुनर्योगम्	पुनः + योगम्	विसर्गसन्धिः (रेफः)।
यच्छ्रेयः	यत् + श्रेयः	छत्वसन्धिः श्चुत्वम्।
यच्छ्रेय एतयोः	यच्छ्रेयः + एतयोः	विसर्गसन्धिः (लोपः)।

	एतयोरेकम्	एतयोः + एकम्	विसर्गसन्धिः (रेफः)।
	तन्मे	तत् + मे	अनुनासिकसन्धिः।
(ख) कृदन्तः	संन्यासम्	सम् + नि + अस् (असु - क्षेपणे) + घञ्, तम्।	
	योगम्	युज् (युजिर् - योगे) + घञ्, तम्।	
	सुनिश्चितम्	सु + निस् + चि (चिञ् - चयने) + क्त (कर्मणि)।	
(ग) तद्धितान्तः	श्रेयः	प्रशस्त + ईयसुन् (अतिशये) प्रशस्तशब्दस्य 'श्र' इति आदेशः।	

भावस्पष्टीकरणम् -

ब्रूहि।	
कस्मै ब्रूहि ?	**मे** ब्रूहि।
कति मे ब्रूहि ?	**एकं** मे ब्रूहि।
किम् एकं मे ब्रूहि ?	**तत्** एकं मे ब्रूहि।
तत् **कीदृशम्** एकं मे ब्रूहि ?	तत् **सुनिश्चितम्** एकं मे ब्रूहि।
कीदृशं तत् सुनिश्चितम् एकं मे ब्रूहि ?	**यत् श्रेयः** तत् सुनिश्चितम् एकं मे ब्रूहि।
कयोः यत् श्रेयः तत् सुनिश्चितम् एकं मे ब्रूहि ?	**एतयोः** यत् श्रेयः तत् सुनिश्चितम् एकं मे ब्रूहि।
शंससि।	
कं शंससि ?	**(कर्म) योगं** शंससि।
पुनश्च कं योगं शंससि ?	**संन्यासं** पुनः योगं च शंससि।
केषां संन्यासं पुनः योगं च शंससि ?	**कर्मणां** संन्यासं पुनः योगं च शंससि।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कृष्ण** !

तात्पर्यम् - हे कृष्ण ! भवान् कर्मसंन्यासं वदति, कर्मयोगमपि वदति। कर्मणां त्यागः तेषां परिग्रहश्च विरुद्धत्वात् युगपत् सर्वथा न सम्भवति। तस्मात् श्रेष्ठत्वेन यत् भवता निश्चितं तत् मे कथयतु।

श्रीभगवानुवाच - संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥५.२॥

पदच्छेदः -

श्रीभगवान्, उवाच - संन्यासः, कर्मयोगः, च, निःश्रेयसकरौ, उभौ।
तयोः, तु, कर्मसंन्यासात्, कर्मयोगः, विशिष्यते ॥

अन्वयः - संन्यासः कर्मयोगः च उभौ निःश्रेयसकरौ । तयोः तु कर्मसंन्यासात् कर्मयोगः विशिष्यते ।

पदार्थः - संन्यासः = कर्मपरित्यागः, कर्मयोगः च = कर्मपरिग्रहः च, उभौ = द्वौ, निःश्रेयसकरौ = मोक्षप्रदौ, तयोः तु = किन्तु द्वयोः, कर्मसंन्यासात् = कर्मपरित्यागात्, कर्मयोगः = कर्मपरिग्रहः, विशिष्यते = प्रशस्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
संन्यासः	अ. पुं. प्र. एक.	कर्मयोगः	अ. पुं. प्र. एक.
च	अव्ययम्	उभौ	अ. सर्व. पुं. प्र. द्विव. (विशेषणम्)
निःश्रेयसकरौ	अ. पुं. प्र. द्विव. (विशेष्यम्)	तयोः	तद्- द. सर्व. पुं. स. द्विव.
तु	अव्ययम्	कर्मसंन्यासात्	अ. पुं. पं. एक.
कर्मयोगः	अ. पुं. प्र. एक.	विशिष्यते	वि + शिष् (शिष्लृ विशेषणे) आत्म. कर्मकर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः

कर्मयोगश्च	कर्मयोगः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
निःश्रेयसकरावुभौ	निःश्रेयसकरौ + उभौ	यान्तवान्तादेशसन्धिः ।
तयोस्तु	तयोः + तु	विसर्गसन्धिः (सकारः) ।
कर्मयोगो विशिष्यते	कर्मयोगः + विशिष्यते	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) समासः

कर्मयोगः	कर्म एव योगः कर्मयोगः - कर्मधारयः ।
कर्मसंन्यासात्	कर्मणां संन्यासः कर्मसंन्यासः, तस्मात् - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः

संन्यासः	सम् + नि + अस् (असु - क्षेपणे) + घञ् ।
योगः	युज् (युजिर् - योगे) + घञ् ।

भावस्पष्टीकरणम् -

निःश्रेयसकरौ ।	
कौ निःश्रेयसकरौ ?	**उभौ** निःश्रेयसकरौ ।
कौ च उभौ निःश्रेयसकरौ ?	**संन्यासः कर्मयोगः च** उभौ निःश्रेयसकरौ ।
संन्यासः कर्मयोगः च उभौ निःश्रेयसकरौ । **तेन किम्** ?	संन्यासः कर्मयोगः च उभौ निःश्रेयसकरौ । **विशिष्यते** ।
संन्यासः कर्मयोगः च उभौ निःश्रेयसकरौ । **कः** विशिष्यते ?	संन्यासः कर्मयोगः च उभौ निःश्रेयसकरौ । **कर्मयोगः** विशिष्यते ।

संन्यासः कर्मयोगः च उभौ निःश्रेयसकरौ। **कस्मात्** कर्मयोगः विशिष्यते ?	संन्यासः कर्मयोगः च उभौ निःश्रेयसकरौ। **कर्मसंन्यासात्** कर्मयोगः विशिष्यते।
संन्यासः कर्मयोगः च उभौ निःश्रेयसकरौ। **कयोः** कर्मसंन्यासात् कर्मयोगः विशिष्यते ?	संन्यासः कर्मयोगः च उभौ निःश्रेयसकरौ। **तयोः** तु कर्मसंन्यासात् कर्मयोगः विशिष्यते।

तात्पर्यम् - कर्मसंन्यासः कर्मयोगः च इति एतौ उभौ अपि मोक्षकारकौ। किन्तु कर्मसंन्यासात् कर्मपरिग्रहः विशिष्यते। (अर्थात् भक्तियुक्तं कर्म श्रेष्ठम् इति)।

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात् प्रमुच्यते ॥५.३॥

पदच्छेदः - ज्ञेयः, सः, नित्यसंन्यासी, यः, न, द्वेष्टि, न, काङ्क्षति।
निर्द्वन्द्वः, हि, महाबाहो, सुखम्, बन्धात्, प्रमुच्यते ॥

अन्वयः - महाबाहो ! यः न द्वेष्टि न काङ्क्षति सः नित्यसंन्यासी ज्ञेयः। निर्द्वन्द्वः सः बन्धात् सुखं प्रमुच्यते।

पदार्थः - महाबाहो = हे अर्जुन ! यः = यः पुरुषः, न द्वेष्टि = न वैरं कुरुते, न काङ्क्षति = न इच्छति, सः = सः पुरुषः, नित्यसंन्यासी = सततसंन्यासी, ज्ञेयः = ज्ञातव्यः, निर्द्वन्द्वः = रागद्वेषशून्यः, बन्धात् = बन्धनात्, सुखम् = अनायासेन, प्रमुच्यते = मुक्तो भवति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महाबाहो	उ. पु. सम्बो. एक.	यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
न	अव्ययम्	द्वेष्टि	द्विष् (द्विष अप्रीतौ) पर. कर्तरि लट्.प्रपु. एक.
काङ्क्षति	काङ्क्ष् (काक्षि काङ्क्षायाम्) पर. कर्तरि लट्. प्रपु. एक.	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
नित्यसंन्यासी	नित्यसंन्यासिन्- न. पुं. प्र. एक. (विशेष्यम्)	ज्ञेयः	अ. पुं. प्र. एक. (विशेषणम्)
निर्द्वन्द्वः	अ. पुं. प्र. एक. (विशेषणम्)	बन्धात्	अ. पुं. पं. एक.
सुखम्	अ. नपुं. प्र. एक.	प्रमुच्यते	प्र + मुच् (मुच्लृ मोक्षणे) आत्म. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	यो न	यः + न	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	निर्द्वन्द्वो हि	निर्द्वन्द्वः + हि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) समासः	नित्यसंन्यासी	नित्यं संन्यासी नित्यसंन्यासी - सुप्समासः।	
	निर्द्वन्द्वः	निर्गतं द्वन्द्वं यस्मात् सः निर्द्वन्द्वः - बहुव्रीहिः।	
	महाबाहो	महान्तौ बाहू यस्य सः महाबाहुः, तत्सम्बुद्धौ - बहुव्रीहिः।	
(ग) कृदन्तः	ज्ञेयः	ज्ञा (ज्ञा - अवबोधने) + यत् (कर्मणि)।	
	बन्धात्	बन्ध् (बन्ध - बन्धने) + घञ्, तस्मात्।	
(घ) तद्धितान्तः	संन्यासी	संन्यास + इनि (मतुबर्थे)। संन्यासः अस्य अस्मिन् वा अस्ति।	

भावस्पष्टीकरणम् -

ज्ञेयः।	
कः ज्ञेयः ?	सः **नित्यसंन्यासी** ज्ञेयः।
कीदृशः सः नित्यसंन्यासी ज्ञेयः ?	**यः न द्वेष्टि** सः नित्यसंन्यासी ज्ञेयः।
यः न द्वेष्टि **पुनश्च किं न करोति** सः नित्यसंन्यासी ज्ञेयः ?	यः न द्वेष्टि **न काङ्क्षति** सः नित्यसंन्यासी ज्ञेयः।
यः न द्वेष्टि न काङ्क्षति सः नित्यसंन्यासी ज्ञेयः। **तेन किम्** ?	यः न द्वेष्टि न काङ्क्षति सः नित्यसंन्यासी ज्ञेयः। **(सः) प्रमुच्यते**।
यः न द्वेष्टि न काङ्क्षति सः नित्यसंन्यासी ज्ञेयः। सः **कस्मात्** प्रमुच्यते ?	यः न द्वेष्टि न काङ्क्षति सः नित्यसंन्यासी ज्ञेयः। सः **बन्धात्** प्रमुच्यते।
यः न द्वेष्टि न काङ्क्षति सः नित्यसंन्यासी ज्ञेयः। सः बन्धात् **कथं** प्रमुच्यते ?	यः न द्वेष्टि न काङ्क्षति सः नित्यसंन्यासी ज्ञेयः। सः बन्धात् **सुखं** प्रमुच्यते।
यः न द्वेष्टि न काङ्क्षति सः नित्यसंन्यासी ज्ञेयः। **कीदृशः** सः बन्धात् सुखं प्रमुच्यते ?	यः न द्वेष्टि न काङ्क्षति सः नित्यसंन्यासी ज्ञेयः। **निर्द्वन्द्वः** सः बन्धात् सुखं प्रमुच्यते।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**महाबाहो** !

तात्पर्यम् - हे अर्जुन ! यः अन्यान् न द्वेष्टि, किञ्चिदपि न काङ्क्षति सः कर्मयोगी नित्यसंन्यासी इति ज्ञातव्यम्। रागद्वेषशून्यः सः सुखेन कर्मबन्धात् मुक्तो भवति।

साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥५.४॥

पदच्छेदः - साङ्ख्ययोगौ, पृथक्, बालाः, प्रवदन्ति, न, पण्डिताः ।
एकम्, अपि, आस्थितः, सम्यक्, उभयोः, विन्दते, फलम् ॥

अन्वयः - बालाः साङ्ख्ययोगौ पृथक् प्रवदन्ति पण्डिताः न । एकम् अपि सम्यक् आस्थितः उभयोः फलं विन्दते ।

पदार्थः - बालाः = मूर्खाः, साङ्ख्ययोगौ = सांख्यं च योगं च, पृथक् = भिन्नम्, प्रवदन्ति = कथयन्ति, पण्डिताः = ज्ञानिनः, न = न, एकम् = अन्यतरत्, अपि = अपि, सम्यक् = साधु, आस्थितः = आश्रितः, उभयोः = द्वयोः, फलम् = प्रयोजनम्, विन्दते = लभते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
बालाः	अ. पुं. प्र. बहु.	साङ्ख्ययोगौ	अ. पुं. द्वि. द्विव.
पृथक्	अव्ययम्	प्रवदन्ति	प्र + वद् (वद व्यक्तायां वाचि) पर. कर्तरि लट्. प्रपु. बहु.
पण्डिताः	अ. पुं. प्र. बहु.	न	अव्ययम्
एकम्	अ. सर्व. नपुं. प्र. एक. (विशेषणम्)	अपि	अव्ययम्
सम्यक्	अव्ययम्	आस्थितः	अ. पुं. प्र. एक. (विशेषणम्)
उभयोः	अ. सर्व. पुं. स. द्विव. (विशेषणम्)	फलम्	अ. नपुं. द्वि. एक.
विन्दते	विद् (विदॢ लाभे) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	पृथग्बालाः	पृथक् + बालाः	जश्त्वसन्धिः ।
	अप्यास्थितः	अपि + आस्थितः	यण्सन्धिः ।
	सम्यगुभयोः	सम्यक् + उभयोः	जश्त्वसन्धिः ।
	उभयोर्विन्दते	उभयोः + विन्दते	विसर्गसन्धिः (रेफः) ।
(ख) समासः	साङ्ख्ययोगौ	साख्यं च योगश्च साङ्ख्ययोगौ, तौ - द्वन्द्वः ।	
(ग) कृदन्तः	योगः	युज् (युजिर् - योगे) + घञ् ।	
	आस्थितः	आ + स्था (ष्ठा - गतिनिवृत्तौ) + क्त (कर्तरि) ।	

(घ) तद्धितान्तः साङ्ख्यम् — सङ्ख्या + अण् (भावार्थे)। सम्यक् ख्यायते प्रकाश्यते वस्तुतत्त्वमनया इति सङ्ख्या।
(सङ्ख्यायाः भावः साङ्ख्यम्)

भावस्पष्टीकरणम् -

प्रवदन्ति।	
कथं प्रवदन्ति ?	**पृथक्** प्रवदन्ति।
के पृथक् प्रवदन्ति ?	**बालाः** पृथक् प्रवदन्ति।
बालाः **कौ** पृथक् प्रवदन्ति ?	बालाः **साङ्ख्ययोगौ** पृथक् प्रवदन्ति।
बालाः साङ्ख्ययोगौ पृथक् प्रवदन्ति, **के च न** ?	बालाः साङ्ख्ययोगौ पृथक् प्रवदन्ति, **पण्डिताः न**।
विन्दते।	
किं विन्दते ?	**फलं** विन्दते।
कयोः फलं विन्दते ?	**उभयोः** फलं विन्दते।
कः उभयोः फलं विन्दते ?	**आस्थितः** उभयोः फलं विन्दते।
कथम् आस्थितः उभयोः फलं विन्दते ?	**सम्यक्** आस्थितः उभयोः फलं विन्दते।
किं सम्यक् आस्थितः उभयोः फलं विन्दते ?	**एकम्** अपि सम्यक् आस्थितः उभयोः फलं विन्दते।

तात्पर्यम् - कर्मसंन्यासः कर्मयोगः च पृथक् इति ये वदन्ति ते निश्चयेन मूर्खाः। ज्ञानिनः तु कदापि तथा न वदन्ति। यतः तयोः एकतरस्य आचरणेन मानवः उभयोः अपि फलं प्राप्नोति।

यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥५.५॥

पदच्छेदः - यत्, साङ्ख्यैः, प्राप्यते, स्थानम्, तत्, योगैः, अपि, गम्यते।
एकम्, साङ्ख्यम्, च, योगम्, च, यः, पश्यति, सः, पश्यति ॥

अन्वयः - यत् स्थानं साङ्ख्यैः प्राप्यते तत् योगैः अपि गम्यते। यः साङ्ख्यं च योगं च एकं पश्यति सः पश्यति।

पदार्थः - यत् = यत्, स्थानम् = पदम्, साङ्ख्यैः = ज्ञानिभिः, प्राप्यते = लभ्यते, तत् = तत्, योगैः = कर्मयोगिभिः, अपि = अपि, गम्यते = लभ्यते, यः = यः पुरुषः, साङ्ख्यं च = ज्ञानमार्गं च, योगं च = योगमार्गं च, एकम् = समानफलम्, पश्यति = वीक्षते, सः पश्यति = सः एव सम्यक् पश्यति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यत्	यद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	स्थानम्	अ. नपुं. प्र. एक. (विशेष्यम्)
साङ्ख्यैः	अ. पुं. तृ. बहु.	प्राप्यते	प्र + आप् (आप्लृ व्याप्तौ) आत्म. कर्मणि लट्. प्रपु. एक.
तत्	तद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	योगैः	अ. पुं. तृ. बहु.
अपि	अव्ययम्	गम्यते	गम् (गम्लृ गतौ) पर. कर्मणि लट्. प्रपु. एक.
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	साङ्ख्यम्	अ. नपुं. द्वि. एक.
च	अव्ययम्	योगम्	अ. पुं. द्वि. एक.
एकम्	अ. सर्व. पुं. द्वि. एक. (विशेषणम्)	पश्यति	पश्य (दृशिर् प्रेक्षणे) पर. कर्तरि लट्. प्रपु. एक.
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	तद्योगैः	तत् + योगैः	जश्त्वसन्धिः ।
	योगैरपि	योगैः + अपि	विसर्गसन्धिः (रेफः) ।
	स पश्यति	सः + पश्यति	विसर्गसन्धिः (लोपः) ।
(ख) कृदन्तः	स्थानम्	स्था (ष्ठा - गतिनिवृत्तौ) + ल्युट् ।	
	योगैः	युज् (युजिर् - योगे) + घञ्, तैः ।	
(ग) तद्धितान्तः	साङ्ख्यम्	सङ्ख्या + अण्, सङ्ख्यायाः भावः साङ्ख्यम् ।	

भावस्पष्टीकरणम् -

प्राप्यते ।	
कैः प्राप्यते ?	**साङ्ख्यैः** प्राप्यते ।
किं साङ्ख्यैः प्राप्यते ?	**स्थानं** साङ्ख्यैः प्राप्यते ।
यत् स्थानं साङ्ख्यैः प्राप्यते **तेन किम्** ?	यत् स्थानं साङ्ख्यैः प्राप्यते **तत् गम्यते** ।
यत् स्थानं साङ्ख्यैः प्राप्यते तत् **कैः अपि** गम्यते ?	यत् स्थानं साङ्ख्यैः प्राप्यते तत् **योगैः अपि** गम्यते ।
पश्यति ।	

कः पश्यति ?	**सः** पश्यति ।
यः किं पश्यति सः पश्यति ?	**यः साङ्ख्यं पश्यति** सः पश्यति ।
यः साङ्ख्यं **पुनश्च कं** पश्यति सः पश्यति ?	यः साङ्ख्यं **च योगं च** पश्यति सः पश्यति ।
यः साङ्ख्यं च योगं च **कीदृशं** पश्यति सः पश्यति ?	यः साङ्ख्यं च योगं च **एकं** पश्यति सः पश्यति ।

तात्पर्यम् - ज्ञाननिष्ठैः संन्यासिभिः यत् स्थानं प्राप्यते तदेव स्थानं कर्मयोगिभिः अपि प्राप्यते । यः ज्ञानयोगं कर्मयोगं च समानप्रयोजनं पश्यति सः एव सम्यक् पश्यति, नान्यः ।

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥५.६॥

पदच्छेदः - संन्यासः, तु, महाबाहो, दुःखम्, आप्तुम्, अयोगतः ।
योगयुक्तः, मुनिः, ब्रह्म, नचिरेण, अधिगच्छति ॥

अन्वयः - महाबाहो ! संन्यासः तु अयोगतः आप्तुं दुःखम् । योगयुक्तः मुनिः नचिरेण ब्रह्म अधिगच्छति ।

पदार्थः - महाबाहो = हे अर्जुन ! संन्यासः तु = ज्ञानयोगः तु, अयोगतः = कर्मयोगं विना, आप्तुम् = लब्धुम्, दुःखम् = कष्टम्, योगयुक्तः = फलनिरपेक्षः कर्मयुक्तः, मुनिः = शान्तः पुरुषः, नचिरेण = शीघ्रम्, ब्रह्म = परमात्मानम्, अधिगच्छति = प्राप्नोति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महाबाहो	उ. पुं. सम्बो. एक.	संन्यासः	अ. पुं. प्र. एक.
तु	अव्ययम्	अयोगतः	अव्ययम्
आप्तुम्	तुमुन्नन्तम् अव्ययम्	दुःखम्	अ. नपुं. द्वि. एक.
योगयुक्तः	अ. पुं. प्र. एक. (विशेषणम्)	मुनिः	इ. पुं. प्र. एक. (विशेष्यम्)
नचिरेण	अ. नपुं. तृ. एक.	ब्रह्म	ब्रह्मन्- न. नपुं. द्वि. एक.
अधिगच्छति	अधि + गम् (गम्लृ गतौ) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	संन्यासस्तु	संन्यासः + तु	विसर्गसन्धिः (सकारः)।
	योगयुक्तो मुनिः	योगयुक्तः + मुनिः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	मुनिर्ब्रह्म	मुनिः + ब्रह्म	विसर्गसन्धिः (रेफः)।
	नचिरेणाधिगच्छति	नचिरेण + अधिगच्छति	सवर्णदीर्घसन्धिः।

(ख) समासः	महाबाहो	महान्तौ बाहू यस्य सः महाबाहुः, तत्सम्बुद्धौ - बहुव्रीहिः।
	अयोगतः	न योगः अयोगः, तस्मात् - नञ्तत्पुरुषः।
	नचिरेण	न चिरं नचिरम्, तेन - सुप्सुपासमासः। अत्र निषेधार्थे 'न' इति शब्दः विशेषः।
	योगयुक्तः	योगेन युक्तः योगयुक्तः - तृतीयातत्पुरुषः।
(ग) कृदन्तः	संन्यासः	सम् + नि + अस् (असु - क्षेपणे) + घञ्।
	आप्तुम्	आप् (आप्लृ - व्याप्तौ) + तुमुन्।
	योगः	युज् (युजिर् - योगे) + घञ्।
	युक्तः	युज् (युजिर् - योगे) + क्त (कर्मणि)।
(घ) तद्धितान्तः	अयोगतः	अयोग + तसिल् (स्वार्थे) कर्मयोगाभावात् इत्यर्थः।

भावस्पष्टीकरणम् -

(अस्ति)।	
किम् अस्ति ?	**दुःखम्** अस्ति।
किं कर्तुं दुःखम् अस्ति ?	**आप्तुं** दुःखम् अस्ति।
कुतः आप्तुं दुःखम् अस्ति ?	**अयोगतः** आप्तुं दुःखम् अस्ति।
कः अयोगतः आप्तुं दुःखम् अस्ति ?	**संन्यासः** तु अयोगतः आप्तुं दुःखम् अस्ति।
अधिगच्छति।	
किम् अधिगच्छति ?	**ब्रह्म** अधिगच्छति।
कथं ब्रह्म अधिगच्छति ?	**नचिरेण** ब्रह्म अधिगच्छति।
कः नचिरेण ब्रह्म अधिगच्छति ?	**मुनिः** नचिरेण ब्रह्म अधिगच्छति।
कीदृशः मुनिः नचिरेण ब्रह्म अधिगच्छति ?	**योगयुक्तः** मुनिः नचिरेण ब्रह्म अधिगच्छति।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**महाबाहो !**

तात्पर्यम् - महाबाहो ! कर्मयोगात् ऋते ज्ञानयोगस्य प्राप्तिः कठिना एव। परन्तु कर्मयोगी मुनिः तु शीघ्रं ब्रह्म अधिगच्छति।

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥५.७॥

पदच्छेदः - योगयुक्तः, विशुद्धात्मा, विजितात्मा, जितेन्द्रियः।
सर्वभूतात्मभूतात्मा, कुर्वन्, अपि, न, लिप्यते ॥

अन्वयः - योगयुक्तः विशुद्धात्मा विजितात्मा जितेन्द्रियः सर्वभूतात्मभूतात्मा कुर्वन् अपि न लिप्यते।

पदार्थः - योगयुक्तः = कर्माचरणयुक्तः, विशुद्धात्मा = विशुद्धचित्तः, विजितात्मा = स्वच्छशरीरः, जितेन्द्रियः = इन्द्रियनिग्रहवान्, सर्वभूतात्मभूतात्मा = सम्यग्दर्शी, कुर्वन् अपि = आचरन् अपि, न लिप्यते = न बध्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
योगयुक्तः	अ. पुं. प्र. एक. (विशेषणम्)	विशुद्धात्मा	विशुद्धात्मन्- न. पुं. प्र. एक. (विशेषणम्)
विजितात्मा	विजितात्मन्- न. पुं. प्र. एक. (विशेषणम्)	जितेन्द्रियः	अ. पुं. प्र. एक. (विशेषणम्)
सर्वभूतात्मभूतात्मा	सर्वभूतात्मभूतात्मन्- न. पुं. प्र. एक. (विशेषणम्)	कुर्वन्	कुर्वत्- त. पुं. प्र. एक. (विशेषणम्)
अपि	अव्ययम्	न	अव्ययम्
लिप्यते	लिप् (लिप उपदेहे) पर. कर्मणि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः

योगयुक्तो विशुद्धात्मा	योगयुक्तः + विशुद्धात्मा	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
कुर्वन्नपि	कुर्वन् + अपि	ङमुडागमसन्धिः।

(ख) समासः

योगयुक्तः	योगेन युक्तः योगयुक्तः - तृतीयातत्पुरुषः।
विशुद्धात्मा	विशुद्धः आत्मा यस्य सः विशुद्धात्मा - बहुव्रीहिः।
विजितात्मा	विजितः आत्मा येन सः विजितात्मा - बहुव्रीहिः।
जितेन्द्रियः	जितानि इन्द्रियाणि येन सः जितेन्द्रियः - बहुव्रीहिः।

	सर्वभूतात्मभूतात्मा	सर्वाणि भूतानि सर्वभूतानि - कर्मधारयः। सर्वभूतानाम् आत्मभूतः सर्वभूतात्मभूतः - षष्ठीतत्पुरुषः। सर्वभूतात्मभूतः आत्मा यस्य सः सर्वभूतात्मभूतात्मा - बहुव्रीहिः।
(ग) कृदन्तः	योगः	युज् (युजिर् - योगे) + घञ्।
	युक्तः	युज् (युजिर् - योगे) + क्त।
	विशुद्धः	वि + शुध् (शुध - शौचे) + क्त (कर्तरि)।
	विजितः	वि + जि (जि - जये) + क्त।
	भूतः	भू (भू - सत्तायाम्) + क्त (भावे)।

भावस्पष्टीकरणम् -

न लिप्यते।	
कः न लिप्यते ?	**योगयुक्तः** न लिप्यते।
योगयुक्तः **पुनश्च कीदृशः** न लिप्यते ?	योगयुक्तः **विशुद्धात्मा** न लिप्यते।
योगयुक्तः विशुद्धात्मा **पुनश्च कीदृशः** न लिप्यते ?	योगयुक्तः विशुद्धात्मा **विजितात्मा** न लिप्यते।
योगयुक्तः विशुद्धात्मा **विजितात्मा पुनश्च कीदृशः** न लिप्यते ?	योगयुक्तः विशुद्धात्मा विजितात्मा **जितेन्द्रियः** न लिप्यते।
योगयुक्तः विशुद्धात्मा विजितात्मा जितेन्द्रियः **पुनश्च कीदृशः** न लिप्यते ?	योगयुक्तः विशुद्धात्मा विजितात्मा जितेन्द्रियः **सर्वभूतात्मभूतात्मा** न लिप्यते।
योगयुक्तः विशुद्धात्मा विजितात्मा जितेन्द्रियः सर्वभूतात्मभूतात्मा **कथं** न लिप्यते ?	योगयुक्तः विशुद्धात्मा विजितात्मा जितेन्द्रियः सर्वभूतात्मभूतात्मा **कुर्वन् अपि** न लिप्यते।

तात्पर्यम् - योगयुक्तः, विशुद्धचित्तः, स्वच्छशरीरः, जितेन्द्रियः यथार्थदर्शी च पुरुषः कर्म कुर्वन्नपि तेन लिप्तः न भवति।

नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित्।
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् ॥५.८॥
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥५.९॥

पदच्छेदः - न, एव, किञ्चित्, करोमि, इति, युक्तः, मन्येत, तत्त्ववित्।
पश्यन्, शृण्वन्, स्पृशन्, जिघ्रन्, अश्नन्, गच्छन्, स्वपन्, श्वसन्॥
प्रलपन्, विसृजन्, गृह्णन्, उन्मिषन्, निमिषन्, अपि।
इन्द्रियाणि, इन्द्रियार्थेषु, वर्तन्ते, इति, धारयन्॥

अन्वयः - युक्तः तत्त्ववित् पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् प्रलपन् विसृजन् गृह्णन् उन्मिषन् निमिषन् अपि इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते इति धारयन् 'न एव किञ्चित् करोमि' इति मन्येत।

पदार्थः - युक्तः = योगी, तत्त्ववित् = सम्यग्दर्शी, पश्यन् = अवलोकयन्, शृण्वन् = आकर्णयन्, स्पृशन् = स्पर्शं कुर्वन्, जिघ्रन् = गन्धं जानन्, अश्नन् = खादन्, गच्छन् = चरन्, स्वपन् = शयानः, श्वसन् = प्राणन्, प्रलपन् = वदन्, विसृजन् = मुञ्चन्, गृह्णन् = स्वीकुर्वन्, उन्मिषन् = उन्मीलन्, निमिषन् अपि = निमीलन् अपि, इन्द्रियाणि = नेत्रादीनि, इन्द्रियार्थेषु = विषयेषु, वर्तन्ते इति = प्रसरन्ति इति, धारयन् = निश्चयं कुर्वन्, न एव किञ्चित् = न ईषत् अपि, करोमि इति = आचरामि इति, मन्येत = चिन्तयेत्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
युक्तः	अ. पुं. प्र. एक. (विशेषणम्)	तत्त्ववित्	तत्त्ववित्- द. पुं. प्र. एक. (विशेषणम्)
पश्यन्	पश्यत्- त. पुं. प्र. एक. (विशेषणम्)	शृण्वन्	शृण्वत्- त. पुं. प्र. एक. (विशेषणम्)
स्पृशन्	स्पृशत्- त. पुं. प्र. एक. (विशेषणम्)	जिघ्रन्	जिघ्रत्- त. पुं. प्र. एक. (विशेषणम्)
अश्नन्	अश्नत्- त. पुं. प्र. एक. (विशेषणम्)	गच्छन्	गच्छत्- त. पुं. प्र. एक. (विशेषणम्)
स्वपन्	स्वपत्- त. पुं. प्र. एक. (विशेषणम्)	श्वसन्	श्वसत्- त. पुं. प्र. एक. (विशेषणम्)
प्रलपन्	प्रलपत्- त. पुं. प्र. एक. (विशेषणम्)	विसृजन्	विसृजत्- त. पुं. प्र. एक. (विशेषणम्)
गृह्णन्	गृह्णत्- त. पुं. प्र. एक. (विशेषणम्)	उन्मिषन्	उन्मिषत्- त. पुं. प्र. एक. (विशेषणम्)
निमिषन्	निमिषत्- त. पुं. प्र. एक. (विशेषणम्)	अपि	अव्ययम्
इन्द्रियाणि	अ. नपुं. प्र. बहु.	इन्द्रियार्थेषु	अ. नपुं. स. बहु.
वर्तन्ते	वृत् (वृतु - वर्तने) आत्म. कर्तरि लट्. प्रपु. बहु.	इति	अव्ययम्
धारयन्	धारयत्- त. पुं. प्र. एक. (विशेषणम्)	न	अव्ययम्
एव	अव्ययम्	किञ्चित्	अव्ययम्

करोमि	कृ (डुकृञ् - करणे) पर. कर्तरि लट्. उपु. एक.	मन्येत	मन् (मन ज्ञाने) आत्म. कर्तरि विधिलिङ्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	नैव	न + एव	वृद्धिसन्धिः।
	करोमीति	करोमि + इति	सवर्णदीर्घसन्धिः।
	युक्तो मन्येत	युक्तः + मन्येत	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	पश्यञ्शृण्वन्	पश्यन् + शृण्वन्	श्चुत्वसन्धिः।
	स्पृशञ्जिघ्रन्	स्पृशन् + जिघ्रन्	श्चुत्वसन्धिः।
	जिघ्रन्नश्नन्	जिघ्रन् + अश्नन्	ङमुडागमसन्धिः।
	स्वपञ्श्वसन्	स्वपन् + श्वसन्	श्चुत्वसन्धिः।
	गृह्णन्नुन्मिषन्	गृह्णन् + उन्मिषन्	ङमुडागमसन्धिः।
	निमिषन्नपि	निमिषन् + अपि	ङमुडागमसन्धिः।
	इन्द्रियाणीन्द्रियार्थेषु	इन्द्रियाणि + इन्द्रियार्थेषु	सवर्णदीर्घसन्धिः।
	वर्तन्त इति	वर्तन्ते + इति	यान्तवान्तादेशसन्धिः, (यलोपः) प्रकृतिभावः च।

(ख) समासः	तत्त्ववित्	तत्त्वं वेत्ति इति तत्त्ववित् - कर्तरि क्विप् उपपदसमासश्च।
	इन्द्रियार्थेषु	इन्द्रियाणाम् अर्थाः इन्द्रियार्थाः, तेषु - षष्ठीतत्पुरुषः।

(ग) कृदन्तः	युक्तः	युज् (युजिर् - योगे) + क्त	(कर्तरि)।
	पश्यन्	दृश्य (दृशिर् - प्रेक्षणे) + शतृ	(कर्तरि)।
	शृण्वन्	श्रु (श्रु - श्रवणे) + शतृ	(कर्तरि)।
	स्पृशन्	स्पृश् (स्पृश - संस्पर्शने) + शतृ	(कर्तरि)।
	जिघ्रन्	घ्रा (घ्रा - गन्धोपादाने) + शतृ	(कर्तरि)।
	अश्नन्	अश् (अश - भोजने) + शतृ	(कर्तरि)।
	गच्छन्	गम् (गम्लृ - गतौ) + शतृ	(कर्तरि)।
	स्वपन्	स्वप् (ञिष्वप् - शये) + शतृ	(कर्तरि)।
	श्वसन्	श्वस् (श्वस - प्राणने) + शतृ	(कर्तरि)।
	प्रलपन्	प्र + लप् (लप - व्यक्तायां वाचि) + शतृ	(कर्तरि)।
	विसृजन्	वि + सृज् (सृज - विसर्गे) + शतृ	(कर्तरि)।
	गृह्णन्	ग्रह् (ग्रह - उपादाने) + शतृ	(कर्तरि)।
	उन्मिषन्	उत् + मिष् (मिष - स्पर्धायाम्) + शतृ	(कर्तरि)।
	निमिषन्	नि + मिष् (मिष - स्पर्धायाम्) + शतृ	(कर्तरि)।
	धारयन्	धृ (धृञ् - धारणे) + णिच् (प्रेरणार्थे) शतृ	(कर्तरि)।

भावस्पष्टीकरणम् -

मन्येत ।	
किं मन्येत ?	**'न एव किञ्चित् करोमि' इति** मन्येत ।
किं कुर्वन् 'न एव किञ्चित् करोमि' इति मन्येत ?	**धारयन्** 'न एव किञ्चित् करोमि' इति मन्येत ।
केषु धारयन् 'न एव किञ्चित् करोमि' इति मन्येत ?	**इन्द्रियार्थेषु** धारयन् 'न एव किञ्चित् करोमि' इति मन्येत ।
कानि इन्द्रियार्थेषु धारयन् 'न एव किञ्चित् करोमि' इति मन्येत ?	**इन्द्रियाणि** इन्द्रियार्थेषु धारयन् 'न एव किञ्चित् करोमि' इति मन्येत ।
इन्द्रियाणि इन्द्रियार्थेषु **किम् इति** धारयन् 'न एव किञ्चित् करोमि' इति मन्येत ?	इन्द्रियाणि इन्द्रियार्थेषु **वर्तन्ते इति** धारयन् 'न एव किञ्चित् करोमि' इति मन्येत ।
कः इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते इति धारयन् 'न एव किञ्चित् करोमि' इति मन्येत ?	**युक्तः** इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते इति धारयन् 'न एव किञ्चित् करोमि' इति मन्येत ।
युक्तः **कीदृशः** इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते इति धारयन् 'न एव किञ्चित् करोमि' इति मन्येत ?	युक्तः **तत्त्ववित्** इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते इति धारयन् 'न एव किञ्चित् करोमि' इति मन्येत ।
युक्तः तत्त्ववित् **किं किं कुर्वन् अपि** इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते इति धारयन् 'न एव किञ्चित् करोमि' इति मन्येत ।	युक्तः तत्त्ववित् **पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् प्रलपन् विसृजन् गृह्णन् उन्मिषन् निमिषन् अपि** इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते इति धारयन् 'न एव किञ्चित् करोमि' इति मन्येत ।

तात्पर्यम् - तत्त्ववित् ज्ञानी यः अस्ति सः पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् प्रलपन् विसृजन् गृह्णन् उन्मिषन् निमिषन् अपि इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते इति मनसि भावनां धारयन् 'अहं न किञ्चित् करोमि' इति मन्यते ।

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥५.१०॥

पदच्छेदः - ब्रह्मणि, आधाय, कर्माणि, सङ्गम्, त्यक्त्वा, करोति, यः ।
लिप्यते, न, सः, पापेन, पद्मपत्रम्, इव, अम्भसा ॥

अन्वयः - यः ब्रह्मणि आधाय सङ्गं त्यक्त्वा कर्माणि करोति सः अम्भसा पद्मपत्रम् इव पापेन न लिप्यते ।

पदार्थः - यः = यः पुरुषः, ब्रह्मणि = परमात्मनि, आधाय = निक्षिप्य, सङ्गम् = फलासक्तिम्, त्यक्त्वा = विसृज्य, कर्माणि = नियतकर्माणि, करोति = आचरति, सः = सः पुरुषः, अम्भसा = जलेन, पद्मपत्रम् इव = कमलपर्णम् इव, पापेन = पापेन, न लिप्यते = न स्पृश्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ब्रह्मणि	ब्रह्मन् - न. नपुं. स. एक.	आधाय	ल्यबन्तम् अव्ययम्
सङ्गम्	अ. पुं. द्वि. एक.	त्यक्त्वा	क्त्वान्तम् अव्ययम्
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	कर्माणि	कर्मन्- न. नपुं. द्वि. बहु.
करोति	कृ (डुकृञ् - करणे) पर. कर्तरि लट्. प्रपु. एक.	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
अम्भसा	अम्भस्- सका. नपुं. तृ. एक.	पद्मपत्रम्	अ. नपुं. प्र. एक.
इव	अव्ययम्	पापेन '	अ. नपुं. तृ. एक
न	अव्ययम्	लिप्यते	लिप् (लिप - उपदेहे) पर. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	ब्रह्मण्याधाय	ब्रह्मणि + आधाय	यण्सन्धिः ।
	स पापेन	सः + पापेन	विसर्गसन्धिः (लोपः) ।
	इवाम्भसा	इव + अम्भसा	सवर्णदीर्घसन्धिः ।
(ख) समासः	पद्मपत्रम्	पद्मस्य पत्रं पद्मपत्रम् - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	आधाय	आ + धा (डुधाञ् धारणपोषणयोः) + ल्यप् ।	
	सङ्गम्	सञ्ज् (षञ्ज - सङ्गे) + घञ्, तम् ।	
	त्यक्त्वा	त्यज् (त्यज हानौ) + क्त्वा ।	

भावस्पष्टीकरणम् -

करोति ।	
कानि करोति ?	**कर्माणि** करोति ।
किं कृत्वा कर्माणि करोति ?	**त्यक्त्वा** कर्माणि करोति ।
कं त्यक्त्वा कर्माणि करोति ?	**सङ्गं** त्यक्त्वा कर्माणि करोति ।

पुनः किं कृत्वा सङ्गं त्यक्त्वा कर्माणि करोति ?	**आधाय** सङ्गं त्यक्त्वा कर्माणि करोति ।
कस्मिन् आधाय सङ्गं त्यक्त्वा कर्माणि करोति ?	**ब्रह्मणि** आधाय सङ्गं त्यक्त्वा कर्माणि करोति ।
कः ब्रह्मणि आधाय सङ्गं त्यक्त्वा कर्माणि करोति ?	**यः** ब्रह्मणि आधाय सङ्गं त्यक्त्वा कर्माणि करोति ।
यः ब्रह्मणि आधाय सङ्गं त्यक्त्वा कर्माणि करोति । **तेन किम् ?**	यः ब्रह्मणि आधाय सङ्गं त्यक्त्वा कर्माणि करोति । **सः न लिप्यते ।**
यः ब्रह्मणि आधाय सङ्गं त्यक्त्वा कर्माणि करोति । सः **केन** न लिप्यते ?	यः ब्रह्मणि आधाय सङ्गं त्यक्त्वा कर्माणि करोति । सः **पापेन** न लिप्यते ।
यः ब्रह्मणि आधाय सङ्गं त्यक्त्वा कर्माणि करोति । सः **किम् इव** पापेन न लिप्यते ?	यः ब्रह्मणि आधाय सङ्गं त्यक्त्वा कर्माणि करोति । सः **पद्मपत्रम् इव** पापेन न लिप्यते ।
यः ब्रह्मणि आधाय सङ्गं त्यक्त्वा कर्माणि करोति । सः **केन** पद्मपत्रम् इव पापेन न लिप्यते ?	यः ब्रह्मणि आधाय सङ्गं त्यक्त्वा कर्माणि करोति । सः **अम्भसा** पद्मपत्रम् इव पापेन न लिप्यते ।

तात्पर्यम् - यः पुरुषः सर्वाणि अपि कर्माणि ब्रह्मणे अर्पयित्वा सङ्गं त्यक्त्वा स्वाम्यर्थं भृत्यः इव कर्माणि आचरति सः पद्मपत्रं सरोवरे वर्तमानम् अपि जलेन यथा न लिप्यते तथा पापेन न लिप्यते ।

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥५.११ ॥

पदच्छेदः - कायेन, मनसा, बुद्ध्या, केवलैः, इन्द्रियैः, अपि ।
योगिनः, कर्म, कुर्वन्ति, सङ्गम्, त्यक्त्वा, आत्मशुद्धये ॥

अन्वयः - योगिनः कायेन मनसा बुद्ध्या केवलैः इन्द्रियैः अपि सङ्गं त्यक्त्वा आत्मशुद्धये कर्म कुर्वन्ति ।

पदार्थः - योगिनः = कर्मयोगिनः, कायेन = शरीरेण, मनसा = चित्तेन, बुद्ध्या = मत्या, केवलैः = ईश्वरार्पणबुद्ध्या विधानेन ममताशून्यैः, इन्द्रियैः अपि = नेत्रादिभिः अपि, सङ्गम् = आसक्तिम्, त्यक्त्वा = विहाय, आत्मशुद्धये = चित्तशुद्धये, कर्म = कर्तव्यम्, कुर्वन्ति = आचरन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कायेन	अ. पुं. तृ. एक.	मनसा	मनस्- सका. नपुं. तृ. एक.
बुद्ध्या	इ. स्त्री. तृ. एक.	केवलैः	अ. नपुं. तृ. बहु. (विशेषणम्)
इन्द्रियैः	अ. नपुं. तृ. बहु. (विशेषणम्)	अपि	अव्ययम्

योगिनः	योगिन्- न. पुं. प्र. बहु.	कर्म	कर्मन्- न. नपुं. द्वि. एक.
कुर्वन्ति	कृ (डुकृञ् करणे) पर. कर्तरि लट्. प्रपु. बहु.	सङ्गम्	अ. पुं. द्वि. एक.
त्यक्त्वा	क्त्वान्तम् अव्ययम्	आत्मशुद्धये	इ. स्त्री. च. एक.

व्याकरणम् -

(क) सन्धिः	केवलैरिन्द्रियैः	केवलैः + इन्द्रियैः	विसर्गसन्धिः (रेफः)।
	इन्द्रियैरपि	इन्द्रियैः + अपि	विसर्गसन्धिः (रेफः)।
	त्यक्त्वात्मशुद्धये	त्यक्त्वा + आत्मशुद्धये	सवर्णदीर्घसन्धिः।
(ख) समासः	आत्मशुद्धये	आत्मनः शुद्धिः आत्मशुद्धिः, तस्मै - षष्ठीतत्पुरुषः।	
(ग) कृदन्तः	कायेन	चि (चिञ् - चयने) + घञ्, चीयतेऽस्मिन् अस्थ्यादिकमिति कायः, तेन।	
	बुद्ध्या	बुध् (बुध - अवगमने) + क्तिन्, तया।	
	सङ्गम्	सञ्ज् (षञ्ज - सङ्गे) + घञ्, तम्।	
	त्यक्त्वा	त्यज् (त्यज - हानौ) + क्त्वा।	
	शुद्धिः	शुध् (शुध - शौचे) + क्तिन्।	
(घ) तद्धितान्तः	योगिनः	योग + इनि (मतुबर्थे) योगः एषाम् एषु वा अस्ति।	

भावस्पष्टीकरणम् -

कुर्वन्ति।	
किं कुर्वन्ति ?	**कर्म** कुर्वन्ति।
किमर्थं कर्म कुर्वन्ति ?	**आत्मशुद्धये** कर्म कुर्वन्ति।
किं कृत्वा आत्मशुद्धये कर्म कुर्वन्ति ?	**त्यक्त्वा** आत्मशुद्धये कर्म कुर्वन्ति।
कं त्यक्त्वा आत्मशुद्धये कर्म कुर्वन्ति ?	**सङ्गं** त्यक्त्वा आत्मशुद्धये कर्म कुर्वन्ति।
के सङ्गं त्यक्त्वा आत्मशुद्धये कर्म कुर्वन्ति ?	**योगिनः** सङ्गं त्यक्त्वा आत्मशुद्धये कर्म कुर्वन्ति।
योगिनः **केन** सङ्गं त्यक्त्वा आत्मशुद्धये कर्म कुर्वन्ति ?	योगिनः **कायेन** सङ्गं त्यक्त्वा आत्मशुद्धये कर्म कुर्वन्ति।
योगिनः कायेन **पुनश्च केन** सङ्गं त्यक्त्वा आत्मशुद्धये कर्म कुर्वन्ति ?	योगिनः कायेन **मनसा** सङ्गं त्यक्त्वा आत्मशुद्धये कर्म कुर्वन्ति।
योगिनः कायेन मनसा **पुनश्च कया** सङ्गं त्यक्त्वा आत्मशुद्धये कर्म कुर्वन्ति ?	योगिनः कायेन मनसा **बुद्ध्या** सङ्गं त्यक्त्वा आत्मशुद्धये कर्म कुर्वन्ति।

योगिनः कायेन मनसा बुद्ध्या **कैः** अपि सङ्गं त्यक्त्वा आत्मशुद्धये कर्म कुर्वन्ति ?	योगिनः कायेन मनसा बुद्ध्या **इन्द्रियैः अपि** सङ्गं त्यक्त्वा आत्मशुद्धये कर्म कुर्वन्ति ।
योगिनः कायेन मनसा बुद्ध्या **कीदृशैः** इन्द्रियैः अपि सङ्गं त्यक्त्वा आत्मशुद्धये कर्म कुर्वन्ति ?	योगिनः कायेन मनसा बुद्ध्या **केवलैः** इन्द्रियैः अपि सङ्गं त्यक्त्वा आत्मशुद्धये कर्म कुर्वन्ति ।

तात्पर्यम् - योगिनः कायेन मनसा बुद्ध्या 'ईश्वराय एव कर्म करोमि, न मम फलाय' इति ममतां विना इन्द्रियैश्च कर्म आचरन्ति । तेन तेषां चित्तं शुद्धं भवति ।

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥५.१२॥

पदच्छेदः - युक्तः, कर्मफलम्, त्यक्त्वा, शान्तिम्, आप्नोति, नैष्ठिकीम् ।
अयुक्तः, कामकारेण, फले, सक्तः, निबध्यते ॥

अन्वयः - युक्तः कर्मफलं त्यक्त्वा नैष्ठिकीं शान्तिम् आप्नोति । अयुक्तः कामकारेण फले सक्तः निबध्यते ।

पदार्थः - युक्तः = समाहितः, कर्मफलम् = कर्मणां प्रयोजनम्, त्यक्त्वा = परित्यज्य, नैष्ठिकीं शान्तिम् = मोक्षम्, (निष्ठा = स्वाभाविकी स्थितिः, तत्सम्बन्धिनीं शान्तिम्) आप्नोति = विन्दते, अयुक्तः = असमाहितः, कामकारेण = इच्छावशात् प्रवृत्त्या, फले = प्रयोजने, सक्तः = सम्बद्धः, निबध्यते = बन्धं प्राप्नोति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
युक्तः	अ. पुं. प्र. एक. (विशेषणम्)	कर्मफलम्	अ. नपुं. द्वि. एक.
त्यक्त्वा	क्त्वान्तम् अव्ययम्	नैष्ठिकीम्	ई. स्त्री. द्वि. एक. (विशेषणम्)
शान्तिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)	आप्नोति	आप् (आप्लृ - व्याप्तौ) पर. कर्तरि लट्. प्रपु. एक.
अयुक्तः	अ. पुं. प्र. एक. (विशेषणम्)	कामकारेण	अ. पुं. तृ. एक.
फले	अ. नपुं. स. एक.	सक्तः	अ. पुं. प्र. एक. (विशेषणम्)
निबध्यते	नि + बन्ध् (बन्ध बन्धने) पर. कर्मणि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः सक्तो निबध्यते — सक्तः + निबध्यते — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) समासः कर्मफलम् — कर्मणां फलम्, कर्मफलम् - षष्ठीतत्पुरुषः ।

	अयुक्तः	न युक्तः अयुक्तः - नञ्तत्पुरुषः।
	कामकारेण	कामस्य कारः कामकारः, तेन - षष्ठीतत्पुरुषः।
(ग) कृदन्तः	युक्तः	युज् (युजिर् - योगे) + क्त कर्तरि।
	त्यक्त्वा	त्यज् (त्यज् - हानौ) + क्त्वा।
	शान्तिम्	शम् (शमु - उपशमने) + क्तिन्, ताम्।
	कामः	कम् (कमु - कान्तौ) घञ्।
	कारः	कृ (डुकृञ् - करणे) घञ्।
	सक्तः	सञ्ज् (षञ्ज- सङ्गे) + क्त (कर्मणि)।
(घ) तद्धितान्तः	नैष्ठिकीम्	निष्ठा + ठक् (इयम् इत्यर्थे) + ङीप् (स्त्री प्रत्ययः) निष्ठासम्बन्धिनी।

भावस्पष्टीकरणम् -

आप्नोति।	
कः आप्नोति	**युक्तः** आप्नोति।
युक्तः **किम्** आप्नोति ?	युक्तः **शान्तिम्** आप्नोति।
युक्तः **कीदृशीं** शान्तिम् आप्नोति ?	युक्तः **नैष्ठिकीं** शान्तिम् आप्नोति।
युक्तः **किं कृत्वा** नैष्ठिकीं शान्तिम् आप्नोति ?	युक्तः **त्यक्त्वा** नैष्ठिकीं शान्तिम् आप्नोति।
युक्तः **किं** त्यक्त्वा नैष्ठिकीं शान्तिम् आप्नोति ?	युक्तः **कर्मफलं** त्यक्त्वा नैष्ठिकीं शान्तिम् आप्नोति।
निबध्यते।	
कः निबध्यते ?	**अयुक्तः** निबध्यते।
अयुक्तः **केन** निबध्यते ?	अयुक्तः **कामकारेण** निबध्यते।
अयुक्तः कामकारेण **कीदृशः** निबध्यते ?	अयुक्तः कामकारेण **सक्तः** निबध्यते।
अयुक्तः कामकारेण **कस्मिन्** सक्तः निबध्यते ?	अयुक्तः कामकारेण **फले** सक्तः निबध्यते।

तात्पर्यम् - 'ईश्वराय कर्माणि करोमि, न फलाय' इति भावयन् समाहितः योगी (पुरुषः) कर्मफलानि त्यक्त्वा मोक्षं प्राप्नोति। यस्तु फलाकाङ्क्षी कर्मसु प्रवर्तते सः बद्धो भवति।

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन्॥५.१३॥

पदच्छेदः - सर्वकर्माणि, मनसा, संन्यस्य, आस्ते, सुखम्, वशी।
नवद्वारे, पुरे, देही, न, एव, कुर्वन्, न, कारयन्॥

अन्वयः - वशी देही नवद्वारे पुरे सर्वकर्माणि मनसा संन्यस्य न एव कुर्वन् न कारयन् सुखम् आस्ते ।

पदार्थः - वशी = जितेन्द्रियः, देही = पुरुषः, नवद्वारे पुरे = नवद्वारसहिते शरीरे, सर्वकर्माणि = सर्वाणि कर्माणि, मनसा = चित्तेन, संन्यस्य = परित्यज्य, न एव कुर्वन् = किमपि अकुर्वन्, न कारयन् = किमपि अकारयन्, सुखम् = सुखेन, आस्ते = तिष्ठति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
वशी	वशिन्- न. पुं. प्र. एक. (विशेषणम्)	देही	देहिन्- न. पुं. प्र. एक. (विशेष्यम्)
नवद्वारे	अ. नपुं. स. एक. (विशेषणम्)	पुरे	अ. नपुं. स. एक. (विशेष्यम्)
सर्वकर्माणि	सर्वकर्मन्- न. नपुं. द्वि. बहु.	मनसा	मनस्- सका. नपुं. तृ. एक.
संन्यस्य	ल्यबन्तम् अव्ययम्	न	अव्ययम्
एव	अव्ययम्	कुर्वन्	कुर्वत्- त. पुं. प्र. एक. (विशेषणम्)
कारयन्	कारयत्- त. पुं. प्र. एक. (विशेषणम्)	सुखम्	अ. नपुं. द्वि. एक.
आस्ते	आस् (आस उपवेशने) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	संन्यस्यास्ते	संन्यस्य + आस्ते	सवर्णदीर्घसन्धिः ।
	नैव	न + एव	वृद्धिसन्धिः ।
(ख) समासः	सर्वकर्माणि	सर्वाणि कर्माणि सर्वकर्माणि - कर्मधारयः ।	
	नवद्वारे	नव द्वाराणि यस्मिन् तत् नवद्वारम्, तस्मिन् - कर्मधारयः ।	
(ग) कृदन्तः	संन्यस्य	सम् + नि + अस् (असु - क्षेपणे) + ल्यप् ।	
	कुर्वन्	कृ (डुकृञ् - करणे) + शतृ (कर्तरि) ।	
	कारयन्	कृ (डुकृञ् - करणे) + णिच् + शतृ (कर्तरि) ।	
(घ) तद्धितान्तः	वशी	वश + इनि (मतुबर्थे) वशः अस्य अस्मिन् वा अस्ति ।	
	देही	देह + इनि (मतुबर्थे) देहः अस्य अस्मिन् वा अस्ति ।	

भावस्पष्टीकरणम् -

आस्ते ।	
कथम् आस्ते ?	सुखम् आस्ते ।
कः सुखम् आस्ते ?	देही सुखम् आस्ते ।

कीदृशः देही सुखम् आस्ते ?	**वशी** देही सुखम् आस्ते ।
वशी देही **किं कृत्वा** सुखम् आस्ते ?	वशी देही **संन्यस्य** सुखम् आस्ते ।
वशी देही **कानि** संन्यस्य सुखम् आस्ते ?	वशी देही **सर्वकर्माणि** संन्यस्य सुखम् आस्ते ।
वशी देही सर्वकर्माणि **केन** संन्यस्य सुखम् आस्ते ?	वशी देही सर्वकर्माणि **मनसा** संन्यस्य सुखम् आस्ते ।
वशी देही **कुत्र** सर्वकर्माणि मनसा संन्यस्य सुखम् आस्ते ?	वशी देही **पुरे** सर्वकर्माणि मनसा संन्यस्य सुखम् आस्ते ।
वशी देही **कीदृशे** पुरे सर्वकर्माणि मनसा संन्यस्य सुखम् आस्ते ।	वशी देही **नवद्वारे** पुरे सर्वकर्माणि मनसा संन्यस्य सुखम् आस्ते ।
वशी देही नवद्वारे पुरे सर्वकर्माणि मनसा संन्यस्य **कदा** सुखम् आस्ते ?	वशी देही नवद्वारे पुरे सर्वकर्माणि मनसा संन्यस्य **न एव कुर्वन् न कारयन्** सुखम् आस्ते ।

तात्पर्यम् - यः जितेन्द्रियः अस्ति सः पुरुषः किमपि कर्म अकुर्वन् अकारयन् च नवद्वारयुते शरीररूपे नगरे सर्वाणि अपि कर्माणि मनसा परित्यज्य सुखेन तिष्ठति । परमात्मनि एव तिष्ठति इत्यर्थः ।

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥५.१४॥

पदच्छेदः - न, कर्तृत्वम्, न, कर्माणि, लोकस्य, सृजति, प्रभुः ।
न, कर्मफलसंयोगम्, स्वभावः, तु, प्रवर्तते ॥

अन्वयः - प्रभुः लोकस्य कर्तृत्वं न सृजति । कर्माणि न कर्मफलसंयोगं न । स्वभावः तु प्रवर्तते ।

पदार्थः - प्रभुः = परमात्मा, लोकस्य = जनस्य, कर्तृत्वम् = विधातृत्वम्, न सृजति = न करोति, कर्माणि = कर्तव्यानि, न = न करोति, कर्मफलसंयोगम् = कर्मप्रयोजनयोः सम्बद्धम्, न = न कुरुते, स्वभावः तु = अविद्या तु, प्रवर्तते = प्रचरति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
प्रभुः	उ. पुं. प्र. एक.	लोकस्य	अ. पुं. ष. एक
कर्तृत्वम्	अ. नपुं. द्वि. एक.	न	अव्ययम्

सृजति	सृज् (सृज - विसर्गे) पर. कर्तरि लट्. प्रपु. एक.	कर्माणि	कर्मन्- न. नपुं. द्वि. एक.
कर्मफलसंयोगम्	अ. नपुं. द्वि. एक.	स्वभावः	अ. पुं. प्र. एक.
तु	अव्ययम्	प्रवर्तते	प्र + वृत् (वृतु - वर्तने) आत्म. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः स्वभावस्तु — स्वभावः + तु — विसर्गसन्धिः (सकारः)।

(ख) समासः कर्मफलसंयोगम् — कर्म च फलं च कर्मफले - द्वन्द्वः।
कर्मफलयोः संयोगः कर्मफलसंयोगः - षष्ठीतत्पुरुषः।

स्वभावः — स्वस्य भावः स्वभावः - षष्ठीतत्पुरुषः।

(ग) कृदन्तः लोकस्य — लोक् (लोकृ - दर्शने) + घञ्, तस्य।

(घ) तद्धितान्तः कर्तृत्वम् — कर्तृ + त्व (भावार्थे), कर्तुः भावः कर्तृत्वम्।

भावस्पष्टीकरणम् -

न सृजति।	
कः न सृजति ?	**प्रभुः** न सृजति।
प्रभुः **किं** न सृजति ?	प्रभुः **कर्तृत्वं** न सृजति।
प्रभुः **कस्य** कर्तृत्वं न सृजति ?	प्रभुः **लोकस्य** कर्तृत्वं न सृजति।
प्रभुः लोकस्य कर्तृत्वं न सृजति। **कानि न करोति ?**	प्रभुः लोकस्य कर्तृत्वं न सृजति। **कर्माणि न** (करोति)।
प्रभुः लोकस्य कर्तृत्वं न सृजति। कर्माणि न करोति। **पुनश्च किं न ?**	प्रभुः लोकस्य कर्तृत्वं न सृजति। कर्माणि न करोति। **कर्मफलसंयोगं च न (करोति)।**
प्रभुः लोकस्य कर्तृत्वं न सृजति। कर्माणि न करोति। कर्मफलसंयोगं च न करोति। **किं भवति** ?	प्रभुः लोकस्य कर्तृत्वं न सृजति। कर्माणि न करोति। कर्मफलसंयोगं च न करोति। **प्रवर्तते**।
प्रभुः लोकस्य कर्तृत्वं न सृजति। कर्माणि न करोति। कर्मफलसंयोगं च न करोति। **कः** प्रवर्तते ?	प्रभुः लोकस्य कर्तृत्वं न सृजति। कर्माणि न करोति। कर्मफलसंयोगं च न करोति। **स्वभावस्तु** प्रवर्तते।

तात्पर्यम् - परमात्मा लोकस्य कर्तृत्वं न उत्पादयति। कर्माणि अपि न सृजति। कर्मफलसंयोगमपि न जनयति। अविद्यालक्षणा प्रकृतिः तु प्रवर्तते।

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥५.१५॥

पदच्छेदः - न, आदत्ते, कस्यचित्, पापम्, न, च, एव, सुकृतम्, विभुः।
अज्ञानेन, आवृतम्, ज्ञानम्, तेन, मुह्यन्ति, जन्तवः ॥

अन्वयः - विभुः कस्यचित् पापं न आदत्ते। सुकृतं च न एव। ज्ञानम् अज्ञानेन आवृतम्। तेन जन्तवः मुह्यन्ति।

पदार्थः - विभुः = परमेश्वरः, कस्यचित् = कस्यचिदपि जीवस्य, पापम् = दुरितम्, न आदत्ते = न स्वीकरोति, सुकृतं च = पुण्यमपि, न एव = नैव स्वीकरोति, ज्ञानम् = ज्ञानम्, अज्ञानेन = अज्ञानेन, आवृतम् = आच्छन्नम्, तेन = तेन, जन्तवः = जीवाः, मुह्यन्ति = मोहं प्राप्नुवन्ति। (भ्रामयन्ति)।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
विभुः	उ. पुं. प्र. एक.	कस्यचित्	अव्ययम्
पापम्	अ. नपुं. द्वि. एक.	न	अव्ययम्
आदत्ते	आ + दा (डुदाञ् - दाने) आत्म. कर्तरि लट्. प्रपु. एक.	सुकृतम्	अ. नपुं. द्वि. एक.
च	अव्ययम्	एव	अव्ययम्
ज्ञानम्	अ. नपुं. प्र. एक. (विशेष्यम्)	अज्ञानेन	अ. नपुं. तृ. एक.
आवृतम्	अ. नपुं. प्र. एक. (विशेषणम्)	तेन	तद्- द. सर्व. पुं. तृ. एक. (विशेषणम्)
जन्तवः	उ. पुं. प्र. बहु.	मुह्यन्ति	मुह् (मुह - वैचित्त्ये) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः

नादत्ते	न + आदत्ते	सवर्णदीर्घसन्धिः।
चैव	च + एव	वृद्धिसन्धिः।
अज्ञानेनावृतम्	अज्ञानेन + आवृतम्	सवर्णदीर्घसन्धिः।

(ख) समासः अज्ञानेन — न ज्ञानम् अज्ञानम्, तेन - नञ्तत्पुरुषः।

(ग) कृदन्तः

सुकृतम्	सु + कृ (डुकृञ् - करणे) क्त। (नपुंसके भावे)
विभुः	वि + भू (भू - सत्तायाम्) डु।
ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट्।
आवृतम्	आ + वृत् (वृतु - वर्तने) + क्त (कर्मणि)।

भावस्पष्टीकरणम् -

न आदत्ते।	
कः न आदत्ते ?	**विभुः** न आदत्ते।
विभुः **किं** न आदत्ते ?	विभुः **पापं** न आदत्ते।
विभुः **कस्य** पापं न आदत्ते ?	विभुः **कस्यचित्** पापं न आदत्ते।
विभुः कस्यचित् पापं न आदत्ते। **किं च न** ?	विभुः कस्यचित् पापं न आदत्ते। **सुकृतं च न एव**।
आवृतम् (भवति)।	
किम् आवृतं भवति ?	**ज्ञानम्** आवृतं भवति।
ज्ञानं **केन** आवृतं भवति ?	ज्ञानम् **अज्ञानेन** आवृतं भवति।
ज्ञानम् अज्ञानेन आवृतं भवति। **तेन किम्** ?	ज्ञानम् अज्ञानेन आवृतं भवति। **तेन मुह्यन्ति**।
ज्ञानम् अज्ञानेन आवृतं भवति। तेन **के** मुह्यन्ति ?	ज्ञानम् अज्ञानेन आवृतं भवति। तेन **जन्तवः** मुह्यन्ति।

तात्पर्यम् - परमात्मा कस्यापि जीवस्य पापं पुण्यं वा नैव गृह्णाति। अज्ञानेन ज्ञानम् आवृतं भवति। तेन सर्वेऽपि जन्तवः मोहम् उपगच्छन्ति।

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥५.१६॥

पदच्छेदः - ज्ञानेन, तु, तत्, अज्ञानम्, येषाम्, नाशितम्, आत्मनः।
तेषाम्, आदित्यवत्, ज्ञानम्, प्रकाशयति, तत्, परम् ॥

अन्वयः - आत्मनः ज्ञानेन येषाम् अज्ञानं नाशितं तेषां तु तत् ज्ञानम् आदित्यवत् परं प्रकाशयति।

पदार्थः - आत्मनः = भगवतः, ज्ञानेन = ज्ञानेन, येषाम् = येषां प्राणिनाम्, अज्ञानम् = अविद्या, नाशितम् = विनाशिता, तेषां तु = तेषां प्राणिनां तु, तत् ज्ञानम् = तत् आत्मज्ञानम्, आदित्यवत् = सूर्यः इव, परम् = परमतत्त्वम्, प्रकाशयति = विशदयति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
आत्मनः	आत्मन्- न. पुं. ष. एक.	ज्ञानेन	अ. नपुं. तृ. एक.
येषाम्	यद्- द. सर्व. पुं. ष. बहु. (विशेषणम्)	अज्ञानम्	अ. नपुं. प्र. एक. (विशेष्यम्)
नाशितम्	अ. नपुं. प्र. एक. (विशेषणम्)	तेषाम्	तद्- द. सर्व. पुं. ष. बहु.

तु	अव्ययम्	तत्	तद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)
ज्ञानम्	अ. नपुं. प्र. एक. (विशेष्यम्)	आदित्यवत्	अव्ययम्
परम्	अ. नपुं. द्वि. एक.	प्रकाशयति	प्र + काश् (काशृ दीप्तौ) (णिच्) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	तदज्ञानम्	तत् + अज्ञानम्	जश्त्वसन्धिः ।
	आदित्यवज्ज्ञानम्	आदित्यवत् + ज्ञानम् श्चुत्वसन्धिः, जश्त्वसन्धिः ।	
(ख) समासः	अज्ञानम्	न ज्ञानम् अज्ञानम् - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	ज्ञानेन	ज्ञा (ज्ञा - अवबोधने) + ल्युट्, तेन ।	
	नाशितम्	नश् (णश - अदर्शने) + णिच् + क्त (कर्मणि) ।	
(घ) तद्धितान्तः	आदित्यवत्	आदित्य + वति (तुल्यार्थे) आदित्यसदृशम् इत्यर्थः ।	

भावस्पष्टीकरणम् -

प्रकाशयति ।	
किं प्रकाशयति ?	**ज्ञानं** प्रकाशयति ।
ज्ञानं **कथं** प्रकाशयति ?	ज्ञानम् **आदित्यवत्** प्रकाशयति ।
ज्ञानम् आदित्यवत् **कीदृशं** प्रकाशयति ?	ज्ञानम् आदित्यवत् **परं** प्रकाशयति ।
कस्य तत् ज्ञानम् आदित्यवत् परं प्रकाशयति ?	**आत्मनः** तत् ज्ञानम् आदित्यवत् परं प्रकाशयति ।
आत्मनः **केन** तत् ज्ञानम् आदित्यवत् परं प्रकाशयति ?	आत्मनः **ज्ञानेन** तत् ज्ञानम् आदित्यवत् परं प्रकाशयति ।
आत्मनः ज्ञानेन **केषां** तत् ज्ञानम् आदित्यवत् परं प्रकाशयति ?	आत्मनः ज्ञानेन **येषां** तत् ज्ञानम् आदित्यवत् परं प्रकाशयति ।
आत्मनः ज्ञानेन येषां **किं** तत् ज्ञानम् आदित्यवत् परं प्रकाशयति ?	आत्मनः ज्ञानेन येषाम् **अज्ञानं** तत् ज्ञानम् आदित्यवत् परं प्रकाशयति ।
आत्मनः ज्ञानेन येषाम् अज्ञानं **कीदृशं** तत् ज्ञानम् आदित्यवत् परं प्रकाशयति ?	आत्मनः ज्ञानेन येषाम् अज्ञानं **नाशितं** तत् ज्ञानम् आदित्यवत् परं प्रकाशयति ।
आत्मनः ज्ञानेन येषाम् अज्ञानं नाशितं **केषां** तत् ज्ञानम् आदित्यवत् परं प्रकाशयति ?	आत्मनः ज्ञानेन येषाम् अज्ञानं नाशितं **तेषां तु** तत् ज्ञानम् आदित्यवत् परं प्रकाशयति ।

तात्पर्यम् - येषाम् अज्ञानम् आत्मनः ज्ञानेन नाशितं भवति तेषां तत् ज्ञानं सूर्यः यथा समस्तं रूपजातं प्रकाशयति तथा परमात्मार्थतत्त्वं प्रकाशयति ।

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥५.१७॥

पदच्छेदः - तद्बुद्धयः, तदात्मानः, तन्निष्ठाः, तत्परायणाः ।
गच्छन्ति, अपुनरावृत्तिम्, ज्ञाननिर्धूतकल्मषाः ॥

अन्वयः - तद्बुद्धयः तदात्मानः तन्निष्ठाः तत्परायणाः ज्ञाननिर्धूतकल्मषाः अपुनरावृत्तिं गच्छन्ति ।

पदार्थः - तद्बुद्धयः = परमात्मनिष्ठमतयः, तदात्मानः = परमात्मनिष्ठचित्ताः, तन्निष्ठाः = परमात्मनिष्ठस्थितयः, तत्परायणाः = परमात्मैव परो मार्गः येषाम्, ज्ञाननिर्धूतकल्मषाः = आत्मज्ञानविनिर्गतपापाः, अपुनरावृत्तिम् = पुनः अनागमनम् (मोक्षम्), गच्छन्ति = लभन्ते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तद्बुद्धयः	इ. पुं. प्र. बहु. (विशेषणम्)	तदात्मानः	तदात्मन्- न. पुं. प्र. बहु. (विशेषणम्)
तन्निष्ठाः	अ. पुं. प्र. बहु. (विशेषणम्)	तत्परायणाः	अ. पुं. प्र. बहु. (विशेषणम्)
ज्ञाननिर्धूतकल्मषाः	अ. पुं. प्र. बहु. (विशेषणम्)	अपुनरावृत्तिम्	इ. स्त्री. द्वि. एक.
गच्छन्ति	गम् (गम्लृ गतौ) पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः

तद्बुद्धयस्तदात्मानः	तद्बुद्धयः + तदात्मानः	विसर्गसन्धिः (सकारः) ।
तदात्मानस्तन्निष्ठाः	तदात्मानः + तन्निष्ठाः	विसर्गसन्धिः (सकारः) ।
तन्निष्ठास्तत्परायणाः	तन्निष्ठाः + तत्परायणाः	विसर्गसन्धिः (सकारः) ।
गच्छन्त्यपुनरावृत्तिम्	गच्छन्ति + अपुनरावृत्तिम्	यण्सन्धिः ।

(ख) समासः

तद्बुद्धयः	तस्मिन् बुद्धिः येषां ते तद्बुद्धयः - बहुव्रीहिः ।
तदात्मानः	तस्मिन् आत्मा येषां ते तदात्मानः - बहुव्रीहिः ।
तन्निष्ठाः	तस्मिन् निष्ठाः येषां ते तन्निष्ठाः - बहुव्रीहिः ।
तत्परायणाः	परम् अयनम्, परायणम् - कर्मधारयः ।
	तत् परायणं येषां ते तत्परायणाः - बहुव्रीहिः ।
अपुनरावृत्तिम्	न पुनरावृत्तिः अपुनरावृत्तिः, ताम् - नञ्तत्पुरुषः ।
ज्ञाननिर्धूतकल्मषाः	ज्ञानेन निर्धूतम्, ज्ञाननिर्धूतम् - तृतीयातत्पुरुषः ।
	ज्ञाननिर्धूतं कल्मषं येषां ते ज्ञाननिर्धूतकल्मषाः - बहुव्रीहिः ।

(ग) कृदन्तः	बुद्धिः	बुध् (बुध - अवगमने) + क्तिन् ।
	परायणम्	परा + अय् (अय - गतौ) + ल्युट् ।
	वृत्तिः	वृत् (वृतु - वर्तने) + क्तिन् ।
	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट् ।
	निर्धूतम्	निर् + धू (धूञ् - कम्पने) + क्त ।

भावस्पष्टीकरणम् -

गच्छन्ति ।	
कां गच्छन्ति ?	**अपुनरावृत्तिं** गच्छन्ति ।
के अपुनरावृत्तिं गच्छन्ति ?	**ज्ञाननिर्धूतकल्मषाः** अपुनरावृत्तिं गच्छन्ति ।
कीदृशाः ज्ञाननिर्धूतकल्मषाः अपुनरावृत्तिं गच्छन्ति ?	**तत्परायणाः** ज्ञाननिर्धूतकल्मषाः अपुनरावृत्तिं गच्छन्ति ।
पुनश्च कीदृशाः तत्परायणाः ज्ञाननिर्धूतकल्मषाः अपुनरावृत्तिं गच्छन्ति ?	**तन्निष्ठाः** तत्परायणाः ज्ञाननिर्धूतकल्मषाः अपुनरावृत्तिं गच्छन्ति ।
पुनश्च कीदृशाः तन्निष्ठाः तत्परायणाः ज्ञाननिर्धूतकल्मषाः अपुनरावृत्तिं गच्छन्ति ?	**तदात्मानः** तन्निष्ठाः तत्परायणाः ज्ञाननिर्धूतकल्मषाः अपुनरावृत्तिं गच्छन्ति ।
पुनश्च कीदृशाः तदात्मानः तन्निष्ठाः तत्परायणाः ज्ञाननिर्धूतकल्मषाः अपुनरावृत्तिं गच्छन्ति ?	**तद्बुद्धयः** तदात्मानः तन्निष्ठाः तत्परायणाः ज्ञाननिर्धूतकल्मषाः अपुनरावृत्तिं गच्छन्ति ।

तात्पर्यम् - येषां बुद्धिः परमात्मनि रमते, चित्तं तत्रैव विहरति, स्थितिः सर्वदा तत्रैव सम्भवति, प्राप्यं च तत्त्वं सः एव भवति तादृशाः ज्ञानेन कल्मषं नाशयन्तः पुरुषाः यतः पुनरागमनं न भवति तादृशं मोक्षं प्राप्नुवन्ति ।

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥५.१८॥

पदच्छेदः - विद्याविनयसम्पन्ने, ब्राह्मणे, गवि, हस्तिनि ।
शुनि, च, एव, श्वपाके, च, पण्डिताः, समदर्शिनः ॥

अन्वयः - पण्डिताः विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि शुनि च एव श्वपाके च समदर्शिनः भवन्ति ।

पदार्थः - पण्डिताः = ज्ञानिनः, विद्याविनयसम्पन्ने = विद्याविनयाभ्यां युक्ते, ब्राह्मणे = विप्रे, गवि = धेन्वाम्, हस्तिनि = गजे, शुनि च एव = शुनके च, श्वपाके च = चाण्डाले च, समदर्शिनः = समानदृष्टयः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पण्डिताः	अ. पुं. प्र. बहु. (विशेष्यम्)	विद्याविनयसम्पन्ने	अ. पुं. स. एक.
ब्राह्मणे	अ. पुं. स. एक.	गवि	ओ. स्त्री. स. एक.
हस्तिनि	हस्तिन्- न. नपुं. स. एक.	शुनि	श्वन्- न. पुं. स. एक.
च	अव्ययम्	एव	अव्ययम्
समदर्शिनः	समदर्शिन्- न. पुं. प्र. बहु. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	चैव	च + एव	वृद्धिसन्धिः ।
(ख) समासः	विद्याविनयसम्पन्ने	विद्या च विनयश्च विद्याविनयौ - द्वन्द्वः ।	
		विद्याविनयाभ्यां सम्पन्नः विद्याविनयसम्पन्नः, तस्मिन् - तृतीयातत्पुरुषः ।	
	श्वपाके	श्वानं पचति इति श्वपाकः, तस्मिन् - उपपदतत्पुरुषः ।	
(ग) कृदन्तः	विनयः	वि + नी (णीञ् - प्रापणे) + अच् ।	
	सम्पन्नः	सम् + पद् (पद - गतौ) + क्त ।	
(घ) तद्धितान्तः	समदर्शिनः	समदृश + इनि (मतुबर्थे) समाना दृष्टिः एषाम् एषु वा अस्ति इति ।	

भावस्पष्टीकरणम् -

समदर्शिनः (भवन्ति) ।	
के समदर्शिनः भवन्ति ?	**पण्डिताः** समदर्शिनः भवन्ति ।
पण्डिताः **कस्मिन्** समदर्शिनः भवन्ति ?	पण्डिताः **ब्राह्मणे** समदर्शिनः भवन्ति ।
पण्डिताः **कीदृशे** ब्राह्मणे समदर्शिनः भवन्ति ?	पण्डिताः **विद्याविनयसम्पन्ने** ब्राह्मणे समदर्शिनः भवन्ति ।
पण्डिताः विद्याविनयसम्पन्ने ब्राह्मणे **पुनश्च कस्यां** समदर्शिनः भवन्ति ?	पण्डिताः विद्याविनयसम्पन्ने ब्राह्मणे **गवि** समदर्शिनः भवन्ति ।
पण्डिताः विद्याविनयसम्पन्ने ब्राह्मणे गवि **पुनश्च कस्मिन्** समदर्शिनः भवन्ति ?	पण्डिताः विद्याविनयसम्पन्ने ब्राह्मणे गवि **हस्तिनि** समदर्शिनः भवन्ति ।
पण्डिताः विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि **पुनश्च कस्मिन्** समदर्शिनः भवन्ति	पण्डिताः विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि **शुनि च एव** समदर्शिनः भवन्ति ।

पण्डिताः विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि शुनि च एव **पुनश्च कस्मिन्** समदर्शिनः भवन्ति ?	पण्डिताः विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि शुनि च एव **श्वपाके च** समदर्शिनः भवन्ति ।

तात्पर्यम् - पण्डिताः विद्याविनयसम्पन्ने ब्राह्मणे धेन्वां गजे कुक्कुरे चाण्डाले च समदर्शिनः भवन्ति । एतेषु सर्वेषु अपि समानं ब्रह्म पश्यन्ति इत्यर्थः । (विद्या आत्मनो बोधः । विनयः विषयाणाम् उपशमः) ।

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः ॥५.१९॥

पदच्छेदः - इह, एव, तैः, जितः, सर्गः, येषाम्, साम्ये, स्थितम्, मनः ।
निर्दोषम्, हि, समम्, ब्रह्म, तस्मात्, ब्रह्मणि, ते, स्थिताः ॥

अन्वयः - येषां साम्ये मनः स्थितं तैः सर्गः इह एव जितः । समं हि ब्रह्म निर्दोषम् । तस्माद् ते ब्रह्मणि स्थिताः ।

पदार्थः - येषाम् = ज्ञानिनाम्, साम्ये = गोब्राह्मणशुनकादौ समानतायाम्, मनः = चित्तम्, स्थितम् = स्थितम्, तै = समदर्शिभिः, सर्गः = संसारः, इह एव = अस्मिन् भूलोके एव, जितः = विजितः, हि = यस्मात्, समम् = सर्वेषु अपि प्राणिषु समत्वेन स्थितम्, ब्रह्म = परवस्तु, निर्दोषम् = दोषरहितम्, तस्मात् = अतः, ते = ज्ञानिनः, ब्रह्मणि = परमात्मनि, स्थिताः = अवस्थिताः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
येषाम्	यद्- द. सर्व. पुं. ष. बहु. (विशेषणम्)	साम्ये	अ. नपुं. स. एक.
मनः	मनस्- सका. नपुं. प्र. एक. (विशेष्यम्)	स्थितम्	अ. नपुं. प्र. एक. (विशेषणम्)
तैः	तद्- द. सर्व. पुं. तृ. बहु.	सर्गः	अ. पुं. प्र. एक. (विशेष्यम्)
इह	अव्ययम्	एव	अव्ययम्
जितः	अ. पुं. प्र. एक. (विशेषणम्)	समम्	अ. नपुं. प्र. एक. (विशेषणम्)
हि	अव्ययम्	ब्रह्म	ब्रह्मन्- न. नपुं. प्र. एक. (विशेष्यम्)
निर्दोषम्	अ. नपुं. प्र. एक. (विशेषणम्)	तस्माद्	तद्- द. सर्व. पुं. पं. एक.
ते	तद्- द. सर्व. पुं. प्र. बहु.	ब्रह्मणि	ब्रह्मन्- न. नपुं. स. एक.
स्थिताः	अ. पुं. प्र. बहु. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	इहैव	इह + एव	वृद्धिसन्धिः ।
	तैर्जितः	तैः + जितः	विसर्गसन्धिः (रेफः) ।
	सर्गो येषाम्	सर्गः + येषाम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	तस्माद् ब्रह्मणि	तस्मात् + ब्रह्मणि	जश्त्वसन्धिः ।
(ख) समासः	निर्दोषम्	निर्गतः दोषः यस्मात् तत् निर्दोषम् - प्रादिबहुव्रीहिः ।	
(ग) कृदन्तः	जितः	जि (जि - जये) + क्त (कर्मणि) ।	
	सर्गः	सृज् (सृज - विसर्गे) + घञ् ।	
	स्थितम्	स्था (ष्ठा - गतिनिवृत्तौ) + क्त (कर्मणि) ।	
	निर्दोषम्	दुष् (दुष - वैकृत्ये) + णिच् + घञ् (भावे) ।	
(घ) तद्धितान्तः	साम्ये	सम + ष्यञ् (भावे) तस्मिन्, समस्य भावः । समता इत्यर्थः ।	

भावस्पष्टीकरणम् -

इह एव जितः	
कैः इह एव जितः ?	**तैः** इह एव जितः ।
तैः **कः** इह एव जितः ?	तैः **सर्गः** इह एव जितः ।
कीदृशं तैः सर्गः इह एव जितः ?	**स्थितं** तैः सर्गः इह एव जितः ।
किं स्थितं तैः सर्गः इह एव जितः ?	**मनः** स्थितं तैः सर्गः इह एव जितः ।
कुत्र मनः स्थितं तैः सर्गः इह एव जितः ?	**साम्ये** मनः स्थितं तैः सर्गः इह एव जितः ।
केषां साम्ये मनः स्थितं तैः सर्गः इह एव जितः ?	**येषां** साम्ये मनः स्थितं तैः सर्गः इह एव जितः ।
येषां साम्ये मनः स्थितं तैः सर्गः इह एव जितः । **तैः किं (मन्यते)** ।	येषां साम्ये मनः स्थितं तैः सर्गः इह एव जितः । **ब्रह्म (मन्यते)** ।
येषां साम्ये मनः स्थितं तैः सर्गः इह एव जितः । ब्रह्म **कीदृशं** मन्यते ?	येषां साम्ये मनः स्थितं तैः सर्गः इह एव जितः । ब्रह्म **निर्दोषं** मन्यते ।
येषां साम्ये मनः स्थितं तैः सर्गः इह एव जितः । **कीदृशं** ब्रह्म निर्दोषं मन्यते ?	येषां साम्ये मनः स्थितं तैः सर्गः इह एव जितः । **समं** हि ब्रह्म निर्दोषं मन्यते ।
येषां साम्ये मनः स्थितं तैः सर्गः इह एव जितः । समं हि ब्रह्म निर्दोषं मन्यते । **तस्मात् किम्** ?	येषां साम्ये मनः स्थितं तैः सर्गः इह एव जितः । समं हि ब्रह्म निर्दोषं मन्यते । **तस्मात् स्थिताः** ।
येषां साम्ये मनः स्थितं तैः सर्गः इह एव जितः । समं हि ब्रह्म निर्दोषं मन्यते । तस्मात् **के** स्थिताः ?	येषां साम्ये मनः स्थितं तैः सर्गः इह एव जितः । समं हि ब्रह्म निर्दोषं मन्यते । तस्मात् **ते** स्थिताः ।

येषां साम्ये मनः स्थितं तैः सर्गः इह एव जितः । समं हि ब्रह्म निर्दोषं मन्यते । तस्मात् ते **कुत्र** स्थिताः ?	येषां साम्ये मनः स्थितं तैः सर्गः इह एव जितः । समं हि ब्रह्म निर्दोषं मन्यते । तस्मात् ते **ब्रह्मणि** स्थिताः ।

तात्पर्यम् - अयम् उच्चः अयं नीचः इति बुद्ध्यभावात् ये सर्वेषु अपि प्राणिषु समानाः भवन्ति ते जीवन्तः एव अस्मिन् लोके सर्वथा विनष्टसंसारबन्धाः सन्ति । इदं ब्रह्म निर्विकारं सर्वेषु प्राणिषु समानं च ।

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसम्मूढो ब्रह्मविद् ब्रह्मणि स्थितः ॥५.२०॥

पदच्छेदः - न, प्रहृष्येत्, प्रियम्, प्राप्य, न, उद्विजेत्, प्राप्य, च, अप्रियम् ।
स्थिरबुद्धिः, असम्मूढः, ब्रह्मवित्, ब्रह्मणि, स्थितः ॥

अन्वयः - ब्रह्मवित् ब्रह्मणि स्थितः स्थिरबुद्धिः असम्मूढः प्रियं प्राप्य न प्रहृष्येत् । अप्रियं प्राप्य च न उद्विजेत् ।

पदार्थः - ब्रह्मवित् = ब्रह्मज्ञानी, ब्रह्मणि = परमात्मनि, स्थितः = वर्तमानः, स्थिरबुद्धिः = निश्चलबुद्धिः, असम्मूढः = व्यामोहरहितः, प्रियम् = इष्टम्, प्राप्य = लब्ध्वा, न प्रहृष्येत् = न सन्तुष्येत्, अप्रियम् = अनिष्टम्, प्राप्य च = लब्ध्वा अपि, न उद्विजेत् = न विषीदेत् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ब्रह्मवित्	ब्रह्मविद्- द. पुं. प्र. एक.	ब्रह्मणि	ब्रह्मन्- न. नपुं. स. एक.
स्थितः	अ. पुं. प्र. एक. (विशेषणम्)	स्थिरबुद्धिः	इ. पु. प्र. एक. (विशेष्यम्)
असम्मूढः	अ. पुं. प्र. एक. (विशेषणम्)	प्रियम्	अ. पुं. द्वि. एक.
प्राप्य	ल्यबन्तम् अव्ययम्	न	अव्ययम्
प्रहृष्येत्	प्र + हृष् (हृष - तुष्टौ) पर. कर्तरि विधिलिङ्. प्रपु. एक.	अप्रियम्	अ. पुं. द्वि. एक.
च	अव्ययम्	उद्विजेत् (उद्विजेत)[1]	विज् (ओविजी - भयचलनयोः) परस्मै. कर्तरि विधिलिङ्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	नोद्विजेत्	न + उद्विजेत्	गुणसन्धिः ।
	चाप्रियम्	च + अप्रियम्	सवर्णदीर्घसन्धिः ।

1. अत्र 'उद्विजेत्' इति परस्मैपदित्वेन प्रयोगः आर्षः ।

	स्थिरबुद्धिरसम्मूढो	स्थिरबुद्धिः + असम्मूढः	विसर्गसन्धिः (रेफः)।
	असम्मूढो ब्रह्मविद्	असम्मूढः + ब्रह्मविद्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	ब्रह्मविद् ब्रह्मणि	ब्रह्मवित् + ब्रह्मणि	जश्त्वसन्धिः।
(ख) समासः	अप्रियम्	न प्रियम् अप्रियम् - नञ्तत्पुरुषः।	
	स्थिरबुद्धिः	स्थिरा बुद्धिः यस्य सः स्थिरबुद्धिः - बहुव्रीहिः।	
	असम्मूढः	न सम्मूढः असम्मूढः - नञ्तत्पुरुषः।	
	ब्रह्मवित्	ब्रह्म वेत्ति इति ब्रह्मवित् - कर्तरि क्विप् उपपदसमासश्च।	
(ग) कृदन्तः	प्रियम्	प्री (प्रीञ् - तर्पणे कान्तौ च) + क, तम्।	
	प्राप्य	प्र + आप् (आप्लृ - व्याप्तौ) + ल्यप्।	
	बुद्धिः	बुध् (बुध - अवगमने) + क्तिन्।	
	सम्मूढः	सम् + मुह् (मुह - वैचित्त्ये) + क्त (कर्तरि)।	
	स्थितः	स्था (ष्ठा - गतिनिवृत्तौ) + क्त (कर्तरि)।	

भावस्पष्टीकरणम् -

न प्रहृष्येत्।	
कः न प्रहृष्येत्?	**ब्रह्मवित्** न प्रहृष्येत्।
ब्रह्मवित् **कथम्भूतः** न प्रहृष्येत्?	ब्रह्मवित् **स्थितः** न प्रहृष्येत्।
ब्रह्मवित् **कस्मिन्** स्थितः न प्रहृष्येत्?	ब्रह्मवित् **ब्रह्मणि** स्थितः न प्रहृष्येत्।
ब्रह्मवित् ब्रह्मणि स्थितः **किं कृत्वा** न प्रहृष्येत्?	ब्रह्मवित् ब्रह्मणि स्थितः **प्राप्य** न प्रहृष्येत्।
ब्रह्मवित् ब्रह्मणि स्थितः **कं** प्राप्य न प्रहृष्येत्?	ब्रह्मवित् ब्रह्मणि स्थितः **प्रियं** प्राप्य न प्रहृष्येत्।
ब्रह्मवित् ब्रह्मणि स्थितः **कीदृशः** प्रियं प्राप्य न प्रहृष्येत्?	ब्रह्मवित् ब्रह्मणि स्थितः **स्थिरबुद्धिः** प्रियं प्राप्य न प्रहृष्येत्।
ब्रह्मवित् ब्रह्मणि स्थितः स्थिरबुद्धिः **पुनश्च कीदृशः** प्रियं प्राप्य न प्रहृष्येत्?	ब्रह्मवित् ब्रह्मणि स्थितः स्थिरबुद्धिः **असम्मूढः** प्रियं प्राप्य न प्रहृष्येत्।
ब्रह्मवित् ब्रह्मणि स्थितः स्थिरबुद्धिः असम्मूढः प्रियं प्राप्य न प्रहृष्येत्। **किं च न कुर्यात्**?	ब्रह्मवित् ब्रह्मणि स्थितः स्थिरबुद्धिः असम्मूढः प्रियं प्राप्य न प्रहृष्येत्। **न उद्विजेत्।**
ब्रह्मवित् ब्रह्मणि स्थितः स्थिरबुद्धिः असम्मूढः प्रियं प्राप्य न प्रहृष्येत्। **किं कृत्वा** च न उद्विजेत्?	ब्रह्मवित् ब्रह्मणि स्थितः स्थिरबुद्धिः असम्मूढः प्रियं प्राप्य न प्रहृष्येत्। **प्राप्य** च न उद्विजेत्।
ब्रह्मवित् ब्रह्मणि स्थितः स्थिरबुद्धिः असम्मूढः प्रियं प्राप्य न प्रहृष्येत्। **किं** प्राप्य च न उद्विजेत्?	ब्रह्मवित् ब्रह्मणि स्थितः स्थिरबुद्धिः असम्मूढः प्रियं प्राप्य न प्रहृष्येत्। **अप्रियं** प्राप्य च न उद्विजेत्।

तात्पर्यम् - यः ब्रह्मवित् सर्वदा ब्रह्मणि एव स्थिरबुद्धिः सम्मोहवर्जितश्च भवति सः इष्टं प्राप्य न प्रहृष्यति। अनिष्टं च प्राप्य खेदं न याति।

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम्।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥५.२१॥

पदच्छेदः - बाह्यस्पर्शेषु, असक्तात्मा, विन्दति, आत्मनि, यत्, सुखम्।
सः, ब्रह्मयोगयुक्तात्मा, सुखम्, अक्षयम्, अश्नुते ॥

अन्वयः - बाह्यस्पर्शेषु असक्तात्मा आत्मनि यत् सुखं विन्दति सः ब्रह्मयोगयुक्तात्मा अक्षयं सुखम् अश्नुते।

पदार्थः - बाह्यस्पर्शेषु = बाह्यविषयेषु, असक्तात्मा = असंलग्नचित्तः, आत्मनि = स्वस्मिन्, यत्, सुखम् = यम् आनन्दम्, विन्दति = प्राप्नोति, सः = सः पुरुषः, ब्रह्मयोगयुक्तात्मा = ब्रह्मसमाधिचित्तः, अक्षयम् = अविनाशि, सुखम् = आनन्दम्, अश्नुते = अनुभवति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
बाह्यस्पर्शेषु	अ. पुं. स. बहु.	असक्तात्मा	असक्तात्मन्- न. पुं. प्र. एक. (विशेषणम्)
आत्मनि	आत्मन्- न. पुं. स. एक.	यत्	यद्- द. नपुं. द्वि. एक. (विशेषणम्)
सुखम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	विन्दति	विद् (विद्लृ - लाभे) पर. कर्तरि लट्. प्रपु. एक.
सः	तद्- द. सर्व. प्र. एक. (विशेषणम्)	ब्रह्मयोगयुक्तात्मा	ब्रह्मयोगयुक्तात्मन्- न. पुं. प्र. एक. (विशेषणम्)
अक्षयम्	अ. नपुं. द्वि. एक. (विशेषणम्)	सुखम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
अश्नुते	अश् (अशू - व्याप्तौ संघाते च) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	बाह्यस्पर्शेष्वसक्तात्मा	बाह्यस्पर्शेषु + असक्तात्मा	यण्सन्धिः।
	विन्दत्यात्मनि	विन्दति + आत्मनि	यण्सन्धिः।
	स ब्रह्मयोगयुक्तात्मा	सः + ब्रह्मयोगयुक्तात्मा	विसर्गसन्धिः (लोपः)।
(ख) समासः	बाह्यस्पर्शेषु	बाह्याः स्पर्शाः बाह्यस्पर्शाः, तेषु - कर्मधारयः।	

	असक्तात्मा	न सक्तः असक्तः - नञ्तत्पुरुषः । असक्तः आत्मा यस्य सः असक्तात्मा - बहुव्रीहिः ।
	ब्रह्मयोगयुक्तात्मा	ब्रह्मणः योगः ब्रह्मयोगः - षष्ठीतत्पुरुषः । ब्रह्मयोगेन युक्तः ब्रह्मयोगयुक्तः - तृतीयातत्पुरुषः । ब्रह्मयोगयुक्तः आत्मा यस्य सः ब्रह्मयोगयुक्तात्मा - बहुव्रीहिः ।
	अक्षयम्	न विद्यते क्षयः यस्य तत् अक्षयम्, तत् - नञ्बहुव्रीहिः ।
(ग) कृदन्तः	सक्तः	सञ्ज् (षञ्ज - सङ्गे) + क्त ।
	योगः	युज् (युजिर् - योगे) + घञ् ।
	युक्तः	युज् (युजिर् - योगे) + क्त ।
	क्षयम्	क्षि (क्षि - क्षये) + अच्, तत् ।
(घ) तद्धितान्तः	बाह्यः	बहिः + यञ् (भवार्थे) । बहिः भवः इत्यर्थः ।

भावस्पष्टीकरणम् -

विन्दति ।	
किं विन्दति ?	**सुखं** विन्दति ।
किं सुखं विन्दति ?	**यत्** सुखं विन्दति ।
कस्मिन् यत् सुखं विन्दति ?	**आत्मनि** यत् सुखं विन्दति ।
कः आत्मनि यत् सुखम् विन्दति ?	**असक्तात्मा** आत्मनि यत् सुखं विन्दति ।
केषु असक्तात्मा आत्मनि यत् सुखं विन्दति ?	**बाह्यस्पर्शेषु** असक्तात्मा आत्मनि यत् सुखं विन्दति ।
बाह्यस्पर्शेषु असक्तात्मा आत्मनि यत् सुखं विन्दति । सः **किं** कुरुते ?	बाह्यस्पर्शेषु असक्तात्मा आत्मनि यत् सुखं विन्दति । सः **अश्नुते** ।
बाह्यस्पर्शेषु असक्तात्मा आत्मनि यत् सुखं विन्दति । सः **किम्** अश्नुते ?	बाह्यस्पर्शेषु असक्तात्मा आत्मनि यत् सुखं विन्दति । सः **सुखम्** अश्नुते ?
बाह्यस्पर्शेषु असक्तात्मा आत्मनि यत् सुखं विन्दति । सः **कीदृशं** सुखम् अश्नुते ?	बाह्यस्पर्शेषु असक्तात्मा आत्मनि यत् सुखं विन्दति । सः **अक्षयं** सुखम् अश्नुते ।
बाह्यस्पर्शेषु असक्तात्मा आत्मनि यत् सुखं विन्दति । सः **कः** अक्षयं सुखम् अश्नुते ?	बाह्यस्पर्शेषु असक्तात्मा आत्मनि यत् सुखं विन्दति । सः **ब्रह्मयोगयुक्तात्मा** अक्षयं सुखम् अश्नुते ।

तात्पर्यम् - शब्दादिषु बाह्येषु इन्द्रियविषयेषु यः अनासक्तः भवति सः आत्मनि यत् प्राप्नोति ब्रह्मयोगेन युक्तान्तःकरणः सः तदेव सुखम् अक्षयं प्राप्नोति ।

ये हि संस्पर्शजा भोगाः दुःखयोनय एव ते।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥५.२२॥

पदच्छेदः - ये, हि, संस्पर्शजाः, भोगाः, दुःखयोनयः, एव, ते ।
आद्यन्तवन्तः, कौन्तेय, न, तेषु, रमते, बुधः ॥

अन्वयः - कौन्तेय ! ये संस्पर्शजाः भोगाः ते आद्यन्तवन्तः दुःखयोनयः एव हि । बुधः तेषु न रमते ।

पदार्थः - कौन्तेय = अर्जुन ! ये हि = यस्मात् अमी, संस्पर्शजाः = विषयजन्याः, भोगाः = आनन्दाः (सन्ति), ते = ते आनन्दाः, आद्यन्तवन्तः = उत्पत्तिविनाशसहिताः, दुःखयोनयः एव = विषादहेतवः एव, बुधः = पण्डितः, तेषु = भोगेषु, न रमते = न क्रीडति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	ये	यद्- द. सर्व. प्र. बहु. (विशेषणम्)
संस्पर्शजाः	अ. पुं. प्र. बहु. (विशेषणम्)	भोगाः	अ. पुं. प्र. बहु. (विशेष्यम्)
ते	तद्- द. सर्व. प्र. बहु. (विशेषणम्)	आद्यन्तवन्तः	आद्यन्तवत्- त. पुं. प्र. बहु. (विशेषणम्)
दुःखयोनयः	इ. पुं. प्र. बहु. (विशेषणम्)	एव	अव्ययम्
हि	अव्ययम्	बुधः	अ. पुं. प्र. एक. (विशेषणम्)
तेषु	तद्- द. सर्व. पुं. स. बहु. (विशेषणम्)	न	अव्ययम्
रमते	रम् (रमु क्रीडायाम्) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः संस्पर्शजा भोगाः — संस्पर्शजाः + भोगाः — विसर्गसन्धिः (लोपः) ।
दुःखयोनय एव — दुःखयोनयः + एव — विसर्गसन्धिः (लोपः) ।

(ख) समासः संस्पर्शजाः — संस्पर्शात् जाताः संस्पर्शजाः - कर्तरि डप्रत्ययः उपपदसमासः ।
दुःखयोनयः — दुःखस्य योनयः दुःखयोनयः - षष्ठीतत्पुरुषः ।
आद्यन्तौ — आदिश्च अन्तश्च - द्वन्द्वः ।

(ग) कृदन्तः भोगाः — भुज् (भुज - पालनाभ्यवहारयोः) + घञ् ।
बुधः — बुध् (बुध - अवगमने) + क ।

(घ) तद्धितान्तः आद्यन्तवन्तः — आद्यन्त + मतुप् । आद्यन्तौ एषाम् एषु वा स्तः । ते ।
कौन्तेय — कुन्ती + ढक् (अपत्यार्थे) (एय आदेशश्च), तत्सम्बुद्धौ, कुन्त्याः अपत्यं पुमान् ।

भावस्पष्टीकरणम् -

(सन्ति)।	
कीदृशाः सन्ति ?	**दुःखयोनयः** एव हि सन्ति।
के दुःखयोनयः एव हि सन्ति ?	**भोगाः** दुःखयोनयः एव हि सन्ति।
कीदृशाः भोगाः दुःखयोनयः एव हि सन्ति ?	**संस्पर्शजाः** भोगाः दुःखयोनयः एव हि सन्ति।
ये संस्पर्शजाः भोगाः ते **कीदृशाः** दुःखयोनयः एव हि सन्ति ?	ये संस्पर्शजाः भोगाः ते **आद्यन्तवन्तः** दुःखयोनयः एव हि सन्ति।
ये संस्पर्शजाः भोगाः ते आद्यन्तवन्तः दुःखयोनयः एव हि सन्ति। **तेन किम्** ?	ये संस्पर्शजाः भोगाः ते आद्यन्तवन्तः दुःखयोनयः एव हि सन्ति। **न रमते**।
ये संस्पर्शजाः भोगाः ते आद्यन्तवन्तः दुःखयोनयः एव हि सन्ति। **केषु** न रमते ?	ये संस्पर्शजाः भोगाः ते आद्यन्तवन्तः दुःखयोनयः एव हि सन्ति। **तेषु** न रमते।
ये संस्पर्शजाः भोगाः ते आद्यन्तवन्तः दुःखयोनयः एव हि सन्ति। **कः** तेषु न रमते ?	ये संस्पर्शजाः भोगाः ते आद्यन्तवन्तः दुःखयोनयः एव हि सन्ति। **बुधः** तेषु न रमते।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय** !

तात्पर्यम् - कौन्तेय ! विषयजन्याः सर्वेऽपि भोगाः परिमिताः (आद्यन्तयुक्ताः) दुःखजनकाश्च भवन्ति। अतः विद्वान् तेषु भोगेषु न रमते।

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात्।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥५.२३॥

पदच्छेदः - शक्नोति, इह, एव, यः, सोढुम्, प्राक्, शरीरविमोक्षणात्।
कामक्रोधोद्भवम्, वेगम्, सः, युक्तः, सः, सुखी, नरः ॥

अन्वयः - यः इह एव शरीरविमोक्षणात् प्राक् कामक्रोधोद्भवं वेगं सोढुं शक्नोति सः नरः युक्तः। सः (एव च) सुखी।

पदार्थः - यः = यः पुरुषः, इह एव = अत्र एव, शरीरविमोक्षणात् = देहत्यागात्, प्राक् = पूर्वम्, कामक्रोधोद्भवम् = रागद्वेषजन्यम्, वेगम् = वेगसदृशं विकारम्, सोढुम् = जेतुम्, शक्नोति = समर्थो भवति, सः नरः = सः पुरुषः, युक्तः = योगी, सः (एव च) = सः पुरुषः एव च, सुखी = आनन्दी।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	इह	अव्ययम्

एव	अव्ययम्	शरीरविमोक्षणात्	अ. पुं. पं. एक.
प्राक्	अव्ययम्	कामक्रोधोद्भवम्	अ. पुं. द्वि. एक. (विशेषणम्)
वेगम्	अ. पुं. द्वि. एक. (विशेष्यम्)	सोढुम्	तुमुन्नन्तम् अव्ययम्
शक्नोति	शक् (शक्लृ - शक्तौ) पर. कर्तरि लट्. प्रपु. एक.	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
नरः	अ. पुं. प्र. एक. (विशेष्यम्)	युक्तः	अ. पुं. प्र. एक. (विशेषणम्)
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	सुखी	सुखिन्- न. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	शक्नोतीह	शक्नोति + इह	सवर्णदीर्घसन्धिः ।
	इहैव	इह + एव	वृद्धिसन्धिः ।
	स युक्तः	सः + युक्तः	विसर्गसन्धिः (लोपः) ।
	स सुखी	सः + सुखी	विसर्गसन्धिः (लोपः) ।
(ख) समासः	कामक्रोधोद्भवम्	कामश्च क्रोधश्च कामक्रोधौ - द्वन्द्वः । कामक्रोधाभ्याम् उद्भवः कामक्रोधोद्भवः, तम् - पञ्चमीतत्पुरुषः ।	
(ग) कृदन्तः	सोढुम्	सह् (षह - मर्षणे) + तुमुन् ।	
	विमोक्षणात्	वि + मोक्ष् (मोक्ष - क्षेपे) + ल्युट्, तस्मात्, (भावे) ।	
	कामः	कम् (कमु - कान्तौ) + घञ् ।	
	क्रोधः	क्रुध् (क्रुध - क्रोधे) + घञ् ।	
	उद्भवः	उद् + भू (भू - सत्तायाम्) + घञ् ।	
	वेगम्	विज् (ओविजी - भयचलनयोः) + घञ्, तम् ।	
	युक्तः	युज् (युजिर् - योगे) + क्त (कर्तरि) ।	
	नरः	नॄ (नॄ - नये) + अच् ।	
(घ) तद्धितान्तः	सुखी	सुख + इनि (मतुबर्थे) । सुखम् अस्य अस्मिन् वा अस्ति ।	

भावस्पष्टीकरणम् -

शक्नोति ।	
किं कर्तुं शक्नोति ?	**सोढुं शक्नोति ।**
कं सोढुं शक्नोति ?	**वेगं सोढुं शक्नोति ।**

कीदृशं वेगं सोढुं शक्नोति ?	**कामक्रोधोद्भवं** वेगं सोढुं शक्नोति ।
कदा कामक्रोधोद्भवं वेगं सोढुं शक्नोति ?	**प्राक्** कामक्रोधोद्भवं वेगं सोढुं शक्नोति ।
कस्मात् प्राक् कामक्रोधोद्भवं वेगं सोढुं शक्नोति ?	**शरीरविमोक्षणात्** प्राक् कामक्रोधोद्भवं वेगं सोढुं शक्नोति ।
कुत्र शरीरविमोक्षणात् प्राक् कामक्रोधोद्भवं वेगं सोढुं शक्नोति ?	**इह एव** शरीरविमोक्षणात् प्राक् कामक्रोधोद्भवं वेगं सोढुं शक्नोति ।
यः इह एव शरीरविमोक्षणात् प्राक् कामक्रोधोद्भवं वेगं सोढुं शक्नोति, **सः कीदृशः** ?	**यः** इह एव शरीरविमोक्षणात् प्राक् कामक्रोधोद्भवं वेगं सोढुं शक्नोति, **सः युक्तः** ।
यः इह एव शरीरविमोक्षणात् प्राक् कामक्रोधोद्भवं वेगं सोढुं शक्नोति, सः **कः** युक्तः ?	यः इह एव शरीरविमोक्षणात् प्राक् कामक्रोधोद्भवं वेगं सोढुं शक्नोति, सः **नरः** युक्तः ।
यः इह एव शरीरविमोक्षणात् प्राक् कामक्रोधोद्भवं वेगं सोढुं शक्नोति, सः नरः युक्तः । **पुनश्च सः एव कीदृशः** ।	यः इह एव शरीरविमोक्षणात् प्राक् कामक्रोधोद्भवं वेगं सोढुं शक्नोति, सः नरः युक्तः । **सः** (एव च) **सुखी** ।

तात्पर्यम् - यः इह जगति एव शरीरत्यागात् पूर्वं कामक्रोधोद्भवं वेगं सोढुं शक्नोति, सः नरः योगी । सः एव च सुखी ।

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥५.२४॥

पदच्छेदः - यः, अन्तःसुखः, अन्तरारामः, तथा, अन्तर्ज्योतिः, एव, यः ।
सः, योगी, ब्रह्मनिर्वाणम्, ब्रह्मभूतः, अधिगच्छति ॥

अन्वयः - यः अन्तःसुखः अन्तरारामः तथा यः एव अन्तर्ज्योतिः सः योगी ब्रह्मभूतः ब्रह्मनिर्वाणम् अधिगच्छति ।

पदार्थः - यः = यः पुरुषः, अन्तःसुखः = आत्मनि एव सुखवान्, अन्तरारामः = आत्मनि एव रममाणः, तथा यः एव = एवं यः जनः, अन्तर्ज्योतिः = आत्मनि एव ज्ञानवान्, सः = सः जनः, योगी = योगी, ब्रह्मभूतः = ब्रह्मणा एकीभावं प्राप्तवान्, ब्रह्मनिर्वाणम् = ब्रह्मणि लयम् (मोक्षम्) अधिगच्छति = प्राप्नोति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	अन्तःसुखः	अ. पुं. प्र. एक. (विशेषणम्)
अन्तरारामः	अ. पुं. प्र. एक. (विशेषणम्)	तथा	अव्ययम्

एव	अव्ययम्	अन्तर्ज्योतिः	अन्तर्ज्योतिस्- सका. पुं. प्र. एक.
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	योगी	योगिन्- न. पुं. प्र. एक. (विशेष्यम्)
ब्रह्मभूतः	अ. पुं. प्र. एक. (विशेषणम्)	ब्रह्मनिर्वाणम्	अ. नपुं. द्वि. एक.
अधिगच्छति	अधि + गम् (गम्लृ - गतौ) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	योऽन्तःसुखः	यः + अन्तःसुखः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	अन्तःसुखोऽन्तरारामः	अन्तःसुखः + अन्तरारामः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	अन्तरारामस्तथा	अन्तरारामः + तथा	विसर्गसन्धिः (सकारः)।
	तथान्तर्ज्योतिः	तथा+ अन्तर्ज्योतिः	सवर्णदीर्घसन्धिः।
	अन्तर्ज्योतिरेव	अन्तर्ज्योतिः + एव	विसर्गसन्धिः (रेफः)।
	स योगी	सः + योगी	विसर्गसन्धिः (लोपः)।
	ब्रह्मभूतोऽधिगच्छति	ब्रह्मभूतः + अधिगच्छति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
(ख) समासः	अन्तःसुखः	अन्तः एव सुखं यस्य सः अन्तःसुखः - बहुव्रीहिः।	
	अन्तरारामः	अन्तः एव आरामः (आक्रीडा) यस्य सः अन्तरारामः - बहव्रीहिः।	
	अन्तर्ज्योतिः	अन्तः एव ज्योतिः यस्य सः अन्तर्ज्योतिः - बहुव्रीहिः।	
	ब्रह्मनिर्वाणम्	ब्रह्मणि निर्वाणम्, ब्रह्मनिर्वाणम् - सप्तमीतत्पुरुषः।	
	ब्रह्मभूतः	ब्रह्म भूतः ब्रह्मभूतः - द्वितीयातत्पुरुषः।	
(ग) कृदन्तः	निर्वाणम्	निर् + वा (वा - गतिगन्धनयोः) + ल्युट्।	
	भूतः	भू (भू - सत्तायाम्) + क्त (कर्तरि)।	
(घ) तद्धितान्तः	योगी	योग + इनि (मतुबर्थे)। योगः अस्य अस्मिन् वा अस्ति।	

भावस्पष्टीकरणम् -

अधिगच्छति।	
किम् अधिगच्छति ?	**ब्रह्मनिर्वाणम्** अधिगच्छति।
कः ब्रह्मनिर्वाणम् अधिगच्छति ?	**योगी** ब्रह्मनिर्वाणम् अधिगच्छति।

योगी **कीदृशः (सन्)** ब्रह्मनिर्वाणम् अधिगच्छति ?	योगी **ब्रह्मभूतः (सन्)** ब्रह्मनिर्वाणम् अधिगच्छति ।
कीदृशः योगी ब्रह्मभूतः सन् ब्रह्मनिर्वाणम् अधिगच्छति ?	**यः अन्तःसुखः सः** योगी ब्रह्मभूतः सन् ब्रह्मनिर्वाणम् अधिगच्छति ।
यः अन्तःसुखः **पुनश्च कीदृशः** सः योगी ब्रह्मभूतः सन् ब्रह्मनिर्वाणम् अधिगच्छति ?	यः अन्तःसुखः **अन्तरारामः** सः योगी ब्रह्मभूतः सन् ब्रह्मनिर्वाणम् अधिगच्छति ।
यः अन्तःसुखः अन्तरारामः **तथा कः एव** सः योगी ब्रह्मभूतः सन् ब्रह्मनिर्वाणम् अधिगच्छति ?	यः अन्तःसुखः अन्तरारामः **तथा यः एव अन्तर्ज्योतिः** सः योगी ब्रह्मभूतः सन् ब्रह्मनिर्वाणम् अधिगच्छति ।

तात्पर्यम् - यः आत्मनि एव सुखमनुभवति न विषयसम्बन्धि, यः आत्मनि एव विहरति, न तु विषयेषु, यः आत्मज्ञानेन ज्ञानवान् न विषयज्ञानेन, तादृशः योगी ब्रह्माभिन्नः सन् ब्रह्मणि एव लयं गच्छति ।

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥५.२५॥

पदच्छेदः - लभन्ते, ब्रह्मनिर्वाणम्, ऋषयः, क्षीणकल्मषाः ।
छिन्नद्वैधाः, यतात्मानः, सर्वभूतहिते, रताः ॥

अन्वयः - क्षीणकल्मषाः छिन्नद्वैधाः यतात्मानः सर्वभूतहिते रताः ऋषयः ब्रह्मनिर्वाणं लभन्ते ।

पदार्थः - क्षीणकल्मषाः = नष्टपापाः, छिन्नद्वैधाः = अपगतसंशयाः, यतात्मानः = जितेन्द्रियाः, सर्वभूतहिते = सर्वभूतसुखे, रताः = आसक्ताः, ऋषयः = मुनयः, ब्रह्मनिर्वाणम् = मोक्षम्, लभन्ते = प्राप्नुवन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
क्षीणकल्मषाः	अ. पुं. प्र. बहु. (विशेषणम्)	छिन्नद्वैधाः	अ. पुं. प्र. बहु. (विशेषणम्)
यतात्मानः	यतात्मन्- न. पुं. प्र. बहु. (विशेषणम्)	सर्वभूतहिते	अ. नपुं. स. एक.
रताः	अ. पुं. प्र. बहु. (विशेषणम्)	ऋषयः	इ. पुं. प्र. बहु. (विशेष्यम्)
ब्रह्मनिर्वाणम्	अ. नपुं. द्वि. एक.	लभन्ते	लभ् (डुलभष् - प्राप्तौ) आत्म. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः छिन्नद्वैधा यतात्मानः छिन्नद्वैधाः + यतात्मानः विसर्गसन्धिः (लोपः) ।

(ख) समासः	ब्रह्मनिर्वाणम्	ब्रह्मणि निर्वाणम्, ब्रह्मनिर्वाणम् - सप्तमीतत्पुरुषः ।
	क्षीणकल्मषाः	क्षीणानि कल्मषाणि येषां ते क्षीणकल्मषाः - बहुव्रीहिः ।
	छिन्नद्वैधाः	छिन्नं द्वैधं यैः ते छिन्नद्वैधाः - बहुव्रीहिः ।
	यतात्मानः	यतः आत्मा यैः ते यतात्मानः - बहुव्रीहिः ।
	सर्वभूतहिते	सर्वाणि भूतानि सर्वभूतानि - कर्मधारयः । सर्वभूतेभ्यः हितम्, सर्वभूतहितम्, तस्मिन् - चतुर्थीतत्पुरुषः ।
(ग) कृदन्तः	निर्वाणम्	निर् + वा (वा - गतिगन्धनयोः) + क्त ।
	छिन्नः	छिद् (छिदिर् - द्वैधीकरणे) + क्त (कर्मणि) ।
	यतः	यम् (यम - उपरमे) + क्त (कर्तरि) ।
	भूतम्	भू (भू - सत्तायाम्) + क्त (कर्तरि) ।
	हितः	धा (हि गतिवृद्धौ च) + क्त (कर्तरि) ।
	रताः	रम् (रमु - क्रीडायाम्) + क्त (कर्तरि) ।

भावस्पष्टीकरणम् -

लभन्ते ।	
किं लभन्ते ?	**ब्रह्मनिर्वाणं** लभन्ते ।
के ब्रह्मनिर्वाणं लभन्ते ?	**ऋषयः** ब्रह्मनिर्वाणं लभन्ते ।
कीदृशाः ऋषयः ब्रह्मनिर्वाणं लभन्ते ?	**रताः** ऋषयः ब्रह्मनिर्वाणं लभन्ते ।
कस्मिन् रताः ऋषयः ब्रह्मनिर्वाणं लभन्ते ?	**सर्वभूतहिते** रताः ऋषयः ब्रह्मनिर्वाणं लभन्ते ।
कीदृशाः सर्वभूतहिते रताः ऋषयः ब्रह्मनिर्वाणं लभन्ते ?	**यतात्मानः** सर्वभूतहिते रताः ऋषयः ब्रह्मनिर्वाणं लभन्ते ।
पुनश्च कीदृशाः यतात्मानः सर्वभूतहिते रताः ऋषयः ब्रह्मनिर्वाणं लभन्ते ?	**छिन्नद्वैधाः** यतात्मानः सर्वभूतहिते रताः ऋषयः ब्रह्मनिर्वाणं लभन्ते ।
पुनश्च कीदृशाः यतात्मानः सर्वभूतहिते रताः ऋषयः ब्रह्मनिर्वाणं लभन्ते ?	**क्षीणकल्मषाः** छिन्नद्वैधाः यतात्मानः सर्वभूतहिते रताः ऋषयः ब्रह्मनिर्वाणं लभन्ते ।

तात्पर्यम् - येषां पापानि विनष्टानि सन्ति, संशयाः च विनष्टाः, चित्तं च नियन्त्रितम् अस्ति, ये सर्वभूतानां हिते रताः सन्ति ते ब्रह्मवेत्तारः ऋषयः मोक्षं प्राप्नुवन्ति ।

कामक्रोधवियुक्तानां यतीनां यतचेतसाम्।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥५.२६॥

पदच्छेदः - कामक्रोधवियुक्तानाम्, यतीनाम्, यतचेतसाम्।
अभितः, ब्रह्मनिर्वाणम्, वर्तते, विदितात्मनाम् ॥

अन्वयः - कामक्रोधवियुक्तानां यतचेतसां विदितात्मनां यतीनां ब्रह्मनिर्वाणम् अभितः वर्तते।

पदार्थः - कामक्रोधवियुक्तानाम् = रागद्वेषरहितानाम्, यतचेतसाम् = नियतबुद्धीनाम्, विदितात्मनाम् = आत्मज्ञानाम्, यतीनाम् = संन्यासिनाम्, ब्रह्मनिर्वाणम् = मोक्षः, अभितः = सर्वतः, वर्तते = विद्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कामक्रोधवियुक्तानाम्	अ. पुं. ष. बहु. (विशेषणम्)	यतचेतसाम्	यतचेतस्- सका. पुं. ष. बहु. (विशेषणम्)
विदितात्मनाम्	विदितात्मन्- न. पुं. ष. बहु. (विशेषणम्)	यतीनाम्	इ. पुं. ष. बहु. (विशेष्यम्)
ब्रह्मनिर्वाणम्	अ. नपुं. प्र. एक.	अभितः	अव्ययम्
वर्तते	वृत् (वृतु वर्तने) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः अभितो ब्रह्मनिर्वाणम् अभितः + ब्रह्मनिर्वाणम् विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।

(ख) समासः कामक्रोधवियुक्तानाम् कामश्च क्रोधश्च कामक्रोधौ - द्वन्द्वः।
कामक्रोधाभ्यां वियुक्ताः कामक्रोधवियुक्ताः, तेषाम् - तृतीयातत्पुरुषः।
यतचेतसाम् यतं चेतः यैः ते यतचेतसः, तेषाम् - बहुव्रीहिः।
ब्रह्मनिर्वाणम् ब्रह्मणि निर्वाणं ब्रह्मनिर्वाणम् - सप्तमीतत्पुरुषः।
विदितात्मनाम् विदितः आत्मा यैः ते विदितात्मानः, तेषाम् - बहुव्रीहिः।

(ग) कृदन्तः निर्वाणम् निर् + वा (वा - गतिगन्धनयोः) + क्त।
कामः कम् (कमु - कान्तौ) + घञ्।
क्रोधः क्रुध् (क्रुध - क्रोधे) + घञ्।
वियुक्तः वि + युज् (युजिर् - योगे) + क्त (कर्तरि)।
यतीनाम् यम् (यम - उपरमे) + क्तिन्, तेषाम्।
यतः यम् (यम - उपरमे) + क्त।

(घ) तद्धितान्तः अभितः अभि + तसिल्।

भावस्पष्टीकरणम् -

वर्तते।	
किं वर्तते ?	**ब्रह्मनिर्वाणं** वर्तते।
ब्रह्मनिर्वाणं **कुतः** वर्तते ?	ब्रह्मनिर्वाणम् **अभितः** वर्तते।
केषां ब्रह्मनिर्वाणम् अभितः वर्तते ?	**यतीनां** ब्रह्मनिर्वाणम् अभितः वर्तते।
कीदृशानां यतीनां ब्रह्मनिर्वाणम् अभितः वर्तते ?	**विदितात्मनां** यतीनां ब्रह्मनिर्वाणम् अभितः वर्तते।
पुनश्च कीदृशानां विदितात्मनां यतीनां ब्रह्मनिर्वाणम् अभितः वर्तते ?	**यतचेतसां** विदितात्मनां यतीनां ब्रह्मनिर्वाणम् अभितः वर्तते।
पुनश्च कीदृशानां यतचेतसां विदितात्मनां यतीनां ब्रह्मनिर्वाणम् अभितः वर्तते ?	**कामक्रोधवियुक्तानां** यतचेतसां विदितात्मनां यतीनां ब्रह्मनिर्वाणम् अभितः वर्तते।

तात्पर्यम् - कामक्रोधाभ्यां वियुक्तानां संयतान्तःकरणानां विदितात्मनां संन्यासिनां जीवतां मृतानां चेति उभयतः अपि मोक्षः वर्तते।

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥५.२७॥
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥५.२८॥

पदच्छेदः - स्पर्शान्, कृत्वा, बहिः, बाह्यान्, चक्षुः, च, एव, अन्तरे, भ्रुवोः।
प्राणापानौ, समौ, कृत्वा, नासाभ्यन्तरचारिणौ ॥५.२७॥
यतेन्द्रियमनोबुद्धिः, मुनिः, मोक्षपरायणः।
विगतेच्छाभयक्रोधः, यः, सदा, मुक्तः, एव, सः ॥

अन्वयः - यः स्पर्शान् बाह्यान् बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा नासाभ्यन्तरचारिणौ प्राणापानौ समौ कृत्वा यतेन्द्रियमनोबुद्धिः मोक्षपरायणः विगतेच्छाभयक्रोधः मुनिः (वर्तते) सः सदा मुक्तः एव।

पदार्थः - यः = यः मानवः, स्पर्शान् = शब्दादीन् विषयान्, बाह्यान् = बहिः वर्तमानान्, बहिः = बहिर्भागे, चक्षुः च एव = नेत्रम् अपि, भ्रुवोः = भ्रुवोः, अन्तरे कृत्वा = मध्ये कृत्वा, नासाभ्यन्तरचारिणौ = नासिकान्तरसञ्चारिणौ, प्राणापानौ = प्राणापानवायू, समौ = तुल्यौ, कृत्वा = विधाय, यतेन्द्रियमनोबुद्धिः = वशीकृतेन्द्रियचित्तमतिः, मोक्षपरायणः = मोक्षरतः, विगतेच्छाभयक्रोधः = विनष्टरागद्वेषभयः, मुनिः = यतिः, सः = सः पुरुषः, सदा = सततम्, मुक्तः एव = विमुक्तः एव।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	स्पर्शान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
बाह्यान्	अ. पुं. द्वि. बहु. (विशेषणम्)	बहिः	अव्ययम्
चक्षुः	चक्षुस्- सका. नपुं. द्वि. एक.	च	अव्ययम्
एव	अव्ययम्	भ्रुवोः	ऊ. स्त्री. स. द्विव.
अन्तरे	अव्ययम्	कृत्वा	क्त्वान्तम् अव्ययम्
नासाभ्यन्त-रचारिणौ	नासाभ्यन्तरचारिन्- न. पुं. द्वि. द्विव. (विशेषणम्)	प्राणापानौ	अ. पुं. द्वि. द्विव. (विशेष्यम्)
समौ	अ. पुं. द्वि. द्विव. (विशेषणम्)	यतेन्द्रियमनोबुद्धिः	इ. पुं. प्र. एक. (विशेषणम्)
मोक्षपरायणः	अ. पुं. प्र. एक. (विशेषणम्)	विगतेच्छाभयक्रोधः	अ. पुं. प्र. एक. (विशेषणम्)
मुनिः	इ. पुं. प्र. एक. (विशेष्यम्)	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
सदा	अव्ययम्	मुक्तः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	बहिर्बाह्यान्	बहिः + बाह्यान्	विसर्गसन्धिः (रेफः)।
	बाह्यांश्चक्षुः	बाह्यान् + चक्षुः	सत्वसन्धिः रुत्वम्, विसर्गः, अनुस्वारः, सकारः श्चुत्वं च।
	चक्षुश्च	चक्षुः + च	विसर्गसन्धिः सकारः श्चुत्वं च।
	चैव	च + एव	वृद्धिसन्धिः।
	एवान्तरे	एव + अन्तरे	सवर्णदीर्घसन्धिः।
	यतेन्द्रियमनोबुद्धिर्मुनिः	यतेन्द्रियमनोबुद्धिः + मुनिः	विसर्गसन्धिः (रेफः)।
	मुनिर्मोक्षपरायणः	मुनिः + मोक्षपरायणः	विसर्गसन्धिः (रेफः)।
	विगतेच्छाभयक्रोधो यः	विगतेच्छाभयक्रोधः + यः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	मुक्त एव	मुक्तः + एव	विसर्गसन्धिः (लोपः)।
(ख) समासः	प्राणापानौ	प्राणश्च अपानश्च प्राणापानौ - द्वन्द्वः।	

	नासाभ्यन्तरचारिणौ	नासाभ्यन्तरे चरतः तच्छीलौ नासाभ्यन्तरचारिणौ - ताच्छीलिके कर्तरि णिनिः उपपदसमासश्च ।
	यतेन्द्रियमनोबुद्धिः	इन्द्रियाणि च मनश्च बुद्धिश्च इन्द्रियमनोबुद्धयः - द्वन्द्वः । यताः इन्द्रियमनोबुद्धयः येन सः यतेन्द्रियमनोबुद्धिः - बहुव्रीहिः ।
	मोक्षपरायणः	मोक्षः परायणं यस्य सः मोक्षपरायणः - बहुव्रीहिः ।
	विगतेच्छाभयक्रोधः	इच्छा च भयं च क्रोधश्च इच्छाभयक्रोधाः - द्वन्द्वः । विगताः इच्छाभयक्रोधाः यस्मात् सः विगतेच्छाभयक्रोधः - बहुव्रीहिः ।
(ग) कृदन्तः	स्पर्शान्	स्पृश् (स्पृश - संस्पर्शने) + घञ् (भावे), तान् ।
	कृत्वा	कृ (डुकृञ् - करणे) + क्त्वा ।
	प्राणाः	प्र + अन् (अन - प्राणने) + अच् ।
	यतम्	यम् (यम - उपरमे) + क्त (कर्तरि) ।
	बुद्धिः	बुध् (बुध - अवगमने) + क्तिन् ।
	मोक्षः	मोक्ष् (मोक्ष - क्षेपे) + घञ् ।
	परायणः	परा + अय् (अय - गतौ) + ल्युट् ।
	विगतः	वि + गम् (गम्लृ - गतौ) + क्त (कर्तरि) ।
	इच्छा	इष् (इषु - इच्छायाम्) + श, स्त्रीत्वे टाप् च ।
	मुक्तः	मुच् (मुच्लृ - मोक्षणे) + क्त ।
(घ) तद्धितान्तः	बाह्यान्	बहिः + यञ् । बहिर्भवः बाह्यः, तान् ।
	सदा	सर्व + दा । (कालार्थे) ।

भावस्पष्टीकरणम् -

मुक्तः एव ।	
कदा मुक्तः एव ?	**सदा** मुक्तः एव ।
कः सदा मुक्तः एव ?	**सः** सदा मुक्तः एव ।
कुत्र कृत्वा सः सदा मुक्तः एव ?	**अन्तरे कृत्वा** सः सदा मुक्तः एव ।
कयोः अन्तरे कृत्वा सः सदा मुक्तः एव ?	**भ्रुवोः** अन्तरे कृत्वा सः सदा मुक्तः एव ।
किं च भ्रुवोः अन्तरे कृत्वा सः सदा मुक्तः एव ?	**चक्षुः च एव** भ्रुवोः अन्तरे कृत्वा सः सदा मुक्तः एव ।
कुत्र चक्षुः च एव भ्रुवोः अन्तरे कृत्वा सः सदा मुक्तः एव ?	**बहिः** चक्षुः च एव भ्रुवोः अन्तरे कृत्वा सः सदा मुक्तः एव ।

कः बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा सः सदा मुक्तः एव ?	**यः** बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा सः सदा मुक्तः एव ।
यः **कान्** बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा सः सदा मुक्तः एव ?	यः **बाह्यान्** बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा सः सदा मुक्तः एव ।
यः **कीदृशान्** बाह्यान् बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा सः सदा मुक्तः एव ?	यः **स्पर्शान्** बाह्यान् बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा सः सदा मुक्तः एव ।
यः स्पर्शान् बाह्यान् बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा **पुनश्च कौ कृत्वा** सः सदा मुक्तः एव ?	यः स्पर्शान् बाह्यान् बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा **समौ कृत्वा** सः सदा मुक्तः एव ।
यः स्पर्शान् बाह्यान् बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा **कौ** समौ कृत्वा सः सदा मुक्तः एव ?	यः स्पर्शान् बाह्यान् बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा **प्राणापानौ** समौ कृत्वा सः सदा मुक्तः एव ।
यः स्पर्शान् बाह्यान् बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा **कीदृशौ** प्राणापानौ समौ कृत्वा सः सदा मुक्तः एव ?	यः स्पर्शान् बाह्यान् बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा **नासाभ्यन्तरचारिणौ** प्राणापानौ समौ कृत्वा सः सदा मुक्तः एव ।
यः स्पर्शान् बाह्यान् बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा नासाभ्यन्तरचारिणौ प्राणापानौ समौ कृत्वा **कः** (वर्तते) सः सदा मुक्तः एव ?	यः स्पर्शान् बाह्यान् बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा नासाभ्यन्तरचारिणौ प्राणापानौ समौ कृत्वा **मुनिः** (वर्तते) सः सदा मुक्तः एव ।
यः स्पर्शान् बाह्यान् बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा नासाभ्यन्तरचारिणौ प्राणापानौ समौ कृत्वा **कीदृशः** मुनिः वर्तते सः सदा मुक्तः एव ?	यः स्पर्शान् बाह्यान् बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा नासाभ्यन्तरचारिणौ प्राणापानौ समौ कृत्वा **विगतेच्छाभयक्रोधः** मुनिः वर्तते सः सदा मुक्तः एव ।
यः स्पर्शान् बाह्यान् बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा नासाभ्यन्तरचारिणौ प्राणापानौ समौ कृत्वा **पुनश्च कीदृशः** विगतेच्छाभयक्रोधः मुनिः वर्तते सः सदा मुक्तः एव ?	यः स्पर्शान् बाह्यान् बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा नासाभ्यन्तरचारिणौ प्राणापानौ समौ कृत्वा **मोक्षपरायणः** विगतेच्छा-भयक्रोधः मुनिः वर्तते सः सदा मुक्तः एव ।
यः स्पर्शान् बाह्यान् बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा नासाभ्यन्तरचारिणौ प्राणापानौ समौ कृत्वा **पुनश्च कीदृशः** मोक्षपरायणः विगतेच्छाभयक्रोधः मुनिः वर्तते सः सदा मुक्तः एव ?	यः स्पर्शान् बाह्यान् बहिः चक्षुः च एव भ्रुवोः अन्तरे कृत्वा नासाभ्यन्तरचारिणौ प्राणापानौ समौ कृत्वा **यतेन्द्रियमनोबुद्धिः** मोक्षपरायणः विगतेच्छाभयक्रोधः मुनिः वर्तते सः सदा मुक्तः एव ।

तात्पर्यम् - यः सर्वान् अपि इन्द्रियार्थान् बहिरेव कृत्वा (तान् अविचिन्त्य), दृष्टिं भ्रुवोः मध्ये संस्थाप्य, नासिकायां संचरन्तौ प्राणापानौ समौ कृत्वा, इन्द्रियाणि मनः बुद्धिं च नियन्त्र्य मोक्षपरायणः भवति, यश्च इच्छाभयक्रोधरहितः अस्ति सः सदा मुक्तः एव इति निर्णयः।

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥५.२९॥

पदच्छेदः - भोक्तारम्, यज्ञतपसाम्, सर्वलोकमहेश्वरम्।
सुहृदम्, सर्वभूतानाम्, ज्ञात्वा, माम्, शान्तिम्, ऋच्छति ॥

अन्वयः - यज्ञतपसां भोक्तारं सर्वलोकमहेश्वरं सर्वभूतानां सुहृदं मां ज्ञात्वा शान्तिम् ऋच्छति।

पदार्थः - यज्ञतपसाम् = यज्ञानां तपसां च, भोक्तारम् = पालकम्, सर्वलोकमहेश्वरम् = सकलभुवननाथम्, सर्वभूतानाम् = सकलप्राणिनाम्, सुहृदम् = मित्रम्, माम् = माम्, ज्ञात्वा = विदित्वा, शान्तिम् = मोक्षम्, ऋच्छति = विन्दति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यज्ञतपसाम्	यज्ञतपस्- सका. नपुं. ष. बहु.	भोक्तारम्	ऋ. पुं. द्वि. एक. (विशेषणम्)
सर्वलोकमहेश्वरम्	अ. पुं. द्वि. एक. (विशेषणम्)	सर्वभूतानाम्	अ. नपुं. ष. बहु.
सुहृदम्	सुहृद्- द. पुं. द्वि. एक. (विशेषणम्)	माम्	अस्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)
ज्ञात्वा	क्त्वान्तम् अव्ययम्	शान्तिम्	इ. स्त्री. द्वि. एक.
ऋच्छति	ऋ (ऋ - गतिप्रापणयोः) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) समासः यज्ञतपसाम् — यज्ञाश्च तपांसि च यज्ञतपांसि, तेषाम् - द्वन्द्वः।
सर्वलोकमहेश्वरम् — सर्वे लोकाः सर्वलोकाः - कर्मधारयः।
महान् ईश्वरः महेश्वरः - कर्मधारयः।
सर्वलोकानां महेश्वरः सर्वलोकमहेश्वरः, तम् -षष्ठीतत्पुरुषः।
सर्वभूतानां — सर्वाणि भूतानि सर्वभूतानि, तेषाम् - कर्मधारयः।

(ख) कृदन्तः भोक्तारम् — भुज् (भुज - पालनाभ्यवहारयोः) + तृच्, तम्।

लोकः	लोक् (लोकृ - दर्शने) + घञ्।
भूतम्	भू (भू - सत्तायाम्) + क्त (भावे)।
ज्ञात्वा	ज्ञा (ज्ञा - अवबोधने) + क्त्वा।
शान्तिम्	शम् (शमु - उपशमने) + क्तिन्, ताम्।

भावस्पष्टीकरणम् -

ऋच्छति।	
काम् ऋच्छति ?	**शान्तिम्** ऋच्छति।
किं कृत्वा शान्तिम् ऋच्छति ?	**ज्ञात्वा** शान्तिम् ऋच्छति।
कं ज्ञात्वा शान्तिम् ऋच्छति ?	**मां** ज्ञात्वा शान्तिम् ऋच्छति।
कीदृशं मां ज्ञात्वा शान्तिम् ऋच्छति ?	**सुहृदं** मां ज्ञात्वा शान्तिम् ऋच्छति।
केषां सुहृदं मां ज्ञात्वा शान्तिम् ऋच्छति ?	**सर्वभूतानां** सुहृदं मां ज्ञात्वा शान्तिम् ऋच्छति ?
कीदृशं सर्वभूतानां सुहृदं मां ज्ञात्वा शान्तिम् ऋच्छति ?	**सर्वलोकमहेश्वरं** सर्वभूतानां सुहृदं मां ज्ञात्वा शान्तिम् ऋच्छति।
पुनश्च कीदृशं सर्वलोकमहेश्वरं सर्वभूतानां सुहृदं मां ज्ञात्वा शान्तिम् ऋच्छति ?	**भोक्तारं** सर्वलोकमहेश्वरं सर्वभूतानां सुहृदं मां ज्ञात्वा शान्तिम् ऋच्छति।
केषां भोक्तारं सर्वलोकमहेश्वरं सर्वभूतानां सुहृदं मां ज्ञात्वा शान्तिम् ऋच्छति ?	**यज्ञतपसां** भोक्तारं सर्वलोकमहेश्वरं सर्वभूतानां सुहृदं मां ज्ञात्वा शान्तिम् ऋच्छति।

तात्पर्यम् - सोऽयं मुनिः भगवन्तं मां यज्ञतपसां पालकम्, सर्वलोकानां महेश्वरम्, सर्वभूतानां मित्रं च ज्ञात्वा मोक्षं प्राप्नोति।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मसंन्यासयोगो नाम पञ्चमोऽध्यायः ॥५॥

पञ्चमाध्यायस्य सारः

चतुर्थे अध्याये भगवता ज्ञानयोग-कर्मयोगयोः विवरणं कृतम्। तत् श्रुत्वा अर्जुनः - "हे कृष्ण ! भवान् कर्मसंन्यासं कथयति, कर्मयोगमपि उपदिशति। कर्मणां त्यागः, तेषां स्वीकारश्च परस्परविरोधः। केनापि मनुष्येण तयोः द्वयोः अपि अनुष्ठानं युगपत् कर्तुं न शक्यते। तस्मात् तयोः द्वयोः एकतरस्य स्वीकारः एव क्रमप्राप्तः भवति। अतः तयोः मध्ये यत् मम निश्चयेन कल्याणकरं भवेत् तत् कथयतु'' इति अस्य अध्यायस्य आरम्भे भगवन्तं निवेदयति।

तदा कर्मसंन्यास-कर्मानुष्ठानयोः समानतां दर्शयितुं देवः एवम् उत्तरति - "कर्मसंन्यासः कर्मयोगः च इति एतौ उभौ अपि मोक्षकारकौ स्तः। किन्तु कर्मसंन्यासात् कर्मपरिग्रहः (कर्माचरणम्) विशिष्टः भवति। यः अन्यान् न द्वेष्टि, किञ्चिदपि न काङ्क्षति सः कर्मयोगी नित्यसंन्यासी इति ज्ञातव्यम्। रागद्वेषशून्यः सः सुखेन कर्मबन्धात् मुक्तो भवति। कर्मसंन्यासः कर्मयोगः च वस्तुतः भिन्नौ न। तौ पृथक् इति बालाः वदन्ति, न तु ज्ञानिनः। यतः तयोः एकतरस्य आचरणेन मानवः उभयोः अपि फलं प्राप्नोति। ज्ञाननिष्ठैः संन्यासिभिः यत् स्थानं (परमपदं) प्राप्यते तदेव कर्मयोगिभिः अपि गम्यते। यः ज्ञानयोगस्य कर्मयोगस्य च समानप्रयोजनं पश्यति सः एव सम्यक् जानाति, नान्यः। कर्मयोगात् ऋते ज्ञानयोगस्य प्राप्तिः कठिना एव भवति"।

अग्रे ज्ञानिनः लक्षणानि वर्णयन् भगवान् वदति - "योगयुक्तः, विशुद्धचित्तः, स्वच्छशरीरः, जितेन्द्रियः, यथार्थदर्शी च पुरुषः कर्म कुर्वन्नपि तेन लिप्तः न भवति। तत्त्ववित् ज्ञानी पश्यन्, शृण्वन्, स्पृशन्, जिघ्रन्, अश्नन्, गच्छन्, स्वपन्, श्वसन्, प्रलपन्, विसृजन्, गृह्णन्, उन्मिषन्, निमिषन् अपि इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते (चक्षुरादीनि इन्द्रियाणि तेषां दर्शनादिषु विषयेषु एव प्रवर्तन्ते) इति मनसि चिन्तयन् 'अहं किञ्चित् न करोमि' इति मन्यते। यः पुरुषः सर्वाणि अपि कर्माणि ब्रह्मणे अर्पयित्वा सङ्गं त्यक्त्वा आचरति सः पापेन न लिप्यते। योगिनः कायेन मनसा बुद्ध्या 'ईश्वराय एव कर्म करोमि, न मम फलाय' इति भावनया ममतां विना कर्म आचरन्ति। तेन तेषां चित्तं शुद्धं भवति। यस्तु फलाकाङ्क्षी सन् कर्मसु प्रवर्तते सः बद्धो भवति। जितेन्द्रियः पुरुषः किमपि कर्म अकुर्वन् अकारयन् च सर्वाणि अपि कर्माणि मनसा परित्यज्य परमात्मनि (समाधौ) एव सुखेन तिष्ठति।

परमात्मा लोकस्य कर्तृत्वं न उत्पादयति। कर्माणि अपि न सृजति। कर्मफलसंयोगमपि न जनयति। अविद्यालक्षणा प्रकृतिः तु प्रवर्तते। (साङ्ख्यदर्शनानुसारेण पुरुषः प्रकृतिश्चेति द्वे सृष्टेः मूलतत्त्वे। तयोः पुरुषः सृष्टेः कर्ता अस्ति चेदपि सः केवलं साक्षी। त्रिगुणात्मिका प्रकृतिरेव सृष्टिनिर्माणादिषु कार्येषु प्रवर्तते)। परमात्मा कस्यापि जीवस्य पापं पुण्यं वा नैव गृह्णाति। तथापि कर्मसु प्रवृत्ताः जनाः 'अहं कर्माणि करोमि' इति मोहिताः भवन्ति। यतो हि तेषां ज्ञानम् अज्ञानेन आवृतं भवति। येषाम् अज्ञानम् आत्मज्ञानकारणात् नाशितं भवति, तेषां कृते परमात्मार्थतत्त्वं सूर्यवत् प्रकाशितं भवति। (अर्थात् यदा आत्मज्ञानं भवति तदा अज्ञानस्य नाशः भवति। ततः परमतत्त्वस्य स्पष्टं ज्ञानं जायते इति दार्शनिकसिद्धान्तः।) तादृशस्य ज्ञानिनः जीवन्मुक्तावस्थायाः वर्णनं कुर्वन् भगवान् वदति यत् - ''पण्डिताः विद्याविनयसम्पन्ने, ब्राह्मणे, धेन्वां, गजे, कुक्कुरे, चाण्डाले च समदर्शिनः भवन्ति। ते एतेषु सर्वेषु अपि समानं ब्रह्म पश्यन्ति। यः ब्रह्मवित् सर्वदा ब्रह्मणि एव स्थिरबुद्धिः सन् सम्मोहवर्जितः भवति सः इष्टं प्राप्य न प्रहृष्यति, अनिष्टं प्राप्य खेदं न याति। शब्दादिषु बाह्येषु इन्द्रियविषयेषु अनासक्तः ब्रह्मयोगेन युक्तान्तःकरणः च सन् तदेव अक्षयं सुखं प्राप्नोति। विषयजन्याः सर्वेऽपि भोगाः

परिमिताः दुःखजनकाश्च भवन्ति। अतः विद्वान् तेषु भोगेषु न रमते। यः इह जगति एव शरीरत्यागात् पूर्वं कामक्रोधोद्भवं वेगं सोढुं शक्नोति, सः नरः योगी सुखी च भवति। यः आत्मनि एव सुखमनुभवति न तु लौकिकविषयेषु, यः आत्मज्ञानेन ज्ञानवान् न तु विषयज्ञानेन, तादृशः योगी ब्रह्माभिन्नः सन् ब्रह्मणि एव लयं गच्छति। येषां पापानि संशयाः च विनष्टाः, चित्तम् अपि नियन्त्रितम् अस्ति, ये सर्वभूतेभ्यः हिते रताः ते ब्रह्मवेत्तारः मोक्षं प्राप्नुवन्ति। यः सर्वान् अपि इन्द्रियार्थान् अविचिन्त्य, दृष्टिं भ्रुवोः मध्ये संस्थाप्य, नासिकायां संचरन्तौ प्राणापानौ समौ कृत्वा, इन्द्रियाणि मनः बुद्धिं च नियन्त्र्य मोक्षपरायणः भवति, यश्च इच्छाभय-क्रोधरहितः अस्ति सः सदा मुक्तः एव इति निर्णयः। सोऽयं मुनिः भगवन्तं यज्ञतपसां पालकम्, सर्वलोकानां महेश्वरम्, सर्वभूतानां मित्रं च ज्ञात्वा मोक्षं प्राप्नोति।"

अस्मिन् अध्याये कर्मसंन्यासस्वरूपं स्पष्टीकृतम् इति कारणेन अस्य अध्यायस्य नाम 'कर्मसंन्यासयोगः' इति।

****

अथ षष्ठोऽध्यायः

६

ध्यानयोगः

श्रीभगवानुवाच - अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥६.१॥

पदच्छेदः -

श्रीभगवान्, उवाच - अनाश्रितः, कर्मफलम्, कार्यम्, कर्म, करोति, यः।
सः, संन्यासी, च, योगी, च, न, निरग्निः, न, च, अक्रियः॥

अन्वयः - यः कर्मफलम् अनाश्रितः कार्यं कर्म करोति सः संन्यासी च योगी च (भवति)। निरग्निः न, अक्रियः च न (भवति)।

पदार्थः - यः = यः पुरुषः, कर्मफलम् = कर्मणः फलम् (प्रयोजनम्), अनाश्रितः = अनालम्बमानः (आसक्तिरहितः), कार्यम् = कर्तव्यम्, कर्म = कृत्यम्, करोति = आचरति, सः = सः पुरुषः, संन्यासी च = यतिः च , योगी च = युक्तः च, निरग्निः न = अग्निसाध्यश्रौतकर्म परित्यागी संन्यासी न भवति, अक्रियः च = अग्निनिरपेक्षस्मार्तकर्मपरित्यागी (त्यक्तक्रियः योगी) अपि, न = न भवति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	कर्मफलम्	अ. नपुं. द्वि. एक.
अनाश्रितः	अ. पुं. प्र. एक. (विशेषणम्)	कार्यम्	अ. नपुं. द्वि. एक. (विशेषणम्)
कर्म	कर्मन्- न. नपुं. द्वि. एक. (विशेष्यम्)	करोति	कृ (डुकृञ् करणे) पर. कर्तरि लट्. प्रपु. एक.
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	संन्यासी	संन्यासिन्- न. पुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	योगी	योगिन्- न. पुं. प्र. एक. (विशेषणम्)
निरग्निः	इ. पुं. प्र. एक. (विशेषणम्)	न	अव्ययम्
अक्रियः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	स संन्यासी	सः + संन्यासी	विसर्गसन्धिः (लोपः)।
	निरग्निर्न	निरग्निः + न	विसर्गसन्धिः (रेफः)।
	चाक्रियः	च + अक्रियः	सवर्णदीर्घसन्धिः।
(ख) समासः	अनाश्रितः	न आश्रितः अनाश्रितः - नञ्तत्पुरुषः।	
	कर्मफलम्	कर्मणां फलं कर्मफलम्, तत् - षष्ठीतत्पुरुषः।	

	निरग्निः	निर्गताः अग्नयः यस्मात् सः निरग्निः - बहुव्रीहिः ।
	अक्रियः	न विद्यते क्रिया यस्य सः अक्रियः - बहुव्रीहिः ।
(ग) कृदन्तः	आश्रितः	आ + श्रि (श्रिञ् सेवायाम्) + क्त (कर्तरि) ।
	कार्यम्	कृ (डुकृञ् करणे) + ण्यत् (कर्तव्यम् इत्यर्थः) ।
(घ) तद्धितान्तः	संन्यासी	संन्यास + इनि (संन्यासः अस्य अस्मिन् वा अस्ति इति) ।
	योगी	योग + इनि (मतुबर्थे) (योगः अस्य अस्मिन् वा अस्ति इति) ।

भावस्पष्टीकरणम् -

यः अनाश्रितः कर्म करोति ।	
यः अनाश्रितः **कीदृशं** कर्म करोति ?	यः अनाश्रितः **कार्यं** कर्म करोति ।
यः अनाश्रितः कार्यं कर्म करोति **सः कः** ?	यः अनाश्रितः कार्यं कर्म करोति **सः संन्यासी** ।
यः अनाश्रितः कार्यं कर्म करोति सः संन्यासी **पुनः कः** ?	यः अनाश्रितः कार्यं कर्म करोति सः संन्यासी **च योगी च** (भवति) ।
यः अनाश्रितः कार्यं कर्म करोति सः संन्यासी च योगी च (भवति) । **कः (संन्यासी) न (भवति)** ?	यः अनाश्रितः कार्यं कर्म करोति सः संन्यासी च योगी च (भवति) । **निरग्निः (संन्यासी) न (भवति)** ।
यः अनाश्रितः कार्यं कर्म करोति सः संन्यासी च योगी च (भवति) । निरग्निः (संन्यासी) न **पुनः कः न** (भवति) ?	यः अनाश्रितः कार्यं कर्म करोति सः संन्यासी च योगी च (भवति) । निरग्निः (संन्यासी) न **अक्रियः च न** (भवति) ।

तात्पर्यम् - यः कर्मफलम् अनपेक्षमाणः कर्म करोति सः संन्यासी इति उच्यते। सः एव योगी अपि उच्यते। अग्नित्यागमात्रेण कोऽपि जनः संन्यासी न भवति। कर्मत्यागमात्रेण कोऽपि जनः योगी अपि न भवति। अर्थात् निरपेक्षकर्मकर्ता एव वास्तविकः संन्यासी योगी च भवति इति भावः। (अग्निरक्षणं गृहस्थस्य धर्मः अस्ति। संन्यासाश्रमस्य ग्रहणावसरे अग्नित्यागः क्रियते।)

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव।
न ह्यसंन्यस्तसङ्कल्पो योगी भवति कश्चन॥६.२॥

पदच्छेदः - यम्, संन्यासम्, इति, प्राहुः, योगं, तम्, विद्धि, पाण्डव।
न, हि, असंन्यस्तसङ्कल्पः, योगी, भवति, कश्चन॥

अन्वयः - पाण्डव ! यं संन्यासम् इति प्राहुः तं योगं विद्धि। असंन्यस्तसङ्कल्पः हि कश्चन योगी न भवति।

पदार्थः - पाण्डव = हे अर्जुन, यम् = यम्, संन्यासम् इति = कर्मसंन्यासः इति, प्राहुः = कथयन्ति, तम् = तम्, योगम् = कर्मयोगम्, विद्धि = जानीहि, हि = यस्मात्, असंन्यस्तसङ्कल्पः = अभिलाषम् अपरित्यजन्, कश्चन = कोऽपि, योगी = कर्मयोगी, न भवति = न भवति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पाण्डव	अ. पुं. सम्बो. एक.	यम्	यद्- द. सर्व. पुं. द्वि. एक. (विशेषणम्)
संन्यासम्	अ. पुं. द्वि. एक. (विशेष्यम्)	इति	अव्ययम्
प्राहुः	प्र + ब्रू (ब्रूञ् व्यक्तायां वाचि) पर. कर्तरि लट्. प्रपु. एक.	तम्	तद्- द. सर्व. पुं. द्वि. एक. (विशेषणम्)
योगम्	अ. पुं. द्वि. एक. (विशेष्यम्)	विद्धि	विद् (विद ज्ञाने) पर. कर्तरि लोट्. मपु. एक.
असंन्यस्त-सङ्कल्पः	अ. पुं. प्र. एक. (विशेषणम्)	हि	अव्ययम्
कश्चन	अव्ययम्	योगी	योगिन्- न. पुं. प्र. एक. (विशेष्यम्)
न	अव्ययम्	भवति	भू (भू सत्तायाम्) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः प्राहुर्योगम् — प्राहुः + योगम् — विसर्गसन्धिः (रेफः) ।
ह्यसंन्यस्तसङ्कल्पः — हि + असंन्यस्तसङ्कल्पः — यण्सन्धिः ।
असंन्यस्तसङ्कल्पो योगी — असंन्यस्तसङ्कल्पः + योगी — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) समासः असंन्यस्तसङ्कल्पः — संन्यस्तः सङ्कल्पः येन सः संन्यस्तसङ्कल्पः - बहुव्रीहिः ।
न संन्यस्तसङ्कल्पः असंन्यस्तसङ्कल्पः - नञ्तत्पुरुषः ।

(ग) कृदन्तः संन्यासम् — सम् + नि + अस् (असु क्षेपणे) + घञ्, तम् ।
योगम् — युज् (युजिर् योगे) + घञ्, तम् ।
सङ्कल्पः — सम् + कृप् (कृप अवकल्पने) + घञ्, भावे ।

(घ) तद्धितान्तः पाण्डव — पाण्डु + अण् (अपत्यार्थे) पाण्डोः अपत्यं पुमान्, तत्सम्बुद्धौ ।
योगी — योग + इनि (मतुबर्थे) (योगः अस्य अस्मिन् वा अस्ति) ।

भावस्पष्टीकरणम् -

विद्धि ।	
कं विद्धि ?	तं विद्धि ।

तं कं विद्धि ?	तं **योगं** विद्धि ।
कीदृशं तं योगं विद्धि ?	**यं संन्यासम् इति प्राहुः** तं योगं विद्धि ।
न भवति ।	
कः न भवति ?	**योगी** न भवति ।
पुनः कः योगी न भवति ?	**कश्चन** योगी न भवति ।
कीदृशः कश्चन योगी न भवति ?	**असंन्यस्तसङ्कल्पः** हि कश्चन योगी न भवति ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पाण्डव** !

तात्पर्यम् - हे अर्जुन ! श्रुतिस्मृतिविदः यं संन्यासं वदन्ति तमेव कर्मयोगं जानीहि । यतः असंन्यस्तसङ्कल्पः कश्चन योगी न भवति । अर्थात् यः कर्मसङ्कल्पस्य त्यागी न भवति सः पुरुषः कदापि योगी भवितुं न अर्हति ।

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥६.३॥

पदच्छेदः - आरुरुक्षोः, मुनेः, योगम्, कर्म, कारणम्, उच्यते ।
योगारूढस्य, तस्य, एव, शमः, कारणम्, उच्यते ॥

अन्वयः - योगम् आरुरुक्षोः मुनेः कर्म कारणम् उच्यते । योगारूढस्य तस्य एव (कर्मसंन्यासे) शमः कारणम् उच्यते ।

पदार्थः - योगम् = ज्ञानयोगम्, आरुरुक्षोः = आरोढुमिच्छतः, मुनेः = मुनीभविष्यतः गृहस्थस्य, कर्म = कर्माचरणम्, कारणम् = साधनम्, उच्यते = कथ्यते, योगारूढस्य = ज्ञानयोगम् आरूढस्य, तस्य एव = मुनीभूतस्य एव, शमः = उपशमः (सङ्कल्पानाम् अभावः), कारणम् = ज्ञानपरिपाके साधनम्, उच्यते = कथ्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
योगम्	अ. पुं. द्वि. एक.	आरुरुक्षोः	उ. पुं. ष. एक. (विशेषणम्)
मुनेः	इ. पुं. ष. एक. (विशेष्यम्)	कर्म	कर्मन्- न. नपुं. प्र. एक. (विशेष्यम्)
कारणम्	अ. नपुं. प्र. एक. (विशेषणम्)	उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.
योगारूढस्य	अ. पुं. ष. एक. (विशेष्यम्)	तस्य	तद्- द. सर्व. पुं. ष. एक. (विशेषणम्)
एव	अव्ययम्	शमः	अ. पुं. प्र. एक.

व्याकरणम् -

(क) सन्धिः	आरुरुक्षोर्मुनेः	आरुरुक्षोः + मुनेः	विसर्गसन्धिः (रेफः)।
	मुनेर्योगम्	मुनेः + योगम्	विसर्गसन्धिः (रेफः)।
	तस्यैव	तस्य + एव	वृद्धिसन्धिः।
(ख) समासः	योगारूढस्य	योगम् आरूढः योगारूढः, तस्य - द्वितीयातत्पुरुषः।	
(ग) कृदन्तः	योगम्	युज् (युजिर् योगे) + घञ्, तम्।	
	आरुरुक्षोः	आ + रुह् (रुह - बीजजन्मनि प्रादुर्भावे च) + सन् (इच्छायाम्) + उ, (कर्तरि) तस्य।	
	कारणम्	कृ (डुकृञ् करणे) + णिच् + ल्युट्।	
	आरूढस्य	आ + रुह् (रुह - बीजजन्मनि प्रादुर्भावे च) + क्त (कर्तरि) तस्य।	
	शमः	शम् (शम उपशमने) + घञ्।	

भावस्पष्टीकरणम् -

उच्यते।	
किम् उच्यते ?	**कारणम्** उच्यते।
किं कारणम् उच्यते ?	**कर्म** कारणम् उच्यते।
कस्य कर्म कारणम् उच्यते ?	**मुनेः** कर्म कारणम् उच्यते।
कीदृशस्य मुनेः कर्म कारणम् उच्यते ?	**आरुरुक्षोः** मुनेः कर्म कारणम् उच्यते।
कम् आरुरुक्षोः मुनेः कर्म कारणम् उच्यते ?	**योगम्** आरुरुक्षोः मुनेः कर्म कारणम् उच्यते।
उच्यते।	
किम् उच्यते ?	**कारणम्** उच्यते।
कः कारणम् उच्यते ? ·	**शमः** कारणम् उच्यते।
कस्य शमः कारणम् उच्यते ?	**तस्य एव** शमः कारणम् उच्यते।
कीदृशस्य तस्य एव शमः कारणम् उच्यते ?	**योगारूढस्य** तस्य एव शमः कारणम् उच्यते।

तात्पर्यम् - समत्वबुद्धिरूपं योगं यः आरोढुम् इच्छति तस्य योगिनः कृते निष्कामबुद्ध्या कर्माचरणं तत्र कारणं भवति। यदा तादृशं योगं सः आरूढः भवति तदा तु तस्य ज्ञानपरिपाके शमः (मनःशान्तिः) एव कारणं भवति।

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते।
सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते ॥६.४॥

पदच्छेदः - यदा, हि, न, इन्द्रियार्थेषु, न, कर्मसु, अनुषज्जते ।
सर्वसङ्कल्पसंन्यासी, योगारूढः, तदा, उच्यते ॥

अन्वयः - यदा हि इन्द्रियार्थेषु न अनुषज्जते, कर्मसु (अपि) न तदा सर्वसङ्कल्पसंन्यासी योगारूढः उच्यते ।

पदार्थः - यदा हि = यस्मिन् समये, इन्द्रियार्थेषु = शब्दादिषु विषयेषु, न अनुषज्जते = न आसक्तो भवति, कर्मसु = कर्माचरणेषु अपि, न (अनुषज्जते) = न आसक्तो भवति, तदा = तस्मिन् काले, सर्वसङ्कल्पसंन्यासी = सर्वेषाम् इन्द्रियविषयाणां तत्साधनानां च श्रवणादिक्रियाणां परित्यक्ता, योगारूढः = ज्ञानयोगम् आरूढः, उच्यते = वर्ण्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यदा	अव्ययम्	हि	अव्ययम्
इन्द्रियार्थेषु	अ. पुं. स. बहु.	न	अव्ययम्
अनुषज्जते	अनु + सज्ज् (षस्ज गतौ) आत्म. कर्तरि लट्. प्रपु. एक.	कर्मसु	कर्मन्- न. नपुं. स. बहु.
तदा	अव्ययम्	सर्वसङ्कल्प-संन्यासी	सर्वसङ्कल्पसंन्यासिन्- न. पुं. प्र. एक. (विशेष्यम्)
योगारूढः	अ. पुं. प्र. एक. (विशेषणम्)	उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः
- नेन्द्रियार्थेषु — न + इन्द्रियार्थेषु — गुणसन्धिः ।
- कर्मस्वनुषज्जते — कर्मसु + अनुषज्जते — यणसन्धिः ।
- योगारूढस्तदा — योगारूढः + तदा — विसर्गसन्धिः (सकारः) ।
- तदोच्यते — तदा + उच्यते — गुणसन्धिः ।

(ख) समासः
- इन्द्रियार्थेषु — इन्द्रियाणाम् अर्थाः इन्द्रियार्थाः, तेषु - षष्ठीतत्पुरुषः ।
- सर्वसङ्कल्पसंन्यासी — सर्वे सङ्कल्पाः सर्वसङ्कल्पाः - कर्मधारयः ।
  सर्वसङ्कल्पानां संन्यासी सर्वसङ्कल्पसंन्यासी - षष्ठीतत्पुरुषः ।
- योगारूढः — योगम् आरूढः योगारूढः - द्वितीयातत्पुरुषः ।

(ग) कृदन्तः
- सङ्कल्पः — सम् + कृप् (कृप अवकल्पने) + घञ् ।

	योगः	युज् (युजिर् योगे) + घञ्।
	आरूढस्य	आ + रुह् (रुह बीजजन्मनि प्रादुर्भावे च) + क्त (कर्तरि) तस्य।
(घ) तद्धितान्तः	संन्यासी	संन्यास + इनि (संन्यासः अस्य अस्मिन् वा अस्ति इति)।

भावस्पष्टीकरणम् -

न अनुषज्जते।	
केषु न अनुषज्जते ?	**इन्द्रियार्थेषु** न अनुषज्जते।
कदा इन्द्रियार्थेषु न अनुषज्जते ?	**यदा हि** इन्द्रियार्थेषु न अनुषज्जते।
यदा हि इन्द्रियार्थेषु न अनुषज्जते, **पुनः केषु न** ?	यदा हि इन्द्रियार्थेषु न अनुषज्जते, **कर्मसु न**।
यदा हि इन्द्रियार्थेषु न अनुषज्जते, कर्मसु न **तदा किं भवति** ?	यदा हि इन्द्रियार्थेषु न अनुषज्जते, कर्मसु न **तदा उच्यते**।
यदा हि इन्द्रियार्थेषु न अनुषज्जते, कर्मसु न तदा **कः** उच्यते ?	यदा हि इन्द्रियार्थेषु न अनुषज्जते, कर्मसु न तदा **योगारूढः** उच्यते।
यदा हि इन्द्रियार्थेषु न अनुषज्जते, कर्मसु न तदा **कः** योगारूढः उच्यते ?	यदा हि इन्द्रियार्थेषु न अनुषज्जते, कर्मसु न तदा **सर्वसङ्कल्पसंन्यासी** योगारूढः उच्यते।

तात्पर्यम् - यदा पुरुषः इन्द्रियार्थेषु रूपरसगन्धस्पर्शादिषु तत्साधनेषु दर्शनास्वादनघ्राणादिषु कर्मसु च आसक्तो न भवति तदा तस्य तेषु विषयेषु तत्साधनेषु च कर्मसु इच्छैव न भवति। तदानीं सः ज्ञानयोगम् आरूढः भवति, अर्थात् 'ज्ञानवान्' इति उच्यते।

उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥६.५॥

पदच्छेदः - उद्धरेत्, आत्मना, आत्मानम्, न, आत्मानम्, अवसादयेत्।
आत्मा, एव, हि, आत्मनः, बन्धुः, आत्मा, एव, रिपुः, आत्मनः ॥

अन्वयः - आत्मानम् आत्मना उद्धरेत्। आत्मानं न अवसादयेत्। आत्मा एव हि आत्मनः बन्धुः। आत्मा एव आत्मनः रिपुः।

पदार्थः - आत्मानम् = स्वम्, आत्मना = विषयसङ्गरहितेन मनसा, उद्धरेत् = उन्नयेत्, आत्मानम् = स्वम्, न अवसादयेत् = न नाशयेत्, आत्मा एव हि = विषयसङ्गरहितं मनः एव, आत्मनः = स्वस्य, बन्धुः = बान्धवः, आत्मा एव = विषयसङ्गविशिष्टं मनः एव, आत्मनः = स्वस्य, रिपुः = शत्रुः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
आत्मानम्	आत्मन् - न. पुं. द्वि. एक.	आत्मना	आत्मन् - न. पुं. तृ. एक.
उद्धरेत्	उद् + हृ (हृञ् हरणे) पर. कर्तरि विधिलिङ्. प्रपु. एक.	न	अव्ययम्
अवसादयेत्	अव + सद् (षद्लृ विशरणगत्यवसादनेषु) पर. कर्तरि णिच्, विधिलिङ्. प्रपु. एक.	आत्मा	आत्मन् - न. पुं. प्र. एक. (विशेष्यम्)
एव	अव्ययम्	हि	अव्ययम्
आत्मनः	आत्मन् - न. पुं. ष. एक.	बन्धुः	उ. पुं. प्र. एक. (विशेषणम्)
रिपुः	उ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः

	उद्धरेदात्मना	उद्धरेत् + आत्मना	जश्त्वसन्धिः ।
	आत्मनात्मानम्	आत्मना + आत्मानम्	सवर्णदीर्घसन्धिः ।
	नात्मानम्	न + आत्मानम्	सवर्णदीर्घसन्धिः ।
	आत्मैव	आत्मा + एव	वृद्धिसन्धिः ।
	ह्यात्मनः	हि + आत्मनः	यण्सन्धिः ।
	आत्मनो बन्धुः	आत्मनः + बन्धुः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	बन्धुरात्मा	बन्धुः + आत्मा	विसर्गसन्धिः (रेफः) ।
	आत्मैव	आत्मा + एव	वृद्धिसन्धिः ।
	रिपुरात्मनः	रिपुः + आत्मनः	विसर्गसन्धिः (रेफः) ।

भावस्पष्टीकरणम् -

उद्धरेत् ।	
कम् उद्धरेत् ?	**आत्मानम्** उद्धरेत् ।
केन आत्मानम् उद्धरेत् ?	**आत्मना** आत्मानम् उद्धरेत् ।
आत्मना आत्मानम् उद्धरेत् (पुनः) **किं न** ?	आत्मना आत्मानम् उद्धरेत् (पुनः) **न अवसादयेत्** ।
आत्मना आत्मानम् उद्धरेत् (पुनः) **कं** न अवसादयेत् ?	आत्मना आत्मानम् उद्धरेत् (पुनः) **आत्मानं** न अवसादयेत् ।

आत्मना आत्मानम् उद्धरेत् (पुनः) आत्मानं न अवसादयेत् **(यतः) किम्** ?	आत्मना आत्मानम् उद्धरेत् (पुनः) आत्मानं न अवसादयेत् **(यतः) आत्मा एव हि आत्मनः बन्धुः** ।
आत्मना आत्मानम् उद्धरेत् (पुनः) आत्मानं न अवसादयेत् (यतः) आत्मा एव हि आत्मनः बन्धुः **(पुनः) किम्** ?	आत्मना आत्मानम् उद्धरेत् (पुनः) आत्मानं न अवसादयेत् (यतः) आत्मा एव हि आत्मनः बन्धुः **(पुनः)** आत्मा एव आत्मनः रिपुः ।

तात्पर्यम् - संसारसागरे निमग्नम् आत्मानं विषयसङ्गरहितेन मनसा उद्धारयेत् । न तु कदापि विषय- सङ्गविशिष्टेन संसारसागरे पुनः निमज्जयेत् । यतः विषयसङ्गरहितं मनः एव आत्मनः तारकं पोषकं भवति । विषयसङ्गसहितं मनः तु आत्मनः नाशकम् एव भवति ।

बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥६.६ ॥

पदच्छेदः - बन्धुः, आत्मा, आत्मनः, तस्य, येन, आत्मा, एव, आत्मना, जितः ।
अनात्मनः, तु, शत्रुत्वे, वर्तेत, आत्मा, एव, शत्रुवत् ॥

अन्वयः - येन आत्मना आत्मा एव जितः तस्य आत्मनः आत्मा बन्धुः । अनात्मनः तु आत्मा एव शत्रुवत् शत्रुत्वे वर्तेत ।

पदार्थः - येन = येन पुरुषेण, आत्मना = स्वेन, आत्मा एव = मनः एव, जितः = विषयेभ्यः निवर्तितम्, तस्य = तादृशस्य पुरुषस्य, आत्मा = मनः, आत्मनः = स्वस्य, बन्धुः = हितः, अनात्मनः तु = अवशीकृतमनस्कस्य तु, आत्मा एव = मनः एव, शत्रुवत् = शत्रुसदृशः, शत्रुत्वे = अपकरणे, वर्तेत = स्यात् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
येन	यद्- द. सर्व. पुं. तृ. एक. (विशेषणम्)	आत्मना	आत्मन्- न. पुं. तृ. एक. (विशेष्यम्)
आत्मा	आत्मन्- न. पुं. प्र. एक. (विशेष्यम्)	एव	अव्ययम्
जितः	अ. पुं. प्र. एक. (विशेषणम्)	तस्य	तद्- द. सर्व. पुं. ष. एक. (विशेषणम्)
आत्मनः	आत्मन्- न. पुं. ष. एक. (विशेष्यम्)	बन्धुः	उ. पुं. प्र. एक. (विशेषणम्)
अनात्मनः	अनात्मन्- न. पुं. ष. एक.	तु	अव्ययम्

शत्रुवत्	अव्ययम्	शत्रुत्वे	अ. नपुं. स. एक.
वर्तेत	वृत् (वृतु वर्तने) आत्म. कर्तरि विधिलिङ्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	बन्धुरात्मा	बन्धुः + आत्मा	विसर्गसन्धिः (रेफः)।
	आत्मनस्तस्य	आत्मनः + तस्य	विसर्गसन्धिः (सकारः)।
	येनात्मा	येन + आत्मा	सवर्णदीर्घसन्धिः।
	आत्मैव	आत्मा + एव	वृद्धिसन्धिः।
	एवात्मना	एव + आत्मना	सवर्णदीर्घसन्धिः।
	अनात्मनस्तु	अनात्मनः + तु	विसर्गसन्धिः (सकारः)।
	वर्तेतात्मा	वर्तेत + आत्मा	सवर्णदीर्घसन्धिः।
	आत्मैव	आत्मा + एव	वृद्धिसन्धिः।
(ख) समासः	अनात्मनः	न विद्यते आत्मा यस्य सः अनात्मा, तस्य - बहुव्रीहिः।	
(ग) कृदन्तः	जितः	जि (जि जये) + क्त (कर्मणि)।	
(घ) तद्धितान्तः	शत्रुत्वे	शत्रु + त्वल्, तस्मिन्।	
	शत्रुवत्	शत्रु + वतिः।	

भावस्पष्टीकरणम् -

जितः।	
कः जितः ?	**आत्मा एव** जितः।
केन आत्मा एव जितः ?	**येन** आत्मा एव जितः।
येन **कथम्** आत्मा एव जितः ?	येन **आत्मना** आत्मा एव जितः।
येन आत्मना आत्मा एव जितः **तस्य कः** ?	येन आत्मना आत्मा एव जितः **तस्य बन्धुः**।
येन आत्मना आत्मा एव जितः तस्य **कः** बन्धुः ?	येन आत्मना आत्मा एव जितः तस्य **आत्मा** बन्धुः।
येन आत्मना आत्मा एव जितः तस्य **कस्य** आत्मा बन्धुः ?	येन आत्मना आत्मा एव जितः तस्य **आत्मनः** आत्मा बन्धुः।
येन आत्मना आत्मा एव जितः तस्य आत्मनः आत्मा बन्धुः (पुनः) **किम्** ?	येन आत्मना आत्मा एव जितः तस्य आत्मनः आत्मा बन्धुः (पुनः) **वर्तेत**।

येन आत्मना आत्मा एव जितः तस्य आत्मनः आत्मा बन्धुः (पुनः) **कः** वर्तेत ?	येन आत्मना आत्मा एव जितः तस्य आत्मनः आत्मा बन्धुः, **आत्मा** वर्तेत ।
येन आत्मना आत्मा एव जितः तस्य आत्मनः आत्मा बन्धुः, **कस्य** आत्मा वर्तेत ?	येन आत्मना आत्मा एव जितः तस्य आत्मनः आत्मा बन्धुः, **अनात्मनः तु** आत्मा वर्तेत ।
येन आत्मना आत्मा एव जितः तस्य आत्मनः आत्मा बन्धुः, अनात्मनः तु आत्मा **कीदृशः** वर्तेत ?	येन आत्मना आत्मा एव जितः तस्य आत्मनः आत्मा बन्धुः, अनात्मनः तु आत्मा **एव शत्रुवत्** वर्तेत ।
येन आत्मना आत्मा एव जितः तस्य आत्मनः आत्मा बन्धुः, अनात्मनः तु आत्मा एव शत्रुवत् **कदा** वर्तेत ?	येन आत्मना आत्मा एव जितः तस्य आत्मनः आत्मा बन्धुः, अनात्मनः तु आत्मा एव शत्रुवत् **शत्रुत्वे** वर्तेत ।

तात्पर्यम् - येन पुरुषेण मनः विषयेभ्यः विमुखीकृतं तस्य मनः तस्य कृते बन्धुवत् हितकारि भवति । यस्तु तादृशो न भवति तस्य तदेव मनः शत्रुवत् पीडाकारि भवति । विषयासक्तं मनः बन्धनं जनयति, तद्रहितं तु बन्धमोचनं करोति ।

जितात्मनः प्रशान्तस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥६.७॥

पदच्छेदः - जितात्मनः, प्रशान्तस्य, परमात्मा, समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥

अन्वयः - शीतोष्णसुखदुःखेषु तथा मानापमानयोः प्रशान्तस्य जितात्मनः परमात्मा समाहितः ।

पदार्थः - शीतोष्णसुखदुःखेषु = शीते उष्णे सुखे दुःखे च सति, तथा = एवम्, मानापमानयोः = सम्माने अपमाने च सतोः, प्रशान्तस्य = रागद्वेषशून्यस्य, जितात्मनः = वशीकृतचित्तस्य, परमात्मा = परमात्मा, समाहितः = समाधेः विषयो भवति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
शीतोष्ण-सुखदुःखेषु	अ. नपुं. स. बहु.	तथा	अव्ययम्
मानापमानयोः	अ. पुं. स. द्विव.	प्रशान्तस्य	अ. पुं. ष. एक. (विशेषणम्)
जितात्मनः	जितात्मन्- न. पुं. ष. एक. (विशेषणम्)	परमात्मा	परमात्मन्- न. पुं. प्र. एक. (विशेष्यम्)
समाहितः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) समासः जितात्मनः — जितः आत्मा येन सः जितात्मा, तस्य - बहुव्रीहिः ।
परमात्मा — परमः आत्मा परमात्मा - कर्मधारयः ।
शीतोष्णसुखदुःखेषु — शीतं च उष्णं च सुखं च दुःखं च शीतोष्णसुखदुःखानि, तेषु - द्वन्द्वः ।
मानापमानयोः — मानः च अपमानः च मानापमानौ, तयोः - द्वन्द्वः ।

(ख) कृदन्तः जितः — जि (जि जये) + क्त (कर्तरि) ।
प्रशान्तस्य — प्र + शम् (शमु उपशमने) + क्त (कर्तरि), तस्य ।
समाहितः — सम् + आ + धा (डुधाञ् धारणपोषणयोः) + क्त (कर्तरि) (हि - आदेशः)।

भावस्पष्टीकरणम् -

समाहितः (भवति) ।	
कः समाहितः ?	**परमात्मा** समाहितः ।
कस्य परमात्मा समाहितः ?	**जितात्मनः** परमात्मा समाहितः ।
कीदृशस्य जितात्मनः परमात्मा समाहितः ?	**प्रशान्तस्य** जितात्मनः परमात्मा समाहितः ।
केषु प्रशान्तस्य जितात्मनः परमात्मा समाहितः ?	**शीतोष्णसुखदुःखेषु** प्रशान्तस्य जितात्मनः परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु **तथा कयोः** प्रशान्तस्य जितात्मनः परमात्मा समाहितः ?	शीतोष्णसुखदुःखेषु तथा **मानापमानयोः** प्रशान्तस्य जितात्मनः परमात्मा समाहितः ।

तात्पर्यम् - यः जितेन्द्रियः जितमनस्कः भवति, रागद्वेषादिरहितः विषयासक्तिरहितः भवति तस्य जितेन्द्रियस्य परमात्मा समाधेः विषयो भवति । तादृशः सः पुरुषः शीतोष्णसुखदुःखेषु मानापमानयोः च समानः भवति, समानमनस्कः भवति ।

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥६.८॥

पदच्छेदः - ज्ञानविज्ञानतृप्तात्मा, कूटस्थः, विजितेन्द्रियः ।
युक्तः, इति, उच्यते, योगी, समलोष्टाश्मकाञ्चनः ॥

अन्वयः - ज्ञानविज्ञानतृप्तात्मा कूटस्थः समलोष्टाश्मकाञ्चनः विजितेन्द्रियः युक्तः योगी इति उच्यते ।

पदार्थः - ज्ञानविज्ञानतृप्तात्मा = ज्ञानानुभवसन्तुष्टचित्तः, कूटस्थः = निर्विकारः, समलोष्टाश्मकाञ्चनः = मृत्पाषाणसुवर्णेषु समानबुद्धिः, विजितेन्द्रियः = वशीकृतेन्द्रियः, युक्तः = समाहितचित्तः, योगी इति = योगी इति, उच्यते = (कथ्यते) अभिधीयते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ज्ञानविज्ञानतृप्तात्मा	ज्ञानविज्ञानतृप्तात्मन्- न. पुं. प्र. एक. (विशेषणम्)	कूटस्थः	अ. पुं. प्र. एक. (विशेषणम्)
समलोष्टाश्मकाञ्चनः	अ. पुं. प्र. एक. (विशेषणम्)	विजितेन्द्रियः	अ. पुं. प्र. एक. (विशेषणम्)
युक्तः	अ. पुं. प्र. एक. (विशेषणम्)	योगी	योगिन्- न. पुं. प्र. एक. (विशेष्यम्)
इति	अव्ययम्	उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	कूटस्थो विजितेन्द्रियः	कूटस्थः + विजितेन्द्रियः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	युक्त इति	युक्तः + इति	विसर्गसन्धिः (लोपः) ।
	इत्युच्यते	इति + उच्यते	यण्सन्धिः ।

(ख) समासः	ज्ञानविज्ञानतृप्तात्मा	ज्ञानं च विज्ञानं च ज्ञानविज्ञाने - द्वन्द्वः ।
		ज्ञानविज्ञानाभ्यां तृप्तः ज्ञानविज्ञानतृप्तः - तृतीयातत्पुरुषः ।
		ज्ञानविज्ञानतृप्तः आत्मा यस्य सः - बहुव्रीहिः ।
	विजितेन्द्रियः	विजितानि इन्द्रियाणि येन सः - बहुव्रीहिः ।
	समलोष्टाश्मकाञ्चनः	लोष्टं च अश्मा च काञ्चनं च लोष्टाश्मकाञ्चनानि - द्वन्द्वः ।
		समानि लोष्टाश्मकाञ्चनानि यस्य सः - बहुव्रीहिः ।
(ग) कृदन्तः	ज्ञानम्	ज्ञा (ज्ञा अवबोधने) + ल्युट् ।
	तृप्तः	तृप् (तृप तृप्तौ) + क्त (कर्मणि) ।
	कूटस्थः	कूट + स्था + क्त (कर्तरि) । निर्विकारः इति भावः ।
	विजितः	वि + जि (जि जये) + क्त (कर्तरि) ।
	युक्तः	युज् (युज समाधौ) + क्त (कर्तरि) ।
(घ) तद्धितान्तः	योगी	योग + इनि (मतुबर्थे) । योगः अस्य अस्मिन् वा अस्ति ।

भावस्पष्टीकरणम् -

उच्यते ।	
कः उच्यते ?	**योगी इति** उच्यते ।
कीदृशः योगी इति उच्यते ?	**युक्तः** योगी इति उच्यते ।

पुनः कीदृशः युक्तः योगी इति उच्यते ?	**विजितेन्द्रियः** युक्तः योगी इति उच्यते ।
पुनः कीदृशः विजितेन्द्रियः युक्तः योगी इति उच्यते ?	**समलोष्टाश्मकाञ्चनः** विजितेन्द्रियः युक्तः योगी इति उच्यते ।
पुनः कीदृशः समलोष्टाश्मकाञ्चनः विजितेन्द्रियः युक्तः योगी इति उच्यते ?	**कूटस्थः** समलोष्टाश्मकाञ्चनः विजितेन्द्रियः युक्तः योगी इति उच्यते ।
पुनः कीदृशः कूटस्थः समलोष्टाश्मकाञ्चनः विजितेन्द्रियः युक्तः योगी इति उच्यते ।	**ज्ञानविज्ञानतृप्तात्मा** कूटस्थः समलोष्टाश्मकाञ्चनः विजितेन्द्रियः युक्तः योगी इति उच्यते ।

तात्पर्यम् - गुरुणा उपदिष्टस्य ज्ञानेन प्रत्यक्षानुभवेन च यस्य चित्तं प्रसन्नं वर्तते यश्च निर्विकारः यश्च इन्द्रियाणां वशीकर्ता वर्तते, यस्य च मृत्पिण्डे, पाषाणे सुवर्णे च समानबुद्धिः सञ्जाता, तादृशः समाधौ मग्नः योगी इति कथ्यते। (ज्ञानं शास्त्रोक्तपदार्थानां परिज्ञानम् । विज्ञानं शास्त्रतो ज्ञातानां तथा एव स्वानुभवविषयीकरणम् ।)

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥६.९॥

पदच्छेदः - सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुषु, अपि, च, पापेषु, समबुद्धिः, विशिष्यते ॥

अन्वयः - सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु साधुषु पापेषु अपि च समबुद्धिः विशिष्यते ।

पदार्थः - सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु = सुहृत्, मित्रं, शत्रुः, उदासीनः, मध्यस्थः, द्वेष्यः, बन्धुः, इत्येतेषु, साधुषु = सज्जनेषु, पापेषु अपि च = दुर्जनेषु अपि च, समबुद्धिः = तुल्यमतिः, विशिष्यते = अतिरिच्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु	उ. पुं. स. बहु. (विशेषणम्)	साधुषु	उ. पुं. स. बहु. (विशेष्यम्)
पापेषु	अ. नपुं. स. बहु. (विशेष्यम्)	अपि	अव्ययम्
च	अव्ययम्	समबुद्धिः	इ. पुं. प्र. एक. (विशेषणम्)
विशिष्यते	वि+शिष् (शिष्लृ विशेषणे) पर. कर्मकर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः साधुष्वपि — साधुषु + अपि — यण्सन्धिः ।
समबुद्धिर्विशिष्यते — समबुद्धिः + विशिष्यते — विसर्गसन्धिः (रेफः) ।

(ख) समासः सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु — सुहृत् च मित्रं च अरिः च उदासीनः च मध्यस्थः च द्वेष्यः च बन्धुः च सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धवः, तेषु - द्वन्द्वः ।
समबुद्धिः — समा बुद्धिः यस्य सः समबुद्धिः - बहुव्रीहिः ।

(ग) कृदन्तः उदासीनः — उद् + आस् (आस उपवेशने) + शानच् (कर्तरि) ।
बुद्धिः — बुध् (बुध अवबोधने) + क्तिन् ।

भावस्पष्टीकरणम् -

विशिष्यते ।	
कः विशिष्यते ?	**समबुद्धिः** विशिष्यते ।
केषु समबुद्धिः विशिष्यते ?	**सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु** समबुद्धिः विशिष्यते ।
सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु **पुनः केषु** समबुद्धिः विशिष्यते ?	सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु **साधुषु** समबुद्धिः विशिष्यते ।
सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु साधुषु **पुनः केषुः** समबुद्धिः विशिष्यते ?	सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु साधुषु **पापेषु अपि च** समबुद्धिः विशिष्यते ।

तात्पर्यम् - सुहृत्, मित्रं, शत्रुः, उदासीनः, मध्यस्थः, द्वेष्यः, बन्धुः, साधवः पापिनः च इत्येतेषु सर्वेषु अपि यः रागद्वेषशून्यः भवति सः योगारूढेषु उत्तमः । (सुहृत् स्वभावेनैव उपकर्ता, मित्रं स्नेहेन उपकर्ता, अरिः स्वभावेन अपकर्ता, उदासीनः विवदमानयोः उभयोरपि तिरस्कारकः, मध्यस्थः विवदमानयोः उभयोरपि हिताकाङ्क्षी, द्वेष्यः कारणविशेषेण अपकर्ता, बन्धुः सम्बन्धेन उपकर्ता ।)

योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥६.१०॥

पदच्छेदः - योगी, युञ्जीत, सततम्, आत्मानम्, रहसि, स्थितः ।
एकाकी, यतचित्तात्मा, निराशीः, अपरिग्रहः ॥

अन्वयः - यतचित्तात्मा निराशीः अपरिग्रहः एकाकी योगी रहसि स्थितः सततम् आत्मानं युञ्जीत ।

पदार्थः - यतचित्तात्मा = नियतमनोदेहः, निराशीः = अपगततृष्णः, अपरिग्रहः = परिग्रहरहितः,

एकाकी = सहायरहितः, योगी = योगी, रहसि = विजने (एकान्ते), स्थितः = वर्तमानः, सततम् = सदा, आत्मानम् = मनः, युञ्जीत = योजयेत् (समाधिमग्नं कुर्यात्)।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यतचित्तात्मा	यतचित्तात्मन्- न. पुं. प्र. एक. (विशेषणम्)	निराशीः	निराशिस्- सका. पुं. प्र. एक. (विशेषणम्)
अपरिग्रहः	अ. पुं. प्र. एक. (विशेषणम्)	एकाकी	एकाकिन्- न. पुं. प्र. एक. (विशेषणम्)
योगी	योगिन्- न. पुं. प्र. एक.	रहसि	रहस्- सका. नपुं. स. एक.
स्थितः	अ. पुं. प्र. एक. (विशेषणम्)	सततम्	अव्ययम्
आत्मानम्	आत्मन् - न. पुं. द्वि. एक.	युञ्जीत	युज् (युजिर् योगे) आत्म. कर्तरि विधिलिङ्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	निराशीरपरिग्रहः	निराशीः + अपरिग्रहः	विसर्गसन्धिः (रेफः)।
(ख) समासः	यतचित्तात्मा	चित्तं च आत्मा च चित्तात्मानौ - द्वन्द्वः।	
		यतौ चित्तात्मानौ येन सः - बहुव्रीहिः।	
	निराशीः	निर्गता आशीः यस्मात् सः निराशीः - बहुव्रीहिः।	
	अपरिग्रहः	न विद्यते परिग्रहः यस्य सः - नञ्बहुव्रीहिः।	
(ग) कृदन्तः	स्थितः	स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि)।	
(घ) तद्धितान्तः	योगी	योग + इनि (मतुबर्थे) (योगः अस्य अस्मिन् वा अस्ति)।	

भावस्पष्टीकरणम् -

युञ्जीत।	
कः युञ्जीत ?	**योगी** युञ्जीत।
कीदृशः योगी युञ्जीत ?	**यतचित्तात्मा** योगी युञ्जीत।
यतचित्तात्मा **पुनः कीदृशः** योगी युञ्जीत ?	यतचित्तात्मा **निराशीः** योगी युञ्जीत।
यतचित्तात्मा निराशीः **पुनः कीदृशः** योगी युञ्जीत ?	यतचित्तात्मा निराशीः **अपरिग्रहः** योगी युञ्जीत।
यतचित्तात्मा निराशीः अपरिग्रहः **पुनः कीदृशः** योगी युञ्जीत ?	यतचित्तात्मा निराशीः अपरिग्रहः **एकाकी** योगी युञ्जीत।

यतचित्तात्मा निराशीः अपरिग्रहः एकाकी **पुनः कीदृशः** योगी युञ्जीत ?	यतचित्तात्मा निराशीः अपरिग्रहः एकाकी **रहसि स्थितः** योगी युञ्जीत ।
यतचित्तात्मा निराशीः अपरिग्रहः एकाकी रहसि स्थितः योगी **कं** युञ्जीत ?	यतचित्तात्मा निराशीः अपरिग्रहः एकाकी रहसि स्थितः योगी **आत्मानं** युञ्जीत ।
यतचित्तात्मा निराशीः अपरिग्रहः एकाकी रहसि स्थितः योगी **कथम्** आत्मानं युञ्जीत ?	यतचित्तात्मा निराशीः अपरिग्रहः एकाकी रहसि स्थितः योगी **सततम्** आत्मानं युञ्जीत ।

तात्पर्यम् - योगी जनान्तरेण रहितः, वशीकृतचित्तः, तृष्णारहितः परिग्रहशून्यश्च सन् निर्जनप्रदेशे स्थित्वा मनः सततम् आत्मविषयकं कुर्यात्। मनः समाधिमग्नं कुर्यात्।

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्॥६.११॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये॥६.१२॥

पदच्छेदः - शुचौ, देशे, प्रतिष्ठाप्य, स्थिरम्, आसनम् आत्मनः।
न, अत्युच्छ्रितम्, न, अतिनीचम्, चैलाजिनकुशोत्तरम्॥
तत्र, एकाग्रम्, मनः, कृत्वा, यतचित्तेन्द्रियक्रियः।
उपविश्य, आसने, युञ्ज्यात्, योगम्, आत्मविशुद्धये॥

अन्वयः - यतचित्तेन्द्रियक्रियः शुचौ देशे स्थिरं न अत्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् आत्मनः आसनं प्रतिष्ठाप्य तत्र आसने उपविश्य मनः एकाग्रं कृत्वा आत्मविशुद्धये योगं युञ्ज्यात्।

पदार्थः - यतचित्तेन्द्रियक्रियः = नियतेन्द्रियव्यापारः, शुचौ = परिशुद्धे, देशे = स्थाने, स्थिरम् = अचलम्, न अत्युच्छ्रितम् = न अत्युन्नतम्, नातिनीचम् = न अतिनिम्नम्, चैलाजिनकुशोत्तरम् = वस्त्रकृष्णाजिनदर्भोत्तरम्, आत्मनः = स्वस्य, आसनम् = पीठम्, प्रतिष्ठाप्य = संस्थाप्य, तत्र = तस्मिन्, आसने = पीठे, उपविश्य = उपविश्य, मनः = चित्तम् (आत्मानम्), एकाग्रम् = संलग्नम्, कृत्वा = विधाय, आत्मविशुद्धये = अन्तःकरणस्य नैर्मल्याय, योगम् = समाधिम्, युञ्ज्यात् = युञ्जीत।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यतचित्ते-न्द्रियक्रियः	अ. पुं. प्र. एक. (विशेषणम्)	शुचौ	इ. पुं. स. एक. (विशेषणम्)

देशे	अ. पुं. स. एक. (विशेष्यम्)	स्थिरम्	अ. नपुं. द्वि. एक. (विशेषणम्)
न	अव्ययम्	अत्युच्छ्रितम्	अ. नपुं. द्वि. एक. (विशेषणम्)
नातिनीचम्	अ. नपुं. द्वि. एक. (विशेषणम्)	चैलाजिनकुशोत्तरम्	अ. नपुं. द्वि. एक. (विशेषणम्)
आत्मनः	आत्मन्- न. पुं. ष. एक.	आसनम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
प्रतिष्ठाप्य	ल्यबन्तम् अव्ययम्	तत्र	अव्ययम्
आसने	अ. नपुं. स. एक.	उपविश्य	ल्यबन्तम् अव्ययम्
मनः	मनस्- सका. नपुं. द्वि. एक. (विशेष्यम्)	एकाग्रम्	अ. नपुं. द्वि. एक. (विशेषणम्)
कृत्वा	क्त्वान्तम् अव्ययम्	आत्मविशुद्धये	इ. स्त्री. च. एक.
योगम्	अ. पुं. द्वि. एक.	युञ्ज्यात्	युज् (युजिर् योगे) पर. कर्तरि विधिलिङ्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः नात्युच्छ्रितम् — न + अत्युच्छ्रितम् — सवर्णदीर्घसन्धिः ।
नातिनीचम् — न + अतिनीचम् — सवर्णदीर्घसन्धिः ।
तत्रैकाग्रम् — तत्र + एकाग्रम् — वृद्धिसन्धिः ।
उपविश्यासने — उपविश्य + आसने — सवर्णदीर्घसन्धिः ।
युञ्ज्याद्योगम् — युञ्ज्यात् + योगम् — जश्त्वसन्धिः ।

(ख) समासः चैलाजिनकुशोत्तरम् — चैलं च अजिनं च चैलाजिने - द्वन्द्वः ।
कुशेभ्यः उत्तरं कुशोत्तरम् - पञ्चमीतत्पुरुषः ।
चैलाजिने कुशोत्तरे यस्मिन् तत् चैलाजिनकुशोत्तरम् - बहुव्रीहिः ।
एकाग्रम् — एकम् अग्रं यस्य तत् एकाग्रम् - बहुव्रीहिः ।
यतचित्तेन्द्रियक्रियः — चित्तं च इन्द्रियाणि च चित्तेन्द्रियाणि - द्वन्द्वः ।
चित्तेन्द्रियाणां क्रियाः चित्तेन्द्रियक्रियाः - षष्ठीतत्पुरुषः ।
यताः चित्तेन्द्रियक्रियाः येन सः यतचित्तेन्द्रियक्रियः - बहुव्रीहिः ।
आत्मविशुद्धये — आत्मनः विशुद्धिः आत्मविशुद्धिः, तस्यै - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः देशे — दिश् (दिश अतिसर्जने) + घञ्, तस्मिन् ।
प्रतिष्ठाप्य — प्रति + स्था (ष्ठा गतिनिवृत्तौ) + णिच् + ल्यप् ।
आसनम् — आस् (आस उपवेशने) + ल्युट् (अधिकरणे) ।
उच्छ्रितम् — उत् + श्रि (श्रिञ् सेवायाम्) + क्त (कर्तरि) ।

कृत्वा	कृ (डुकृञ् करणे) + क्त्वा।
उपविश्य	उप + विश् (विश प्रवेशने) + ल्यप्।
योगम्	युज् (युजिर् योगे) + घञ्, तम्।
विशुद्धये	वि + शुध् (शुध शौचे) + क्तिन्, तस्यै।

भावस्पष्टीकरणम् -

युञ्ज्यात्।	
कः युञ्ज्यात्?	**यतचित्तेन्द्रियक्रियः** युञ्ज्यात्।
यतचित्तेन्द्रियक्रियः **कं** युञ्ज्यात्?	यतचित्तेन्द्रियक्रियः **योगं** युञ्ज्यात्।
यतचित्तेन्द्रियक्रियः **किमर्थं** योगं युञ्ज्यात्?	यतचित्तेन्द्रियक्रियः **आत्मविशुद्धये** योगं युञ्ज्यात्।
यतचित्तेन्द्रियक्रियः **किं कृत्वा** आत्मविशुद्धये योगं युञ्ज्यात्?	यतचित्तेन्द्रियक्रियः **प्रतिष्ठाप्य** आत्मविशुद्धये योगं युञ्ज्यात्।
यतचित्तेन्द्रियक्रियः **किं** प्रतिष्ठाप्य आत्मविशुद्धये योगं युञ्ज्यात्?	यतचित्तेन्द्रियक्रियः **आसनं** प्रतिष्ठाप्य आत्मविशुद्धये योगं युञ्ज्यात्।
यतचित्तेन्द्रियक्रियः **कस्य** आसनं प्रतिष्ठाप्य आत्मविशुद्धये योगं युञ्ज्यात्?	यतचित्तेन्द्रियक्रियः **आत्मनः** आसनं प्रतिष्ठाप्य आत्मविशुद्धये योगं युञ्ज्यात्।
यतचित्तेन्द्रियक्रियः **कीदृशम्** आत्मनः आसनं प्रतिष्ठाप्य आत्मविशुद्धये योगं युञ्ज्यात्?	यतचित्तेन्द्रियक्रियः **स्थिरम्** आत्मनः आसनं प्रतिष्ठाप्य आत्मविशुद्धये योगं युञ्ज्यात्।
यतचित्तेन्द्रियक्रियः **कुत्र** स्थिरम् आत्मनः आसनं प्रतिष्ठाप्य आत्मविशुद्धये योगं युञ्ज्यात्?	यतचित्तेन्द्रियक्रियः **देशे** स्थिरम् आत्मनः आसनं प्रतिष्ठाप्य आत्मविशुद्धये योगं युञ्ज्यात्।
यतचित्तेन्द्रियक्रियः **कस्मिन्** देशे स्थिरम् आत्मनः आसनं प्रतिष्ठाप्य आत्मविशुद्धये योगं युञ्ज्यात्?	यतचित्तेन्द्रियक्रियः **शुचौ** देशे स्थिरम् आत्मनः आसनं प्रतिष्ठाप्य आत्मविशुद्धये योगं युञ्ज्यात्।
यतचित्तेन्द्रियक्रियः शुचौ देशे स्थिरं **पुनः कीदृशम्** आत्मनः आसनं प्रतिष्ठाप्य आत्मविशुद्धये योगं युञ्ज्यात्?	यतचित्तेन्द्रियक्रियः शुचौ देशे स्थिरं **न अत्युच्छ्रितम्** आत्मनः आसनं प्रतिष्ठाप्य आत्मविशुद्धये योगं युञ्ज्यात्।
यतचित्तेन्द्रियक्रियः शुचौ देशे स्थिरं न अत्युच्छ्रितं **पुनः कीदृशम्** आत्मनः आसनं प्रतिष्ठाप्य आत्मविशुद्धये योगं युञ्ज्यात्?	यतचित्तेन्द्रियक्रियः शुचौ देशे स्थिरं न अत्युच्छ्रितं **नातिनीचम्** आत्मनः आसनं प्रतिष्ठाप्य आत्मविशुद्धये योगं युञ्ज्यात्।

यतचित्तेन्द्रियक्रियः शुचौ देशे स्थिरं न अत्युच्छ्रितं नातिनीचं **पुनः कीदृशम्** आत्मनः आसनं प्रतिष्ठाप्य आत्मविशुद्धये योगं युञ्ज्यात् ?	यतचित्तेन्द्रियक्रियः शुचौ देशे स्थिरं न अत्युच्छ्रितं नातिनीचं **चैलाजिनकुशोत्तरम्** आत्मनः आसनं प्रतिष्ठाप्य आत्मविशुद्धये योगं युञ्ज्यात् ।
यतचित्तेन्द्रियक्रियः शुचौ देशे स्थिरं न अत्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् आत्मनः आसनं प्रतिष्ठाप्य **पुनः किं कृत्वा** आत्मविशुद्धये योगं युञ्ज्यात् ?	यतचित्तेन्द्रियक्रियः शुचौ देशे स्थिरं न अत्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् आत्मनः आसनं प्रतिष्ठाप्य **उपविश्य** आत्मविशुद्धये योगं युञ्ज्यात् ।
यतचित्तेन्द्रियक्रियः शुचौ देशे स्थिरं न अत्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् आत्मनः आसनं प्रतिष्ठाप्य **कुत्र** उपविश्य आत्मविशुद्धये योगं युञ्ज्यात् ?	यतचित्तेन्द्रियक्रियः शुचौ देशे स्थिरं न अत्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् आत्मनः आसनं प्रतिष्ठाप्य **तत्र** उपविश्य आत्मविशुद्धये योगं युञ्ज्यात् ।
यतचित्तेन्द्रियक्रियः शुचौ देशे स्थिरं न अत्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् आत्मनः आसनं प्रतिष्ठाप्य तत्र **कस्मिन्** उपविश्य आत्मविशुद्धये योगं युञ्ज्यात् ?	यतचित्तेन्द्रियक्रियः शुचौ देशे स्थिरं न अत्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् आत्मनः आसनं प्रतिष्ठाप्य तत्र **आसने** उपविश्य आत्मविशुद्धये योगं युञ्ज्यात् ।
यतचित्तेन्द्रियक्रियः शुचौ देशे स्थिरं न अत्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् आत्मनः आसनं प्रतिष्ठाप्य तत्र आसने उपविश्य **पुनः किं कृत्वा** आत्मविशुद्धये योगं युञ्ज्यात् ?	यतचित्तेन्द्रियक्रियः शुचौ देशे स्थिरं न अत्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् आत्मनः आसनं प्रतिष्ठाप्य तत्र आसने उपविश्य **मनः एकाग्रं कृत्वा** आत्मविशुद्धये योगं युञ्ज्यात् ।

तात्पर्यम् - शुद्धे स्थाने अधोभागे तादृशम् आसनं भवेत् यत् न अत्युन्नतं नापि अतिनीचम् । नियतेन्द्रियव्यापारः योगी तस्मिंश्च आसने कुशान् अजिनं मृदुवस्त्रं च क्रमेण प्रसार्य, तत्र उपविश्य अवधानेन मनःप्रभृतीनां सर्वेषाम् इन्द्रियाणां क्रियां नियन्त्र्य चित्तशुद्धये समाधिं कुर्यात् ।

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥६.१३॥
प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त असीत मत्परः ॥६.१४॥

पदच्छेदः - सम्म्, कायशिरोग्रीवम्, धारयन्, अचलम्, स्थिरः ।
सम्प्रेक्ष्य, नासिकाग्रम्, स्वम्, दिशः, च, अनवलोकयन् ॥

प्रशान्तात्मा, विगतभीः, ब्रह्मचारिव्रते, स्थितः ।
मनः, संयम्य, मच्चित्तः, युक्तः, असीत, मत्परः ॥

अन्वयः - कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः (भूत्वा) स्वं नासिकाग्रं सम्प्रेक्ष्य दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः (सन्) मनः संयम्य मच्चित्तः मत्परः युक्तः आसीत ।

पदार्थः - कायशिरोग्रीवम् = कटिशीर्षकण्ठम्, समम् = अवक्रम्, अचलम् = अकम्पम्, धारयन् = धरन्, स्थिरः = स्थिरः (भूत्वा), स्वम् = स्वकीयम्, नासिकाग्रम् = नासिकायाः अग्रभागम्, सम्प्रेक्ष्य = अवलोक्य, दिशः च = दिशः च, अनवलोकयन् = अपश्यन्, प्रशान्तात्मा = शान्तचित्तः, विगतभीः = अपगतभयः, ब्रह्मचारिव्रते = ब्रह्मचर्ये, स्थितः = वर्तमानः (सन्), मनः = चित्तम्, संयम्य = नियन्त्र्य, मच्चित्तः = मन्मनस्कः, मत्परः = आत्मपरायणः, युक्तः = समाहितः, आसीत = उपविशेत् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कायशिरोग्रीवम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	समम्	अ. नपुं. द्वि. एक. (विशेषणम्)
अचलम्	अ. नपुं. द्वि. एक. (विशेषणम्)	धारयन्	धारयत्- त. पुं. प्र. एक. (विशेषणम्)
स्थिरः	अ. पुं. प्र. एक. (विशेषणम्)	स्वम्	अ. सर्व. नपुं. द्वि. एक. (विशेषणम्)
नासिकाग्रम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	सम्प्रेक्ष्य	ल्यबन्तम् अव्ययम्
दिशः	दिश् - श. स्त्री. द्वि. बहु.	च	अव्ययम्
अनवलोकयन्	अनवलोकयत्- त. पुं. प्र. एक. (विशेषणम्)	प्रशान्तात्मा	प्रशान्तात्मन्- न. पुं. प्र. एक. (विशेषणम्)
विगतभीः	ई. पुं. प्र. एक. (विशेषणम्)	ब्रह्मचारिव्रते	अ. नपुं. स. एक.
स्थितः	अ. पुं. प्र. एक. (विशेषणम्)	मनः	मनस् - स. नपुं. द्वि. एक.
संयम्य	ल्यबन्तम् अव्ययम्	मच्चित्तः	अ. पुं. प्र. एक. (विशेषणम्)
मत्परः	अ. पुं. प्र. एक. (विशेषणम्)	युक्तः	अ. पुं. प्र. एक.
आसीत	आस् (आस उपवेशने) आत्म. कर्तरि विधिलिङ्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	धारयन्नचलम्	धारयन् + अचलम्	ङमुडागमसन्धिः ।
	दिशश्च	दिशः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
	चानवलोकयन्	च + अनवलोकयन्	सवर्णदीर्घसन्धिः ।
	मच्चित्तो युक्तः	मच्चित्तः + युक्तः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

	युक्त आसीत	युक्तः + आसीत विसर्गसन्धिः (लोपः)।
(ख) समासः	कायशिरोग्रीवम्	कायश्च शिरश्च ग्रीवा च एतेषां समाहारः कायशिरोग्रीवम्, तत् - द्वन्द्वः।
	अचलम्	न चलम् - नञ्तत्पुरुषः।
	नासिकाग्रम्	नासिकायाः अग्रं नासिकाग्रम् - षष्ठीतत्पुरुषः।
	अनवलोकयन्	न अवलोकयन् अनवलोकयन् - नञ्तत्पुरुषः।
	प्रशान्तात्मा	प्रशान्तः आत्मा यस्य सः प्रशान्तात्मा - बहुव्रीहिः।
	विगतभीः	विगता भीः यस्मात् सः विगतभीः - बहुव्रीहिः।
	ब्रह्मचारिव्रते	ब्रह्मचारिणः व्रतं ब्रह्मचारिव्रतम्, तस्मिन् - षष्ठीतत्पुरुषः।
	मच्चित्तः	मयि चित्तं यस्य सः मच्चित्तः - बहुव्रीहिः।
	मत्परः	मम परः - षष्ठीतत्पुरुषः।
(ग) कृदन्तः	धारयन्	धृ (धृञ् धारणे) + णिच् (प्रेरणार्थे) + शतृ।
	चलम्	चल् (चल कम्पने) + अच्, तम्।
	सम्प्रेक्ष्य	सम् + प्र + ईक्ष् (ईक्ष दर्शने) + ल्यप्।
	अवलोकयन्	अव + लोक् (लोकृ दर्शने) णिच् + शतृ।
	प्रशान्तः	प्र + शम् (शमु उपशमने) + क्त (कर्तरि)।
	विगतः	वि + गम् (गम्लृ गतौ) + क्त (कर्तरि)।
	स्थितः	स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि)।
	संयम्य	सम् + यम् (यम उपरमे) + ल्यप्।
	युक्तः	युज् (युजिर् योगे) + क्त (कर्तरि)।
	ब्रह्मचारी	ब्रह्म + चर् + णिनि (आवश्यके) (ब्रह्म ज्ञानं तपो वा आचरति अर्जयति अवश्यम्)।

भावस्पष्टीकरणम् -

आसीत।	
कः आसीत ?	**युक्तः** आसीत।
कीदृशः युक्तः आसीत ?	**मत्परः** युक्तः आसीत।
पुनः कीदृशः मत्परः युक्तः आसीत ?	**स्थिरः** मत्परः युक्तः आसीत।
किं कुर्वन् स्थिरः मत्परः युक्तः आसीत ?	**धारयन्** स्थिरः मत्परः युक्तः आसीत।
किं धारयन् स्थिरः मत्परः युक्तः आसीत ?	**कायशिरोग्रीवं** धारयन् स्थिरः मत्परः युक्तः आसीत।
कायशिरोग्रीवं **कथं** धारयन् स्थिरः मत्परः युक्तः आसीत ?	कायशिरोग्रीवं **समं** धारयन् स्थिरः मत्परः युक्तः आसीत।

कायशिरोग्रीवं समं **पुनः कथं** धारयन् स्थिरः मत्परः युक्तः आसीत ?	कायशिरोग्रीवं समम् **अचलं** धारयन् स्थिरः मत्परः युक्तः आसीत ।
कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः **(भूत्वा) पुनः कीदृशः** मत्परः युक्तः आसीत ?	कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः **(भूत्वा) विगतभीः** मत्परः युक्तः आसीत ।
कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः **कीदृशः** विगतभीः मत्परः युक्तः आसीत ?	कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः **प्रशान्तात्मा** विगतभीः मत्परः युक्तः आसीत ।
कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः **किं कुर्वन्** प्रशान्तात्मा विगतभीः मत्परः युक्तः आसीत ?	कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः **अनवलोकयन्** प्रशान्तात्मा विगतभीः मत्परः युक्तः आसीत ।
कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः **काः** अनवलोकयन् प्रशान्तात्मा विगतभीः मत्परः युक्तः आसीत ?	कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः **दिशः च** अनवलोकयन् प्रशान्तात्मा विगतभीः मत्परः युक्तः आसीत ।
कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः **किं कृत्वा** दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः मत्परः युक्तः आसीत ?	कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः **सम्प्रेक्ष्य** दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः मत्परः युक्तः आसीत ।
कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः **किं** सम्प्रेक्ष्य दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः मत्परः युक्तः आसीत ?	कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः **नासिकाग्रं** सम्प्रेक्ष्य दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः मत्परः युक्तः आसीत ?
कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः **कं** नासिकाग्रं सम्प्रेक्ष्य दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः मत्परः युक्तः आसीत ।	कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः **स्वं** नासिकाग्रं सम्प्रेक्ष्य दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः मत्परः युक्तः आसीत ।
कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः स्वं नासिकाग्रं सम्प्रेक्ष्य दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः **पुनः कीदृशः** मत्परः युक्तः आसीत ?	कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः स्वं नासिकाग्रं सम्प्रेक्ष्य दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः **स्थितः** मत्परः युक्तः आसीत ।

कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः स्वं नासिकाग्रं सम्प्रेक्ष्य दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः **कस्मिन्** स्थितः मत्परः युक्तः आसीत ?	कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः स्वं नासिकाग्रं सम्प्रेक्ष्य दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः **ब्रह्मचारिव्रते** स्थितः मत्परः युक्तः आसीत ।
कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः स्वं नासिकाग्रं सम्प्रेक्ष्य दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः (सन्) **पुनः कीदृशः** मत्परः युक्तः आसीत ?	कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः स्वं नासिकाग्रं सम्प्रेक्ष्य दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः (सन्) **मच्चित्तः** मत्परः युक्तः आसीत ।
कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः स्वं नासिकाग्रं सम्प्रेक्ष्य दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः **किं कृत्वा** मच्चित्तः मत्परः युक्तः आसीत ?	कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः स्वं नासिकाग्रं सम्प्रेक्ष्य दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः **संयम्य** मच्चित्तः मत्परः युक्तः आसीत ।
कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः स्वं नासिकाग्रं सम्प्रेक्ष्य दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः **किं** संयम्य मच्चित्तः मत्परः युक्तः आसीत ?	कायशिरोग्रीवं समम् अचलं धारयन् स्थिरः स्वं नासिकाग्रं सम्प्रेक्ष्य दिशः च अनवलोकयन् प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः **मनः** संयम्य मच्चित्तः मत्परः युक्तः आसीत ।

तात्पर्यम् - कटिं शिरः ग्रीवां च समं धारयन् निश्चलम् उपविशेत् । दिशः च अनवलोकयन् दृष्टिं नासिकाग्रे संस्थापयेत् । प्रशान्तात्मा, भयरहितः ब्रह्मचर्ये स्थितः मनः संनियन्त्र्य मयि एव दत्तचित्तः समाहितः सन् उपविशेत् ।

युञ्जन्नेवं सदात्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥६.१५॥

पदच्छेदः - युञ्जन्, एवम्, सदा, आत्मानम्, योगी, नियतमानसः ।
शान्तिम्, निर्वाणपरमाम्, मत्संस्थाम्, अधिगच्छति ॥

अन्वयः - नियतमानसः योगी एवं सदा आत्मानं युञ्जन् निर्वाणपरमां मत्संस्थां शान्तिम् अधिगच्छति ।

पदार्थः - नियतमानसः = निगृहीतचित्तः, योगी = युक्तः, एवम् = इत्थम्, सदा = सर्वदा, आत्मानम् = स्वम्, युञ्जन् = योजयन्, निर्वाणपरमाम् = मोक्षमुख्याम्, मत्संस्थाम् = मयि स्थिताम्, शान्तिम् = संसारोपरतिम्, अधिगच्छति = प्राप्नोति ।

पदपरिचयः -

पदम्	**विवरणम्**	**पदम्**	**विवरणम्**
नियतमानसः	अ. पुं. प्र. एक. (विशेषणम्)	योगी	योगिन्- न. पुं. प्र. एक. (विशेष्यम्)
एवम्	अव्ययम्	सदा	अव्ययम्
आत्मानम्	आत्मन् - न. पुं. द्वि. एक.	युञ्जन्	युञ्जत्- त. पुं. प्र. एक. (विशेषणम्)
निर्वाणपरमाम्	आ. स्त्री. द्वि. एक. (विशेषणम्)	मत्संस्थाम्	आ. स्त्री. द्वि. एक. (विशेषणम्)
शान्तिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)	अधिगच्छति	अधि + गम् (गम्लृ गतौ) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	युञ्जन्नेवम्	युञ्जन् + एवम्	ङमुडागमसन्धिः ।
	सदात्मानम्	सदा + आत्मानम्	सवर्णदीर्घसन्धिः ।
(ख) समासः	नियतमानसः	नियतं मानसं येन सः नियतमानसः - बहुव्रीहिः ।	
	निर्वाणपरमाम्	निर्वाणं परमं यस्याः सा निर्वाणपरमा, ताम् - बहुव्रीहिः ।	
	मत्संस्थाम्	मयि संस्था यस्याः सा मत्संस्था, ताम् - बहुव्रीहिः ।	
(ग) कृदन्तः	युञ्जन्	युज् (युजिर् योगे) + शतृ ।	
	नियतम्	नि + यम् (यम उपरमे) + क्त (कर्तरि) ।	
	शान्तिम्	शम् (शमु उपशमने) + क्तिन्, ताम् ।	
	निर्वाणम्	निर् + वा (वा गतिगन्धनयोः) + क्त (कर्तरि), तम् ।	
(घ) तद्धितान्तः	योगी	योग + इनि (मतुबर्थे) (योगः अस्य अस्मिन् वा अस्ति) ।	

भावस्पष्टीकरणम् -

अधिगच्छति ।	
काम् अधिगच्छति ?	**शान्तिम्** अधिगच्छति ।
कीदृशीं शान्तिम् अधिगच्छति ?	**मत्संस्थां** शान्तिम् अधिगच्छति ।
पुनः **कीदृशीं** मत्संस्थां शान्तिम् अधिगच्छति ?	**निर्वाणपरमां** मत्संस्थां शान्तिम् अधिगच्छति ।
किं कुर्वन् निर्वाणपरमां मत्संस्थां शान्तिम् अधिगच्छति ?	**युञ्जन्** निर्वाणपरमां मत्संस्थां शान्तिम् अधिगच्छति ।

कं युञ्जन् निर्वाणपरमां मत्संस्थां शान्तिम् अधिगच्छति ?	**आत्मानं** युञ्जन् निर्वाणपरमां मत्संस्थां शान्तिम् अधिगच्छति।
कदा आत्मानं युञ्जन् निर्वाणपरमां मत्संस्थां शान्तिम् अधिगच्छति ?	**एवं सदा** आत्मानं युञ्जन् निर्वाणपरमां मत्संस्थां शान्तिम् अधिगच्छति।
कः एवं सदा आत्मानं युञ्जन् निर्वाणपरमां मत्संस्थां शान्तिम् अधिगच्छति ?	**योगी** एवं सदा आत्मानं युञ्जन् निर्वाणपरमां मत्संस्थां शान्तिम् अधिगच्छति।
कीदृशः योगी एवं सदा आत्मानं युञ्जन् निर्वाणपरमां मत्संस्थां शान्तिम् अधिगच्छति ?	**नियतमानसः** योगी एवं सदा आत्मानं युञ्जन् निर्वाणपरमां मत्संस्थां शान्तिम् अधिगच्छति।

तात्पर्यम् - अनेन प्रकारेण निगृहीतमानसः (जितेन्द्रियः) सन् यः आत्मानं ध्यायेत् सः परमानन्दरूपं मयि स्थितं परमशान्तिरूपं मोक्षं प्राप्नोति।

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन॥६.१६॥

पदच्छेदः - न, अति, अश्नतः, तु, योगः, अस्ति, न, च, एकान्तम्, अनश्नतः।
न, च, अति, स्वप्नशीलस्य, जाग्रतः, न, एव, च, अर्जुन॥

अन्वयः - अर्जुन! अति अश्नतः तु योगः न अस्ति। एकान्तम् अनश्नतः च न। अति स्वप्नशीलस्य च न। जाग्रतः च न एव।

पदार्थः - अर्जुन = हे अर्जुन, अति अश्नतः तु = अत्यधिकं भोजनं कुर्वतः , योगः = समाधिः, न अस्ति = न विद्यते, एकान्तम् = सर्वथा, अनश्नतः च = भोजनम् अकुर्वतः अपि, न = न, अति स्वप्नशीलस्य च = अतीव निद्रालोः अपि, न = न विद्यते, जाग्रतः च = निद्राविहीनस्य अपि, न एव = नैव विद्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुन	अ. पुं. सम्बो. एक.	अति	अव्ययम्
अश्नतः	अश्नत्- त. पुं. ष. एक. (विशेषणम्)	तु	अव्ययम्
योगः	अ. पुं. प्र. एक.	न	अव्ययम्
अस्ति	अस् (अस भुवि) पर. कर्तरि लट्. प्रपु. एक.	एकान्तम्	अव्ययम्

अनश्नतः	अनश्नत्- त. पुं. ष. एक. (विशेषणम्)	च	अव्ययम्
स्वप्नशीलस्य	अ. पुं. ष. एक. (विशेषणम्)	जाग्रतः	जाग्रत्- त. पुं. ष. एक. (विशेषणम्)
एव	अव्ययम्		

व्याकरणम् -

(क) सन्धिः	नाति	न + अति	सवर्णदीर्घसन्धिः।
	अत्यश्नतः	अति + अश्नतः	यण्सन्धिः।
	अश्नतस्तु	अश्नतः + तु	विसर्गसन्धिः (सकारः)।
	योगोऽस्ति	योगः + अस्ति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	चैकान्तम्	च + एकान्तम्	वृद्धिसन्धिः।
	जाग्रतो न	जाग्रतः + न	विसर्गसन्धिः (सकारः) रेफः, उकारः गुणः।
	नैव	न + एव	वृद्धिसन्धिः।
	चार्जुन	च + अर्जुन	सवर्णदीर्घसन्धिः।
(ख) समासः	अनश्नतः	न अश्नन् अनश्नन्, तस्य - नञ्तत्पुरुषः।	
	स्वप्नशीलस्य	स्वप्नः शीलं यस्य सः स्वप्नशीलः, तस्य - बहुव्रीहिः।	
(ग) कृदन्तः	अश्नतः	अश् (अश भोजने) + शतृ, तस्य।	
	योगः	युज् (युजिर् योगे) + घञ्।	
	शीलस्य	शील् (शील उपधारणे) + अच्, तस्य।	
	जाग्रतः	जागृ (जागृ निद्राक्षये) + शतृ, तस्य।	

भावस्पष्टीकरणम् -

न अस्ति।	
कः न अस्ति ?	**योगः** न अस्ति।
कस्य योगः न अस्ति ?	**अति अश्नतः** तु योगः न अस्ति।
अति अश्नतः तु योगः न अस्ति **(पुनः) कस्य न** ?	अति अश्नतः तु योगः न अस्ति **अनश्नतः** च न।
अति अश्नतः तु योगः न अस्ति **कथम्** अनश्नतः च न ?	अति अश्नतः तु योगः न अस्ति **एकान्तम्** अनश्नतः च न।
अति अश्नतः तु योगः न अस्ति एकान्तम् अनश्नतः च न **(पुनः) कस्य न** ?	अति अश्नतः तु योगः न अस्ति एकान्तम् अनश्नतः च न **अति स्वप्नशीलस्य च न**।

अति अश्नतः तु योगः न अस्ति एकान्तम् अनश्नतः च न अति स्वप्नशीलस्य च न (पुनः) **कस्य न** ?	अति अश्नतः तु योगः न अस्ति एकान्तम् अनश्नतः च न अति स्वप्नशीलस्य च न **जाग्रतः च न एव** ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अर्जुन** !

तात्पर्यम् - यः अधिकं भोजनं करोति, यश्च भोजनमेव न करोति तयोः समाधिः न सम्भवति । एवं यः अत्यन्तं निद्राति, यश्च अत्यन्तं जागर्ति तयोरपि समाधिः न सम्भवति ।

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥६.१७॥

पदच्छेदः - युक्ताहारविहारस्य, युक्तचेष्टस्य, कर्मसु ।
युक्तस्वप्नावबोधस्य, योगः, भवति, दुःखहा ॥

अन्वयः - युक्ताहारविहारस्य कर्मसु युक्तचेष्टस्य युक्तस्वप्नावबोधस्य योगः दुःखहा भवति ।

पदार्थः - युक्ताहारविहारस्य = समुचिताहारसञ्चारस्य, कर्मसु = कार्येषु, युक्तचेष्टस्य = समुचितव्यापारस्य, युक्तस्वप्नावबोधस्य = समुचितनिद्राजागरणस्य, योगः = समाधिः, दुःखहा = दुःखनाशकः, भवति = सम्पद्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
युक्ताहारविहारस्य	अ. पुं. ष. एक. (विशेषणम्)	कर्मसु	कर्मन्- न. नपुं. स. बहु.
युक्तचेष्टस्य	अ. पुं. ष. एक. (विशेषणम्)	युक्तस्वप्नावबोधस्य	अ. पुं. ष. एक. (विशेषणम्)
योगः	अ. पुं. प्र. एक. (विशेष्यम्)	दुःखहा	दुःखहन् - न. पुं. प्र. एक. (विशेषणम्)
भवति	भू (भू सत्तायाम्) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः योगो भवति — योगः + भवति विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) समासः युक्ताहारविहारस्य — आहारश्च विहारश्च आहारविहारौ - द्वन्द्वः ।
युक्तौ आहारविहारौ यस्य सः युक्ताहारविहारः, तस्य - बहुव्रीहिः ।

युक्तचेष्टस्य — युक्ता चेष्टा यस्य सः युक्तचेष्टः, तस्य - बहुव्रीहिः ।

	युक्तस्वप्नावबोधस्य	स्वप्नः च अवबोधः च स्वप्नावबोधौ - द्वन्द्व। युक्तौ स्वप्नावबोधौ यस्य सः युक्तस्वप्नावबोधः, तस्य - बहुव्रीहिः।
	दुःखहा	दुःखं हन्ति इति दुःखहा - कर्तरि क्विप् उपपदसमासश्च।
(ग) कृदन्तः	युक्तः	युज् (युज समाधौ) + क्त (कर्तरि)।
	आहारः	आ + हृ (हृञ् हरणे) + घञ्।
	विहारः	वि + हृ (हृञ् हरणे) + घञ्।
	चेष्टः	चेष्ट् (चेष्ट चेष्टायाम्) + क्त (कर्तरि)।
	अवबोधः	अव + बुध् (बुध अवबोधने) + घञ्।
	योगः	युज् (युजिर् योगे) + घञ्।

भावस्पष्टीकरणम् -

भवति।	
कः भवति ?	**योगः** भवति।
योगः **कीदृशः** भवति ?	योगः **दुःखहा** भवति।
कस्य योगः दुःखहा भवति ?	**युक्ताहारविहारस्य** योगः दुःखहा भवति।
युक्ताहारविहारस्य **पुनः कस्य** योगः दुःखहा भवति ?	युक्ताहारविहारस्य **युक्तचेष्टस्य** योगः दुःखहा भवति।
युक्ताहारविहारस्य **केषु** युक्तचेष्टस्य योगः दुःखहा भवति ?	युक्ताहारविहारस्य **कर्मसु** युक्तचेष्टस्य योगः दुःखहा भवति।
युक्ताहारविहारस्य कर्मसु युक्तचेष्टस्य **पुनः कस्य** योगः दुःखहा भवति ?	युक्ताहारविहारस्य कर्मसु युक्तचेष्टस्य **युक्तस्वप्नावबोधस्य** योगः दुःखहा भवति।

तात्पर्यम् - यः यथाकालं परिमितमेव अश्नाति तथा सञ्चरति, यः धर्मसम्मते कार्ये यथाकालं व्यापृतो भवति, यः यथाकालं निद्राति तथा जागर्ति तस्य पुरुषस्य समाधिः अवश्यं दुःखनाशको भवति।

यदा विनियतं चित्तमात्मन्येवावतिष्ठते।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा॥६.१८॥

पदच्छेदः - यदा, विनियतम्, चित्तम्, आत्मनि, एव, अवतिष्ठते।
निःस्पृहः, सर्वकामेभ्यः, युक्तः, इति, उच्यते, तदा॥

अन्वयः - यदा विनियतं चित्तम् आत्मनि एव अवतिष्ठते सर्वकामेभ्यः निःस्पृहः तदा युक्तः इति उच्यते।

पदार्थः - यदा = यस्मिन् काले, विनियतम् = विशेषेण निरुद्धम्, चित्तम् = मनः, आत्मनि एव = आत्मनि (स्वस्मिन्) एव, अवतिष्ठते = विद्यते, सर्वकामेभ्यः = सकलवाञ्छितेभ्यः, निःस्पृहः = निरीहः, तदा = तस्मिन् काले, युक्तः इति = योगी इति, उच्यते = कथ्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यदा	अव्ययम्	विनियतम्	अ. नपुं. द्वि. एक. (विशेषणम्)
चित्तम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	आत्मनि	आत्मन्- न. पुं. स. एक.
एव	अव्ययम्	अवतिष्ठते	अव + स्था (ष्ठा गतिनिवृत्तौ) आत्म. कर्तरि लट्. प्रपु. एक.
सर्वकामेभ्यः	अ. पुं. पं. बहु.	निःस्पृहः	अ. पुं. प्र. एक. (विशेषणम्)
तदा	अव्ययम्	युक्तः	अ. पुं. प्र. एक. (विशेषणम्)
इति	अव्ययम्	उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्र. पु. एक.

व्याकरणम् -

(क) सन्धिः	आत्मन्येव	आत्मनि + एव	यण्सन्धिः।
	एवावतिष्ठते	एव + अवतिष्ठते	सवर्णदीर्घसन्धिः।
	सर्वकामेभ्यो युक्तः	सर्वकामेभ्यः + युक्तः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	युक्त इति	युक्तः + इत्युच्यते	विसर्गसन्धिः (लोपः)।
	इत्युच्यते	इति + उच्यते	यण्सन्धिः।
(ख) समासः	निःस्पृहः	निर्गता स्पृहा यस्मात् सः निःस्पृहः - बहुव्रीहिः।	
	सर्वकामेभ्यः	सर्वे कामाः सर्वकामाः, तेभ्यः - कर्मधारयः।	
(ग) कृदन्तः	विनियतम्	वि + नि + यम् (यम उपरमे) + क्त (कर्मणि)।	
	चित्तम्	चित् (चित सञ्चेतने) + क्त (कर्तरि)।	
	युक्तः	युज् (युजिर् योगे) + क्त (कर्तरि)।	

भावस्पष्टीकरणम् -

अवतिष्ठते।	
किम् अवतिष्ठते ?	**चित्तम्** अवतिष्ठते।
कीदृशं चित्तम् अवतिष्ठते ?	**विनियतं** चित्तम् अवतिष्ठते।
विनियतं चित्तं **कुत्र** अवतिष्ठते ?	विनियतं चित्तम् **आत्मनि एव** अवतिष्ठते।

कदा विनियतं चित्तम् आत्मनि एव अवतिष्ठते ?	**यदा** विनियतं चित्तम् आत्मनि एव अवतिष्ठते।
यदा विनियतं चित्तम् आत्मनि एव अवतिष्ठते **तदा किं भवति** ?	यदा विनियतं चित्तम् आत्मनि एव अवतिष्ठते **तदा उच्यते**।
यदा विनियतं चित्तम् आत्मनि एव अवतिष्ठते तदा **कः** उच्यते ?	यदा विनियतं चित्तम् आत्मनि एव अवतिष्ठते तदा **युक्तः इति** उच्यते।
यदा विनियतं चित्तम् आत्मनि एव अवतिष्ठते **कीदृशः** तदा युक्तः इति उच्यते ?	यदा विनियतं चित्तम् आत्मनि एव अवतिष्ठते **निःस्पृहः** तदा युक्तः इति उच्यते।
यदा विनियतं चित्तम् आत्मनि एव अवतिष्ठते **केभ्यः** निःस्पृहः तदा युक्तः इति उच्यते ?	यदा विनियतं चित्तम् आत्मनि एव अवतिष्ठते **सर्वकामेभ्यः** निःस्पृहः तदा युक्तः इति उच्यते।

तात्पर्यम् - एकाग्रताम् आपन्नं चित्तं यदा विषयानुसन्धानं परित्यज्य आत्मनि एव तिष्ठति (परमात्मनि स्थिरीभवति) तदा सः जनः सर्वकामेषु निःस्पृहत्वात् युक्तः (योगी) इति उच्यते।

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥६.१९॥

पदच्छेदः - यथा, दीपः, निवातस्थः, न, इङ्गते, सा, उपमा, स्मृता।
योगिनः, यतचित्तस्य, युञ्जतः,योगम्, आत्मनः॥

अन्वयः - यथा निवातस्थः दीपः न इङ्गते (तथा) आत्मनः योगं युञ्जतः यतचित्तस्य योगिनः सा उपमा स्मृता।

पदार्थः - यथा = येन प्रकारेण, निवातस्थः = वायुरहितदेशस्थः, दीपः = दीपः, न इङ्गते = न चलति (चञ्चलः न भवति), सा = असौ, आत्मनः = स्वस्य, योगम् = समाधिम्, युञ्जतः = अनुतिष्ठतः, यतचित्तस्य = वशीकृतमनसः, योगिनः = युक्तस्य, उपमा = उपमा इति, स्मृता = कथिता।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यथा	अव्ययम्	निवातस्थः	अ. पुं. प्र. एक. (विशेषणम्)
दीपः	अ. पुं. प्र. एक. (विशेष्यम्)	न	अव्ययम्
इङ्गते (इङ्गति)[1]	इग् (इगि गतौ) आत्मने. कर्तरि लट्. प्रपु. एक.	सा	तद्- द. सर्व. स्त्री. प्र. एक. (विशेषणम्)
आत्मनः	आत्मन्- न. पुं. ष. एक.	योगम्	अ. पुं. द्वि. एक.

युञ्जतः	युञ्जत्- त. पुं. ष. एक. (विशेषणम्)	यतचित्तस्य	अ. पुं. ष. एक. (विशेषणम्)
योगिनः	योगिन्- न. पुं. ष. एक. (विशेष्यम्)	उपमा	आ. स्त्री. प्र. एक. (विशेष्यम्)
स्मृता	आ. स्त्री. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः

दीपो निवातस्थः	दीपः + निवातस्थः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
निवातस्थो न	निवातस्थः + न	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
नेङ्गते	न + इङ्गते	गुणसन्धिः।
सोपमा	सा + उपमा	गुणसन्धिः।
योगिनो यतचित्तस्य	योगिनः + यतचित्तस्य	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
युञ्जतो योगम्	युञ्जतः + योगम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।

(ख) समासः

निवातस्थः — निर्गतः वातः यस्मात् सः निवातः - बहुव्रीहिः।
निवाते तिष्ठति इति निवातस्थः - कर्तरि कप्रत्ययः उपपदसमासश्च।

यतचित्तस्य — यतं चित्तं यस्य सः यतचित्तः, तस्य - बहुव्रीहिः।

(ग) कृदन्तः

दीपः	दीप् (दीपी दीप्तौ) + णिच् + अच्।
स्मृता	स्मृ (स्मृ चिन्तायाम्) + क्त (कर्मणि) + टाप् (स्त्रीत्वे)।
चित्तस्य	चित् (चित सञ्चेतने) + क्त (कर्तरि), तस्य।
युञ्जतः	युज् (युजिर् योगे) + शतृ, तस्य।
योगम्	युज् (युजिर् योगे) + घञ्, तम्।

(घ) तद्धितान्तः योगिनः — योग + इनि (मतुबर्थे) (योगः अस्य अस्मिन् वा अस्ति), तस्य।

भावस्पष्टीकरणम् -

स्मृता।	
का स्मृता ?	**उपमा** स्मृता।
का उपमा स्मृता ?	**सा** उपमा स्मृता।
कीदृशी सा उपमा स्मृता ?	**यथा निवातस्थः दीपः न इङ्गते (इति तादृशी)** सा उपमा स्मृता।
यथा निवातस्थः दीपः न इङ्गते (इति तादृशी) सा **कस्य** उपमा स्मृता ?	यथा निवातस्थः दीपः न इङ्गते (इति तादृशी) सा **योगिनः** उपमा स्मृता।

1. यद्यपि अयं धातुः परस्मैपदी अस्ति किन्तु अत्र 'इङ्गते' इति आत्मनेपदित्वेन आर्षप्रयोगः।

यथा निवातस्थः दीपः न इङ्गते (इति तादृशी) सा **कीदृशस्य** योगिनः उपमा स्मृता ?	यथा निवातस्थः दीपः न इङ्गते (इति तादृशी) सा **यतचित्तस्य** योगिनः उपमा स्मृता ।
यथा निवातस्थः दीपः न इङ्गते (इति तादृशी) सा **किं कुर्वतः** यतचित्तस्य योगिनः उपमा स्मृता ?	यथा निवातस्थः दीपः न इङ्गते (इति तादृशी) सा **युञ्जतः** यतचित्तस्य योगिनः उपमा स्मृता ।
यथा निवातस्थः दीपः न इङ्गते (इति तादृशी) सा **किं** युञ्जतः यतचित्तस्य योगिनः उपमा स्मृता ?	यथा निवातस्थः दीपः न इङ्गते (इति तादृशी) सा **योगं** युञ्जतः यतचित्तस्य योगिनः उपमा स्मृता ।
यथा निवातस्थः दीपः न इङ्गते (इति तादृशी) सा **कस्य** योगं युञ्जतः यतचित्तस्य योगिनः उपमा स्मृता ?	यथा निवातस्थः दीपः न इङ्गते (इति तादृशी) सा **आत्मनः** योगं युञ्जतः यतचित्तस्य योगिनः उपमा स्मृता ।

तात्पर्यम् - यथा वायुविरहिते स्थाने वर्तमानः दीपः न चलति (चञ्चलः न भवति) तथा नियतान्तःकरणस्य योगम् आचरतः ध्यानमग्नस्य योगिनः चित्तमपि निष्कम्पं तिष्ठति। अतः सः दीपः तादृशचित्तस्य उपमा भवितुमर्हति ।

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥६.२०॥

पदच्छेदः - यत्र, उपरमते, चित्तम्, निरुद्धम्, योगसेवया ।
यत्र, च, एव, आत्मना, आत्मानम्, पश्यन्, आत्मनि, तुष्यति ॥

अन्वयः - यत्र योगसेवया निरुद्धं चित्तम् उपरमते, यत्र च एव आत्मना आत्मानं पश्यन् आत्मनि तुष्यति ।

पदार्थः - यत्र = यस्मिन् अवस्थाविशेषे, योगसेवया = योगाभ्यासेन, निरुद्धम् = विषयेभ्यः विमुखीकृतम्, चित्तम् = मनः, उपरमते = विरमति, यत्र च एव = यस्मिन् च अवस्थाविशेषे, आत्मना = मनसा, आत्मानम् = आत्मानम्, पश्यन् = अवलोकयन्, आत्मनि = स्वस्मिन्, तुष्यति = सन्तुष्यति ....।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यत्र	अव्ययम्	योगसेवया	आ. स्त्री. तृ. एक.
निरुद्धम्	अ. नपुं. प्र. एक. (विशेषणम्)	चित्तम्	अ. नपुं. प्र. एक. (विशेष्यम्)
उपरमते	उप + रम् (रमु क्रीडायाम्) आत्म. कर्तरि लट्. प्रपु. एक.	च	अव्ययम्

एव	अव्ययम्	आत्मना	आत्मन्- न. पुं. तृ. एक.
आत्मानम्	आत्मन्- न. पुं. द्वि. एक.	पश्यन्	पश्यत्- त. पुं. प्र. एक. (विशेषणम्)
आत्मनि	आत्मन्- न. पुं. स. एक.	तुष्यति	तुष् (तुष प्रीतौ) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	यत्रोपरमते	यत्र + उपरमते	गुणसन्धिः ।
	चैव	च + एव	वृद्धिसन्धिः ।
	एवात्मना	एव + आत्मना	सवर्णदीर्घसन्धिः ।
	आत्मनात्मानम्	आत्मना + आत्मानम्	सवर्णदीर्घसन्धिः ।
	पश्यन्नात्मनि	पश्यन् + आत्मनि	ङमुडागमसन्धिः ।
(ख) समासः	योगसेवया	योगस्य सेवा योगसेवा, तया - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	चित्तम्	चित् (चित सञ्चेतने) + क्त (कर्तरि) ।	
	निरुद्धम्	नि + रुध् (रुधिर् आवरणे) + क्त (कर्मणि) ।	
	योगः	युज् (युजिर् योगे) + घञ् ।	
	पश्यन्	दृश् (दृशिर् प्रेक्षणे) + शतृ ।	

भावस्पष्टीकरणम् -

उपरमते ।	
किम् उपरमते ?	**चित्तम्** उपरमते ।
कीदृशं चित्तम् उपरमते ?	**निरुद्धं** चित्तम् उपरमते ।
कया निरुद्धं चित्तम् उपरमते ?	**योगसेवया** निरुद्धं चित्तम् उपरमते ।
कुत्र योगसेवया निरुद्धं चित्तम् उपरमते ?	**यत्र** योगसेवया निरुद्धं चित्तम् उपरमते ।
यत्र योगसेवया निरुद्धं चित्तम् उपरमते, **पुनश्च किं भवति** ?	यत्र योगसेवया निरुद्धं चित्तम् उपरमते, **(पुनश्च) तुष्यति** ।
यत्र योगसेवया निरुद्धं चित्तम् उपरमते, **कुत्र** तुष्यति ?	यत्र योगसेवया निरुद्धं चित्तम् उपरमते, **आत्मनि** तुष्यति ।
यत्र योगसेवया निरुद्धं चित्तम् उपरमते, **किं कुर्वन्** आत्मनि तुष्यति ?	यत्र योगसेवया निरुद्धं चित्तम् उपरमते, **पश्यन्** आत्मनि तुष्यति ।

यत्र योगसेवया निरुद्धं चित्तम् उपरमते, **कं** पश्यन् आत्मनि तुष्यति ?	यत्र योगसेवया निरुद्धं चित्तम् उपरमते, **आत्मानं** पश्यन् आत्मनि तुष्यति।
यत्र योगसेवया निरुद्धं चित्तम् उपरमते, **केन** आत्मानं पश्यन् आत्मनि तुष्यति ?	यत्र योगसेवया निरुद्धं चित्तम् उपरमते, **आत्मना** आत्मानं पश्यन् आत्मनि तुष्यति।
यत्र योगसेवया निरुद्धं चित्तम् उपरमते, **कुत्र** आत्मना आत्मानं पश्यन् आत्मनि तुष्यति ?	यत्र योगसेवया निरुद्धं चित्तम् उपरमते, **यत्र च एव** आत्मना आत्मानं पश्यन् आत्मनि तुष्यति।

तात्पर्यम् - यस्मिन् अवस्थाविशेषे योगानुष्ठानेन निरुद्धं चेतः उपरतिं प्राप्नोति, यस्मिन् च अवस्था-विशेषे आत्मना आत्मानं पश्यन्, आत्मनि एव सन्तुष्टः भवति (तं योगसंज्ञितं विद्यात्)।

सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यमतीन्द्रियम्।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥६.२१॥

पदच्छेदः - सुखम्, आत्यन्तिकम्, यत्, तत्, बुद्धिग्राह्यम्, अतीन्द्रियम्।
वेत्ति, यत्र, न, च, एव, अयम्, स्थितः, चलति, तत्त्वतः ॥

अन्वयः - अतीन्द्रियं बुद्धिग्राह्यं यत् आत्यन्तिकं सुखं तत् यत्र वेत्ति च स्थितः अयं तत्त्वतः न एव चलति।

पदार्थः - अतीन्द्रियम् = इन्द्रियागोचरम्, बुद्धिग्राह्यम् = मतिबोध्यम्, यत् = यत्, आत्यन्तिकम् = अनिर्वचनीयम्, सुखम् = आनन्दम्, तत् = तत्, यत्र = यस्मिन् अवस्थाविषये, वेत्ति = जानाति, च = च, स्थितः = यस्मिन् च अवस्थाविशेषे वर्तमानः, अयम् = अयं पुरुषः, तत्त्वतः = स्वरूपतः, न एव चलति = न विचलति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अतीन्द्रियम्	अव्ययम्	बुद्धिग्राह्यम्	अ. नपुं. द्वि. एक. (विशेषणम्)
यत्	यद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	आत्यन्तिकम्	अ. नपुं. प्र. एक. (विशेषणम्)
सुखम्	अ. नपुं. प्र. एक. (विशेष्यम्)	तत्	तद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
यत्र	अव्ययम्	वेत्ति	विद् (विद ज्ञाने) पर. कर्तरि लट्. प्रपु. एक.
च	अव्ययम्	स्थितः	अ. पुं. प्र. एक. (विशेषणम्)
अयम्	इदम्- म. सर्व. पुं. प्र. एक. (विशेषणम्)	तत्त्वतः	अव्ययम्

न	अव्ययम्	एव	अव्ययम्
चलति	चल् (चल कम्पने) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	तद् बुद्धिग्राह्यम्	तत् + बुद्धिग्राह्यम्	जश्त्वसन्धिः ।
	चैव	च + एव	वृद्धिसन्धिः ।
	एवायम्	एव + अयम्	सवर्णदीर्घसन्धिः ।
	स्थितश्चलति	स्थितः + चलति	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
(ख) समासः	बुद्धिग्राह्यम्	बुद्ध्या ग्राह्यम् बुद्धिग्राह्यम् - तृतीयातत्पुरुषः ।	
	अतीन्द्रियम्	इन्द्रियम् अतिक्रान्तम् - अव्ययीभावः ।	
(ग) कृदन्तः	बुद्धिः	बुध् (बुध अवबोधने) + क्तिन् ।	
	ग्राह्यम्	ग्रह् (ग्रह उपादाने) + ण्यत् (कर्मणि) ।	
	स्थितः	स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि) ।	
(घ) तद्धितान्तः	आत्यन्तिकम्	अत्यन्त + ठञ् (भावार्थे) ।	
	तत्त्वतः	तत्त्व + तसिल् ।	

भावस्पष्टीकरणम् -

वेत्ति ।	
किं वेत्ति ?	**तत्** वेत्ति ।
किं तत् वेत्ति ?	**यत् आत्यन्तिकं सुखं तत्** वेत्ति ।
कीदृशं यत् आत्यन्तिकं सुखं तत् वेत्ति ?	**बुद्धिग्राह्यं** यत् आत्यन्तिकं सुखं तत् यत्र वेत्ति ।
पुनश्च कीदृशं बुद्धिग्राह्यं यत् आत्यन्तिकं सुखं तत् वेत्ति ?	**अतीन्द्रियं** बुद्धिग्राह्यं यत् आत्यन्तिकं सुखं तत् वेत्ति ।
अतीन्द्रियं बुद्धिग्राह्यं यत् आत्यन्तिकं सुखं तत् **कुत्र** वेत्ति ?	अतीन्द्रियं बुद्धिग्राह्यं यत् आत्यन्तिकं सुखं तत् **यत्र** वेत्ति ।
अतीन्द्रियं बुद्धिग्राह्यं यत् आत्यन्तिकं सुखं तत् यत्र वेत्ति (तत्र) **किं न भवति ?**	अतीन्द्रियं बुद्धिग्राह्यं यत् आत्यन्तिकं सुखं तत् यत्र वेत्ति (तत्र) **न एव चलति ।**
अतीन्द्रियं बुद्धिग्राह्यं यत् आत्यन्तिकं सुखं तत् यत्र वेत्ति (तत्र) **कथं** न एव चलति ?	अतीन्द्रियं बुद्धिग्राह्यं यत् आत्यन्तिकं सुखं तत् यत्र वेत्ति (तत्र) **तत्त्वतः** न एव चलति ।

अतीन्द्रियं बुद्धिग्राह्यं यत् आत्यन्तिकं सुखं तत् यत्र वेत्ति (तत्र) **कः** तत्त्वतः न एव चलति ?	अतीन्द्रियं बुद्धिग्राह्यं यत् आत्यन्तिकं सुखं तत् यत्र वेत्ति (तत्र) **अयं** तत्त्वतः न एव चलति ।
अतीन्द्रियं बुद्धिग्राह्यं यत् आत्यन्तिकं सुखं तत् यत्र वेत्ति (तत्र) **कीदृशः** अयं तत्त्वतः न एव चलति ?	अतीन्द्रियं बुद्धिग्राह्यं यत् आत्यन्तिकं सुखं तत् यत्र वेत्ति (तत्र) **स्थितः च** अयं तत्त्वतः न एव चलति ।

तात्पर्यम् - यस्मिन् अवस्थाविशेषे अनिर्वचनीयम्, अनन्तं, बुद्ध्या एव ग्राह्यम्, इन्द्रियैः ग्रहीतुम् अशक्यं सुखं वेत्ति, यत्र च अवस्थाविशेषे तस्मिन् सुखे स्थितः आत्मनः स्वरूपात् न चलति । (तं योगसंज्ञितं विद्यात् ।)

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥६.२२ ॥

पदच्छेदः - यम्, लब्ध्वा, च, अपरम्, लाभम्, मन्यते, न, अधिकम्, ततः ।
यस्मिन्, स्थितः, न, दुःखेन, गुरुणा, अपि, विचाल्यते ॥

अन्वयः - यं च लब्ध्वा ततः अधिकम् अपरं लाभं न मन्यते, यस्मिन् स्थितः गुरुणा दुःखेन अपि न विचाल्यते (तं योगसंज्ञितं विद्यात्) ।

पदार्थः - यं च = यम् आनन्दम्, लब्ध्वा = प्राप्य, ततः = तस्मात्, अधिकम् = उत्कृष्टम्, अपरम् = अन्यम्, लाभम् = प्रयोजनम्, न मन्यते = न चिन्तयति, यस्मिन् = यस्मिन् तत्त्वे, स्थितः = तिष्ठन्, गुरुणा = महता, दुःखेन अपि = क्लेशेन अपि, न विचाल्यते = न अपसार्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यम्	यद्- द. सर्व. पुं. द्वि. एक. (विशेषणम्)	च	अव्ययम्
लब्ध्वा	क्त्वान्तम् अव्ययम्	ततः	अव्ययम्
अधिकम्	अ. पुं. द्वि. एक.	अपरम्	अ. सर्व. पुं. द्वि. एक. (विशेषणम्)
लाभम्	अ. पुं. द्वि. एक. (विशेष्यम्)	न	अव्ययम्
मन्यते	मन् (मन ज्ञाने) आत्म. कर्तरि लट्. प्रपु. एक.	यस्मिन्	यद् - द. सर्व. नपुं. स. एक. (विशेषणम्)
स्थितः	अ. पुं. प्र. एक. (विशेषणम्)	गुरुणा	उ. नपुं. तृ. एक. (विशेषणम्)
दुःखेन	अ. नपुं. तृ. एक. (विशेष्यम्)	अपि	अव्ययम्

विचाल्यते	वि + चल् (चल कम्पने) णिच्. पर. कर्मणि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः चापरम् च + अपरम् सवर्णदीर्घसन्धिः ।

नाधिकम् न + अधिकम् सवर्णदीर्घसन्धिः ।

स्थितो न स्थितः + न विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

गुरुणापि गुरुणा + अपि सवर्णदीर्घसन्धिः ।

(ख) समासः अपरम् न परम् अपरम् - नञ्तत्पुरुषः ।

(ग) कृदन्तः लब्ध्वा लभ् (डुलभष् प्राप्तौ) + क्त्वा ।

लाभम् लभ् (डुलभष् प्राप्तौ) + घञ्, तम् ।

स्थितः स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि) ।

भावस्पष्टीकरणम् -

न मन्यते ।	
कं न मन्यते ?	**लाभं** न मन्यते ।
कीदृशं लाभं न मन्यते ?	**अपरं** लाभं न मन्यते ।
कथम् अपरं लाभं न मन्यते ?	**अधिकम्** अपरं लाभं न मन्यते ।
कुतः अधिकम् अपरं लाभं न मन्यते ?	**ततः** अधिकम् अपरं लाभं न मन्यते ।
किं कृत्वा ततः अधिकम् अपरं लाभं न मन्यते ?	**लब्ध्वा** ततः अधिकम् अपरं लाभं न मन्यते ।
कं लब्ध्वा ततः अधिकम् अपरं लाभं न मन्यते ?	**यं च** लब्ध्वा ततः अधिकम् अपरं लाभं न मन्यते ।
यं च लब्ध्वा ततः अधिकम् अपरं लाभं न मन्यते, **पुनः किं न क्रियते** ?	यं च लब्ध्वा ततः अधिकम् अपरं लाभं न मन्यते, **न विचाल्यते** ।
यं च लब्ध्वा ततः अधिकम् अपरं लाभं न मन्यते, **केन** न विचाल्यते ?	यं च लब्ध्वा ततः अधिकम् अपरं लाभं न मन्यते, **दुःखेन** अपि न विचाल्यते ।
यं च लब्ध्वा ततः अधिकम् अपरं लाभं न मन्यते, **कीदृशेन** दुःखेन अपि न विचाल्यते ?	यं च लब्ध्वा ततः अधिकम् अपरं लाभं न मन्यते, **गुरुणा** दुःखेन अपि न विचाल्यते ।
यं च लब्ध्वा ततः अधिकम् अपरं लाभं न मन्यते, **कः** गुरुणा दुःखेन अपि न विचाल्यते ?	यं च लब्ध्वा ततः अधिकम् अपरं लाभं न मन्यते, **स्थितः** गुरुणा दुःखेन अपि न विचाल्यते ।

यं च लब्ध्वा ततः अधिकम् अपरं लाभं न मन्यते, **कस्मिन्** स्थितः गुरुणा दुःखेन अपि न विचाल्यते ?	यं च लब्ध्वा ततः अधिकम् अपरं लाभं न मन्यते, **यस्मिन्** स्थितः गुरुणा दुःखेन अपि न विचाल्यते ।

तात्पर्यम् - यत् सुखं प्राप्य अन्यम् आनन्दं ततोऽप्यधिकं न मन्यते, यस्मिन् च सुखे स्थितः महता दुःखेन अपि न अपसारयितुं शक्यते । (तं योगसंज्ञितं विद्यात् ।)

तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥६.२३॥

पदच्छेदः - तम्, विद्यात्, दुःखसंयोगवियोगम्, योगसंज्ञितम् ।
स:, निश्चयेन, योक्तव्यः, योगः, अनिर्विण्णचेतसा ॥

अन्वयः - तं दुःखसंयोगवियोगं योगसंज्ञितं विद्यात् । सः योगः अनिर्विण्णचेतसा निश्चयेन योक्तव्यः ।

पदार्थः - तम् = तम् आनन्दम्, दुःखसंयोगवियोगम् = दुःखसम्बन्धरहितम्, योगसंज्ञितम् = योगनामकम्, विद्यात् = जानीयात्, सः = तादृशः, योगः = समाधिः, अनिर्विण्णचेतसा = समुत्सुकमनसा पुरुषेण, निश्चयेन = अवश्यम्, योक्तव्यः = प्राप्तव्यः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तम्	तद्- द. सर्व. पुं. द्वि. एक. (विशेषणम्)	दुःखसंयोगवियोगम्	अ. पुं. द्वि. एक. (विशेष्यम्)
योगसंज्ञितम्	अ. पुं. द्वि. एक. (विशेषणम्)	विद्यात्	विद् (विद ज्ञाने) पर. कर्तरि विधिलिङ् प्रपु. एक.
सः	तद्- द. सर्व. पुं. द्वि. एक. (विशेषणम्)	योगः	अ. पुं. प्र. एक. (विशेष्यम्)
अनिर्विण्णचेतसा	अनिर्विण्णचेतस् - सका. पुं. तृ. एक. (विशेषणम्)	निश्चयेन	अ. पुं. तृ. एक.
योक्तव्यः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः विद्याद्दुःखसंयोगवियोगम्
विद्यात् + दुःखसंयोगवियोगम् जश्त्वसन्धिः ।
स निश्चयेन स: + निश्चयेन विसर्गसन्धिः (लोपः) ।

	योक्तव्यो योगः	योक्तव्यः + योगः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	योगोऽनिर्विण्णचेतसा	योगः + अनिर्विण्णचेतसा	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
(ख) समासः	दुःखसंयोगवियोगम्	दुःखस्य संयोगः दुःखसंयोगः - षष्ठीतत्पुरुषः । दुःखसंयोगात् वियोगः दुःखसंयोगवियोगः, तम् - पञ्चमीतत्पुरुषः ।	
	योगसंज्ञितम्	योगः इति संज्ञा योगसंज्ञा - कर्मधारयः । योगसंज्ञा अस्य सञ्जाता इति योगसंज्ञितः, तम् (इतच्प्रत्ययः) ।	
	अनिर्विण्णचेतसा	निर्विण्णं चेतः यस्य सः निर्विण्णचेताः - बहुव्रीहिः । न निर्विण्णचेताः अनिर्विण्णचेताः, तेन - तत्पुरुषः ।	
(ग) कृदन्तः	योगः	युज् (युजिर् योगे) + घञ् ।	
	निश्चयेन	निस् + चि (चिञ् चयने) + अच्, तेन ।	
	योक्तव्यः	युज् (युजिर् योगे) + तव्यत् (कर्मणि) ।	
	निर्विण्णः	निर् + विद् (विद सत्तायाम्) + क्त (कर्तरि) ।	

भावस्पष्टीकरणम् -

विद्यात् ।	
कं विद्यात् ?	**तं** विद्यात् ।
तं **कीदृशं** विद्यात् ?	तं **दुःखसंयोगवियोगं** विद्यात् ।
तं दुःखसंयोगवियोगं **पुनः कीदृशं** विद्यात् ?	तं दुःखसंयोगवियोगं **योगसंज्ञितं** विद्यात् ।
तं दुःखसंयोगवियोगं योगसंज्ञितं विद्यात्, **पुनः किं कर्तव्यः** ?	तं दुःखसंयोगवियोगं योगसंज्ञितं विद्यात्, **योक्तव्यः** ।
तं दुःखसंयोगवियोगं योगसंज्ञितं विद्यात्, **कः** योक्तव्यः ?	तं दुःखसंयोगवियोगं योगसंज्ञितं विद्यात्, सः **योगः** योक्तव्यः ।
तं दुःखसंयोगवियोगं योगसंज्ञितं विद्यात्, सः योगः **केन** योक्तव्यः ?	तं दुःखसंयोगवियोगं योगसंज्ञितं विद्यात्, सः योगः **अनिर्विण्णचेतसा** योक्तव्यः ।
तं दुःखसंयोगवियोगं योगसंज्ञितं विद्यात्, सः योगः अनिर्विण्णचेतसा **कथं** योक्तव्यः ?	तं दुःखसंयोगवियोगं योगसंज्ञितं विद्यात्, सः योगः अनिर्विण्णचेतसा **निश्चयेन** योक्तव्यः ।

तात्पर्यम् - एवं यस्मिन् अवस्थाविशेषे वैषयिकस्य सुखस्य दुःखस्य च स्पर्श एव न भवति तम् अवस्थाविशेषं योगः इति जानीयात् । तं च योगं समुत्सुकः अवश्यं प्राप्नुयात् ।

सङ्कल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः॥६.२४॥
शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्॥६.२५॥

पदच्छेदः - सङ्कल्पप्रभवान्, कामान्, त्यक्त्वा, सर्वान्, अशेषतः।
मनसा, एव, इन्द्रियग्रामम्, विनियम्य, समन्ततः॥
शनैः, शनैः, उपरमेत्, बुद्ध्या, धृतिगृहीतया।
आत्मसंस्थम्, मनः, कृत्वा, न, किञ्चित्, अपि, चिन्तयेत्॥

अन्वयः - सङ्कल्पप्रभवान् सर्वान् कामान् अशेषतः त्यक्त्वा, मनसा एव समन्ततः इन्द्रियग्रामं विनियम्य, धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्। मनः आत्मसंस्थं कृत्वा किञ्चित् अपि न चिन्तयेत्।

पदार्थः - सङ्कल्पप्रभवान् = सङ्कल्पजनितान्, सर्वान् = सकलान्, कामान् = अभिलाषान्, अशेषतः = अशेषान् पूर्णतः (निरवशेषान्), त्यक्त्वा = परित्यज्य, मनसा एव = चित्तेन एव, समन्ततः = सर्वतः, इन्द्रियग्रामम् = इन्द्रियसमुदायम्, विनियम्य = निरुध्य, धृतिगृहीतया = धैर्यसहितया, बुद्ध्या = मत्या, शनैः शनैः = मन्दं मन्दम्, उपरमेत् = विश्रामयेत्, मनः = चित्तम्, आत्मसंस्थम् = स्वनिष्ठम्, कृत्वा = विधाय, किञ्चित् अपि = किमपि, न चिन्तयेत् = न भावयेत्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सङ्कल्पप्रभवान्	अ. पुं. द्वि. बहु. (विशेषणम्)	सर्वान्	अ. सर्व. पुं. द्वि. बहु. (विशेषणम्)
कामान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	अशेषतः	अव्ययम्
त्यक्त्वा	क्त्वान्तम् अव्ययम्	मनसा	मनस् - सका. नपुं. तृ. एक.
एव	अव्ययम्	समन्ततः	अव्ययम्
इन्द्रियग्रामम्	अ. पुं. द्वि. एक.	विनियम्य	ल्यबन्तम् अव्ययम्
धृतिगृहीतया	आ. स्त्री. तृ. एक. (विशेषणम्)	बुद्ध्या	इ. स्त्री. तृ. एक. (विशेष्यम्)
शनैः	अव्ययम्	उपरमेत् (उपरमेत)	उप + रम् (रमु क्रीडायाम्)[1] आत्म. कर्तरि विधिलिङ्. प्रपु. एक.
मनः	मनस्- सका. नपुं. द्वि. एक. (विशेष्यम्)	आत्मसंस्थम्	अ. नपुं. द्वि. एक. (विशेषणम्)

कृत्वा	क्त्वान्तम् अव्ययम्	किञ्चित्	अव्ययम्
अपि	अव्ययम्	न	अव्ययम्
चिन्तयेत्	चिन्त् (चिति स्मृत्याम्) पर. कर्तरि विधिलिङ्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः

कामांस्त्यक्त्वा	कामान् + त्यक्त्वा	रुत्वम्, अनुस्वारागमः, विसर्गः, सत्वम्।
मनसैव	मनसा + एव	वृद्धिसन्धिः।
एवेन्द्रियग्रामम्	एव + इन्द्रियग्रामम्	गुणसन्धिः।
शनैरुपरमेत्	शनैः + उपरमेत्	विसर्गसन्धिः (रेफः)।
उपरमेद् बुद्ध्या	उपरमेत् + बुद्ध्या	जश्त्वसन्धिः।
किञ्चिदपि	किञ्चित् + अपि	जश्त्वसन्धिः।

(ख) समासः

सङ्कल्पप्रभवान्	सङ्कल्पः प्रभवः येषां ते सङ्कल्पप्रभवाः, तान् - बहुव्रीहिः।
अशेषतः	न शेषाः अशेषाः, तान् नञ्तत्पुरुषः, स्वार्थे द्वितीयाविभक्त्यन्तात् तसिः।
इन्द्रियग्रामम्	इन्द्रियाणां ग्रामः इन्द्रियग्रामः, तम् - षष्ठीतत्पुरुषः।
धृतिगृहीतया	धृत्या गृहीता धृतिगृहीता, तया - तृतीयातत्पुरुषः।
आत्मसंस्थम्	आत्मनि संस्था यस्य तत् आत्मसंस्थम्, तत् - बहुव्रीहिः।

(ग) कृदन्तः

सङ्कल्पः	सम् + कृप् (कृप अवकल्पने) + घञ्।
त्यक्त्वा	त्यज् (त्यज हानौ) + क्त्वा।
विनियम्य	वि + नि + यम् (यम उपरमे) + ल्यप्।
बुद्ध्या	बुध् (बुध अवबोधने) + क्तिन्, तया।
धृतिः	धृ (धृञ् धारणे) + क्तिन्।
गृहीतया	ग्रह् (ग्रह उपादाने) + क्त (कर्मणि) + टाप् (स्त्रीत्वे), तया।
कृत्वा	कृ (डुकृञ् करणे) + क्त्वा।

(घ) तद्धितान्तः

शेषतः	शेष + तसिल्।
समन्ततः	समन्त + तसिल्।

1. अत्र 'उपरमेत्' इति परस्मैपदित्वेन आर्षप्रयोगः।

भावस्पष्टीकरणम् -

उपरमेत्।	
कथम् उपरमेत्?	**शनैः शनैः** उपरमेत्।
कया शनैः शनैः उपरमेत्?	**बुद्ध्या** शनैः शनैः उपरमेत्।
कीदृश्या बुद्ध्या शनैः शनैः उपरमेत्?	**धृतिगृहीतया** बुद्ध्या शनैः शनैः उपरमेत्।
किं कृत्वा धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्?	**विनियम्य** धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्।
कं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्?	**इन्द्रियग्रामं** विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्।
कथम् इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्?	**समन्ततः** इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्।
केन समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्?	**मनसा एव** समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्।
पुनश्च किं कृत्वा मनसा एव समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्?	**त्यक्त्वा** मनसा एव समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्।
कान् त्यक्त्वा, मनसा एव समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्?	**कामान्** त्यक्त्वा, मनसा एव समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्।
कान् कामान् त्यक्त्वा, मनसा एव समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्?	**सर्वान्** कामान् त्यक्त्वा, मनसा एव समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्।
कीदृशान् सर्वान् कामान् त्यक्त्वा, मनसा एव समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्?	**सङ्कल्पप्रभवान्** सर्वान् कामान् त्यक्त्वा, मनसा एव समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्।
सङ्कल्पप्रभवान् सर्वान् कामान् **कथं** त्यक्त्वा, मनसा एव समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्?	सङ्कल्पप्रभवान् सर्वान् कामान् **अशेषतः** त्यक्त्वा, मनसा एव समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्।
सङ्कल्पप्रभवान् सर्वान् कामान् अशेषतः त्यक्त्वा, मनसा एव समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्, **पुनः किं कुर्यात्**?	सङ्कल्पप्रभवान् सर्वान् कामान् अशेषतः त्यक्त्वा, मनसा एव समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्, **न चिन्तयेत्**।

सङ्कल्पप्रभवान् सर्वान् कामान् अशेषतः त्यक्त्वा, मनसा एव समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्, **किं** न चिन्तयेत् ?	सङ्कल्पप्रभवान् सर्वान् कामान् अशेषतः त्यक्त्वा, मनसा एव समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्, **किञ्चित् अपि** न चिन्तयेत्।
सङ्कल्पप्रभवान् सर्वान् कामान् अशेषतः त्यक्त्वा, मनसा एव समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्, **किं कृत्वा** किञ्चित् अपि न चिन्तयेत् ?	सङ्कल्पप्रभवान् सर्वान् कामान् अशेषतः त्यक्त्वा, मनसा एव समन्ततः इन्द्रियग्रामं विनियम्य धृतिगृहीतया बुद्ध्या शनैः शनैः उपरमेत्, **मनः आत्मसंस्थं कृत्वा** किञ्चित् अपि न चिन्तयेत्।

तात्पर्यम् - सङ्कल्पात् जायमानान् सर्वान् अपि कामान् त्यजेत्। विवेकयुक्तेन मनसा इन्द्रियसमुदायं समन्ततः नियन्त्रयेत्। धैर्येण गृहीतया बुद्ध्या सावधानतया तम् इन्द्रियसमुदायं प्रशमयेत्। मनः आत्मनि एव संस्थितं यथा स्यात् तथा कुर्यात्। ततः अन्यत् किञ्चिदपि नैव चिन्तयेत्।

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥६.२६॥

पदच्छेदः - यतः, यतः, निश्चरति, मनः, चञ्चलम्, अस्थिरम्।
ततः, ततः, नियम्य, एतत्, आत्मनि, एव, वशम्, नयेत्॥

अन्वयः - चञ्चलम् अस्थिरं मनः यतः यतः निश्चरति ततः ततः एतत् नियम्य आत्मनि एव वशं नयेत्।

पदार्थः - चञ्चलम् = अतीव चलम्, अस्थिरम् = अदृढम्, मनः = चित्तम्, यतः यतः = यस्मात् यस्मात् विषयात्, निश्चरति = गच्छति, ततः ततः = तस्मात् तस्मात् विषयात्, एतत् = इदं मनः, नियम्य = निरुध्य, आत्मनि एव = आत्मनि एव, वशं नयेत् = अधीनतां कुर्यात्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
चञ्चलम्	अ. नपुं. प्र. एक. (विशेषणम्)	अस्थिरम्	अ. नपुं. प्र. एक. (विशेषणम्)
मनः	मनस्- सका. नपुं. प्र. एक. (विशेष्यम्)	यतः	अव्ययम्
निश्चरति	निस् + चर् (चर गतिभक्षणयोः) पर. कर्तरि लट्. प्रपु. एक.	ततः	अव्ययम्
एतत्	एतद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	नियम्य	ल्यबन्तम् अव्ययम्

आत्मनि	आत्मन्- न. पुं. स. एक.	एव	अव्ययम्
वशम्	अ. पुं. द्वि. एक.	नयेत्	नी (णीञ् प्रापणे) पर. कर्तरि विधिलिङ्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	यतो यतः	यतः + यतः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	यतो निश्चरति	यतः + निश्चरति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	मनश्चञ्चलम्	मनः + चञ्चलम्	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
	ततस्ततः	ततः + ततः	विसर्गसन्धिः (सकारः) ।
	ततो नियम्य	ततः + नियम्य	विसर्गसन्धिः (सकारः) रेफः, उकारः गुणः ।
	नियम्यैतत्	नियम्य + एतत्	वृद्धिसन्धिः ।
	एतदात्मनि	एतत् + आत्मनि	जश्त्वसन्धिः ।
	आत्मन्येव	आत्मनि + एव	यण्सन्धिः ।
(ख) समासः	अस्थिरम्	न स्थिरम् अस्थिरम् - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	नियम्य	नि + यम् (यम उपरमे) + ल्यप् ।	
	वशम्	वश् (वश कान्तौ) + अच् (कर्तरि), तम् ।	

भावस्पष्टीकरणम् -

नयेत् ।	
कुत्र नयेत् ?	**वशं** नयेत् ।
कस्मिन् वशं नयेत् ?	**आत्मनि एव** वशं नयेत् ।
किं कृत्वा आत्मनि एव वशं नयेत् ?	**नियम्य** आत्मनि एव वशं नयेत् ।
किं नियम्य आत्मनि एव वशं नयेत् ?	**मनः** नियम्य आत्मनि एव वशं नयेत् ।
किं मनः नियम्य आत्मनि एव वशं नयेत् ?	**एतत्** मनः नियम्य आत्मनि एव वशं नयेत् ।
कीदृशम् एतत् मनः नियम्य आत्मनि एव वशं नयेत् ?	**अस्थिरम्** एतत् मनः नियम्य आत्मनि एव वशं नयेत् ।
पुनश्च कीदृशम् अस्थिरम् एतत् मनः नियम्य आत्मनि एव वशं नयेत् ?	**चञ्चलम्** अस्थिरम् एतत् मनः नियम्य आत्मनि एव वशं नयेत् ।
चञ्चलम् अस्थिरम् एतत् मनः **कुतः** नियम्य आत्मनि एव वशं नयेत् ?	चञ्चलम् अस्थिरम् एतत् मनः **ततः ततः** नियम्य आत्मनि एव वशं नयेत् ।

चञ्चलम् अस्थिरम् एतत् मनः **कुतः** ततः ततः नियम्य आत्मनि एव वशं नयेत् ?	चञ्चलम् अस्थिरं मनः **यतः यतः निश्चरति** ततः ततः एतत् नियम्य आत्मनि एव वशं नयेत् ।

तात्पर्यम् - चञ्चलं मनः शब्दादिषु विषयेषु यत्र यत्र प्रवर्तते ततः ततः तत् प्रतिनिवर्तयेत् । आत्मनि एव तत् प्रवर्तयेत् ।

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥६.२७॥

पदच्छेदः - प्रशान्तमनसम्, हि, एनम्, योगिनम्, सुखम्, उत्तमम् ।
उपैति, शान्तरजसम्, ब्रह्मभूतम्, अकल्मषम् ॥

अन्वयः - प्रशान्तमनसं हि शान्तरजसम् अकल्मषं ब्रह्मभूतम् एनं योगिनम् उत्तमं सुखम् उपैति ।

पदार्थः - प्रशान्तमनसं हि = शान्तचित्तम्, शान्तरजसम् = नष्टरजोगुणम्, अकल्मषम् = विषयशून्यम्, ब्रह्मभूतम्=ब्रह्मणि निलीनम् (जीवन्मुक्तम्), एनम्=एतम्, योगिनम्=समाधिनिष्ठम्, उत्तमम्=निरतिशयम्, सुखम् = सुखम्, उपैति = उपगच्छति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
प्रशान्तमनसम्	प्रशान्तमनस्- सका. पुं. द्वि. एक. (विशेषणम्)	हि	अव्ययम्
शान्तरजसम्	शान्तरजस्- सका. पुं. द्वि. एक. (विशेषणम्)	अकल्मषम्	अ. पुं. द्वि. एक. (विशेषणम्)
ब्रह्मभूतम्	अ. पुं. द्वि. एक. (विशेषणम्)	एनम्	एतद्- द. सर्व. पुं. द्वि. एक. (विशेषणम्)
योगिनम्	योगिन्- न. पुं. द्वि. एक. (विशेष्यम्)	उत्तमम्	अ. नपुं. प्र. एक. (विशेषणम्)
सुखम्	अ. नपुं. प्र. एक. (विशेष्यम्)	उपैति	उप + इ (इण गतौ) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः ह्येनम् — हि + एनम् — यण्सन्धिः ।

(ख) समासः
प्रशान्तमनसम् — प्रशान्तं मनः यस्य सः प्रशान्तमनाः, तम् - बहुव्रीहिः ।
शान्तरजसम् — शान्तं रजः यस्य सः शान्तरजाः, तम् - बहुव्रीहिः ।
ब्रह्मभूतम् — ब्रह्म भूतः यः सः ब्रह्मभूतः, तम् - बहुव्रीहिः ।

	अकल्मषम्	न विद्यते कल्मषं यस्मिन् सः अकल्मषः, तम् - बहुव्रीहिः ।
(ग) कृदन्तः	प्रशान्तः	प्र + शम् (शमु उपशमने) + क्त (कर्तरि) ।
	भूतम्	भू (भू सत्तायाम्) + क्त (कर्तरि) ।
(घ) तद्धितान्तः	योगिनम्	योग + इनि (मतुबर्थे) (योगः अस्य अस्मिन् वा अस्ति), तम् ।

भावस्पष्टीकरणम् -

उपैति ।	
किम् उपैति ?	**सुखम्** उपैति ।
कीदृशं सुखम् उपैति ?	**उत्तमं** सुखम् उपैति ।
कम् उत्तमं सुखम् उपैति ?	**एनं योगिनम्** उत्तमं सुखम् उपैति ।
कीदृशं एनं योगिनम् उत्तमं सुखम् उपैति ?	**ब्रह्मभूतम्** एनं योगिनम् उत्तमं सुखम् उपैति ।
पुनः कीदृशं ब्रह्मभूतम् एनं योगिनम् उत्तमं सुखम् उपैति ?	**अकल्मषं** ब्रह्मभूतम् एनं योगिनम् उत्तमं सुखम् उपैति ।
पुनः कीदृशम् अकल्मषं ब्रह्मभूतम् एनं योगिनम् उत्तमं सुखम् उपैति ?	**शान्तरजसम्** अकल्मषं ब्रह्मभूतम् एनं योगिनम् उत्तमं सुखम् उपैति ।
पुनः कीदृशं शान्तरजसम् अकल्मषं ब्रह्मभूतम् एनं योगिनम् उत्तमं सुखम् उपैति ?	**प्रशान्तमनसं हि** शान्तरजसम् अकल्मषं ब्रह्मभूतम् एनं योगिनम् उत्तमं सुखम् उपैति ।

तात्पर्यम् - यस्य मनः एवं शान्तं भवति सः उत्तमं सुखं प्राप्नोति। तस्य विषयरूपकल्मषं प्रक्षीणं भवति। सः अपगतकल्मषः जीवन्मुक्तः च भवति ।

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥६.२८॥

पदच्छेदः - युञ्जन्, एवम्, सदा, आत्मानम्, योगी, विगतकल्मषः ।
सुखेन, ब्रह्मसंस्पर्शम्, अत्यन्तम्, सुखम्, अश्नुते ॥

अन्वयः - विगतकल्मषः योगी एवम् आत्मानं सदा युञ्जन् सुखेन अत्यन्तं सुखं ब्रह्मसंस्पर्शम् अश्नुते ।

पदार्थः - विगतकल्मषः = अपगतपापः, योगी = योगी, एवम् = इत्थम्, आत्मानम् = स्वम्, सदा = सर्वदा, युञ्जन् = योजयन्, सुखेन = अनायासेन, अत्यन्तम् = अतीव, सुखम् = परमानन्दम्, ब्रह्मसंस्पर्शम् = परमात्मसम्पर्कम्, अश्नुते = लभते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
विगतकल्मषः	अ. पुं. प्र. एक. (विशेषणम्)	योगी	योगिन्- न. पुं. प्र. एक. (विशेष्यम्)
एवम्	अव्ययम्	आत्मानम्	आत्मन्- न. पुं. द्वि. एक.
सदा	अव्ययम्	युञ्जन्	युञ्जत्- त. पुं. प्र. एक. (विशेषणम्)
सुखेन	अ. नपुं. तृ. एक.	अत्यन्तम्	अव्ययम्
सुखम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	ब्रह्मसंस्पर्शम्	अ. नपुं. द्वि. एक. (विशेषणम्)
अश्नुते	अश् (अशू व्याप्तौ सङ्घाते च) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	युञ्जन्नेवम्	युञ्जन् + एवम्	ङमुडागमसन्धिः ।
	सदात्मानम्	सदा + आत्मानम्	सवर्णदीर्घसन्धिः ।
(ख) समासः	विगतकल्मषः	विगतः कल्मषः यस्मात् सः - बहुव्रीहिः ।	
	ब्रह्मसंस्पर्शम्	ब्रह्मणः संस्पर्शः, तम् - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	युञ्जन्	युज् (युजिर् योगे) + शतृ (कर्तरि) ।	
	विगतः	वि + गम् (गम्लृ गतौ) + क्त (कर्तरि) ।	
	संस्पर्शम्	स्पृश् (स्पृश संस्पर्शने) + घञ्, तम् ।	
(घ) तद्धितान्तः	योगी	योग + इनि (मतुबर्थे) (योगः अस्य अस्मिन् वा अस्ति) ।	

भावस्पष्टीकरणम् -

अश्नुते ।	
कः अश्नुते ?	**योगी** अश्नुते ।
कीदृशः योगी अश्नुते ?	**विगतकल्मषः** योगी अश्नुते ।
विगतकल्मषः योगी **किम्** अश्नुते ?	विगतकल्मषः योगी **सुखम्** अश्नुते ।
विगतकल्मषः योगी **कीदृशं** सुखम् अश्नुते ?	विगतकल्मषः योगी **अत्यन्तं** सुखम् अश्नुते ।
विगतकल्मषः योगी **पुनः कीदृशम्** अत्यन्तं सुखम् अश्नुते ?	विगतकल्मषः योगी **ब्रह्मसंस्पर्शम्** अत्यन्तं सुखम् अश्नुते ।

विगतकल्मषः योगी **कथं** ब्रह्मसंस्पर्शम् अत्यन्तं सुखम् अश्नुते ?	विगतकल्मषः योगी **सुखेन** ब्रह्मसंस्पर्शम् अत्यन्तं सुखम् अश्नुते ।
विगतकल्मषः योगी **किं कुर्वन्** सुखेन ब्रह्मसंस्पर्शम् अत्यन्तं सुखम् अश्नुते ?	विगतकल्मषः योगी **युञ्जन्** सुखेन ब्रह्मसंस्पर्शम् अत्यन्तं सुखम् अश्नुते ।
विगतकल्मषः योगी **कं** युञ्जन् सुखेन ब्रह्मसंस्पर्शम् अत्यन्तं सुखम् अश्नुते ?	विगतकल्मषः योगी **एवम् आत्मानं** युञ्जन् सुखेन ब्रह्मसंस्पर्शम् अत्यन्तं सुखम् अश्नुते ।
विगतकल्मषः योगी एवम् आत्मानं **कदा** युञ्जन् सुखेन ब्रह्मसंस्पर्शम् अत्यन्तं सुखम् अश्नुते ?	विगतकल्मषः योगी एवम् आत्मानं **सदा** युञ्जन् सुखेन ब्रह्मसंस्पर्शम् अत्यन्तं सुखम् अश्नुते ।

तात्पर्यम् - अनेन प्रकारेण सर्वदा यः आत्मानं प्रवर्तयति सः योगी विषयरूपकश्मलरहितः निष्पापः भवति । सः अनायासेन ब्रह्मसम्बन्धं परमानन्दमयम् अतिशयितं सुखं प्राप्नोति ।

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥६.२९ ॥

पदच्छेदः - सर्वभूतस्थम्, आत्मानम्, सर्वभूतानि, च, आत्मनि ।
ईक्षते, योगयुक्तात्मा, सर्वत्र, समदर्शनः ॥

अन्वयः - योगयुक्तात्मा सर्वत्र समदर्शनः आत्मानं सर्वभूतस्थम् आत्मनि च सर्वभूतानि ईक्षते ।

पदार्थः - योगयुक्तात्मा = समाहितचित्तः, सर्वत्र = सर्वेषु, समदर्शनः = तुल्यदृष्टिः, आत्मानम् = स्वम्, सर्वभूतस्थम् = निखिलभूतस्थितम्, आत्मनि च = स्वस्मिन् च, सर्वभूतानि = सकलभूतानि, ईक्षते = अवलोकयति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
योगयुक्तात्मा	योगयुक्तात्मन्- न. पुं. प्र. एक. (विशेषणम्)	सर्वत्र	अव्ययम्
समदर्शनः	अ. पुं. प्र. एक. (विशेषणम्)	आत्मानम्	आत्मन्- न. पुं. द्वि. एक. (विशेष्यम्)
सर्वभूतस्थम्	अ. पुं. द्वि. एक. (विशेषणम्)	आत्मनि	आत्मन्- न. पुं. स. एक.
च	अव्ययम्	सर्वभूतानि	अ नपुं. द्वि. बहु.

ईक्षते	ईक्ष् (ईक्ष दर्शने) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः चात्मनि — च + आत्मनि — सवर्णदीर्घसन्धिः ।

(ख) समासः
सर्वभूतस्थम् — सर्वभूतेषु तिष्ठति इति सर्वभूतस्थः - कर्तरि कप्रत्ययः उपपदसमासश्च ।
सर्वभूतानि — सर्वाणि भूतानि सर्वभूतानि - कर्मधारयः ।
योगयुक्तात्मा — योगेन युक्तः योगयुक्तः - तृतीयातत्पुरुषः ।
योगयुक्तः आत्मा यस्य सः योगयुक्तात्मा - बहुव्रीहिः ।
समदर्शनः — समं दर्शनं यस्य सः समदर्शनः - बहुव्रीहिः ।

(ग) कृदन्तः
भूतानि — भू (भू सत्तायाम्) + क्त (कर्तरि), तानि ।
योगः — युज् (युजिर् योगे) + घञ् ।
युक्तः — युज् (युज समाधौ) + क्त (कर्तरि) ।
दर्शनम् — दृश् (दृशिर् प्रेक्षणे) + ल्युट् ।

भावस्पष्टीकरणम् -

ईक्षते ।	
कः ईक्षते ?	**योगयुक्तात्मा** ईक्षते ।
कीदृशः योगयुक्तात्मा ईक्षते ?	**सर्वत्र समदर्शनः** योगयुक्तात्मा ईक्षते ।
सर्वत्र समदर्शनः योगयुक्तात्मा **कम्** ईक्षते ?	सर्वत्र समदर्शनः योगयुक्तात्मा **आत्मानम्** ईक्षते ।
सर्वत्र समदर्शनः योगयुक्तात्मा आत्मानं **कीदृशम्** ईक्षते ?	सर्वत्र समदर्शनः योगयुक्तात्मा आत्मानं **सर्वभूतस्थम्** ईक्षते ।
सर्वत्र समदर्शनः योगयुक्तात्मा आत्मानं सर्वभूतस्थं **(पुनः) कानि** ईक्षते ?	सर्वत्र समदर्शनः योगयुक्तात्मा आत्मानं सर्वभूतस्थं **(पुनः) सर्वभूतानि** ईक्षते ।
सर्वत्र समदर्शनः योगयुक्तात्मा आत्मानं सर्वभूतस्थं (पुनः) **कुत्र** सर्वभूतानि ईक्षते ?	योगयुक्तात्मा सर्वत्र समदर्शनः आत्मानं सर्वभूतस्थम् **आत्मनि च** सर्वभूतानि ईक्षते ।

तात्पर्यम् - समाहितान्तःकरणः सः आत्मानं सर्वेषु अपि भूतेषु पश्यति । आत्मनि च सर्वाण्यपि भूतानि पश्यति । स्थावरजङ्गमादिषु सर्वेषु अपि सः निर्विशेषतया ब्रह्म पश्यति ।

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥६.३०॥

पदच्छेदः - यः, माम्, पश्यति, सर्वत्र, सर्वम्, च, मयि, पश्यति।
तस्य, अहम्, न, प्रणश्यामि, सः, च, मे, न, प्रणश्यति ॥

अन्वयः - यः मां सर्वत्र पश्यति सर्वं च मयि पश्यति, तस्य अहं न प्रणश्यामि सः च मे न प्रणश्यति।

पदार्थः - यः = यः पुरुषः, माम् = माम्, सर्वत्र = सर्वप्रदेशेषु, पश्यति = ईक्षते, सर्वं च = निखिलमपि, मयि = परमात्मनि, पश्यति = अवलोकयति, तस्य = तस्य पुरुषस्य, अहम् = ब्रह्मरूपः अहम्, न प्रणश्यामि = न परोक्षः भवामि, सः च = सोऽपि, मे = मम, न प्रणश्यति = न परोक्षः भवति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	माम्	अस्मद्- द. सर्व. द्वि. एक.
सर्वत्र	अव्ययम्	पश्यति	दृश् (दृशिर् प्रेक्षणे) पर. कर्तरि लट्. प्रपु. एक.
सर्वम्	अ. सर्व. पुं. द्वि. एक. (विशेषणम्)	च	अव्ययम्
मयि	अस्मद्- द. सर्व. स. एक.	तस्य	तद्- द. सर्व. पुं. ष. एक. (विशेषणम्)
अहम्	अस्मद्- द. सर्व. प्र. एक.	न	अव्ययम्
प्रणश्यामि	प्र + नश् (णश अदर्शने) पर. कर्तरि लट्. उपु. एक.	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
मे	अस्मद्- द. सर्व. ष. एक.	प्रणश्यति	प्र + नश् (णश अदर्शने) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	यो माम्	यः + माम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	तस्याहम्	तस्य + अहम्	सवर्णदीर्घसन्धिः।
	स च	सः + च	विसर्गसन्धिः (लोपः)।

भावस्पष्टीकरणम् -

पश्यति।	
कः पश्यति ?	**यः** पश्यति।

यः **कं** पश्यति ?	यः **मां** पश्यति ।
यः मां **कुत्र** पश्यति ?	यः मां **सर्वत्र** पश्यति ।
यः मां सर्वत्र पश्यति **पुनः किं पश्यति** ?	यः मां सर्वत्र पश्यति **सर्वं च पश्यति** ।
यः मां सर्वत्र पश्यति सर्वं च **कुत्र** पश्यति ?	यः मां सर्वत्र पश्यति सर्वं च **मयि** पश्यति ।
यः मां सर्वत्र पश्यति सर्वं च मयि पश्यति **तस्य अहं किं करोमि** ?	यः मां सर्वत्र पश्यति सर्वं च मयि पश्यति, **तस्य अहं न प्रणश्यामि** ।
यः मां सर्वत्र पश्यति सर्वं च मयि पश्यति, तस्य अहं न प्रणश्यामि **सः च किं करोति** ?	यः मां सर्वत्र पश्यति सर्वं च मयि पश्यति, तस्य अहं न प्रणश्यामि **सः च मे न प्रणश्यति** ।

तात्पर्यम् - यः सर्वेषु भूतेषु मां पश्यति, मयि सर्वमपि भूतजातं पश्यति तस्य कदापि अहं परोक्षतां न गच्छामि । सोऽपि मम परोक्षतां न गच्छति ।

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥६.३१॥

पदच्छेदः - सर्वभूतस्थितम्, यः, माम्, भजति, एकत्वम्, आस्थितः ।
सर्वथा, वर्तमानः, अपि, सः, योगी, मयि, वर्तते ॥

अन्वयः - यः एकत्वम् आस्थितः सर्वभूतस्थितं मां भजति, सः योगी सर्वथा वर्तमानः अपि मयि वर्तते ।

पदार्थः - यः = यः मानवः, एकत्वम् = ऐक्यम्, आस्थितः = आश्रितः, सर्वभूतस्थितम् = सकलप्राणिषु वर्तमानम्, माम् = माम्, भजति = सेवते, सः योगी = सः युक्तः, सर्वथा = सर्वप्रकारेण, वर्तमानः अपि = स्थितोऽपि, मयि = परमात्मनि, वर्तते = तिष्ठति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	एकत्वम्	अ. नपुं. द्वि. एक.
आस्थितः	अ. पुं. प्र. एक. (विशेषणम्)	सर्वभूतस्थितम्	अ. पुं. द्वि. एक. (विशेषणम्)
माम्	अस्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)	भजति	भज् (भज सेवायाम्) पर. कर्तरि लट्. प्रपु. एक.
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	योगी	योगिन्- न. पुं. प्र. एक. (विशेष्यम्)

सर्वथा	अव्ययम्	वर्तमानः	अ. पुं. प्र. एक. (विशेषणम्)
अपि	अव्ययम्	मयि	अस्मद् - द. सर्व. स. एक.
वर्तते	वृत् (वृतु वर्तने) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः योो माम् — यः + माम् — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
भजत्येकत्वम् — भजति + एकत्वम् — यण्सन्धिः ।
वर्तमानोऽपि — वर्तमानः + अपि — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
स योगी — सः + योगी — विसर्गसन्धिः (लोपः) ।

(ख) समासः सर्वभूतस्थितम् — सर्वाणि भूतानि सर्वभूतानि - कर्मधारयः ।
सर्वभूतेषु स्थितः सर्वभूतस्थितः, तम् - सप्तमीतत्पुरुषः ।

(ग) कृदन्तः स्थितम् — स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि), तम् ।
आस्थितः — आ + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि) ।
वर्तमानः — वृत् (वृतु वर्तने) + शानच् (कर्तरि) ।

(घ) तद्धितान्तः एकत्वम् — एक + त्व (भावे) (एकस्य भावः इत्यर्थः) ।
योगी — योग + इनि (मतुबर्थे) (योगः अस्य अस्मिन् वा अस्ति) ।

भावस्पष्टीकरणम् -

वर्तते ।	
कः वर्तते ?	**सः योगी** वर्तते ।
कीदृशः सः योगी वर्तते ?	**यः एकत्वम् आस्थितः सर्वभूतस्थितं मां भजति (तादृशः)** सः योगी वर्तते ।
यः एकत्वम् आस्थितः सर्वभूतस्थितं मां भजति सः योगी **कुत्र** वर्तते ?	यः एकत्वम् आस्थितः सर्वभूतस्थितं मां भजति सः योगी **मयि** वर्तते ।
यः एकत्वम् आस्थितः सर्वभूतस्थितं मां भजति सः योगी **कीदृशः अपि** मयि वर्तते ?	यः एकत्वम् आस्थितः सर्वभूतस्थितं मां भजति सः योगी **सर्वथा वर्तमानः** अपि मयि वर्तते ।

तात्पर्यम् - सर्वेषु भूतेषु वर्तमानं मां यः एकत्वमास्थितः सन् भजति सः योगी सर्वप्रकारैः वर्तमानः अपि मयि एव भवति । अर्थात् योगी सर्वं विष्णुमयं जगत् इति मन्यते ।

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥६.३२॥

पदच्छेदः - आत्मौपम्येन, सर्वत्र, समम्, पश्यति, यः, अर्जुन।
सुखम्, वा, यदि, वा, दुःखम्, सः, योगी, परमः, मतः ॥

अन्वयः - अर्जुन ! (तस्मात्) सुखं वा (भवतु) यदि वा (तस्मात्) दुःखं (तथापि) यः आत्मौपम्येन सर्वत्र समं पश्यति सः योगी परमः मतः।

पदार्थः - अर्जुन = हे धनञ्जय, सुखं वा = आनन्दो वा भवतु, यदि वा = अथवा, दुःखम् = खेदः (कष्टम्), (तथापि) यः = यः पुरुषः, आत्मौपम्येन = स्वसादृश्येन, सर्वत्र = सर्वप्राणिषु, समम् = समानम्, पश्यति = दृष्टिं पातयति, सः = सः पुरुषः, योगी = युक्तः, परमः = उत्तमः, मतः = अभिमतः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुन	अ. पुं. सम्बो. एक.	सुखम्	अ. नपुं. द्वि. एक.
वा	अव्ययम्	यदि	अव्ययम्
दुःखम्	अ. नपुं. द्वि. एक.	यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
आत्मौपम्येन	अ. नपुं. तृ. एक.	सर्वत्र	अव्ययम्
समम्	अ. नपुं. द्वि. एक.	पश्यति	दृश् (दृशिर् प्रेक्षणे) पर. कर्तरि लट्. प्रपु. एक.
सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	योगी	योगिन्- न. पुं. प्र. एक. (विशेष्यम्)
परमः	अ. पुं. प्र. एक. (विशेषणम्)	मतः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः योऽर्जुन — यः + अर्जुन — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
स योगी — सः + योगी — विसर्गसन्धिः (लोपः)।
परमो मतः — परमः + मतः — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।

(ख) समासः आत्मौपम्यम् — आत्मनः औपम्यम् आत्मौपम्यम् - षष्ठीतत्पुरुषः।

(ग) कृदन्तः मतः — मन् (मन ज्ञाने) + क्त (कर्तरि)।

(घ) तद्धितान्तः औपम्यम् — उपमा + ष्यञ् (स्वार्थे) (उपमा इत्यर्थः)।
योगी — योग + इनि (मतुबर्थे) (योगः अस्य अस्मिन् वा अस्ति)।

भावस्पष्टीकरणम् -

मतः ।	
कः मतः ?	**सः योगी** मतः ।
सः योगी **कीदृशः** मतः ?	सः योगी **परमः** मतः ।
कीदृशः सः योगी परमः मतः ?	**यः आत्मौपम्येन सर्वत्र समं पश्यति** सः योगी परमः मतः ।
किं किं (भवतु तथापि) यः आत्मौपम्येन सर्वत्र समं पश्यति सः योगी परमः मतः ?	**सुखं वा यदि वा दुःखं (भवतु तथापि)** यः आत्मौपम्येन सर्वत्र समं पश्यति सः योगी परमः मतः ।

तात्पर्यम् - यदि कस्माच्चित् सुखं कस्माच्चित् दुःखं वा जायेत तथापि यः सर्वेऽपि एते मम समानाः इति मत्वा सर्वेषु अपि प्राणिषु समानबुद्धिं धारयति सः उत्तमः योगी इति मम मतिः ।

अर्जुन उवाच - **योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।**
एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम् ॥६.३३॥

पदच्छेदः -

अर्जुनः, उवाच - यः, अयम्, योगः, त्वया, प्रोक्तः, साम्येन, मधुसूदन ।
तस्य, अहम्, न, पश्यामि, चञ्चलत्वात्, स्थितिम्, स्थिराम्॥

अन्वयः - मधुसूदन ! यः अयं योगः त्वया साम्येन प्रोक्तः (मनसः) चञ्चलत्वात् एतस्य स्थिरां स्थितिम् अहं न पश्यामि ।

पदार्थः - मधुसूदन = हे कृष्ण, यः अयं योगः = असौ योगः, त्वया = भवता, साम्येन = समत्वेन (उपलक्षितः), प्रोक्तः = उपदिष्टः, चञ्चलत्वात् = अस्थिरत्वात्, एतस्य = अस्य, स्थिराम् = अचलाम्, स्थितिम् = अवस्थानम्, अहम् = अहम् (अर्जुनः), न पश्यामि = न जानामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मधुसूदन	अ. पुं. सम्बो. एक.	यः	यद्- द. सर्व. पुं. प्र. एक.
अयम्	इदम्- म. सर्व. पुं. प्र. एक. (विशेषणम्)	योगः	अ. पुं. प्र. एक. (विशेष्यम्)
त्वया	युष्मद्- द. सर्व. तृ. एक.	साम्येन	अ. नपुं. तृ. एक.
प्रोक्तः	अ. पुं. प्र. एक. (विशेषणम्)	चञ्चलत्वात्	अ. नपुं. पं. एक.
एतस्य	एतद्- द. सर्व. पुं. ष. एक. (विशेषणम्)	स्थिराम्	आ. स्त्री. द्वि. एक. (विशेषणम्)

स्थितिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)	अहम्	अस्मद्- द. सर्व. प्र. एक.
न	अव्ययम्	पश्यामि	दृश् (दृशिर् प्रेक्षणे) पर. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः	योऽयम्	यः + अयम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	योगस्त्वया	योगः + त्वया	विसर्गसन्धिः (सकारः)।
	एतस्याहम्	एतस्य + अहम्	सवर्णदीर्घसन्धिः।
(ख) समासः	मधुसूदन	मधुं (तन्नामकम्) दैत्यं सूदयति इति मधुसूदनः, तत्सम्बुद्धौ - बहुव्रीहिः। मधु + सूद् (सूद क्षरणे) उभय. + णिच् (स्वार्थे) + ल्यु (अन)।	
(ग) कृदन्तः	योगः	युज् (युजिर् योगे) + घञ्।	
	प्रोक्तः	प्र + वच् (वच परिभाषणे) + क्त (कर्मणि)।	
	स्थितिम्	स्था (ष्ठा गतिनिवृत्तौ) + क्तिन् (भावे), ताम्।	
(घ) तद्धितान्तः	साम्येन	सम + ष्यञ् (भावे) (समस्य भावः) (समता इत्यर्थः)।	
	चञ्चलत्वात्	चञ्चल + त्व (भावे) (चञ्चलस्य भावः इत्यर्थः)।	

भावस्पष्टीकरणम् -

अहं न पश्यामि।	
काम् अहं न पश्यामि ?	**स्थितिम्** अहं न पश्यामि।
कीदृशीं स्थितिम् अहं न पश्यामि ?	**स्थिरां** स्थितिम् अहं न पश्यामि।
कस्य स्थिरां स्थितिम् अहं न पश्यामि ?	**एतस्य** स्थिरां स्थितिम् अहं न पश्यामि।
कीदृशस्य एतस्य स्थिरां स्थितिम् अहं न पश्यामि ?	**यः अयं योगः त्वया साम्येन प्रोक्तः (तादृशस्य)** एतस्य स्थिरां स्थितिम् अहं न पश्यामि।
यः अयं योगः त्वया साम्येन प्रोक्तः (तादृशस्य) एतस्य स्थिरां स्थितिं **कस्मात्** अहं न पश्यामि ?	यः अयं योगः त्वया साम्येन प्रोक्तः (तादृशस्य) एतस्य स्थिरां स्थितिं **चञ्चलत्वात्** अहं न पश्यामि।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**मधुसूदन** !

तात्पर्यम् - हे कृष्ण ! भवता अधुना साम्येन उपेतः यः योगः प्रोक्तः तस्य स्थिरा स्थितिः भवेत् इति मम निर्णयो नास्ति। यतः मनः अत्यन्तं चञ्चलम्। अतः तादृशस्य योगस्य अपि स्थितिः अस्थिरा एव भवेत्।

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥६.३४॥

पदच्छेदः - चञ्चलम्, हि, मनः, कृष्ण, प्रमाथि, बलवत्, दृढम् ।
तस्य, अहम्, निग्रहम्, मन्ये, वायोः, इव, सुदुष्करम् ॥

अन्वयः - कृष्ण ! मनः हि चञ्चलं बलवत् दृढं प्रमाथि । अहं तस्य निग्रहं वायोः इव सुदुष्करं मन्ये ।

पदार्थः - कृष्ण = हे कृष्ण !, मनः हि = चित्तं निश्चयेन, चञ्चलम् = अस्थिरम्, बलवत् = प्रबलम्, दृढम् = दृढम्, प्रमाथि = प्रमथनशीलम्, अहम् = अहम् (अर्जुनः), तस्य = तस्य मनसः, निग्रहम् = निरोधम्, वायोः इव = वातस्य निरोधम् इव, सुदुष्करम् = असाध्यम्, मन्ये = भावयामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कृष्ण	अ. पुं. सम्बो. एक.	मनः	मनस्- सका. नपुं. प्र. एक. (विशेष्यम्)
हि	अव्ययम्	चञ्चलम्	अ. नपुं. प्र. एक. (विशेषणम्)
बलवत्	बलवत्- त. नपुं. प्र. एक. (विशेषणम्)	दृढम्	अ. नपुं. प्र. एक. (विशेषणम्)
प्रमाथि	प्रमाथिन्- न. नपुं. प्र. एक. (विशेषणम्)	अहम्	अस्मद्- द. सर्व. प्र. एक.
तस्य	तद्- द. सर्व. पुं. ष. एक. (विशेषणम्)	निग्रहम्	अ. पुं. द्वि. एक. (विशेष्यम्)
वायोः	उ. पुं. ष. एक.	इव	अव्ययम्
सुदुष्करम्	अ. पुं. द्वि. एक. (विशेषणम्)	मन्ये	मन् (मन ज्ञाने) आत्म. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः	बलवद् दृढम्	बलवत् + दृढम्	जश्त्वसन्धिः ।
	तस्याहम्	तस्य + अहम्	सवर्णदीर्घसन्धिः ।
	वायोरिव	वायोः + इव	विसर्गसन्धिः (रेफः) ।
(ख) समासः	सुदुष्करम्	दुःखेन क्रियते इति दुष्करम् - उपपदसमासः ।	
		सुष्ठु दुष्करम् सुदुष्करम् - प्रादितत्पुरुषः ।	
(ग) कृदन्तः	दृढम्	दृह् (दृह वृद्धौ) + क्त (कर्तरि) ।	
	निग्रहम्	नि + ग्रह् (ग्रह उपादाने) + अप्, तम् ।	

(घ) तद्धितान्तः प्रमाथी — प्रमाथ + इनि, प्रमाथः अस्य अस्मिन् वा अस्ति ।
बलवत् — बल + मतुप् । बलम् अस्य अस्मिन् वा अस्ति ।

भावस्पष्टीकरणम् -

प्रमाथि ।	
कथं प्रमाथि ?	**दृढं** प्रमाथि ।
कीदृशं दृढं प्रमाथि ?	**बलवत्** दृढं प्रमाथि ।
पुनश्च कीदृशं बलवत् दृढं प्रमाथि ?	**चञ्चलं** बलवत् दृढं प्रमाथि ।
किं चञ्चलं बलवत् दृढं प्रमाथि ?	**मनः हि** चञ्चलं बलवत् दृढं प्रमाथि ।
मनः हि चञ्चलं बलवत् दृढं प्रमाथि **तस्य किम्** ?	मनः हि चञ्चलं बलवत् दृढं प्रमाथि **अहं तस्य मन्ये** ।
मनः हि चञ्चलं बलवत् दृढं प्रमाथि अहं तस्य **कं** मन्ये ?	मनः हि चञ्चलं बलवत् दृढं प्रमाथि अहं तस्य **निग्रहं** मन्ये ।
मनः हि चञ्चलं बलवत् दृढं प्रमाथि अहं तस्य निग्रहं **कीदृशं** मन्ये ?	मनः हि चञ्चलं बलवत् दृढं प्रमाथि अहं तस्य निग्रहं **सुदुष्करं** मन्ये ।
मनः हि चञ्चलं बलवत् दृढं प्रमाथि अहं तस्य निग्रहं **कथं** सुदुष्करं मन्ये ?	मनः हि चञ्चलं बलवत् दृढं प्रमाथि अहं तस्य निग्रहं **वायोः इव** सुदुष्करं मन्ये ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कृष्ण** !

तात्पर्यम् - हे कृष्ण ! मनः अत्यन्तं चञ्चलं, प्रमथनशीलं च । तद् नितरां बलवत् दृढं च । केनापि नियन्तुम् अशक्यम् । अच्छेद्यमपि तत् । एवम्भूतस्य मनसः निग्रहः वायोः निग्रहः इव अत्यन्तं दुष्करः इति अहं मन्ये ।

श्रीभगवानुवाच - **असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।**
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥६.३५॥

पदच्छेदः -

श्रीभगवान्, उवाच - असंशयम्, महाबाहो, मनः, दुर्निग्रहम्, चलम् ।
अभ्यासेन, तु, कौन्तेय, वैराग्येण, च, गृह्यते ॥

अन्वयः - महाबाहो ! असंशयं मनः दुर्निग्रहं चलम् । कौन्तेय ! अभ्यासेन तु वैराग्येण च गृह्यते ।

पदार्थः - महाबाहो = हे अर्जुन, असंशयम् = निस्सन्देहम्, मनः = अन्तःकरणम्, दुर्निग्रहम् = दुर्निरोधम्, चलम् = चञ्चलम्, कौन्तेय = हे कुन्तीपुत्र, अभ्यासेन = आवृत्त्या, तु = परन्तु, वैराग्येण च = वितृष्णया च, गृह्यते = वशीक्रियते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महाबाहो	उ. पुं. सम्बो. एक.	असंशयम्	अ. नपुं. द्वि. एक. (क्रिया विशेषणम्)
मनः	मनस्- सका. नपुं. प्र. एक. (विशेष्यम्)	दुर्निग्रहम्	अ. नपुं. प्र. एक. (विशेषणम्)
चलम्	अ. नपुं. प्र. एक. (विशेषणम्)	कौन्तेय	अ. पुं. सम्बो. एक.
अभ्यासेन	अ. पुं. तृ. एक.	तु	अव्ययम्
वैराग्येण	अ. पुं. तृ. एक.	च	अव्ययम्
गृह्यते	ग्रह् (ग्रह उपादाने) पर. कर्मणि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	मनो दुर्निग्रहम्	मनः + दुर्निग्रहम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
(ख) समासः	असंशयम्	न विद्यते संशयः यथा भवति तथा इति क्रियाविशेषणम्। क्रिया अत्र कथयत्यादिः ।	
	महाबाहो	महान्तौ बाहू यस्य सः महाबाहुः, सम्बुद्धौ - बहुव्रीहिः ।	
(ग) कृदन्तः	संशयम्	सम् + शी (शीङ् स्वप्ने) + अच्, तत् ।	
	दुर्निग्रहम्	दुर् + नि + ग्रह् (ग्रह उपादाने) + अप्, तत् ।	
	चलम्	चल् (चल कम्पने) + अच्, तत् ।	
	अभ्यासेन	अभि + आ + अस् (असु क्षेपणे) + घञ्, तेन ।	
(घ) तद्धितान्तः	कौन्तेय	कुन्ती + ढक् (अपत्यार्थे, एय इत्यादेशः) (कुन्त्याः अपत्यं पुमान्), तत्सम्बुद्धौ ।	
	वैराग्येण	विराग + ष्यञ् (भावे) विरागस्य भावः, तेन ।	

भावस्पष्टीकरणम् -

गृह्यते ।	
किं गृह्यते ?	**मनः** गृह्यते ।
कीदृशं मनः गृह्यते ?	**असंशयं** मनः गृह्यते ।
असंशयं **पुनः कीदृशं** मनः गृह्यते ?	असंशयं **दुर्निग्रहं** मनः गृह्यते ।

असंशयं दुर्निग्रहं **पुनः कीदृशं** मनः गृह्यते ?	असंशयं दुर्निग्रहं **चलं** मनः गृह्यते ।
असंशयं दुर्निग्रहं चलं मनः **केन** गृह्यते ?	असंशयं दुर्निग्रहं चलं मनः **अभ्यासेन तु** गृह्यते ।
असंशयं दुर्निग्रहं चलं मनः अभ्यासेन तु **पुनः केन** गृह्यते ?	असंशयं दुर्निग्रहं चलं मनः अभ्यासेन तु **वैराग्येण च** गृह्यते ।
अस्मिन् श्लोके सम्बोधनपदे के ?	**महाबाहो ! कौन्तेय !**

तात्पर्यम् - हे अर्जुन ! मनः नियन्त्रयितुम् अशक्यं, तद् अत्यन्तं चञ्चलं च इत्यत्र संशयः नास्ति । तथापि हे कौन्तेय ! अभ्यासेन वैराग्येण च तस्य नियन्त्रणं शक्यं भवति ।

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥६.३६॥

पदच्छेदः - असंयतात्मना, योगः, दुष्प्रापः, इति, मे, मतिः ।
वश्यात्मना, तु, यतता, शक्यः, अवाप्तुम्, उपायतः ॥

अन्वयः - असंयतात्मना योगः दुष्प्रापः इति मे मतिः । यतता वश्यात्मना तु उपायतः अवाप्तुं शक्यः ।

पदार्थः - असंयतात्मना = अनिरुद्धचित्तेन, योगः = समाधिः, दुष्प्रापः इति = दुर्लभः इति, मे मतिः = मम आशयः, यतता = प्रयत्नवता, वश्यात्मना तु = निगृहीतचित्तेन पुनः, उपायतः = साधनेन, अवाप्तुम् = लब्धुम्, शक्यः = साध्यः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
असंयतात्मना	असंयतात्मन्- न. पुं. तृ. एक. (विशेषणम्)	योगः	अ. पुं. प्र. एक. (विशेष्यम्)
दुष्प्रापः	अ. पुं. प्र. एक. (विशेषणम्)	इति	अव्ययम्
मे	अस्मद्- द. सर्व. ष. एक.	मतिः	इ. स्त्री. प्र. एक.
यतता	यतत्- त. पुं. तृ. एक. (विशेषणम्)	वश्यात्मना	वश्यात्मन्- न. पुं. तृ. एक. (विशेषणम्)
तु	अव्ययम्	उपायतः	अव्ययम्
अवाप्तुम्	तुमुन्नन्तम् अव्ययम्	शक्यः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	योगो दुष्प्रापः	योगः + दुष्प्रापः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	दुष्प्राप इति	दुष्प्रापः + इति	विसर्गसन्धिः (लोपः)।
	शक्योऽवाप्तुम्	शक्यः + अवाप्तुम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।

(ख) समासः	असंयतात्मना	संयतः आत्मा येन सः संयतात्मा - बहुव्रीहिः।
		न संयतात्मा असंयतात्मा, तेन - नञ्तत्पुरुषः।
	वश्यात्मना	वश्यः आत्मा यस्य सः वश्यात्मा, तेन - बहुव्रीहिः।
(ग) कृदन्तः	योगः	युज् (युजिर् योगे) + घञ्।
	दुष्प्रापः	दुस् + प्र + आप् (आप्लृ व्याप्तौ) + घञ्।
	मतिः	मन् (मन ज्ञाने) + क्तिन्।
	यतता	यत् (यती प्रयत्ने) + शतृ[1], तेन।
	शक्यः	शक् (शक्लृ शक्तौ) + यत्।
	अवाप्तुम्	अव + आप् (आप्लृ व्याप्तौ) + तुमुन्।
(घ) तद्धितान्तः	उपायतः	उपाय + तसिल्।

भावस्पष्टीकरणम् -

मतिः।	
कस्य मतिः ?	**मे** मतिः।
कः इति मे मतिः ?	**दुष्प्रापः** इति मे मतिः।
कः दुष्प्रापः इति मे मतिः ?	**योगः** दुष्प्रापः इति मे मतिः।
केन योगः दुष्प्रापः इति मे मतिः ?	**असंयतात्मना** योगः दुष्प्रापः इति मे मतिः।
शक्यः।	
किं कर्तुं शक्यः ?	**अवाप्तुं** शक्यः।
कुतः अवाप्तुं शक्यः ?	**उपायतः** अवाप्तुं शक्यः।
केन उपायतः अवाप्तुं शक्यः ?	**वश्यात्मना तु** उपायतः अवाप्तुं शक्यः।
किं कुर्वता वश्यात्मना तु उपायतः अवाप्तुं शक्यः ?	**यतता** वश्यात्मना तु उपायतः अवाप्तुं शक्यः।

1. अत्र 'यतता' इति शतृप्रत्ययत्वेन आर्षप्रयोगः।

तात्पर्यम् - अभ्यासेन वैराग्येण च यो मनः निग्रहीतुं न शक्नोति तस्य योगः दुर्लभः । किन्तु प्रयत्नशीलेन निगृहीतचित्तेन पुरुषेण साधनम् अवलम्ब्य सः योगः अपि प्राप्तुं शक्यः इति मे मतम् ।

अर्जुन उवाच - **अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।**
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥६.३७॥

पदच्छेदः -

अर्जुनः, उवाच - अयतिः, श्रद्धया, उपेतः, योगात्, चलितमानसः ।
अप्राप्य, योगसंसिद्धिम्, काम्, गतिम्, कृष्ण, गच्छति ॥

अन्वयः - कृष्ण ! श्रद्धया उपेतः अयतिः योगात् चलितमानसः योगसंसिद्धिम् अप्राप्य कां गतिं गच्छति ?

पदार्थः - कृष्ण = हे कृष्ण, श्रद्धया = आसक्त्या, उपेतः = युक्तः, अयतिः = प्रयत्नरहितः, योगात् = योगमार्गात्, चलितमानसः = भ्रष्टचित्तः, योगसंसिद्धिम् = योगफलम्, अप्राप्य = अलब्ध्वा, काम् = कीदृशीम्, गतिम् = स्थितिम्, गच्छति = प्राप्नोति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कृष्ण	अ. पुं. सम्बो. एक.	श्रद्धया	आ. स्त्री. तृ. एक.
उपेतः	अ. पुं. प्र. एक. (विशेषणम्)	अयतिः	इ. पुं. प्र. एक. (विशेषणम्)
योगात्	अ. पुं. पं. एक.	चलितमानसः	अ. पुं. प्र. एक. (विशेषणम्)
योगसंसिद्धिम्	इ. स्त्री. द्वि. एक.	अप्राप्य	ल्यबन्तम् अव्ययम्
काम्	किम्- म. सर्व. स्त्री. द्वि. एक. (विशेषणम्)	गतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)
गच्छति	गम् (गम्लृ गतौ) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः

श्रद्धयोपेतः	श्रद्धया + उपेतः	गुणसन्धिः ।
उपेतो योगात्	उपेतः + योगात्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
योगाच्चलितमानसः	योगात् + चलितमानसः	श्चुत्वसन्धिः ।

(ख) समासः

चलितमानसः	चलितं मानसं यस्य सः चलितमानसः - बहुव्रीहिः ।
अप्राप्य	न प्राप्य अप्राप्य - नञ्तत्पुरुषः ।

	योगसंसिद्धिम्	योगस्य संसिद्धिः योगसंसिद्धिः, ताम् - षष्ठीतत्पुरुषः।
	अयतिः	न विद्यते यतिः यस्य सः (बहुव्रीहिः)
(ग) कृदन्तः	उपेतः	उप + इ (इण् गतौ) + क्त (कर्तरि)।
	योगात्	युज् (युजिर् योगे) + घञ्, तस्मात्।
	चलितः	चल् (चल कम्पने) + क्तः (कर्तरि)।
	प्राप्य	प्र + आप् (आप्लृ व्याप्तौ) + ल्यप्।
	संसिद्धिः	सम् + सिध् (षिधु संराद्धौ) + क्तिन् (भावे)।
	गतिम्	गम् (गम्लृ गतौ) + क्तिन्, ताम्।
(घ) तद्धितान्तः	मानसम्	मनस् + अण् (स्वार्थे) (मनः एव मानसम्)।

भावस्पष्टीकरणम् -

गच्छति।	
कः गच्छति ?	**चलितमानसः** गच्छति।
कस्मात् चलितमानसः गच्छति ?	**योगात्** चलितमानसः गच्छति।
कः योगात् चलितमानसः गच्छति ?	**अयतिः** योगात् चलितमानसः गच्छति।
कीदृशः अयतिः योगात् चलितमानसः गच्छति ?	**उपेतः** अयतिः योगात् चलितमानसः गच्छति।
कया उपेतः अयतिः योगात् चलितमानसः गच्छति ?	**श्रद्धया** उपेतः अयतिः योगात् चलितमानसः गच्छति।
श्रद्धया उपेतः अयतिः योगात् चलितमानसः **कां** गच्छति ?	श्रद्धया उपेतः अयतिः योगात् चलितमानसः **गतिं** गच्छति।
श्रद्धया उपेतः अयतिः योगात् चलितमानसः **किं कृत्वा** गतिं गच्छति ?	श्रद्धया उपेतः अयतिः योगात् चलितमानसः **अप्राप्य** गतिं गच्छति।
श्रद्धया उपेतः अयतिः योगात् चलितमानसः **काम्** अप्राप्य गतिं गच्छति ?	श्रद्धया उपेतः अयतिः योगात् चलितमानसः **योगसंसिद्धिम्** अप्राप्य गतिं गच्छति।
श्रद्धया उपेतः अयतिः योगात् चलितमानसः योगसंसिद्धिम् अप्राप्य **तां** गतिं गच्छति।	श्रद्धया उपेतः अयतिः योगात् चलितमानसः योगसंसिद्धिम् अप्राप्य **कां** गतिं गच्छति ?
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कृष्ण** !

तात्पर्यम् - हे कृष्ण ! श्रद्धया युक्तः अपि यः अल्पप्रयत्नः भवति, तेन च यस्य मनः योगात् चलितं भवति सः योगस्य फलं ज्ञानं न प्राप्नोति। तस्य का गतिः भवति ?

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥६.३८॥

पदच्छेदः - कच्चित्, न, उभयविभ्रष्टः, छिन्नाभ्रम्, इव, नश्यति ।
अप्रतिष्ठः, महाबाहो, विमूढः, ब्रह्मणः, पथि ॥

अन्वयः - महाबाहो ! उभयविभ्रष्टः अप्रतिष्ठः ब्रह्मणः पथि विमूढः छिन्नाभ्रम् इव न नश्यति कच्चित् ।

पदार्थः - महाबाहो = दीर्घबाहो (कृष्ण), उभयविभ्रष्टः = मार्गद्वयप्रच्युतः, अप्रतिष्ठः = निराश्रयः, ब्रह्मणः = परमात्मनः, पथि =मार्गे, विमूढः = सम्मूढः, छिन्नाभ्रम् इव = भिन्नमेघवत्, न नश्यति कच्चित् = न प्रणश्यति किम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महाबाहो	उ. पुं. सम्बो. एक.	उभयविभ्रष्टः	अ. पुं. प्र. एक. (विशेषणम्)
अप्रतिष्ठः	अ. पुं. प्र. एक. (विशेष्यम्)	ब्रह्मणः	ब्रह्मन्- न. नपुं. ष. एक.
पथि	पथिन्- न. पुं. स. एक.	विमूढः	अ. पुं. प्र. एक. (विशेषणम्)
छिन्नाभ्रम्	अ. नपुं. द्वि. एक.	इव	अव्ययम्
न	अव्ययम्	नश्यति	नश् (णश अदर्शने) पर. कर्तरि लट्. प्रपु. एक.
कच्चित्	अव्ययम्		

व्याकरणम् -

(क) सन्धिः

कच्चिन्न	कच्चित् + न	अनुनासिकसन्धिः ।
नोभयविभ्रष्टः	न + उभयविभ्रष्टः	गुणसन्धिः ।
उभयविभ्रष्टश्छिन्नाभ्रम्	उभयविभ्रष्टः + छिन्नाभ्रम्	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
अप्रतिष्ठो महाबाहो	अप्रतिष्ठः + महाबाहो	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
विमूढो ब्रह्मणः	विमूढः + ब्रह्मणः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) समासः

उभयविभ्रष्टः	उभयस्मात् विभ्रष्टः उभयविभ्रष्टः - पञ्चमीतत्पुरुषः ।
छिन्नाभ्रम्	छिन्नम् अभ्रम् छिन्नाभ्रम् - कर्मधारयः ।
अप्रतिष्ठः	न विद्यते प्रतिष्ठा यस्य सः अप्रतिष्ठः - बहुव्रीहिः ।
महाबाहो	महान्तौ बाहू यस्य सः महाबाहुः, तत्सम्बुद्धौ - बहुव्रीहिः ।

(ग) कृदन्तः

विभ्रष्टः	वि + भ्रंश् (भ्रंशु अधःपतने) + क्त (कर्तरि) ।
विमूढः	वि + मुह् (मुह वैचित्त्ये) + क्त (कर्तरि) ।

भावस्पष्टीकरणम् -

न नश्यति कच्चित् ।	
कः न नश्यति कच्चित् ?	**उभयविभ्रष्टः** न नश्यति कच्चित् ।
उभयविभ्रष्टः **कीदृशः** न नश्यति कच्चित् ?	उभयविभ्रष्टः **अप्रतिष्ठः** न नश्यति कच्चित् ।
उभयविभ्रष्टः अप्रतिष्ठः **कः** न नश्यति कच्चित् ?	उभयविभ्रष्टः अप्रतिष्ठः **विमूढः** न नश्यति कच्चित् ।
उभयविभ्रष्टः अप्रतिष्ठः **कस्मिन्** विमूढः न नश्यति कच्चित् ?	उभयविभ्रष्टः अप्रतिष्ठः **पथि** विमूढः न नश्यति कच्चित् ।
उभयविभ्रष्टः अप्रतिष्ठः **कस्य** पथि विमूढः न नश्यति कच्चित् ?	उभयविभ्रष्टः अप्रतिष्ठः **ब्रह्मणः** पथि विमूढः न नश्यति कच्चित् ।
उभयविभ्रष्टः अप्रतिष्ठः ब्रह्मणः पथि विमूढः **किमिव** न नश्यति कच्चित् ?	उभयविभ्रष्टः अप्रतिष्ठः ब्रह्मणः पथि विमूढः **छिन्नाभ्रमिव** न नश्यति कच्चित् ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**महाबाहो !**

तात्पर्यम् - ब्रह्मप्राप्तिमार्गे मोहमापन्नः निराश्रयः कर्ममार्गात् योगमार्गात् च यः विभ्रष्टः सः वायुना विच्छिन्नः मेघखण्डः इव न नश्यति किम् ?

एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥६.३९॥

पदच्छेदः - एतत्, मे, संशयम्, कृष्ण, छेत्तुम्, अर्हसि, अशेषतः ।
त्वत्, अन्यः, संशयस्य, अस्य, छेत्ता, न, हि, उपपद्यते ॥

अन्वयः - कृष्ण ! एतत् मे संशयम् अशेषतः छेत्तुम् अर्हसि । त्वदन्यः हि अस्य संशयस्य छेत्ता न उपपद्यते ।

पदार्थः - कृष्ण = हे कृष्ण, एतत् = पूर्वोक्तम्, मे = मम, संशयम् = सन्देहम्, अशेषतः = समग्रम्, छेत्तुम् = परिहर्तुम्, अर्हसि = योग्यः असि, त्वदन्यः = भवतोऽन्यः, हि = यतः,अस्य = एतस्य, संशयस्य = सन्देहस्य, छेत्ता = नाशयिता, न उपपद्यते = न विद्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कृष्ण	अ. पुं. सम्बो. एक.	एतत्	एतद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
मे	अस्मद्- द. सर्व. ष. एक.	संशयम्	अ. पुं. द्वि. एक. (विशेष्यम्)

अशेषतः	अव्ययम्	छेत्तुम्	तुमुन्नन्तम् अव्ययम्
अर्हसि	अर्ह् (अर्ह पूजायाम्) पर. कर्तरि लट्. मपु. एक.	त्वदन्यः	अ. पुं. प्र. एक. (विशेष्यम्)
हि	अव्ययम्	अस्य	इदम्- म. सर्व. पुं. ष. एक.
संशयस्य	अ. पुं. ष. एक. (विशेष्यम्)	छेत्ता	ऋ. पुं. प्र. एक. (विशेषणम्)
न	अव्ययम्	उपपद्यते	उप + पद् (पद गतौ) आत्म. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	एतन्मे	एतत् + मे	अनुनासिकसन्धिः।
	अर्हस्यशेषतः	अर्हसि + अशेषतः	यण्सन्धिः।
	त्वदन्यः	त्वत् + अन्यः	जश्त्वसन्धिः।
	संशयस्यास्य	संशयस्य + अस्य	सवर्णदीर्घसन्धिः।
	ह्युपपद्यते	हि + उपपद्यते	यण्सन्धिः।
(ख) समासः	अशेषतः	न शेषः अशेषः, तम् - नञ्तत्पुरुषः) (ततः स्वार्थे तसिल्)।	
(ग) कृदन्तः	संशयम्	सम् + शी (शीङ् स्वप्ने) + अच्, तम्।	
	छेत्तुम्	छिद् (छिदिर् द्वैधीकरणे) + तुमुन्।	
	छेत्ता	छिद् (छिदिर् द्वैधीकरणे) + तृच् (कर्तरि)।	
(घ) तद्धितान्तः	शेषतः	शेष + तसिल्।	

भावस्पष्टीकरणम् -

अर्हसि।	
किं कर्तुम् अर्हसि ?	**छेत्तुम्** अर्हसि।
कथं छेत्तुम् अर्हसि ?	**अशेषतः** छेत्तुम् अर्हसि।
कम् अशेषतः छेत्तुम् अर्हसि ?	**संशयम्** अशेषतः छेत्तुम् अर्हसि।
कस्य संशयम् अशेषतः छेत्तुम् अर्हसि ?	**मे** संशयम् अशेषतः छेत्तुम् अर्हसि।
किं मे संशयम् अशेषतः छेत्तुम् अर्हसि ?	**एतत्** मे संशयम् अशेषतः छेत्तुम् अर्हसि।
एतत् मे संशयम् अशेषतः छेत्तुम् अर्हसि (पुनः) **किम्** ?	एतत् मे संशयम् अशेषतः छेत्तुम् अर्हसि (पुनः) न **उपपद्यते।**

एतत् मे संशयम् अशेषतः छेत्तुम् अर्हसि **कः** न उपपद्यते ?	एतत् मे संशयम् अशेषतः छेत्तुम् अर्हसि **छेत्ता** न उपपद्यते ।
एतत् मे संशयम् अशेषतः छेत्तुम् अर्हसि **कीदृशः** छेत्ता न उपपद्यते ?	एतत् मे संशयम् अशेषतः छेत्तुम् अर्हसि **त्वदन्यः** छेत्ता न उपपद्यते ।
एतत् मे संशयम् अशेषतः छेत्तुम् अर्हसि त्वदन्यः **कस्य** छेत्ता न उपपद्यते ?	एतत् मे संशयम् अशेषतः छेत्तुम् अर्हसि त्वदन्यः **संशयस्य** छेत्ता न उपपद्यते ।
एतत् मे संशयम् अशेषतः छेत्तुम् अर्हसि त्वदन्यः **कस्य** संशयस्य छेत्ता न उपपद्यते ?	एतत् मे संशयम् अशेषतः छेत्तुम् अर्हसि त्वदन्यः हि **अस्य** संशयस्य छेत्ता न उपपद्यते ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कृष्ण !**

तात्पर्यम् - मम एतं संशयं निरवशेषम् अपनेतुं भवान् एव अर्हति । ऋते भवतः अस्य संशयस्य अपनेता अन्यः कोऽपि नैव विद्यते ।

श्रीभगवानुवाच - **पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।**
न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥६.४०॥

पदच्छेदः -

श्रीभगवान्, उवाच - पार्थ, न, एव, इह, न, अमुत्र, विनाशः, तस्य, विद्यते ।
न, हि, कल्याणकृत्, कश्चित्, दुर्गतिम्, तात, गच्छति ॥

अन्वयः - पार्थ ! इह तस्य विनाशः न एव विद्यते । अमुत्र न । तात ! कल्याणकृत् हि कश्चित् दुर्गतिं न गच्छति ।

पदार्थः - पार्थ = हे अर्जुन, इह = अत्र, तस्य = तादृशस्य योगभ्रष्टस्य, विनाशः = नाशः, न एव विद्यते = नास्ति एव, अमुत्र = परलोके, न = न भवति एव, तात = वत्स, कल्याणकृत् = शुभकृत्, हि = यस्मात्, कश्चित् = कोऽपि, दुर्गतिम् = कुत्सितगतिम्, न गच्छति = न प्राप्नोति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	इह	अव्ययम्
तस्य	तद्- द. सर्व. पुं. ष. एक. (विशेषणम्)	विनाशः	अ. पुं. प्र. एक.
न	अव्ययम्	एव	अव्ययम्

विद्यते	विद् (विद सत्तायाम्) आत्म. कर्तरि लट्. प्रपु. एक.	अमुत्र	अव्ययम्
तात	अ. पुं. सम्बो. एक.	कल्याणकृत्	कल्याणकृत्- त. पुं. प्र. एक.
हि	अव्ययम्	कश्चित्	अव्ययम्
दुर्गतिम्	इ. स्त्री. द्वि. एक.	गच्छति	गम् (गम्लृ गतौ) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	नैव	न + एव	वृद्धिसन्धिः।
	एवेह	एव + इह	गुणसन्धिः।
	नामुत्र	न + अमुत्र	सवर्णदीर्घसन्धिः।
	विनाशस्तस्य	विनाशः + तस्य	विसर्गसन्धिः (सकारः)।
	कश्चिद्दुर्गतिम्	कश्चित् + दुर्गतिम्	जश्त्वसन्धिः।
(ख) समासः	कल्याणकृत्	कल्याणं करोति इति कल्याणकृत् - कर्तरि क्विप् उपपदसमासश्च।	
	दुर्गतिम्	दुष्टा गतिः दुर्गतिः, ताम् - प्रादितत्पुरुषः।	
(ग) कृदन्तः	विनाशः	वि + नश् (णश अदर्शने) + घञ् (भावे)।	
	गतिम्	गम् (गम्लृ गतौ) + क्तिन्, ताम्।	
(घ) तद्धितान्तः	पार्थ	पृथा + अण्, (अपत्यार्थे) पृथायाः अपत्यं पुमान्, तत्सम्बुद्धौ।	

भावस्पष्टीकरणम् -

न एव विद्यते।	
कः न एव विद्यते?	**विनाशः** न एव विद्यते।
कस्य विनाशः न एव विद्यते?	**तस्य** विनाशः न एव विद्यते।
कुत्र तस्य विनाशः न एव विद्यते?	**इह** तस्य विनाशः न एव विद्यते।
इह तस्य विनाशः न एव विद्यते, **पुनः कुत्र न**?	इह तस्य विनाशः न एव विद्यते, **अमुत्र न**।
न गच्छति।	
कां न गच्छति?	**दुर्गतिं** न गच्छति।
कः दुर्गतिं न गच्छति?	**कश्चित्** दुर्गतिं न गच्छति।

कीदृशः कश्चित् दुर्गतिं न गच्छति ?	**कल्याणकृत् हि कश्चित् दुर्गतिं न गच्छति ।**
अस्मिन् श्लोके सम्बोधनपदे के ?	**पार्थ ! तात !**

तात्पर्यम् - हे अर्जुन ! यः योगमार्गात् भ्रष्टः भवति तस्य इह लोके परस्मिन् लोके वा पतनम्, अर्थात् पूर्वस्माद् हीनजन्मप्राप्तिः न भवति । यतः हे तात ! शुभस्य कर्ता कोऽपि जनः कथञ्चिदपि दुर्गतिं न प्राप्नोति ।

प्राप्य पुण्यकृताँल्लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥६.४१॥

पदच्छेदः - प्राप्य, पुण्यकृताम्, लोकान्, उषित्वा, शाश्वतीः, समाः ।
शुचीनाम्, श्रीमताम्, गेहे, योगभ्रष्टः, अभिजायते ॥

अन्वयः - योगभ्रष्टः पुण्यकृतां लोकान् प्राप्य शाश्वतीः समाः उषित्वा शुचीनां श्रीमतां गेहे अभिजायते ।

पदार्थः - योगभ्रष्टः = योगात् च्युतः, पुण्यकृताम् = पुण्यकर्मणाम्, लोकान् = भुवनानि, प्राप्य = लब्ध्वा, शाश्वतीः = शाश्वतीः, समाः = वत्सरान्, उषित्वा = वासम् अनुभूय, शुचीनाम् = पवित्राणाम्, श्रीमताम् = विभूतिमताम्, गेहे = गृहे, अभिजायते = उत्पद्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
योगभ्रष्टः	अ. पुं. प्र. एक. (विशेषणम्)	पुण्यकृताम्	पुण्यकृत्- त. पुं. ष. बहु. (विशेषणम्)
लोकान्	अ. पुं. द्वि. बहु.	प्राप्य	ल्यबन्तम् अव्ययम्
शाश्वतीः	ई. स्त्री. द्वि. बहु. (विशेष्यम्)	समाः	आ. स्त्री. द्वि. बहु. (विशेषणम्)
उषित्वा	क्त्वान्तम् अव्ययम्	शुचीनाम्	इ. पुं. ष. बहु. (विशेषणम्)
श्रीमताम्	श्रीमत्- त. पुं. ष. बहु. (विशेषणम्)	गेहे	अ. नपुं. स. एक.
अभिजायते	अभि + जन् (जनी प्रादुर्भावे) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः

पुण्यकृताँल्लोकान्	पुण्यकृताम् + लोकान्	अनुनासिकसन्धिः ।
योगभ्रष्टोऽभिजायते	योगभ्रष्टः + अभिजायते	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

(ख) समासः	पुण्यकृताम्	पुण्यं कुर्वन्ति इति पुण्यकृतः, तेषाम् - कर्तरि क्विप् उपपदसमासश्च ।
	योगभ्रष्टः	योगात् भ्रष्टः योगभ्रष्टः - पञ्चमीतत्पुरुषः ।
(ग) कृदन्तः	प्राप्य	प्र + आप् (आप्लृ व्याप्तौ) + ल्यप् ।
	लोकान्	लोक् (लोकृ दर्शने) + घञ् (भावे), तान् ।
	उषित्वा	वस् (वस निवासे) + क्त्वा ।
	योगः	युज् (युजिर् योगे) + घञ् ।
	भ्रष्टः	भ्रंश् (भ्रंशु अधःपतने) + क्त (कर्तरि) ।
(घ) तद्धितान्तः	शाश्वतीः	शश्वत् + अण् + ङीप् (स्त्रीत्वे), ताः (शश्वद् भवाः इत्यर्थः) ।
	श्रीमताम्	श्री + मतुप्, तेषाम् (श्रीः एषाम् एषु वा अस्ति) ।

भावस्पष्टीकरणम् -

अभिजायते ।	
कुत्र अभिजायते ?	गेहे अभिजायते ।
केषां गेहे अभिजायते ?	**श्रीमतां** गेहे अभिजायते ।
कीदृशानां श्रीमतां गेहे अभिजायते ?	**शुचीनां** श्रीमतां गेहे अभिजायते ।
किं कृत्वा शुचीनां श्रीमतां गेहे अभिजायते ?	**उषित्वा** शुचीनां श्रीमतां गेहे अभिजायते ।
काः उषित्वा शुचीनां श्रीमतां गेहे अभिजायते ?	**समाः** उषित्वा शुचीनां श्रीमतां गेहे अभिजायते ।
कीदृशीः समाः उषित्वा शुचीनां श्रीमतां गेहे अभिजायते ?	**शाश्वतीः** समाः उषित्वा शुचीनां श्रीमतां गेहे अभिजायते ।
किं कृत्वा शाश्वतीः समाः उषित्वा शुचीनां श्रीमतां गेहे अभिजायते ?	**प्राप्य** शाश्वतीः समाः उषित्वा शुचीनां श्रीमतां गेहे अभिजायते ।
कान् प्राप्य शाश्वतीः समाः उषित्वा शुचीनां श्रीमतां गेहे अभिजायते ?	**लोकान्** प्राप्य शाश्वतीः समाः उषित्वा शुचीनां श्रीमतां गेहे अभिजायते ।
केषां लोकान् प्राप्य शाश्वतीः समाः उषित्वा शुचीनां श्रीमतां गेहे अभिजायते ?	**पुण्यकृतां** लोकान् प्राप्य शाश्वतीः समाः उषित्वा शुचीनां श्रीमतां गेहे अभिजायते ।
कः पुण्यकृतां लोकान् प्राप्य शाश्वतीः समाः उषित्वा शुचीनां श्रीमतां गेहे अभिजायते ?	**योगभ्रष्टः** पुण्यकृतां लोकान् प्राप्य शाश्वतीः समाः उषित्वा शुचीनां श्रीमतां गेहे अभिजायते ।

तात्पर्यम् - सः योगभ्रष्टः पुण्यकर्मभिः प्राप्यमाणान् लोकान् प्राप्य तत्र अनेकसंवत्सरं वसति । ततः सदाचारसम्पन्नानां धनिनां गृहे जन्म प्राप्नोति ।

अथवा योगिनामेव कुले भवति धीमताम्।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम्॥६.४२॥

पदच्छेदः - अथवा, योगिनाम्, एव, कुले, भवति, धीमताम्।
एतत्, हि, दुर्लभतरम्, लोके, जन्म, यत्, ईदृशम्॥

अन्वयः - अथवा धीमतां योगिनां कुले एव भवति। यत् एतत् ईदृशं हि जन्म लोके दुर्लभतरम्।

पदार्थः - अथवा = यद्वा, धीमताम् = बुद्धिमताम्, योगिनाम् = युक्तानाम्, कुले एव = वंशे एव, भवति = जायते, यत् एतत् हि = यदिदम्, ईदृशम् = एवंविधम्, जन्म = जन्म, लोके = भुवने, दुर्लभतरम् = अत्यन्तं दुष्प्रापम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अथवा	अव्ययम्	धीमताम्	धीमत्- त. पुं. ष. बहु. (विशेषणम्)
योगिनाम्	योगिन्- न. पुं. ष. बहु. (विशेषणम्)	कुले	अ. नपुं. स. एक.
एव	अव्ययम्	भवति	भू (भू सत्तायाम्) पर. कर्तरि लट्. प्रपु. एक.
यत्	यद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	एतत्	एतद्- द. सर्व. नपुं. प्र. एक.
हि	अव्ययम्	ईदृशम्	अ. नपुं. प्र. एक. (विशेषणम्)
जन्म	जन्मन्- न. नपुं. प्र. एक. (विशेष्यम्)	लोके	अ. पुं. स. एक.
दुर्लभतरम्	अ. नपुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः एतद्धि — एतत् + हि — पूर्वसवर्णसन्धिः।
यदीदृशम् — यत् + ईदृशम् — जश्त्वसन्धिः।

(ख) कृदन्तः लोके — लोक् (लोकृ दर्शने) + घञ् (भावे), तस्मिन्।

(ग) तद्धितान्तः योगिनाम् — योग + इनि (मतुबर्थे) (योगः अस्य अस्मिन् वा अस्ति), तेषाम्।
धीमताम् — धी + मतुप्, तेषाम् (धीः एषाम् एषु वा अस्ति)।
दुर्लभतरम् — दुर्लभ + तरप्, अतिशयेन दुर्लभं दुर्लभतरम् (द्वयोः अन्यतरस्मिन् अतिशये तरप्)।

भावस्पष्टीकरणम् -

भवति ।	
अथवा कस्मिन् भवति ?	**अथवा कुले एव** भवति ।
अथवा **केषां** कुले एव भवति ?	अथवा **योगिनां** कुले एव भवति ।
अथवा **कीदृशानां** योगिनां कुले एव भवति ?	अथवा **धीमतां** योगिनां कुले एव भवति ।
अथवा धीमतां योगिनां कुले एव भवति **यत् कथम् (भवति)** ?	अथवा धीमतां योगिनां कुले एव भवति **यत् दुर्लभतरम् (भवति)** ।
अथवा धीमतां योगिनां कुले एव भवति यत् **किं** दुर्लभतरम् (भवति) ?	अथवा धीमतां योगिनां कुले एव भवति यत् **जन्म** दुर्लभतरम् (भवति) ।
अथवा धीमतां योगिनां कुले एव भवति यत् **कीदृशं** जन्म दुर्लभतरम् (भवति) ?	अथवा धीमतां योगिनां कुले एव भवति यत् **एतत् ईदृशं हि** जन्म दुर्लभतरम् (भवति) ।
अथवा धीमतां योगिनां कुले एव भवति यत् एतत् ईदृशं हि जन्म **कुत्र** दुर्लभतरम् (भवति) ?	अथवा धीमतां योगिनां कुले एव भवति यत् एतत् ईदृशं हि जन्म **लोके** दुर्लभतरम् (भवति) ।

तात्पर्यम् - अथवा ब्रह्मविद्यावतां योगिनां कुले जन्म प्राप्नोति। जगति एवं योगिनां कुले जन्मप्राप्तिः तु अत्यन्तं दुर्लभा।

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥६.४३॥

पदच्छेदः - तत्र, तम्, बुद्धिसंयोगम्, लभते, पौर्वदेहिकम्।
यतते, च, ततः, भूयः, संसिद्धौ, कुरुनन्दन ॥

अन्वयः - कुरुनन्दन ! तत्र तं पौर्वदेहिकं बुद्धिसंयोगं लभते। ततः च संसिद्धौ भूयः यतते।

पदार्थः - कुरुनन्दन = हे अर्जुन, तत्र = तत्र कुले, तम् = तम्, पौर्वदेहिकम् = पूर्वशरीरसम्बन्धिनम्, बुद्धिसंयोगम् = मतिसम्बन्धम्, लभते = प्राप्नोति, ततः च = तस्मात्, संसिद्धौ = योगसिद्धौ, भूयः = पुनः अधिकम्, यतते = प्रयत्नं करोति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कुरुनन्दन	अ. पुं. सम्बो. एक.	तत्र	अव्ययम्

तम्	तद्- द. सर्व. पुं. द्वि. एक. (विशेषणम्)	पौर्वदेहिकम्	अ. पुं. द्वि. एक. (विशेषणम्)
बुद्धिसंयोगम्	अ. पुं. द्वि. एक (विशेष्यम्)	लभते	लभ् (डुलभष् प्राप्तौ) आत्म. कर्तरि लट्. प्रपु. एक.
ततः	अव्ययम्	च	अव्ययम्
संसिद्धौ	इ. स्त्री. स. एक.	भूयः	अव्ययम्
यतते	यत् (यती प्रयत्ने) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	ततो भूयः	ततः + भूयः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) समासः	बुद्धिसंयोगम्	बुद्धेः संयोगः, तम् - षष्ठीतत्पुरुषः।	
	कुरुनन्दन	कुरूणां नन्दनः कुरुनन्दनः तत्सम्बुद्धौ - षष्ठीतत्पुरुषः।	
(ग) कृदन्तः	बुद्धिः	बुध् (बुध अवगमने) + क्तिन्।	
	संयोगम्	सम् + युज् (युजिर् योगे) + घञ्, तम्।	
	संसिद्धौ	सम् + सिद् (षिधु संराद्धौ) + क्तिन् (भावे), तस्याम्।	
(घ) तद्धितान्तः	पौर्वदेहिकम्	पूर्वदेह + ठक्, तम् (पूर्वदेहे भवः)।	

भावस्पष्टीकरणम् -

लभते।	
कं लभते ?	**बुद्धिसंयोगं** लभते।
कीदृशं बुद्धिसंयोगं लभते ?	**पौर्वदेहिकं** बुद्धिसंयोगं लभते।
कं पौर्वदेहिकं बुद्धिसंयोगं लभते ?	**तं** पौर्वदेहिकं बुद्धिसंयोगं लभते ?
कुत्र तं पौर्वदेहिकं बुद्धिसंयोगं लभते ?	**तत्र** तं पौर्वदेहिकं बुद्धिसंयोगं लभते ?
तत्र तं पौर्वदेहिकं बुद्धिसंयोगं लभते **ततः च किं भवति** ?	तत्र तं पौर्वदेहिकं बुद्धिसंयोगं लभते **ततः च यतते**।
तत्र तं पौर्वदेहिकं बुद्धिसंयोगं लभते ततः च **कथं** यतते ?	तत्र तं पौर्वदेहिकं बुद्धिसंयोगं लभते ततः च **भूयः** यतते।
तत्र तं पौर्वदेहिकं बुद्धिसंयोगं लभते ततः च **कस्यां** भूयः यतते ?	तत्र तं पौर्वदेहिकं बुद्धिसंयोगं लभते ततः च **संसिद्धौ** भूयः यतते।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कुरुनन्दन** !

तात्पर्यम् - हे अर्जुन ! योऽयं योगभ्रष्टः श्रीमतां योगिनां कुले जातः पूर्वस्मिन् देहे या बुद्धिः आसीत् तामेव आत्मविषयिकां बुद्धिं प्राप्नोति । ततः सः मोक्षार्थं पुनः प्रयत्नं करोति । अर्थात् तस्य सञ्चितपुण्यप्रभावः तदापि तिष्ठति ।

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥६.४४॥

पदच्छेदः - पूर्वाभ्यासेन, तेन, एव, ह्रियते, हि, अवशः, अपि, सः ।
जिज्ञासुः अपि, योगस्य, शब्दब्रह्म, अतिवर्तते ॥

अन्वयः - सः अवशः अपि तेन पूर्वाभ्यासेन एव ह्रियते । योगस्य जिज्ञासुः अपि शब्दब्रह्म अतिवर्तते हि ।

पदार्थः - सः = तादृशः पुरुषः, अवशः अपि = अनधीनोऽपि (अनीशोऽपि), तेन = तेन, पूर्वाभ्यासेन एव = पूर्वजन्मसंस्कारेणैव, ह्रियते = आकृष्यते, योगस्य = योगमार्गस्य, जिज्ञासुः अपि = ज्ञानेच्छुः अपि, शब्दब्रह्म = कर्मप्रतिपादकवेदभागम्, अतिवर्तते हि = अतिक्राम्यति खलु ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	अवशः	अ. पुं. प्र. एक. (विशेषणम्)
अपि	अव्ययम्	तेन	तद्- द. सर्व. पुं. तृ. एक. (विशेषणम्)
पूर्वाभ्यासेन	अ. पुं. तृ. एक. (विशेष्यम्)	एव	अव्ययम्
ह्रियते	हृ (हृञ् हरणे) पर. कर्मणि लट्. प्रपु. एक.	योगस्य	अ. पुं. ष. एक.
जिज्ञासुः	उ. पुं. प्र. एक.	शब्दब्रह्म	शब्दब्रह्मन्- न. नपुं. द्वि. एक.
अतिवर्तते	अति + वृत् (वृतु वर्तने) आत्म. कर्तरि लट्. प्र. एक.	हि	अव्ययम्

व्याकरणम् -

(क) सन्धिः

तेनैव	तेन + एव	वृद्धिसन्धिः ।
ह्यवशः	हि + अवशः	यण्सन्धिः ।
अवशोऽपि	अवशः + अपि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
जिज्ञासुरपि	जिज्ञासुः + अपि	विसर्गसन्धिः (रेफः) ।
शब्दब्रह्मातिवर्तते	शब्दब्रह्म + अतिवर्तते	सवर्णदीर्घसन्धिः ।

(ख) समासः	पूर्वाभ्यासेन	पूर्वकृतः अभ्यासः पूर्वाभ्यासः, तेन - मध्यमपदलोपी तत्पुरुषः ।
	अवशः	न वशः अवशः - नञ्तत्पुरुषः ।
	शब्दब्रह्म	शब्दरूपं ब्रह्म - मध्यमपुरुषः ।
(ग) कृदन्तः	अभ्यासेन	अभि + आ + अस् (असु क्षेपणे) + घञ्, तेन ।
	वशः	वश् (वश कान्तौ) + अच् (कर्तरि) ।
	जिज्ञासुः	ज्ञा (ज्ञा अवबोधने) + सन् (इच्छायाम्) + उ (कर्तरि) ।
	योगस्य	युज् (युजिर् योगे) + घञ्, तस्य ।

भावस्पष्टीकरणम् -

ह्रियते ।	
कः ह्रियते ?	**सः** ह्रियते ।
सः **कीदृशः** ह्रियते ?	सः **अवशः** अपि ह्रियते ।
सः अवशः अपि **केन** ह्रियते ?	सः अवशः अपि **पूर्वाभ्यासेन** ह्रियते ।
सः अवशः अपि **केन** पूर्वाभ्यासेन ह्रियते ?	सः अवशः अपि **तेन** पूर्वाभ्यासेन एव ह्रियते ।
अतिवर्तते हि ।	
कः अतिवर्तते हि ?	**जिज्ञासुः** अपि अतिवर्तते हि ।
कस्य जिज्ञासुः अपि अतिवर्तते हि ?	**योगस्य** जिज्ञासुः अपि अतिवर्तते हि ।
योगस्य जिज्ञासुः अपि **किम्** अतिवर्तते हि ?	योगस्य जिज्ञासुः अपि **शब्दब्रह्म** अतिवर्तते हि ।

तात्पर्यम् - सः योगभ्रष्टः जन्मान्तरीयस्य अभ्यासस्य वशात् विषयाणाम् अभिमुखोऽपि तस्मिन् जन्मनि योगम् एव अभिगच्छति । योगस्य जिज्ञासुः अपि सः वेदोक्तकर्मफलम् अतिक्रम्य वर्तते । कर्माधिकारम् उपेक्ष्य ज्ञानाधिकारे एव निष्ठां करोति इत्यर्थः ।

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्विषः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥६.४५॥

पदच्छेदः - प्रयत्नात्, यतमानः, तु, योगी, संशुद्धकिल्विषः ।
अनेकजन्मसंसिद्धः, ततः, याति, पराम्, गतिम् ॥

अन्वयः - संशुद्धकिल्विषः प्रयत्नात् यतमानः योगी तु अनेकजन्मसंसिद्धः ततः परां गतिं याति ।

पदार्थः - संशुद्धकिल्विषः = विनष्टपापः, प्रयत्नात् = अधिकयत्नात्, यतमानः = प्रवर्तमानः, योगी तु = युक्तः

तु, अनेकजन्मसंसिद्धः = नानाजन्मसुपरिशुद्धः, ततः = तस्मात् अनन्तरम्, पराम् = प्रकृष्टाम्, गतिम् = स्थानम्, याति = गच्छति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
संशुद्धकिल्विषः	अ. पुं. प्र. एक. (विशेषणम्)	प्रयत्नात्	अ. पुं. पं. एक.
यतमानः	अ. पुं. प्र. एक. (विशेषणम्)	योगी	योगिन्- न. पुं. प्र. एक. (विशेष्यम्)
तु	अव्ययम्	अनेकजन्म-संसिद्धः	अ. पुं. प्र. एक. (विशेषणम्)
ततः	अव्ययम्	पराम्	आ. स्त्री. द्वि. एक. (विशेषणम्)
गतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)	याति	या (या प्रापणे) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	प्रयत्नाद्यतमानः	प्रयत्नात् + यतमानः	जश्त्वसन्धिः ।
	यतमानस्तु	यतमानः + तु	विसर्गसन्धिः (सकारः) ।
	अनेकजन्मसंसिद्धस्ततः	अनेकजन्मसंसिद्धः + ततः	विसर्गसन्धिः (सकारः) ।
	ततो याति	ततः + याति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
(ख) समासः	संशुद्धकिल्विषः	संशुद्धं किल्विषं यस्य सः संशुद्धकिल्विषः - बहुव्रीहिः ।	
	अनेकजन्मसंसिद्धः	अनेकानि च तानि जन्मानि अनेकजन्मानि - कर्मधारयः ।	
		अनेकजन्मसु संसिद्धः अनेकजन्मसंसिद्धः - सप्तमीतत्पुरुषः ।	
(ग) कृदन्तः	यतमानः	यत् (यती प्रयत्ने) + शानच् (कर्तरि) ।	
	संशुद्धः	सम् + शुध् (शुध शौचे) + क्त (कर्तरि) ।	
	संसिद्धः	सम् + सिध् (षिधु संराद्धौ) + क्त (कर्तरि) ।	
	गतिम्	गम् (गम्लृ गतौ) + क्तिन्, ताम् ।	
(घ) तद्धितान्तः	योगी	योग + इनि (मतुबर्थे) (योगः अस्य अस्मिन् वा अस्ति) ।	

भावस्पष्टीकरणम् -

याति ।	
कः याति ?	**योगी** याति ।
कीदृशः योगी याति ?	**संशुद्धकिल्विषः** योगी याति ।
संशुद्धकिल्विषः **पुनः कीदृशः** योगी याति ?	संशुद्धकिल्विषः **यतमानः** योगी याति ।

संशुद्धकिल्विषः **कथं** यतमानः योगी याति ?	संशुद्धकिल्विषः **प्रयत्नात्** यतमानः योगी याति ।
संशुद्धकिल्विषः प्रयत्नात् यतमानः **पुनः कीदृशः** योगी याति ?	संशुद्धकिल्विषः प्रयत्नात् यतमानः **अनेकजन्मसंसिद्धः** योगी याति ।
संशुद्धकिल्विषः प्रयत्नात् यतमानः अनेकजन्मसंसिद्धः योगी **कां** याति ?	संशुद्धकिल्विषः प्रयत्नात् यतमानः अनेकजन्मसंसिद्धः योगी **तु गतिं** याति ।
संशुद्धकिल्विषः प्रयत्नात् यतमानः अनेकजन्मसंसिद्धः योगी तु **कीदृशीं** गतिं याति ?	संशुद्धकिल्विषः प्रयत्नात् यतमानः अनेकजन्मसंसिद्धः योगी तु **परां** गतिं याति ।
संशुद्धकिल्विषः प्रयत्नात् यतमानः अनेकजन्मसंसिद्धः योगी तु **कुतः** परां गतिं याति ?	संशुद्धकिल्विषः प्रयत्नात् यतमानः अनेकजन्मसंसिद्धः योगी तु **ततः** परां गतिं याति ।

तात्पर्यम् - पूर्वोक्तप्रकारेण यत्नेन योगे पुनः पुनः प्रवर्तमानस्य योगिनः सर्वाणि अपि पापानि विनश्यन्ति । विनष्टपापः सः बहुषु जन्मसु शुद्धो भूत्वा मुक्तिरूपां परमां गतिं प्राप्नोति ।

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥६.४६॥

पदच्छेदः - तपस्विभ्यः, अधिकः, योगी, ज्ञानिभ्यः, अपि, मतः, अधिकः ।
कर्मिभ्यः, च, अधिकः, योगी, तस्मात्, योगी, भव, अर्जुन ॥

अन्वयः - योगी तपस्विभ्यः अधिकः मतः, ज्ञानिभ्यः अपि अधिकः, कर्मिभ्यः च अधिकः । अर्जुन ! तस्मात् योगी भव ।

पदार्थः - योगी = योगी, तपस्विभ्यः = तापसेभ्यः, अधिकः = प्रकृष्टः, मतः = इष्टः, ज्ञानिभ्यः अपि = पण्डितेभ्यः अपि, अधिकः = प्रकृष्टः, कर्मिभ्यः च = सकामकर्मकर्तृभ्यः अपि, अधिकः = प्रकृष्टः, अर्जुन = हे पार्थ !, तस्मात् = हेतोः, योगी = ध्यानयोगी, भव = जायस्व ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
योगी	योगिन्- न. पुं. प्र. एक. (विशेष्यम्)	तपस्विभ्यः	तपस्विन्- न. पुं. पं. बहु.
अधिकः	अ. पुं. प्र. एक. (विशेषणम्)	मतः	अ. पुं. प्र. एक. (विशेषणम्)
ज्ञानिभ्यः	ज्ञानिन्- न. पुं. पं. बहु.	अपि	अव्ययम्

कर्मिभ्यः	कर्मिन्- न. पुं. पं. बहु.	च	अव्ययम्
अर्जुन	अ. पुं. सम्बो. एक.	तस्मात्	तद्- द. सर्व. पुं. पं. एक.
भव	भू (भू सत्तायाम्) पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः	तपस्विभ्योऽधिकः	तपस्विभ्यः + अधिकः	विसर्गसन्धिः (सकारः) रेफः, उकार, गुणः पूर्वरूपं च ।
	अधिको योगी	अधिकः + योगी	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	ज्ञानिभ्योऽपि	ज्ञानिभ्यः + अपि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
	मतोऽधिकः	मतः + अधिकः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
	कर्मिभ्यश्चाधिकः	कर्मिभ्यः + चाधिकः	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
	चाधिकः	च + अधिकः	सवर्णदीर्घसन्धिः ।
	तस्माद्योगी	तस्मात् + योगी	जश्त्वसन्धिः ।
	भवार्जुन	भव + अर्जुन	सवर्णदीर्घसन्धिः ।
(ख) कृदन्तः	मतः	मन् (मन ज्ञाने) + क्त (कर्मणि) ।	
(ग) तद्धितान्तः	तपस्विभ्यः	तपस् + विनि (मतुबर्थे), तेभ्यः (तपः एषाम् एषु वा अस्ति) ।	
	योगी	योग + इनि (मतुबर्थे) (योगः अस्य अस्मिन् वा अस्ति) ।	
	ज्ञानिभ्यः	ज्ञान + इनि (मतुबर्थे), तेभ्यः (ज्ञानम् एषाम् एषु वा अस्ति) ।	
	कर्मिभ्यः	कर्मन् + इनि (मतुबर्थे), तेभ्यः (कर्म एषाम् एषु वा अस्ति) ।	

भावस्पष्टीकरणम् -

भव ।	
कः भव ?	**योगी भव ।**
कस्मात् योगी भव ?	**तस्मात् योगी भव ।**
किमर्थं तस्मात् योगी भव ?	**योगी तपस्विभ्यः अधिकः मतः (अतः) तस्मात् योगी भव ।**

योगी तपस्विभ्यः अधिकः मतः, **(पुनः) केभ्यः अधिकः** (अतः) तस्मात् योगी भव ?	योगी तपस्विभ्यः अधिकः मतः, **ज्ञानिभ्यः अपि अधिकः**, (अतः) तस्मात् योगी भव।
योगी तपस्विभ्यः अधिकः मतः, ज्ञानिभ्यः अपि अधिकः, **(पुनः) केभ्यः अधिकः** (अतः) तस्मात् योगी भव ?	योगी तपस्विभ्यः अधिकः मतः, ज्ञानिभ्यः अपि अधिकः, **कर्मिभ्यः च अधिकः** (अतः) तस्मात् योगी भव।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	अर्जुन !

तात्पर्यम् - कृच्छ्रचान्द्रायणादिरूपं तपः आचरद्भ्यः अपि योगी अधिकः मन्यते। शास्त्रे पण्डितेभ्यः अपि योगी अधिकः मन्यते। अग्निहोत्रादिकर्म आचरद्भ्यः अपि योगी अधिकः मन्यते। अतः हे अर्जुन ! त्वं योगी भव।

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥६.४७॥

पदच्छेदः - योगिनाम्, अपि, सर्वेषाम्, मद्गतेन, अन्तरात्मना।
श्रद्धावान्, भजते, यः, माम्, सः, मे, युक्ततमः, मतः ॥

अन्वयः - सर्वेषां योगिनाम् अपि यः श्रद्धावान् मद्गतेन अन्तरात्मना मां भजते सः मे युक्ततमः मतः।

पदार्थः - सर्वेषाम् = सकलानाम्, योगिनाम् अपि = युक्तानाम् अपि, यः = यः पुरुषः, श्रद्धावान् = श्रद्धालुः सन्, मद्गतेन = मयि स्थितेन, अन्तरात्मना = चित्तेन, माम् = माम्, भजते = सेवते, सः = सः पुरुषः, मे = मम, युक्ततमः = आप्ततमः, मतः = अभिमतः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सर्वेषाम्	अ. सर्व. पुं. ष. बहु. (विशेषणम्)	योगिनाम्	योगिन्- न. पुं. ष. बहु. (विशेषणम्)
अपि	अव्ययम्	यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
श्रद्धावान्	श्रद्धावत्- त. पुं. प्र. एक. (विशेषणम्)	मद्गतेन	अ. पुं. तृ. एक.
अन्तरात्मना	अन्तरात्मन्- न. पुं. तृ. एक.	माम्	अस्मद्- द. सर्व. द्वि. एक.
भजते	भज् (भज सेवायाम्) आत्म. कर्तरि लट्. प्रपु. एक.	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)

मे	अस्मद् - द. सर्व. ष. एक.	युक्ततमः	अ. पुं. प्र. एक. (विशेषणम्)
मतः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः मद्गतेनान्तरात्मना — मद्गतेन + अन्तरात्मना — सवर्णदीर्घसन्धिः ।
योो माम् — यः + माम् — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
स मे — सः + मे — विसर्गसन्धिः (लोपः) ।
युक्ततमो मतः — युक्ततमः + मतः — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) समासः मद्गतेन — मां गतः मद्गतः, तेन - द्वितीयातत्पुरुषः ।
अन्तरात्मना — अन्तः आत्मा यस्य सः अन्तरात्मा, तेन - बहुव्रीहिः ।

(ग) कृदन्तः गतः — गम् (गम्लृ गतौ) + क्त (कर्तरि) ।
युक्तः — युज् (युजिर् योगे) + क्त (कर्तरि) ।
मतः — मन् (मन ज्ञाने) + क्त (कर्तरि) ।

(घ) तद्धितान्तः योगिनाम् — योग + इनि (मतुबर्थे) (योगः अस्य अस्मिन् वा अस्ति), तेषाम् ।
श्रद्धावान् — श्रद्धा + मतुप् (श्रद्धा अस्य अस्मिन् वा अस्ति इति) ।
युक्ततमः — युक्त + तमप् (अतिशयेन युक्तं युक्ततमम्) (बहुषु अन्यतमस्मिन् अतिशये तमप्) ।

भावस्पष्टीकरणम् -

मतः ।	
कः मतः ?	**सः** मतः ।
सः **कीदृशः** मतः ?	सः **युक्ततमः** मतः ।
सः **कस्य** युक्ततमः मतः ?	सः **मे** युक्ततमः मतः ।
कीदृशः सः मे युक्ततमः मतः ?	**सर्वेषां योगिनाम् अपि यः श्रद्धावान् मद्गतेन अन्तरात्मना मां भजते** सः मे युक्ततमः मतः ।

तात्पर्यम् - योगिषु अपि यः वासुदेवे मयि श्रद्धधानः मामेव समाहितान्तःकरणः सन् भजते सः मम अतिशयेन आप्तः भवति ।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ध्यानयोगो (आत्मसंयमयोगो) नाम षष्ठोऽध्यायः ॥६॥

षष्ठाध्यायस्य सारः

षष्ठाध्याये ध्यानविषये विवेचनं कृतमस्ति। अतः अस्य 'ध्यानयोगः' इति अन्वर्थकं नाम वर्तते। कुत्रचित् अस्य आत्मसंयमयोगः इत्यपि नाम दृश्यते। इतःपूर्वम् आत्मनः अमरताविषये साङ्ख्यमतम् उपदिष्टम् अस्ति। 'कर्माणि फलासक्तिरहिततया निष्कामबुद्ध्या करणीयानि' इत्येतादृशः कर्मयोगः उपदिष्टः वर्तते। साङ्ख्यमतेन योगमार्गेण च ब्रह्मनिर्वाणं कथं प्राप्तव्यम् इत्यस्य अपि विवेचनं कृतमस्ति। अधुना अस्मिन् अध्याये कर्मयोगाय या निःसङ्गता ब्रह्मनिष्ठस्थितिः वा आवश्यकी अस्ति, सा कैः साधनैः प्राप्तव्या इति वर्णितम् अस्ति।

आदिमेषु श्लोकेषु गताध्याये उपदिष्टस्य ज्ञानस्य उपसंहारः वर्तते। तत्र प्रथमम् एव फलाशारहितः कर्तव्यशीलः एव संन्यासी योगी वा भवति, केवलम् अग्नित्यागमात्रेण कर्मत्यागमात्रेण वा न कोऽपि योगी भवति इति वर्णितमस्ति। तदनन्तरं कर्मयोगस्य साधनावस्थायां कर्माचरणं कारणम्, सिद्धावस्थायां च शमं कारणम् उक्त्वा योगारूढस्य लक्षणं वर्णितमस्ति। अग्रे योगसिद्धौ आत्मनः स्वतन्त्रताविषये उक्त्वा समबुद्धेः जितात्मनः श्रेष्ठता उक्ता। तदनन्तरं ध्यानावसरे योगिनः आसनं कथं भवेत् इति निर्दिष्टं वर्तते। गताध्याये अष्टाङ्गयोगे यम-नियमविषये किञ्चित् विवेचनम् अस्ति, अस्मिन् अध्याये पुनः आहारविहार-विषये निद्राजागरणविषये च नियमः वर्णितः अस्ति। तदनन्तरं योगिनः योगावस्थायाः वर्णनं कृत्वा योगिना चित्तं विषयेभ्यः कथं स्थिरीकरणीयम्, समाध्यवस्था च कथं साधनीया इति उपदिष्टम् अस्ति। अग्रे ब्रह्मभूतस्य योगिनः सुखं वर्णितमस्ति। ततः एतादृशस्य योगयुक्तात्मनः सर्वभूतेषु भगवद्भावः कथं जागर्ति, सर्वभूतेषु च समदृष्टिः कथं भवति इत्येतस्य वर्णनं कृतमस्ति।

अध्यायस्य अन्तिमभागे अर्जुनेन प्रश्नद्वयं पृष्टमस्ति - १. मनः सर्वदा चञ्चलं भवति, एवं सति मनोनिग्रहः कथं साधनीयः ? २. श्रद्धया योगाभ्यासं कुर्वन् मनुष्यः यदि केनचित् कारणेन योगभ्रष्टः भवति तर्हि तस्य पुनः का गतिः भवति ? इत्येवम्। तदा भगवान् उत्तरति - १. यद्यपि मनः चञ्चलं भवति, तथापि अभ्यासेन वैराग्येण च तस्य नियन्त्रणं शक्यम्। अतः प्रयत्नशीलेन योगिना मनः नियन्त्र्य योगः साधनीयः। २. योगाभ्यासं कुर्वन् मनुष्यः न कदापि दुर्गतिं याति। यद्यपि सः मरणं प्राप्नोति तथापि अग्रिमे जन्मनि योगिनः ब्रह्मवेत्तुः पवित्रकुले उत्पन्नः भविष्यति। तत्रापि पूर्वसंस्कारेण योगाभ्यासं कुर्वन् सिद्धिं प्राप्य सः परमगतिं याति इति।

एवं प्रकारेण अर्जुनाय उत्तरं दत्त्वा श्रीकृष्णः तस्य शङ्कां निवारितवान्। "तपस्विभ्यः, ज्ञानिभ्यः, कर्मिभ्यः अपि योगी श्रेष्ठः। कर्मयोगिषु अपि मय्येव समाहितचित्तः योगी युक्ततमः। तस्मात् अर्जुन ! योगी भव" इति उपदिष्टवान् च।

****

७

अथ सप्तमोऽध्यायः

ज्ञानविज्ञानयोगः

श्रीभगवानुवाच - मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥७.१॥

पदच्छेदः -

श्रीभगवान्, उवाच - मयि, आसक्तमनाः, पार्थ, योगम्, युञ्जन्, मदाश्रयः ।
असंशयम्, समग्रम्, माम्, यथा, ज्ञास्यसि, तत्, शृणु ॥

अन्वयः - पार्थ ! मयि आसक्तमनाः योगं युञ्जन् मदाश्रयः असंशयं समग्रं मां यथा ज्ञास्यसि तत् शृणु ।

पदार्थः - पार्थ = अर्जुन ! मयि = परमेश्वरे, आसक्तमनाः = लग्नचित्तः, योगम् = समाधिम्, युञ्जन् = अभ्यस्य, मदाश्रयः = मामेव अवलम्बमानः, असंशयम् = निस्सन्देहम्, समग्रम् = निरवशेषम्, माम् = माम्, यथा = येन प्रकारेण, ज्ञास्यसि = बोधिष्यसि, (तथा) तत् = तेन प्रकारेण एतत्, शृणु = आकर्णय ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	मयि	अस्मद्- द. सर्व. स. एक.
आसक्तमनाः	आसक्तमनस्- सका. पुं. प्र. एक.	योगम्	अ. पुं. द्वि. एक.
युञ्जन्	युञ्जत्- त. पुं. प्र. एक. (विशेषणम्)	मदाश्रयः	अ. पुं. प्र. एक.
असंशयम्	अ. पुं. द्वि. एक. क्रियावि.	समग्रम्	अ. पुं. द्वि. एक. (विशेषणम्)
माम्	अस्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)	यथा	अव्ययम्
ज्ञास्यसि	ज्ञा (ज्ञा - अवबोधने) पर. कर्तरि लट्. मपु. एक.	तत्	तद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
शृणु	श्रु (श्रु श्रवणे) पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः
- मय्यासक्तमनाः — मयि + आसक्तमनाः — यण्सन्धिः ।
- तच्छृणु — तत् + शृणु — श्चुत्वसन्धिः छत्वसन्धिः च ।

(ख) समासः
- आसक्तमनाः — आसक्तं मनः यस्य सः आसक्तमनाः - बहुव्रीहिः ।
- मदाश्रयः — अहम् आश्रयः यस्य सः मदाश्रयः - बहुव्रीहिः ।

(ग) कृदन्तः
- आसक्तम् — आ + सञ्ज् (षञ्ज - सङ्गे) + क्त (कर्तरि) ।
- योगम् — युज् (युजिर् - योगे) + घञ्, तम् ।

	युञ्जन्	युज् (युजिर् - योगे) + शतृ (कर्तरि) ।
	आश्रयः	आ + श्रि (श्रिञ् - सेवायाम्) + अच् ।
(घ) तद्धितान्तः	पार्थ	पृथा + अण् (अपत्यार्थे) तत्सम्बुद्धौ, पृथायाः अपत्यं पुमान् ।

भावस्पष्टीकरणम् -

ज्ञास्यसि ।	
कथं ज्ञास्यसि ?	**यथा** ज्ञास्यसि ।
कं यथा ज्ञास्यसि ?	**मां** यथा ज्ञास्यसि ।
कीदृशं मां यथा ज्ञास्यसि ?	**समग्रं** मां यथा ज्ञास्यसि ।
कथं समग्रं मां यथा ज्ञास्यसि ?	**असंशयं** समग्रं मां यथा ज्ञास्यसि ।
कीदृशः असंशयं समग्रं मां यथा ज्ञास्यसि ?	**मदाश्रयः** असंशयं समग्रं मां यथा ज्ञास्यसि ।
किं कुर्वन् मदाश्रयः असंशयं समग्रं मां यथा ज्ञास्यसि ?	**युञ्जन्** मदाश्रयः असंशयं समग्रं मां यथा ज्ञास्यसि ।
कं युञ्जन् मदाश्रयः असंशयं समग्रं मां यथा ज्ञास्यसि ?	**योगं** युञ्जन् मदाश्रयः असंशयं समग्रं मां यथा ज्ञास्यसि ।
कीदृशः योगं युञ्जन् मदाश्रयः असंशयं समग्रं मां यथा ज्ञास्यसि ?	**आसक्तमनाः** योगं युञ्जन् मदाश्रयः असंशयं समग्रं मां यथा ज्ञास्यसि ।
कस्मिन् आसक्तमनाः योगं युञ्जन् मदाश्रयः असंशयं समग्रं मां यथा ज्ञास्यसि ?	**मयि** आसक्तमनाः योगं युञ्जन् मदाश्रयः असंशयं समग्रं मां यथा ज्ञास्यसि ।
मयि आसक्तमनाः योगं युञ्जन् मदाश्रयः असंशयं समग्रं मां यथा ज्ञास्यसि **तत् किम्** ?	मयि आसक्तमनाः योगं युञ्जन् मदाश्रयः असंशयं समग्रं मां यथा ज्ञास्यसि **तत् शृणु** ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ** !

तात्पर्यम् - पार्थ ! मयि एव मनः निवेश्य मामेव आश्रयन् समाधिं च कुर्वन् तत्सर्वं निस्संशयं ज्ञातुम् अर्हसि यदहं कथयामि ।

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥७.२॥

पदच्छेदः - ज्ञानम्, ते, अहम्, सविज्ञानम्, इदम्, वक्ष्यामि, अशेषतः ।
यत्, ज्ञात्वा, न, इह, भूयः, अन्यत्, ज्ञातव्यम्, अवशिष्यते ॥

अन्वयः - अहम् इदं सविज्ञानं ज्ञानं ते अशेषतः वक्ष्यामि यत् ज्ञात्वा अन्यत् ज्ञातव्यं भूयः इह न अवशिष्यते ।

पदार्थः - अहम् = सर्वेश्वरः अहम्, इदम् = एतत्, सविज्ञानम् = अनुभवसहितम्, ज्ञानम् = परमात्मज्ञानम्, ते = तुभ्यम्, अशेषतः = समग्रम्, वक्ष्यामि = कथयिष्यामि, यत् ज्ञात्वा = यत् अवबुध्य, ज्ञातव्यम् = बोद्धव्यम्, अन्यत् = इतरत्, भूयः = पुनः, इह = अत्र, न अवशिष्यते = परिशिष्टं न भवति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहम्	अस्मद्- द. सर्व. प्र. एक.	इदम्	इदम्- म. सर्व. नपुं. द्वि. एक. (विशेषणम्)
सविज्ञानम्	अ. नपुं. द्वि. एक. (विशेषणम्)	ज्ञानम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
ते	युष्मद्- द. सर्व. च. एक.	अशेषतः	अव्ययम्
वक्ष्यामि	वच् (वच - परिभाषणे) पर. कर्तरि लृट्. उपु. एक.	यत्	यद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
ज्ञात्वा	क्त्वान्तम् अव्ययम्	अन्यत्	अ. सर्व. नपुं. प्र. एक. (विशेषणम्)
ज्ञातव्यम्	अ. नपुं. प्र. एक. (विशेषणम्)	भूयः	अव्ययम्
इह	अव्ययम्	न	अव्ययम्
अवशिष्यते	अव + शिष् (शिष्लृ विशेषणे) आत्म. कर्मकर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	तेऽहम्	ते + अहम्	पूर्वरूपसन्धिः ।
	वक्ष्याम्यशेषतः	वक्ष्यामि + अशेषतः	यण्सन्धिः ।
	यज्ज्ञात्वा	यत् + ज्ञात्वा	श्चुत्वसन्धिः जश्त्वसन्धिः च ।
	नेह	न + इह	गुणसन्धिः ।
	भूयोऽन्यत्	भूयः + अन्यत्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
	अन्यज्ज्ञातव्यम्	अन्यत् + ज्ञातव्यम्	श्चुत्वसन्धिः जश्त्वसन्धिः च ।
(ख) समासः	सविज्ञानम्	विज्ञानेन सहितं वर्तते इति, सविज्ञानम् - बहुव्रीहिः ।	
(ग) कृदन्तः	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट् ।	
	ज्ञात्वा	ज्ञा (ज्ञा - अवबोधने) + क्त्वा ।	
	ज्ञातव्यम्	ज्ञा (ज्ञा - अवबोधने) + तव्यत् (कर्मणि) ।	

भावस्पष्टीकरणम् -

अहं वक्ष्यामि ।	
अहं **किं** वक्ष्यामि ?	अहम् **इदं** वक्ष्यामि ।
अहम् इदं **किं** वक्ष्यामि ?	अहम् इदं **ज्ञानं** वक्ष्यामि
अहम् इदं **कीदृशं** ज्ञानं वक्ष्यामि ?	अहम् इदं **सविज्ञानं** ज्ञानं वक्ष्यामि
अहम् इदं सविज्ञानं ज्ञानं **कस्मै** वक्ष्यामि ?	अहम् इदं सविज्ञानं ज्ञानं **ते** वक्ष्यामि ।
अहम् इदं सविज्ञानं ज्ञानं ते **कथं** वक्ष्यामि ?	अहम् इदं सविज्ञानं ज्ञानं ते **अशेषतः** वक्ष्यामि ।
अहम् इदं सविज्ञानं ज्ञानं ते अशेषतः वक्ष्यामि । **तेन किम्** ?	अहम् इदं सविज्ञानं ज्ञानं ते अशेषतः वक्ष्यामि । **न अवशिष्यते** ।
अहम् इदं सविज्ञानं ज्ञानं ते अशेषतः वक्ष्यामि । **कुत्र** न अवशिष्यते ?	अहम् इदं सविज्ञानं ज्ञानं ते अशेषतः वक्ष्यामि । **इह** न अवशिष्यते ।
अहम् इदं सविज्ञानं ज्ञानं ते अशेषतः वक्ष्यामि । **कदा** इह न अवशिष्यते ?	अहम् इदं सविज्ञानं ज्ञानं ते अशेषतः वक्ष्यामि । **भूयः** इह न अवशिष्यते ।
अहम् इदं सविज्ञानं ज्ञानं ते अशेषतः वक्ष्यामि । **किं कृत्वा** भूयः इह न अवशिष्यते ?	अहम् इदं सविज्ञानं ज्ञानं ते अशेषतः वक्ष्यामि । **यत् ज्ञात्वा** भूयः इह न अवशिष्यते ?
अहम् इदं सविज्ञानं ज्ञानं ते अशेषतः वक्ष्यामि । यत् ज्ञात्वा **अन्यच्च किं** भूयः इह न अवशिष्यते ?	अहम् इदं सविज्ञानं ज्ञानं ते अशेषतः वक्ष्यामि । यत् ज्ञात्वा **अन्यत् ज्ञातव्यं** भूयः इह न अवशिष्यते ।

तात्पर्यम् - अहम् एतत् अनुभवसहितं परमात्मज्ञानं ते अशेषतः वक्ष्यामि । यदि एतत् जानासि तर्हि पश्चात् अस्मिन् लोके ज्ञातव्यम् अन्यत् किमपि ते न अवशिष्यते ।

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥७.३॥

पदच्छेदः - मनुष्याणाम्, सहस्रेषु, कश्चित्, यतति, सिद्धये, ।
यतताम्, अपि, सिद्धानाम्, कश्चित्, माम्, वेत्ति, तत्त्वतः ॥

अन्वयः - मनुष्याणां सहस्रेषु कश्चित् सिद्धये यतति । यतताम् अपि सिद्धानां कश्चित् तत्त्वतः मां वेत्ति ।

पदार्थः - मनुष्याणाम् = मानवानाम्, सहस्रेषु = सहस्रेषु, कश्चित् = कोऽपि, सिद्धये = सिद्ध्यर्थम्, यतति = प्रयत्नं

करोति, यतताम् = प्रयत्नं कुर्वताम् अपि, सिद्धानाम् = ज्ञानिनाम्, कश्चित् = कोऽपि, माम् = माम्, तत्त्वतः = यथावत्, वेत्ति = जानाति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मनुष्याणाम्	अ. पुं. ष. बहु.	सहस्रेषु	अ. नपुं. स. बहु.
कश्चित्	अव्ययम्	सिद्धये	इ. स्त्री. च. एक.
यतति (यतते)	यत् (यती प्रयत्ने)[1] आत्म. कर्तरि लट्. प्रपु. एक.	यतताम् (यतमानानाम्)	यतत्- त. पुं. ष. एक. (विशेषणम्)
अपि	अव्ययम्	सिद्धानाम्	अ. पुं. ष. बहु. (विशेष्यम्)
तत्त्वतः	अव्ययम्	माम्	अस्मद्- द. सर्व. द्वि. एक.
वेत्ति	विद् (विद ज्ञाने) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	कश्चिद्यतति	कश्चित् + यतति	जश्त्वसन्धिः ।
	कश्चिन्माम्	कश्चित् + माम्	अनुनासिकसन्धिः ।
(ख) कृदन्तः	सिद्धये	सिध् (षिधु - संराद्धौ) + क्तिन्, तस्यै ।	
	यतताम्	यत् (यती - प्रयत्ने) + शतृ[2] (कर्तरि), तेषाम् ।	
	सिद्धानाम्	सिध् (षिधु - संराद्धौ) + क्त (कर्तरि), तेषाम् ।	
(ग) तद्धितान्तः	मनुष्याणाम्	मनु (षुक्) + यत् (अपत्यार्थे) । मनोः अपत्यानि पुमांसः, तेषाम् ।	
	तत्त्वतः	तत्त्व + तसिल् ।	

भावस्पष्टीकरणम् -

यतति (यतते) ।	
कः यतते ?	**कश्चित्** यतते ।
कश्चित् **कस्यै** यतते ?	कश्चित् **सिद्धये** यतते ।
केषां कश्चित् सिद्धये यतते ?	**मनुष्याणां** कश्चित् सिद्धये यतते ।
मनुष्याणां **केषु** कश्चित् सिद्धये यतते ?	मनुष्याणां **सहस्रेषु** कश्चित् सिद्धये यतते ।

1. अत्र 'यतति' इति परस्मैपदित्वेन आर्षः प्रयोगः ।
2. अत्र 'यतताम्' इति शतृप्रत्ययत्वेन आर्षः प्रयोगः ।

मनुष्याणां सहस्रेषु कश्चित् सिद्धये यतते । **किं करोति** ?	मनुष्याणां सहस्रेषु कश्चित् सिद्धये यतते । **वेत्ति** ।
मनुष्याणां सहस्रेषु कश्चित् सिद्धये यतते । **कं** वेत्ति ?	मनुष्याणां सहस्रेषु कश्चित् सिद्धये यतते । **मां** वेत्ति ।
मनुष्याणां सहस्रेषु कश्चित् सिद्धये यतते । **कथं** मां वेत्ति ?	मनुष्याणां सहस्रेषु कश्चित् सिद्धये यतते । **तत्त्वतः** मां वेत्ति ।
मनुष्याणां सहस्रेषु कश्चित् सिद्धये यतते । **कः** तत्त्वतः मां वेत्ति ?	मनुष्याणां सहस्रेषु कश्चित् सिद्धये यतते । **कश्चित्** तत्त्वतः मां वेत्ति
मनुष्याणां सहस्रेषु कश्चित् सिद्धये यतते । **केषां** कश्चित् तत्त्वतः मां वेत्ति ?	मनुष्याणां सहस्रेषु कश्चित् सिद्धये यतते । **सिद्धानां** कश्चित् तत्त्वतः मां वेत्ति ।
मनुष्याणां सहस्रेषु कश्चित् सिद्धये यतते । **कीदृशानाम् अपि** सिद्धानां कश्चित् तत्त्वतः मां वेत्ति ?	मनुष्याणां सहस्रेषु कश्चित् सिद्धये यतते । **यतताम् अपि** सिद्धानां कश्चित् तत्त्वतः मां वेत्ति ।

तात्पर्यम् - वस्तुतः अहं दुर्ज्ञेयः अस्मि । बहुषु मानवेषु कोऽपि सिद्ध्यर्थं प्रयत्नं करोति । तेन प्रयत्नेन च ये सिद्धिं प्राप्नुवन्ति तेषु अपि कश्चिदेव मां यथावत् ज्ञातुं शक्नोति ।

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥७.४॥

पदच्छेदः - भूमिः, आपः, अनलः, वायुः, खम्, मनः, बुद्धिः, एव, च ।
अहङ्कारः, इति, इयम्, मे, भिन्ना, प्रकृतिः, अष्टधा ॥

अन्वयः - भूमिः आपः अनलः वायुः खं मनः बुद्धिः अहङ्कारः च एव इति इयं मे प्रकृतिः अष्टधा भिन्ना ।

पदार्थः - भूमिः = पृथिवी, आपः = जलम्, अनलः = अग्निः, वायुः = मरुत्, खम् = आकाशः, मनः = चित्तम्, बुद्धिः = मतिः, अहङ्कारः च एव इति = अहङ्कारः च इति, इयम् = एषा, मे = मम, प्रकृतिः = शक्तिः, अष्टधा = अष्टभिः प्रकारैः, भिन्ना = भेदं गता (वर्तते) ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भूमिः	इ. स्त्री. प्र. एक.	आपः	अप्- प. स्त्री. प्र. बहु.
अनलः	अ. पुं. प्र. एक.	वायुः	उ. पु. प्र. एक.
खम्	अ. नपुं. प्र. एक.	मनः	मनस्- सका. नपुं. प्र. एक.
बुद्धिः	इ. स्त्री. प्र. एक.	अहङ्कारः	अ. पुं. प्र. एक.

च	अव्ययम्	एव	अव्ययम्
इति	अव्ययम्	इयम्	इदम्- म. स्त्री. प्र. एक. (विशेषणम्)
मे	अस्मद्- द. सर्व. ष. एक.	प्रकृतिः	इ. स्त्री. प्र. एक. (विशेष्यम्)
अष्टधा	अव्ययम्	भिन्ना	आ. स्त्री. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	भूमिरापः	भूमिः + आपः	विसर्गसन्धिः (रेफः)।
	आपोऽनलः	आपः + अनलः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	अनलो वायुः	अनलः + वायुः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	मनो बुद्धिः	मनः + बुद्धिः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	बुद्धिरेव	बुद्धिः + एव	विसर्गसन्धिः (रेफः)।
	अहङ्कार इति	अहङ्कारः + इति	विसर्गसन्धिः (लोपः)।
	इतीयम्	इति + इयम्	सवर्णदीर्घसन्धिः।
	प्रकृतिरष्टधा	प्रकृतिः + अष्टधा	विसर्गसन्धिः (रेफः)।
(ख) कृदन्तः	बुद्धिः	बुध् (बुध - अवगमने) + क्तिन्।	
	भिन्ना	भिद् (भिदिर् - विदारणे) + क्त (कर्तरि) स्त्रीत्वे टाप्।	
	प्रकृतिः	प्र + कृ (डुकृञ् - करणे) + क्तिन् (भावे)।	
(ग) तद्धितान्तः	अष्टधा	अष्ट + धा (प्रकारेण)।	

भावस्पष्टीकरणम् -

(वर्तते)।	
का वर्तते ?	**प्रकृतिः** वर्तते।
प्रकृतिः **कीदृशी** वर्तते ?	प्रकृतिः **भिन्ना** वर्तते।
प्रकृतिः **कतिधा** भिन्ना वर्तते ?	प्रकृतिः **अष्टधा** भिन्ना वर्तते।
कस्य प्रकृतिः अष्टधा भिन्ना वर्तते ?	**मे** प्रकृतिः अष्टधा भिन्ना वर्तते।
का मे प्रकृतिः अष्टधा भिन्ना वर्तते ?	**भूमिः, आपः, अनलः, वायुः, खम्, मनः, बुद्धिः, अहङ्कारः च एव इति इयं** मे प्रकृतिः अष्टधा भिन्ना वर्तते।

तात्पर्यम् - पृथिवी जलम् अग्निः वायुः आकाशः मनः बुद्धिः अहङ्कारः च इति मम प्रकृतिः अष्टभिः प्रकारैः भिन्ना अस्ति।

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत्॥७.५॥

पदच्छेदः - अपरा, इयम्, इतः, तु, अन्याम्, प्रकृतिम्, विद्धि, मे, पराम्।
जीवभूताम्, महाबाहो, यया, इदम्, धार्यते, जगत्॥

अन्वयः - महाबाहो ! इयं तु अपरा। इतः मे जीवभूताम् अन्यां परां प्रकृतिं विद्धि, यया इदं जगत् धार्यते।

पदार्थः - महाबाहो = अर्जुन ! इयं तु = एषा तु, अपरा = संसारबन्धनात्मिका, इतः = अस्याः, मे = मम. जीवभूताम् = प्राणधारिणीम्, अन्याम् = भिन्नाम्, पराम् = प्रकृष्टाम्, प्रकृतिम् = शक्तिम्, विद्धि = जानीहि, यया = यया प्रकृत्या, इदम् = एतत्, जगत् = भुवनम्, धार्यते = उह्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महाबाहो	उ. पुं. सम्बो. एक.	इयम्	इदम्- म. सर्व. स्त्री. प्र. एक. (विशेषणम्)
तु	अव्ययम्	अपरा	आ. सर्व. स्त्री. प्र. एक. (विशेषणम्)
इतः	अव्ययम्	मे	अस्मद्- द. सर्व. ष. एक.
जीवभूताम्	आ. स्त्री. द्वि. एक. (विशेषणम्)	अन्याम्	आ. सर्व. स्त्री. द्वि. एक. (विशेषणम्)
प्रकृतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)	विद्धि	विद् (विद ज्ञाने) पर. कर्तरि लोट्. मपु. एक
यया	यद्- द. स्त्री. तृ. एक. (विशेषणम्)	इदम्	इदम्- म. सर्व. नपुं. प्र. एक. (विशेषणम्)
जगत्	जगत्- त. नपुं. प्र. एक. (विशेष्यम्)	धार्यते	धृ (धृञ् - धारणे) + णिच्, आत्म. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः
- अपरेयम् — अपरा + इयम् — गुणसन्धिः।
- इतस्तु — इतः + तु — विसर्गसन्धिः (सकारः)।
- त्वन्याम् — तु + अन्याम् — यण्सन्धिः।
- ययेदम् — यया + इदम् — गुणसन्धिः।

(ख) समासः
- जीवभूताम् — जीवं भूता जीवभूता, ताम् - द्वितीयातत्पुरुषः।
- महाबाहो — महान्तौ बाहू यस्य सः महाबाहुः, तत्सम्बुद्धौ - बहुव्रीहिः।

(ग) कृदन्तः
- प्रकृतिम् — प्र + कृ (डुकृञ् - करणे) + क्तिन्, ताम्।
- जीवः — जीव् (जीव - प्राणने) + घञ्।
- भूता — भू (भू - सत्तायाम्) + क्त (कर्तरि) (स्त्रीत्वे टाप्)।

(घ) तद्धितान्तः
- इतः — इदम् + तसिल् (पञ्चम्यर्थे)।

भावस्पष्टीकरणम् -

(अस्ति) ।	
कीदृशी अस्ति ?	**अपरा** अस्ति ।
का अपरा अस्ति ?	**इयं तु** अपरा अस्ति ।
इयं तु अपरा अस्ति । **तेन किम् ?**	इयं तु अपरा अस्ति । **विद्धि ।**
इयं तु अपरा अस्ति । **कां** विद्धि ?	इयं तु अपरा अस्ति । **प्रकृतिं** विद्धि ।
इयं तु अपरा अस्ति । **कीदृशीं** प्रकृतिं विद्धि ?	इयं तु अपरा अस्ति । **परां** प्रकृतिं विद्धि ?
इयं तु अपरा अस्ति । **कां** परां प्रकृतिं विद्धि ?	इयं तु अपरा अस्ति । **अन्यां** परां प्रकृतिं विद्धि ।
इयं तु अपरा अस्ति । **कथम्भूताम्** अन्यां परां प्रकृतिं विद्धि ?	इयं तु अपरा अस्ति । **जीवभूताम्** अन्यां परां प्रकृतिं विद्धि ।
इयं तु अपरा अस्ति । **कस्य** जीवभूताम् अन्यां परां प्रकृतिं विद्धि ?	इयं तु अपरा अस्ति । **मे** जीवभूताम् अन्यां परां प्रकृतिं विद्धि ।
इयं तु अपरा अस्ति । **कुतः** मे जीवभूताम् अन्यां परां प्रकृतिं विद्धि ?	इयं तु अपरा अस्ति । **इतः** मे जीवभूताम् अन्यां परां प्रकृतिं विद्धि ।
इयं तु अपरा अस्ति । इतः मे जीवभूताम् अन्यां परां प्रकृतिं विद्धि । **तेन किम्** ?	इयं तु अपरा अस्ति । इतः मे जीवभूताम् अन्यां परां प्रकृतिं विद्धि, **धार्यते** ।
इयं तु अपरा अस्ति । इतः मे जीवभूताम् अन्यां परां प्रकृतिं विद्धि, **किं** धार्यते ?	इयं तु अपरा अस्ति । इतः मे जीवभूताम् अन्यां परां प्रकृतिं विद्धि, **जगत्** धार्यते ।
इयं तु अपरा अस्ति । इतः मे जीवभूताम् अन्यां परां प्रकृतिं विद्धि, **किं** जगत् धार्यते ?	इयं तु अपरा अस्ति । इतः मे जीवभूताम् अन्यां परां प्रकृतिं विद्धि, **इदं** जगत् धार्यते ।
इयं तु अपरा अस्ति । इतः मे जीवभूताम् अन्यां परां प्रकृतिं विद्धि, **कया** इदं जगत् धार्यते ?	इयं तु अपरा अस्ति । इतः मे जीवभूताम् अन्यां परां प्रकृतिं विद्धि, **यया** इदं जगत् धार्यते ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**महाबाहो** !

तात्पर्यम् - महाबाहो ! अष्टधा विभक्ता इयं मम प्रकृतिः संसारबन्धनात्मिका अस्ति । अस्याः अन्याः अपि मम प्रकृतिः अस्ति । प्रकृष्टा सा एव सर्वेषां प्राणधारिणी अस्ति । तया एव एतत् जगत् धार्यते ।

एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥७.६॥

पदच्छेदः - एतद्योनीनि, भूतानि, सर्वाणि, इति, उपधारय।
अहम्, कृत्स्नस्य, जगतः, प्रभवः, प्रलयः, तथा ॥

अन्वयः - सर्वाणि भूतानि एतद्योनीनि इति उपधारय। अहं कृत्स्नस्य जगतः प्रभवः तथा प्रलयः।

पदार्थः - सर्वाणि = सकलानि, भूतानि = भूतजातानि, एतद्योनीनि इति = एतत्प्रकृतिद्वयसम्भवानि इति, उपधारय = जानीहि, अहम् = अहम्, कृत्स्नस्य = समग्रस्य, जगतः = लोकस्य, प्रभवः = उत्पत्तिकारणम्, तथा = तथा, प्रलयः = विनाशकारणम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सर्वाणि	अ. सर्व. नपुं. प्र. बहु. (विशेषणम्)	भूतानि	अ. नपुं. प्र. बहु. (विशेषणम्)
एतद्योनीनि	इ. नपुं. प्र. बहु. (विशेष्यम्)	इति	अव्ययम्
उपधारय	उप + धृ (धृञ् धारणे) णिच्, पर. कर्तरि लोट्. मपु. एक.	अहम्	अस्मद्- द. सर्व. प्र. एक.
कृत्स्नस्य	अ. नपुं. ष. एक. (विशेषणम्)	जगतः	जगत्- त. नपुं. ष. एक. (विशेष्यम्)
प्रभवः	अ. पुं. प्र. एक.	तथा	अव्ययम्
प्रलयः	अ. पुं. प्र. एक.		

व्याकरणम् -

(क) सन्धिः	सर्वाणीति	सर्वाणि + इति	सवर्णदीर्घसन्धिः।
	इत्युपधारय	इति + उपधारय	यण्सन्धिः।
	प्रलयस्तथा	प्रलयः + तथा	विसर्गसन्धिः (सकारः)।
(ख) समासः	एतद्योनीनि	एषा योनिः येषां तानि एतद्योनीनि - बहुव्रीहिः।	
(ग) कृदन्तः	प्रभवः	प्र + भू (भू - सत्तायाम्) + अप्। (अपादाने) प्रभवति अस्मात् इत्यर्थः।	
	प्रलयः	प्र + ली (लीङ् - श्लेषणे) + अच् (अधिकरणे) प्रलीयते अत्र इत्यर्थः।	

भावस्पष्टीकरणम् -

उपधारय ?	
कानि इति उपधारय ?	एतद्योनीनि इति उपधारय।

कानि एतद्योनीनि इति उपधारय ?	**भूतानि** एतद्योनीनि इति उपधारय ।
कति भूतानि एतद्योनीनि इति उपधारय ?	**सर्वाणि** भूतानि एतद्योनीनि इति उपधारय ।
(अस्मि) ।	
कः अस्मि ?	**प्रभवः** अस्मि ।
प्रभवः तथा **कः** अस्मि ?	प्रभवः **तथा प्रलयः** अस्मि ।
कस्य प्रभवः तथा प्रलयः अस्मि ?	**जगतः** प्रभवः तथा प्रलयः अस्मि ।
कीदृशस्य जगतः प्रभवः तथा प्रलयः अस्मि ?	**अहं कृत्स्नस्य** जगतः प्रभवः तथा प्रलयः अस्मि ।

तात्पर्यम् - सर्वाणि भूतानि प्रकृतिसम्भवानि इति जानीहि । इदं समग्रं जगत् मत्तः एव निर्गच्छति, मयि एव च लीनं भवति ।

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥७.७॥

पदच्छेदः - मत्तः, परतरम्, न, अन्यत्, किञ्चित्, अस्ति, धनञ्जय ।
मयि, सर्वम्, इदम्, प्रोतम्, सूत्रे, मणिगणाः, इव ॥

अन्वयः - धनञ्जय ! मत्तः अन्यत् किञ्चित् परतरं न अस्ति । इदं सर्वं सूत्रे मणिगणाः इव मयि प्रोतम् ।

पदार्थः - धनञ्जय = अर्जुन ! मत्तः = परमेश्वरात्, अन्यत् = इतरत् वस्तु, किञ्चित् = किमपि, परतरम् = उत्कृष्टतरम्, न अस्ति = न विद्यते, इदम् = एतत्, सर्वम् = सकलम्, सूत्रे = तन्तौ, मणिगणाः इव = मणिसमूहाः इव, मयि = परमेश्वरे, प्रोतम् = योजितम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
धनञ्जय	अ. पुं. सम्बो. एक.	मत्तः	अव्ययम्
अन्यत्	अव्ययम्	किञ्चित्	अव्ययम्
परतरम्	अ. नपुं. प्र. एक.	न	अव्ययम्
अस्ति	अस् (अस - भुवि) पर. कर्तरि लट्. प्रपु. एक.	इदम्	इदम्- म. सर्व. नपुं. प्र. एक. (विशेषणम्)
सर्वम्	अ. सर्व. नपुं. प्र. एक. (विशेषणम्)	सूत्रे	अ. नपुं. स. एक.

मणिगणाः	अ. पुं. प्र. बहु.	इव	अव्ययम्
मयि	अस्मद्- द. सर्व. स. एक.	प्रोतम्	अ. नपुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः किञ्चिदस्ति — किञ्चित् + अस्ति — जश्त्वसन्धिः।
मणिगणा इव — मणिगणाः + इव — विसर्गसन्धिः (लोपः)।

(ख) समासः मणिगणाः — मणीनां गणाः मणिगणाः - षष्ठीतत्पुरुषः।
धनञ्जय — धनं जयति इति धनञ्जयः, तत्सम्बुद्धौ - कर्तरि खश् (उपपदसमासश्च)।

(ग) कृदन्तः प्रोतम् — प्र + वे (वेञ् - तन्तुसन्ताने) + क्त (कर्मणि)।

(घ) तद्धितान्तः मत्तः — अस्मद् + तसिल्।
परतरम् — पर + तरप्। (अतिशये) अतिशयेन परम्।

भावस्पष्टीकरणम् -

न अस्ति।	
किं न अस्ति ?	**परतरं** न अस्ति।
किं परतरं न अस्ति ?	**अन्यत् किञ्चित्** परतरं न अस्ति।
कुतः अन्यत् किञ्चित् परतरं न अस्ति ?	**मत्तः** अन्यत् किञ्चित् परतरं न अस्ति।
मत्तः अन्यत् किञ्चित् परतरं न अस्ति। **किं (अस्ति)** ?	मत्तः अन्यत् किञ्चित् परतरं न अस्ति। **प्रोतम्** (अस्ति)।
मत्तः अन्यत् किञ्चित् परतरं न अस्ति। **किं** प्रोतम् अस्ति ?	मत्तः अन्यत् किञ्चित् परतरं न अस्ति। **इदं** प्रोतम् अस्ति।
मत्तः अन्यत् किञ्चित् परतरं न अस्ति। इदं **किं** प्रोतम् अस्ति ?	मत्तः अन्यत् किञ्चित् परतरं न अस्ति। इदं **सर्वं** प्रोतम् अस्ति।
मत्तः अन्यत् किञ्चित् परतरं न अस्ति। इदं सर्वं **कस्मिन्** प्रोतम् अस्ति ?	मत्तः अन्यत् किञ्चित् परतरं न अस्ति। इदं सर्वं **सूत्रे** प्रोतम् अस्ति।
मत्तः अन्यत् किञ्चित् परतरं न अस्ति। इदं सर्वं सूत्रे **के** इव प्रोतम् अस्ति ?	मत्तः अन्यत् किञ्चित् परतरं न अस्ति। इदं सर्वं सूत्रे **मणिगणाः** इव प्रोतम् अस्ति।
मत्तः अन्यत् किञ्चित् परतरं न अस्ति। इदं सर्वं सूत्रे मणिगणाः इव **कस्मिन्** प्रोतम् अस्ति ?	मत्तः अन्यत् किञ्चित् परतरं न अस्ति। इदं सर्वं सूत्रे मणिगणाः इव **मयि** प्रोतम् अस्ति।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**धनञ्जय !**

तात्पर्यम् - धनञ्जय ! मदपेक्षया अन्यत् किमपि वस्तु उत्कृष्टतरं नास्ति । एतत् सर्वं तन्तौ मणिसमूहाः इव मयि योजितम् ।

रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥७.८॥

पदच्छेदः - रसः, अहम्, अप्सु, कौन्तेय, प्रभा, अस्मि, शशिसूर्ययोः ।
प्रणवः, सर्ववेदेषु, शब्दः, खे, पौरुषम्, नृषु ॥

अन्वयः - कौन्तेय ! अहम् अप्सु रसः, शशिसूर्ययोः प्रभा, सर्ववेदेषु प्रणवः, खे शब्दः, नृषु पौरुषम् अस्मि ।

पदार्थः - कौन्तेय = अर्जुन ! अहम् अप्सु = अहम् उदके, रसः = माधुर्यरसः, शशिसूर्ययोः = चन्द्रार्कयोः, प्रभा = कान्तिः, सर्ववेदेषु = निखिलवेदेषु, प्रणवः = ओङ्कारः, खे = आकाशे, शब्दः = ध्वनिः, नृषु = मानवेषु, पौरुषम् = पुरुषत्वम्, अस्मि = भवामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	अहम्	अस्मद्- द. सर्व. प्र. एक.
अप्सु	अप्- प. स्त्री. स. बहु.	रसः	अ. पुं. प्र. एक.
शशिसूर्ययोः	अ. पुं. ष. द्विव.	प्रभा	आ. स्त्री. प्र. एक.
सर्ववेदेषु	अ. पुं. स. बहु.	प्रणवः	अ. पुं. प्र. एक.
खे	अ. नपुं. स. एक.	शब्दः	अ. पुं. प्र. एक.
नृषु	ऋ. पुं. स. बहु.	पौरुषम्	अ. नपुं. प्र. एक.
अस्मि	अस् (अस भुवि) पर. कर्तरि लट्. उपु. एक.		

व्याकरणम् -

(क) सन्धिः रसोऽहम् — रसः + अहम् — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

प्रभास्मि — प्रभा + अस्मि — सवर्णदीर्घसन्धिः ।

(ख) समासः शशिसूर्ययोः — शशी च सूर्यश्च शशिसूर्यौ, तयोः - द्वन्द्वः ।

सर्ववेदेषु — सर्वे वेदाः सर्ववेदाः, तेषु - कर्मधारयः ।

(ग) कृदन्तः वेदेषु — विद् (विद - ज्ञाने) + घञ्, तेषु ।

(घ) तद्धितान्तः कौन्तेय — कुन्ती + ढक् (अपत्यार्थे, एय इत्यादेशः) कुन्त्याः अपत्यं पुमान्, तत्सम्बुद्धौ।

पौरुषम् — पुरुष + अण्। (भावे) पुरुषस्य भावः, पुरुषत्वम् इत्यर्थः।

भावस्पष्टीकरणम् -

अहम् अस्मि।	
अहं **कः** अस्मि ?	अहं **रसः** अस्मि।
अहं **कासु** रसः अस्मि ?	अहम् **अप्सु** रसः अस्मि
अहम् अप्सु रसः, **पुनश्च का** अस्मि ?	अहम् अप्सु रसः, **प्रभा** अस्मि।
अहम् अप्सु रसः, **कयोः** प्रभा अस्मि ?	अहम् अप्सु रसः, **शशिसूर्ययोः** प्रभा अस्मि।
अहम् अप्सु रसः, शशिसूर्ययोः प्रभा, **पुनश्च कः** अस्मि ?	अहम् अप्सु रसः, शशिसूर्ययोः प्रभा, **प्रणवः** अस्मि ?
अहम् अप्सु रसः, शशिसूर्ययोः प्रभा, **केषु** प्रणवः अस्मि ?	अहम् अप्सु रसः, शशिसूर्ययोः प्रभा, **सर्ववेदेषु** प्रणवः अस्मि।
अहम् अप्सु रसः, शशिसूर्ययोः प्रभा, सर्ववेदेषु प्रणवः, **पुनश्च कः** अस्मि ?	अहम् अप्सु रसः, शशिसूर्ययोः प्रभा, सर्ववेदेषु प्रणवः, **शब्दः** अस्मि।
अहम् अप्सु रसः, शशिसूर्ययोः प्रभा, सर्ववेदेषु प्रणवः, **कस्मिन्** शब्दः अस्मि ?	अहम् अप्सु रसः, शशिसूर्ययोः प्रभा, सर्ववेदेषु प्रणवः, **खे** शब्दः अस्मि।
अहम् अप्सु रसः, शशिसूर्ययोः प्रभा, सर्ववेदेषु प्रणवः, खे शब्दः, **किम्** अस्मि ?	अहम् अप्सु रसः, शशिसूर्ययोः प्रभा, सर्ववेदेषु प्रणवः, खे शब्दः, **पौरुषम्** अस्मि।
अहम् अप्सु रसः, शशिसूर्ययोः प्रभा, सर्ववेदेषु प्रणवः, खे शब्दः, अन्यत् **केषु** पौरुषम् अस्मि ?	अहम् अप्सु रसः, शशिसूर्ययोः प्रभा, सर्ववेदेषु प्रणवः, खे शब्दः, अन्यत् **नृषु** पौरुषम् अस्मि।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय !**

तात्पर्यम् - कौन्तेय ! अहम् उदकेषु माधुर्यम्, चन्द्रसूर्ययोः कान्तिः सर्ववेदेषु ओङ्कारः, आकाशे ध्वनिः, मानवेषु पुरुषत्वं च अस्मि।

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥७.९॥

पदच्छेदः - पुण्यः, गन्धः, पृथिव्याम्, च, तेजः, च, अस्मि, विभावसौ।
जीवनम्, सर्वभूतेषु, तपः, च, अस्मि, तपस्विषु ॥

अन्वयः - पृथिव्यां च पुण्यः गन्धः विभावसौ तेजः च अस्मि। सर्वभूतेषु जीवनं तपस्विषु तपः च अस्मि।

पदार्थः - पृथिव्यां च = भूमौ च, पुण्यः = स्वाभाविकः, गन्धः = गन्धः, विभावसौ = सूर्ये, तेजः च = कान्तिः च, अस्मि = भवामि, सर्वभूतेषु = सकलप्राणिषु, जीवनम् = आयुः, तपस्विषु = मुनिषु, तपः च = तपः अपि, अस्मि = भवामि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पृथिव्याम्	ई. स्त्री. स. एक.	च	अव्ययम्
पुण्यः	अ. पुं. प्र. एक.	गन्धः	अ. पुं. प्र. एक.
विभावसौ	उ. पुं. स. एक.	तेजः	तेजस्- सका. नपुं. प्र. एक.
अस्मि	अस् (अस भुवि) पर. कर्तरि लट्. प्रपु. एक.	सर्वभूतेषु	अ. नपुं. स. बहु.
जीवनम्	अ. नपुं. प्र. एक.	तपस्विषु	तपस्विन्- न. पुं. स. बहु.
तपः	तपस्- सका. नपुं. प्र. एक.		

व्याकरणम् -

(क) सन्धिः
पुण्यो गन्धः	पुण्यः + गन्धः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
तेजश्च	तेजः + च	विसर्गसन्धिः (सकारः) श्चुत्वसन्धिः च।
चास्मि	च + अस्मि	सवर्णदीर्घसन्धिः।
तपश्च	तपः + च	विसर्गसन्धिः (सकारः) श्चुत्वसन्धिः च।
चास्मि	च + अस्मि	सवर्णदीर्घसन्धिः।

(ख) समासः सर्वभूतेषु — सर्वाणि भूतानि सर्वभूतानि, तेषु - कर्मधारयः।

(ग) कृदन्तः
गन्धः — गन्ध् (गन्ध - अर्दने) + अच् (पचाद्यच्)।
जीवनम् — जीव् (जीव - प्राणने) + ल्युट् (करणे)।
भूतेषु — भू (भू - सत्तायाम्) + क्त (कर्तरि)।

(घ) तद्धितान्तः तपस्विषु — तपस् + विनि (मतुबर्थे)। तपः एषाम् एषु वा अस्ति, तेषु।

भावस्पष्टीकरणम् -

अस्मि ।	
कः अस्मि ?	**गन्धः** अस्मि ।
कीदृशः गन्धः अस्मि ?	**पुण्यः** गन्धः अस्मि ।
कस्यां पुण्यः गन्धः अस्मि ?	**पृथिव्यां** च पुण्यः गन्धः अस्मि ।
पृथिव्यां च पुण्यः गन्धः **किं च** अस्मि ?	पृथिव्यां च पुण्यः गन्धः **तेजः च** अस्मि ।
पृथिव्यां च पुण्यः गन्धः **कस्मिन्** तेजः च अस्मि ?	पृथिव्यां च पुण्यः गन्धः **विभावसौ** तेजः च अस्मि ।
अस्मि ।	
किम् अस्मि ?	**जीवनम्** अस्मि ।
केषु जीवनम् अस्मि ?	**सर्वभूतेषु** जीवनम् अस्मि ।
सर्वभूतेषु जीवनं **किं च** अस्मि ?	सर्वभूतेषु जीवनं **तपः च** अस्मि ।
सर्वभूतेषु जीवनं **केषु** तपः च अस्मि ?	सर्वभूतेषु जीवनं **तपस्विषु** तपः च अस्मि ।

तात्पर्यम् - अहं पृथिव्यां सुरभिः गन्धः सूर्ये कान्तिः च अस्मि । सकलप्राणिषु आयुः तपस्विषु तपः च अस्मि ।

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥७.१०॥

पदच्छेदः - बीजम्, माम्, सर्वभूतानाम्, विद्धि, पार्थ, सनातनम् ।
बुद्धिः, बुद्धिमताम्, अस्मि, तेजः, तेजस्विनाम्, अहम् ॥

अन्वयः - पार्थ ! सर्वभूतानां सनातनं बीजं मां विद्धि । बुद्धिमतां बुद्धिः तेजस्विनां तेजः अहम् अस्मि ।

पदार्थः - पार्थ = अर्जुन ! सर्वभूतानाम् = सकलप्राणिनाम्, सनातनम् = चिरन्तनम्, बीजम् = प्ररोहकारणम्, मां विद्धि = मां जानीहि, बुद्धिमताम् = धीमताम्, बुद्धिः = धीः, तेजस्विनाम् = प्रगल्भानाम्, तेजः = प्रागल्भ्यम्, अहम् अस्मि = अहं भवामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	सर्वभूतानाम्	अ. नपुं. ष. बहु.

सनातनम्	अ. नपुं. द्वि. एक. (विशेषणम्)	बीजम्	अ. नपुं. द्वि. एक. (विशेषणम्)
माम्	अस्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)	विद्धि	विद् (विद ज्ञाने) पर. कर्तरि लोट्. मपु. एक.
बुद्धिमताम्	बुद्धिमत्- त. पुं. ष. बहु.	बुद्धिः	इ. स्त्री. प्र. एक. (विशेषणम्)
तेजस्विनाम्	तेजस्विन्- न. पुं. ष. बहु.	तेजः	तेजस्- सका. नपुं. प्र. एक.
अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)	अस्मि	अस् (अस - भुवि) पर. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः	बुद्धिर्बुद्धिमताम्	बुद्धिः + बुद्धिमताम्	विसर्गसन्धिः (रेफः)।
	तेजस्तेजस्विनाम्	तेजः + तेजस्विनाम्	विसर्गसन्धिः, (सकारः)।
(ख) समासः	सर्वभूतानाम्	सर्वाणि भूतानि सर्वभूतानि, तेषाम् - कर्मधारयः।	
(ग) कृदन्तः	भूतम्	भू (भू - सत्तायाम्) + क्त (भावे)।	
	बुद्धिः	बुध् (बुध - अवगमने) + क्तिन्।	
(घ) तद्धितान्तः	पार्थ	पृथा + अण् (अपत्यार्थे), पृथायाः अपत्यं पुमान्, तत्सम्बुद्धौ।	
	सनातनम्	सना + ट्युल् (भव इत्यर्थे) सदा भवं सनातनम् इत्यर्थः।	
	बुद्धिमताम्	बुद्धि + मतुप्, तेषाम्। बुद्धिः एषाम् एषु वा अस्ति इति बुद्धिमान्।	
	तेजस्विनाम्	तेजस् + विनि, (मतुबर्थे)। तेजः एषाम् एषु वा अस्ति, तेषाम्।	

भावस्पष्टीकरणम् -

विद्धि।	
कं विद्धि ?	**मां** विद्धि।
किं मां विद्धि ?	**बीजं** मां विद्धि।
कीदृशं बीजं मां विद्धि ?	**सनातनं** बीजं मां विद्धि।
केषां सनातनं बीजं मां विद्धि ?	**सर्वभूतानां** सनातनं बीजं मां विद्धि।
सर्वभूतानां सनातनं बीजं मां विद्धि। **किमर्थम्** ?	सर्वभूतानां सनातनं बीजं मां विद्धि। **(यतः) अहम् अस्मि।**
सर्वभूतानां सनातनं बीजं मां विद्धि। यतः **का** अहम् अस्मि ?	सर्वभूतानां सनातनं बीजं मां विद्धि। यतः **बुद्धिः** अहम् अस्मि।

सर्वभूतानां सनातनं बीजं मां विद्धि। यतः **केषां** बुद्धिः अहम् अस्मि ?	सर्वभूतानां सनातनं बीजं मां विद्धि। यतः **बुद्धिमतां** बुद्धिः अहम् अस्मि।
सर्वभूतानां सनातनं बीजं मां विद्धि। यतः बुद्धिमतां बुद्धिः **पुनश्च किम्** अहम् अस्मि ?	सर्वभूतानां सनातनं बीजं मां विद्धि। यतः बुद्धिमतां बुद्धिः **तेजः** अहम् अस्मि।
सर्वभूतानां सनातनं बीजं मां विद्धि। यतः बुद्धिमतां बुद्धिः **केषां** तेजः अहम् अस्मि ?	सर्वभूतानां सनातनं बीजं मां विद्धि। यतः बुद्धिमतां बुद्धिः **तेजस्विनां** तेजः अहम् अस्मि।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ !**

तात्पर्यम् - पार्थ ! सकलभूतानां चिरन्तनं बीजं मां जानीहि। अहं धीमतां धीः अस्मि तेजस्विनां तेजः च।

बलं बलवतां चाहं कामरागविवर्जितम्।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥७.११॥

पदच्छेदः - बलम्, बलवताम्, च, अहम्, कामरागविवर्जितम्।
धर्माविरुद्धः, भूतेषु, कामः, अस्मि, भरतर्षभ ॥

अन्वयः - भरतर्षभ ! अहं बलवतां कामरागविवर्जितं बलं भूतेषु धर्माविरुद्धः कामः च अस्मि।

पदार्थः - भरतर्षभ = भरतश्रेष्ठ ! अहं बलवताम् = अहम् ओजस्विनाम्, कामरागविवर्जितम् = वस्तुनि अभिलाषः, तदाधिक्ये च अभिलाषः इत्येताभ्यां रहितम्, बलम् = सामर्थ्यम्, भूतेषु = प्राणिषु, धर्माविरुद्धः = धर्मानुकूलः, कामः च = इच्छा च, अस्मि = भवामि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भरतर्षभ	अ. पुं. सम्बो. एक.	अहम्	अस्मद्- द. सर्व. प्र. एक.
बलवताम्	बलवत्- त. पुं. ष. बहु.	कामरागविवर्जितम्	अ. नपुं. प्र. एक.
बलम्	अ. नपुं. प्र. एक.	भूतेषु	अ. नपुं. स. बहु.
धर्माविरुद्धः	अ. पुं. प्र. एक.	कामः	अ. पुं. प्र. एक.
च	अव्ययम्	अस्मि	अस् (अस भुवि) पर. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः	चाहम्	च + अहम्	सवर्णदीर्घसन्धिः ।
	धर्माविरुद्धो भूतेषु	धर्माविरुद्धः + भूतेषु	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	कामोऽस्मि	कामः + अस्मि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

(ख) समासः	कामरागविवर्जितम्	कामश्च रागश्च कामरागौ - द्वन्द्वः ।
		कामरागाभ्यां विवर्जितं कामरागविवर्जितम् - तृतीयातत्पुरुषः ।
	धर्माविरुद्धः	न विरुद्धः अविरुद्धः - नञ्तत्पुरुषः ।
		धर्मस्य अविरुद्धः धर्माविरुद्धः - षष्ठीतत्पुरुषः ।
	भरतर्षभ	भरतः ऋषभः यस्य सः भरतर्षभः, तत्सम्बुद्धौ - बहुव्रीहिः ।
(ग) कृदन्तः	बलम्	बल् (बल - प्राणने) + अच् (पचाद्यच्) ।
	कामः	कम् (कमु - कान्तौ) + घञ् (कर्मणि) ।
	रागः	रञ्ज् (रञ्ज रागे - क्रीडायाम्) + घञ् ।
	विवर्जितम्	वि + वृज् (वृजी - वर्जने) + क्त (कर्मणि) ।
	विरुद्धः	वि + रुध् (रुधिर् - आवरणे) + क्त (कर्मणि) ।
	भूतेषु	भू (भू - सत्तायाम्) + क्त (कर्मणि) ।
(घ) तद्धितान्तः	बलवताम्	बल + मतुप् । बलम् एषाम् एषु वा अस्ति, तेषाम् ।

भावस्पष्टीकरणम् -

अस्मि ।	
किम् अस्मि ?	**बलम्** अस्मि ।
कीदृशं बलम् अस्मि ?	**कामरागविवर्जितं** बलम् अस्मि ।
केषां कामरागविवर्जितं बलम् अस्मि ?	**बलवतां** कामरागविवर्जितं बलम् अस्मि ।
बलवतां कामरागविवर्जितं बलं **पुनश्च कः** अस्मि ?	बलवतां कामरागविवर्जितं बलं **कामः च** अस्मि ।
बलवतां कामरागविवर्जितं बलं **कीदृशः** कामः च अस्मि ?	बलवतां कामरागविवर्जितं बलं **धर्माविरुद्धः** कामः च अस्मि ।
बलवतां कामरागविवर्जितं बलं **केषु** धर्माविरुद्धः कामः च अस्मि ?	बलवतां कामरागविवर्जितं बलं **भूतेषु** धर्माविरुद्धः कामः च अस्मि ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भरतर्षभ !**

तात्पर्यम् - भरतश्रेष्ठ ! अहम् ओजस्विनां तृष्णारागसहितं सामर्थ्यम् अस्मि। प्राणिषु धर्माविरुद्धा इच्छा अस्मि।

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि॥७.१२॥

पदच्छेदः - ये, च, एव, सात्त्विकाः, भावाः, राजसाः, तामसाः, च, ये।
मत्तः, एव, इति, तान्, विद्धि, न, तु, अहम्, तेषु, ते, मयि॥

अन्वयः - ये च एव सात्त्विकाः भावाः ये राजसाः तामसाः च तान् मत्तः एव इति विद्धि। अहं तु तेषु न ते (पुनः) मयि।

पदार्थः - ये च एव = ये पुनः, सात्त्विकाः = सत्त्वात् आगताः, भावाः = पदार्थाः, ये राजसाः = ये रजसः आगताः, तामसाः च = तमसः आगताः च, तान् = पदार्थान्, मत्तः एव इति = मत्तः सम्भूताः इति, विद्धि = जानीहि, अहं तु = अहं हि, तेषु = तेषु पदार्थेषु, न = न भवामि, ते (पुनः) = भावाः पदार्थाः तु, मयि = मयि (वर्तन्ते)।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ये	यद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	च	अव्ययम्
एव	अव्ययम्	सात्त्विकाः	अ. पुं. प्र. बहु. (विशेषणम्)
भावाः	अ. पुं. प्र. बहु. (विशेष्यम्)	राजसाः	अ. पुं. प्र. बहु. (विशेषणम्)
तामसाः	अ. पुं. प्र. बहु. (विशेषणम्)	तान्	तद्- द. सर्व. पुं. द्वि. बहु. (विशेषणम्)
मत्तः	अव्ययम्	इति	अव्ययम्
विद्धि	विद् (विद ज्ञाने) पर. कर्तरि लोट्. मपु. एक.	अहम्	अस्मद्- द. सर्व. प्र. एक.
तु	अव्ययम्	तेषु	तद्- द. सर्व. पुं. स. बहु. (विशेषणम्)
न	अव्ययम्	ते	तद्- द. सर्व. पुं. प्र. बहु.
मयि	अस्मद्- द. सर्व. स. एक.		

व्याकरणम् -

(क) सन्धिः	चैव	च + एव	वृद्धिसन्धिः।
	सात्त्विका भावाः	सात्त्विकाः + भावाः	विसर्गसन्धिः (लोपः)।
	भावा राजसाः	भावाः + राजसाः	विसर्गसन्धिः (लोपः)।

	राजसास्तामसा	राजसाः + तामसाः	विसर्गसन्धिः (सकारः) ।
	तामसाश्च	तामसाः + च	विसर्गसन्धिः (सकारः) श्चुत्वसन्धिः ।
	मत्त एव	मत्तः + एव	विसर्गसन्धिः (लोपः) ।
	एवेति	एव + इति	गुणसन्धिः ।
	त्वहं	तु + अहम्	यण्सन्धिः ।
(ख) कृदन्तः	भावाः	भू (भू - सत्तायाम्) + णिच् + अच् (पचाद्यच्) ।	
(ग) तद्धितान्तः	सात्त्विकाः	सत्त्व + ठक् । (आगता) सत्वात् आगताः इत्यर्थः ।	
	राजसाः	रजस् + ठक् । (आगता) रजसः आगताः इत्यर्थः ।	
	तामसाः	तमस् + ठक् । (आगता) तमसः आगताः इत्यर्थः ।	
	मत्तः	अस्मद् + तसिल् ।	

भावस्पष्टीकरणम् -

(सन्ति) ।	
के सन्ति ?	**भावाः** सन्ति ।
के च भावाः सन्ति ?	**ये** च एव भावाः सन्ति ।
ये च एव **कीदृशाः** भावाः सन्ति ?	ये च एव **सात्त्विकाः** भावाः सन्ति ।
ये च एव सात्त्विकाः भावाः **पुनश्च कीदृशाः** सन्ति ?	ये च एव सात्त्विकाः भावाः **ये राजसाः** सन्ति ।
ये च एव सात्त्विकाः भावाः ये राजसाः **पुनश्च कीदृशाः** सन्ति ?	ये च एव सात्त्विकाः भावाः ये राजसाः **तामसाः च** सन्ति ।
ये च एव सात्त्विकाः भावाः ये राजसाः तामसाः च सन्ति । **तेन किम्** ?	ये च एव सात्त्विकाः भावाः ये राजसाः तामसाः च सन्ति । **विद्धि** ।
ये च एव सात्त्विकाः भावाः ये राजसाः तामसाः च सन्ति । **कान्** विद्धि ?	ये च एव सात्त्विकाः भावाः ये राजसाः तामसाः च सन्ति । **तान्** विद्धि ?
ये च एव सात्त्विकाः भावाः ये राजसाः तामसाः च सन्ति । तान् **कुतः** एव इति विद्धि ?	ये च एव सात्त्विकाः भावाः ये राजसाः तामसाः च सन्ति । तान् **मत्तः** एव इति विद्धि ।
अहं न (अस्मि) ।	
अहं तु **केषु** न अस्मि ?	अहं तु **तेषु** न अस्मि ।
अहं तु तेषु न अस्मि । **पुनश्च किम्** ?	अहं तु तेषु न अस्मि । **ते मयि** ।

तात्पर्यम् - ये सत्त्वात् समुत्पन्नाः शमदमादयः, ये रजसः समुत्पन्नाः दर्पद्वेषादयः, ये च तमसः समुत्पन्नाः शोकमोहादयः भावाः सन्ति, ते सर्वे मत्तः एव जाताः। तथापि नाहं तेषु अधीनः अस्मि। किन्तु ते एव मयि अधीनाः सन्ति।

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम्॥७.१३॥

पदच्छेदः - त्रिभिः, गुणमयैः, भावैः, एभिः, सर्वम्, इदम्, जगत्।
मोहितम्, न, अभिजानाति, माम्, एभ्यः, परम्, अव्ययम्॥

अन्वयः - गुणमयैः त्रिभिः एभिः भावैः इदं सर्वं जगत् मोहितम्। एभ्यः परम् अव्ययं मां न अभिजानाति।

पदार्थः - गुणमयैः = गुणविकारैः काममोहादिभिः, त्रिभिः = त्रिविधैः, एभिः = एतैः, भावैः = पदार्थैः, इदम् = एतत्, सर्वम् = सकलम्, जगत् = भुवनम्, मोहितम् = व्यामोहितम्, (तस्मात्) एभ्यः = (तस्मात्) एतेभ्यः, परम् = विलक्षणम्, अव्ययम् = नाशरहितम्, मां न अभिजानाति = मां न वेत्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
गुणमयैः	अ. पुं. तृ. बहु. (विशेषणम्)	त्रिभिः	इ. पुं. तृ. बहु. (नित्यबहुवचनान्तः) (विशेषणम्)
एभिः	इदम्- म. सर्व. पुं. तृ. बहु. (विशेषणम्)	भावैः	अ. पुं. तृ. बहु. (विशेष्यम्)
इदम्	इदम्- म. सर्व. नपुं. प्र. एक. (विशेषणम्)	सर्वम्	अ. सर्व. नपुं. प्र. एक. (विशेषणम्)
जगत्	जगत्- त. नपुं. प्र. एक. (विशेष्यम्)	मोहितम्	अ. नपुं. प्र. एक. (विशेषणम्)
एभ्यः	इदम्- म. सर्व. नपुं. पं. बहु. (विशेषणम्)	परम्	अव्ययम्
अव्ययम्	अ. पुं. द्वि. एक. (विशेषणम्)	माम्	अस्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)
न	अव्ययम्	अभिजानाति	अभि + ज्ञा (ज्ञा अवबोधने) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः त्रिभिर्गुणमयैर्भावैः	त्रिभिः + गुणमयैः	विसर्गसन्धिः (रेफः)।	
	गुणमयैः + भावैः	विसर्गसन्धिः (रेफः)।	
भावैरेभिः	भावैः + एभिः	विसर्गसन्धिः (रेफः)।	
नाभिजानाति	न + अभिजानाति	सवर्णदीर्घसन्धिः।	

(ख) समासः	अव्ययम्	न विद्यते व्ययः यस्य सः अव्ययः, तम् - बहुव्रीहिः ।
(ग) कृदन्तः	भावैः	भू (भू - सत्तायाम्) + णिच् + अच् (पचाद्यच्), तैः ।
	मोहितम्	मुह् (मुह - वैचित्ये) + णिच्, + क्त (कर्मणि) ।
(घ) तद्धितान्तः	गुणमयैः	गुण + मयट् (विकारः) तैः । गुणानां विकारैः इत्यर्थः ।

भावस्पष्टीकरणम् -

(अस्ति) ।	
किं अस्ति ?	**मोहितम्** अस्ति ।
किं मोहितम् अस्ति ?	**इदं** मोहितम् अस्ति ।
इदं **किं** मोहितम् अस्ति ?	इदं **सर्वं** मोहितम् अस्ति ।
इदं सर्वं **किं** मोहितम् अस्ति ?	इदं सर्वं **जगत्** मोहितम् अस्ति ।
कैः इदं सर्वं जगत् मोहितम् अस्ति ?	**भावैः** इदं सर्वं जगत् मोहितम् अस्ति ।
कैः भावैः इदं सर्वं जगत् मोहितम् अस्ति ?	**एभिः** भावैः इदं सर्वं जगत् मोहितम् अस्ति ।
कतिभिः एभिः भावैः इदं सर्वं जगत् मोहितम् अस्ति ?	**त्रिभिः** एभिः भावैः इदं सर्वं जगत् मोहितम् अस्ति ।
कीदृशैः त्रिभिः एभिः भावैः इदं सर्वं जगत् मोहितम् अस्ति ?	**गुणमयैः** त्रिभिः एभिः भावैः इदं सर्वं जगत् मोहितम् अस्ति ।
गुणमयैः त्रिभिः एभिः भावैः इदं सर्वं जगत् मोहितम् अस्ति । **तेन किम्** ?	गुणमयैः त्रिभिः एभिः भावैः इदं सर्वं जगत् मोहितम् अस्ति । **न अभिजानाति** ।
गुणमयैः त्रिभिः एभिः भावैः इदं सर्वं जगत् मोहितम् अस्ति । **कं** न अभिजानाति ?	गुणमयैः त्रिभिः एभिः भावैः इदं सर्वं जगत् मोहितम् अस्ति । **मां** न अभिजानाति ।
गुणमयैः त्रिभिः एभिः भावैः इदं सर्वं जगत् मोहितम् अस्ति । **कीदृशं** मां न अभिजानाति ?	गुणमयैः त्रिभिः एभिः भावैः इदं सर्वं जगत् मोहितम् अस्ति । **अव्ययं** मां न अभिजानाति ।
गुणमयैः त्रिभिः एभिः भावैः इदं सर्वं जगत् मोहितम् अस्ति । **केभ्यः** अव्ययं मां न अभिजानाति ?	गुणमयैः त्रिभिः एभिः भावैः इदं सर्वं जगत् मोहितम् अस्ति । **एभ्यः परम्** अव्ययं मां न अभिजानाति ।

तात्पर्यम् - काममोहादयः सत्त्वादीनां गुणविकाराः । तैः विभ्रान्ताः इमे जनाः तान् गुणविकारान् अतीत्य वर्तमानं मां ज्ञातुं न शक्नुवन्ति ।

दैवी ह्येषा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥७.१४॥

पदच्छेदः - दैवी, हि, एषा, गुणमयी, मम, माया, दुरत्यया ।
माम्, एव, ये, प्रपद्यन्ते, मायाम्, एताम्, तरन्ति, ते ॥

अन्वयः - दैवी गुणमयी एषा मम माया दुरत्यया हि । ये माम् एव प्रपद्यन्ते ते एतां मायां तरन्ति ॥

पदार्थः - दैवी = वैष्णवी, गुणमयी = त्रिगुणात्मिका, एषा = इयम्, मम माया = मम मायाशक्तिः, दुरत्यया हि = लङ्घयितुम् अशक्या खलु, ये = ये जनाः, माम् एव = माम् एव, प्रपद्यन्ते = शरणं गच्छन्ति, ते = ते, एताम् = इमाम्, मायाम् = मायाशक्तिम्, तरन्ति = अतिक्राम्यन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
दैवी	ई. स्त्री. प्र. एक. (विशेषणम्)	गुणमयी	ई. स्त्री. प्र. एक. (विशेषणम्)
एषा	एतद्- द. सर्व. स्त्री. प्र. एक. (विशेषणम्)	मम	अस्मद्- द. सर्व. ष. एक.
माया	आ. स्त्री. प्र. एक. (विशेष्यम्)	दुरत्यया	आ. स्त्री. प्र. एक. (विशेषणम्)
हि	अव्ययम्	ये	यद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)
माम्	अस्मद्- द. सर्व. द्वि. एक.	एव	अव्ययम्
प्रपद्यन्ते	प्र + पद् (पद गतौ) आत्म. कर्तरि लट्. प्रपु. बहु.	ते	तद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)
एताम्	एतद्- द. सर्व. स्त्री. द्वि. एक. (विशेषणम्)	मायाम्	आ. स्त्री. द्वि. एक. (विशेष्यम्)
तरन्ति	तॄ (तॄ प्लवनसन्तरणयोः) पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः ह्येषा — हि + एषा — यण्सन्धिः ।

(ख) कृदन्तः दुरत्यया — दुर् + अति + इण् + खल् (कर्मणि) । कृच्छ्रेण अत्येतुं शक्या इत्यर्थः ।

(ग) तद्धितान्तः दैवी — देव + अण् (इदमर्थे) । देवानाम् इयं दैवी, स्त्रीत्वे ङीप् ।

गुणमयी — गुण + मयट् । (स्वरूपार्थे) गुणस्वरूपा इत्यर्थः ।

भावस्पष्टीकरणम् -

(अस्ति) ।	
का अस्ति ?	**माया** अस्ति ।
का माया अस्ति ?	**दैवी** माया अस्ति ।
दैवी **कीदृशी** माया अस्ति ?	दैवी **गुणमयी** माया अस्ति ।
दैवी गुणमयी **का** माया अस्ति ?	दैवी गुणमयी **एषा** माया अस्ति ।
दैवी गुणमयी एषा **कस्य** माया अस्ति ?	दैवी गुणमयी एषा **मम** माया अस्ति ।
दैवी गुणमयी एषा मम माया **कीदृशी** अस्ति ?	दैवी गुणमयी एषा मम माया **दुरत्यया हि** अस्ति ।
दैवी गुणमयी एषा मम माया दुरत्यया हि अस्ति । **ततः किं भवति** ?	दैवी गुणमयी एषा मम माया दुरत्यया हि अस्ति। **प्रपद्यन्ते** ।
दैवी गुणमयी एषा मम माया दुरत्यया हि अस्ति। **कं** प्रपद्यन्ते ?	दैवी गुणमयी एषा मम माया दुरत्यया हि अस्ति। **मां** प्रपद्यन्ते ।
दैवी गुणमयी एषा मम माया दुरत्यया हि अस्ति । **के** मां प्रपद्यन्ते ?	दैवी गुणमयी एषा मम माया दुरत्यया हि अस्ति । **ये** माम् एव प्रपद्यन्ते ।
दैवी गुणमयी एषा मम माया दुरत्यया हि अस्ति । **ये** माम् एव प्रपद्यन्ते, **तेषां किं भवति** ?	दैवी गुणमयी एषा मम माया दुरत्यया हि अस्ति । ये माम् एव प्रपद्यन्ते, **ते तरन्ति** ।
दैवी गुणमयी एषा मम माया दुरत्यया हि अस्ति । ये माम् एव प्रपद्यन्ते ते **कां** तरन्ति ?	दैवी गुणमयी एषा मम माया दुरत्यया हि अस्ति । ये माम् एव प्रपद्यन्ते ते **मायां** तरन्ति ।
दैवी गुणमयी एषा मम माया दुरत्यया हि अस्ति । ये माम् एव प्रपद्यन्ते ते **कां** मायां तरन्ति ?	दैवी गुणमयी एषा मम माया दुरत्यया हि अस्ति । ये माम् एव प्रपद्यन्ते ते **एतां** मायां तरन्ति ।

तात्पर्यम् - एषा लोकोत्तरा गुणत्रयस्वरूपा मम माया केनापि लङ्घयितुं न शक्यते । ये तावत् भक्ताः सन्तः माम् एव शरणम् आगच्छन्ति, ते अवश्यम् इमां मायां लङ्घयितुं शक्नुवन्ति ।

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥७.१५॥

पदच्छेदः - न, माम्, दुष्कृतिनः, मूढाः, प्रपद्यन्ते, नराधमाः ।
मायया, अपहृतज्ञानाः, आसुरम्, भावम्, आश्रिताः ॥

अन्वयः - मायया अपहृतज्ञानाः आसुरं भावम् आश्रिताः दुष्कृतिनः मूढाः नराधमाः मां न प्रपद्यन्ते ।

पदार्थः - मायया = मायाशक्त्या, अपहृतज्ञानाः = निरस्तज्ञानाः, आसुरम् = हिंसादिरूपम्, भावम् = स्वभावम्, आश्रिताः = प्राप्ताः, दुष्कृतिनः = पापकारिणः, मूढाः = अविवेकिनः, नराधमाः = नीचमानवाः, मां न प्रपद्यन्ते = मां न भजन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मायया	आ. स्त्री. तृ. एक.	अपहृतज्ञानाः	अ. पुं. प्र. बहु. (विशेषणम्)
आसुरम्	अ. पुं. द्वि. एक. (विशेषणम्)	भावम्	अ. पुं. द्वि. एक. (विशेष्यम्)
आश्रिताः	अ. पुं. प्र. बहु. (विशेषणम्)	दुष्कृतिनः	दुष्कृतिन्- न. पुं. प्र. बहु. (विशेषणम्)
मूढाः	अ. पुं. प्र. बहु. (विशेषणम्)	नराधमाः	अ. पुं. प्र. बहु. (विशेषणम्)
माम्	अस्मद्- द. सर्व. द्वि. एक.	न	अव्ययम्
प्रपद्यन्ते	प्र + पद् (पद गतौ) आत्म. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः

दुष्कृतिनो मूढाः	दुष्कृतिनः + मूढाः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
अपहृतज्ञाना आसुरम्	अपहृतज्ञानाः + आसुरम्	विसर्गसन्धिः (लोपः) ।

(ख) समासः

दुष्कृतिनः — दुष्टं कृतं, दुष्कृतम् - प्रादिसमासः । दुष्कृतम् एषाम् एषु वा अस्ति । मतुबर्थे इनिः ।

नराधमाः — नरेषु अधमाः, नराधमाः - सप्तमीतत्पुरुषः ।

अपहृतज्ञानाः — अपहृतं ज्ञानं येषां ते अपहृतज्ञानाः - बहुव्रीहिः ।

(ग) कृदन्तः

मूढाः — मुह् (मुह - वैचित्त्ये) + क्त (कर्तरि) ।

हृतम् — हृ (हृञ् - हरणे) + क्त ।

भावम् — भू (भू - सत्तायाम्) + णिच् + अच् (पचाद्यच्), तम् ।

आश्रिताः — आ + श्रि (श्रिञ् - सेवायाम्) + क्त ।

(घ) तद्धितान्तः

आसुरम् — असुर + अण् (इदमर्थे) असुराणाम् अयम् इत्यर्थः, तम् ।

भावस्पष्टीकरणम् -

न प्रपद्यन्ते ।	
कं न प्रपद्यन्ते ?	मां न प्रपद्यन्ते ।

के मां न प्रपद्यन्ते ?	**नराधमाः** मां न प्रपद्यन्ते ।
कीदृशाः नराधमाः मां न प्रपद्यन्ते ?	**मूढाः** नराधमाः मां न प्रपद्यन्ते ।
पुनश्च कीदृशाः मूढाः नराधमाः मां न प्रपद्यन्ते ?	**दुष्कृतिनः** मूढाः नराधमाः मां न प्रपद्यन्ते ।
कथम्भूताः दुष्कृतिनः मूढाः नराधमाः मां न प्रपद्यन्ते ?	**आश्रिताः** दुष्कृतिनः मूढाः नराधमाः मां न प्रपद्यन्ते ।
कम् आश्रिताः दुष्कृतिनः मूढाः नराधमाः मां न प्रपद्यन्ते ?	**भावम्** आश्रिताः दुष्कृतिनः मूढाः नराधमाः मां न प्रपद्यन्ते ।
कीदृशं भावम् आश्रिताः दुष्कृतिनः मूढाः नराधमाः मां न प्रपद्यन्ते ?	**आसुरं** भावम् आश्रिताः दुष्कृतिनः मूढाः नराधमाः मां न प्रपद्यन्ते ।
के आसुरं भावम् आश्रिताः दुष्कृतिनः मूढाः नराधमाः मां न प्रपद्यन्ते ?	**अपहृतज्ञानाः** आसुरं भावम् आश्रिताः दुष्कृतिनः मूढाः नराधमाः मां न प्रपद्यन्ते ।
कया अपहृतज्ञानाः आसुरं भावम् आश्रिताः दुष्कृतिनः मूढाः नराधमाः मां न प्रपद्यन्ते ?	**मायया** अपहृतज्ञानाः आसुरं भावम् आश्रिताः दुष्कृतिनः मूढाः नराधमाः मां न प्रपद्यन्ते ।

तात्पर्यम् - मायया येषां ज्ञानम् अपहृतं भवति तादृशाः राक्षसानां स्वभावं प्राप्ताः पापकारिणः अविवेकिनः नीचमानवाः मां न भजन्ति ।

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥७.१६॥

पदच्छेदः - चतुर्विधाः, भजन्ते, माम्, जनाः, सुकृतिनः, अर्जुन ।
आर्तः, जिज्ञासुः, अर्थार्थी, ज्ञानी, च, भरतर्षभ ॥

अन्वयः - भरतर्षभ अर्जुन ! आर्तः जिज्ञासुः अर्थार्थी ज्ञानी च (इति) चतुर्विधाः सुकृतिनः जनाः मां भजन्ते ।

पदार्थः - भरतर्षभ अर्जुन = भरतोत्तम अर्जुन ! आर्तः = रोगादिपीडितः, जिज्ञासुः = ज्ञातुमिच्छुः, अर्थार्थी = धनाभिलाषी, ज्ञानी च = आत्मज्ञानवान् (इति) चतुर्विधाः = इति चतुष्प्रकारकाः, सुकृतिनः = पुण्यवन्तः, जनाः = मानवाः, माम् = माम्, भजन्ते = सेवन्ते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भरतर्षभ	अ. पुं. सम्बो. एक.	अर्जुन	अ. पुं. सम्बो. एक.
आर्तः	अ. पुं. प्र. एक. (विशेषणम्)	जिज्ञासुः	उ. पुं. प्र. एक. (विशेषणम्)

अर्थार्थी	अर्थार्थिन्- न. पुं. प्र. एक. (विशेषणम्)	ज्ञानी	ज्ञानिन्- न. पुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	चतुर्विधाः	अ. पुं. प्र. बहु. (विशेषणम्)
सुकृतिनः	सुकृतिन्- न. पुं. प्र. बहु. (विशेषणम्)	जनाः	अ. पुं. प्र. बहु. (विशेष्यम्)
माम्	अस्मद्- द. सर्व. द्वि. एक.	भजन्ते	भज् (भज - सेवायाम्) आत्म. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः

चतुर्विधा भजन्ते	चतुर्विधाः + भजन्ते	विसर्गसन्धिः (लोपः)।
सुकृतिनोऽर्जुन	सुकृतिनः + अर्जुन	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
आर्तो जिज्ञासुः	आर्तः + जिज्ञासुः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
जिज्ञासुरर्थार्थी	जिज्ञासुः + अर्थार्थी	विसर्गसन्धिः (रेफः)।

(ख) समासः

चतुर्विधाः	चतस्रः विधाः येषां ते चतुर्विधाः - बहुव्रीहिः।
सुकृतिनः	सुष्ठु कृतम्, सुकृतम् - प्रादिसमासः। सुकृतम् एषाम् एषु वा अस्ति। मतुबर्थे इनिः।
अर्थार्थी	(असन्निहितः) अर्थः अस्ति इति अर्थी। मतुबर्थे इनिः। अर्थेन अर्थी अर्थार्थी - तृतीयातत्पुरुषः।
भरतर्षभ	भरतानाम् ऋषभः भरतर्षभः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः।

(ग) कृदन्तः

आर्तः	आ + ऋ (ऋ - गतिप्रापणयोः) + क्त (कर्तरि)।
जिज्ञासुः	ज्ञा (ज्ञा - अवबोधने) + सन् (इच्छायाम्) + उ (कर्तरि)। ज्ञातुम् इच्छुः।

(घ) तद्धितान्तः

ज्ञानी	ज्ञा (ज्ञा - अवबोधने) + इनि (मतुबर्थे) ज्ञानम् अस्य अस्मिन् वा अस्ति इति।

भावस्पष्टीकरणम् -

भजन्ते।	
कं भजन्ते ?	**मां** भजन्ते।
के मां भजन्ते ?	**जनाः** मां भजन्ते।
कीदृशाः जनाः मां भजन्ते ?	**सुकृतिनः** जनाः मां भजन्ते।
कतिविधाः सुकृतिनः जनाः मां भजन्ते ?	**चतुर्विधाः** सुकृतिनः जनाः मां भजन्ते।

के च ते इति चतुर्विधाः सुकृतिनः जनाः मां भजन्ते ?	**आर्तः जिज्ञासुः अर्थार्थी ज्ञानी च इति** चतुर्विधाः सुकृतिनः जनाः मां भजन्ते ।
अस्मिन् श्लोके सम्बोधनपदे के ?	**भरतर्षभ, अर्जुन !**

तात्पर्यम् - हे भरतोत्तम अर्जुन ! रोगादिग्रस्तः, भगवत्तत्त्वं ज्ञातुम् इच्छुः, धनाभिलाषी, आत्मज्ञानवान् च इत्येते चतुर्विधाः पुण्यकर्माणः जनाः मां भजन्ते ।

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥७.१७॥

पदच्छेदः - तेषाम्, ज्ञानी, नित्ययुक्तः, एकभक्तिः, विशिष्यते ।
प्रियः, हि, ज्ञानिनः, अत्यर्थम्, अहम्, सः, च, मम, प्रियः ॥

अन्वयः - तेषां नित्ययुक्तः एकभक्तिः ज्ञानी विशिष्यते । अहं हि ज्ञानिनः अत्यर्थं प्रियः । सः च मम प्रियः ।

पदार्थः - तेषाम् = तेषु, नित्ययुक्तः = सततयोगी, एकभक्तिः = अनन्यभक्तिः, ज्ञानी = ज्ञानवान्, विशिष्यते = अतिरिच्यते, अहं हि = अहम्, ज्ञानिनः = ज्ञानवतः, अत्यर्थम् = अतिशयेन, प्रियः = अभीष्टः, सः च = सः अपि, मम = मे, प्रियः = अभीष्टः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तेषाम्	तद्- द. सर्व. पुं. ष. बहु. (विशेषणम्)	नित्ययुक्तः	अ. पुं. प्र. एक. (विशेषणम्)
एकभक्तिः	इ. पुं. प्र. एक. (विशेषणम्)	ज्ञानी	ज्ञानिन्- न. पुं. प्र. एक. (विशेष्यम्)
विशिष्यते	वि + शिष् (शिष्लृ - विशेषणे) आत्म. कर्मकर्तरि लट्. प्रपु. एक.	अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)
हि	अव्ययम्	ज्ञानिनः	ज्ञानिन्- न. पुं. ष. एक. (विशेषणम्)
अत्यर्थम्	अ. नपुं. द्वि. एक. क्रियावि.	प्रियः	अ. पुं. प्र. एक. (विशेषणम्)
सः	तद्- द. सर्व. पुं. प्र. एक (विशेषणम्)	च	अव्ययम्
मम	अस्मद्- द. सर्व. ष. एक.	प्रियः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	नित्ययुक्त एकभक्तिः	नित्ययुक्तः + एकभक्तिः	विसर्गसन्धिः (लोपः)।
	एकभक्तिर्विशिष्यते	एकभक्तिः + विशिष्यते	विसर्गसन्धिः (रेफः)।
	प्रियो हि	प्रियः + हि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	ज्ञानिनोऽत्यर्थम्	ज्ञानिनः + अत्यर्थम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	स च	सः + च	विसर्गसन्धिः (लोपः)।

(ख) समासः	नित्ययुक्त	नित्यं युक्तः, नित्ययुक्तः - सुप्समासः।
	एकभक्तिः	एकस्मिन् भक्तिः यस्य सः एकभक्तिः - बहुव्रीहिः।
(ग) कृदन्तः	युक्तः	युज् (युजिर् - योगे) + क्त (कर्तरि)।
	भक्तिः	भज् (भज - सेवायाम्) + क्तिन् (भावे)।
	प्रियः	प्री (प्रीञ् - तर्पणे कान्तौ च) + क।
(घ) तद्धितान्तः	ज्ञानी	ज्ञान + इनि (मतुबर्थे)। ज्ञानम् अस्य अस्मिन् वा अस्ति।

भावस्पष्टीकरणम् -

विशिष्यते।	
कः विशिष्यते ?	**ज्ञानी** विशिष्यते।
कीदृशः ज्ञानी विशिष्यते ?	**एकभक्तिः** ज्ञानी विशिष्यते।
पुनश्च कीदृशः एकभक्तिः ज्ञानी विशिष्यते ?	**नित्ययुक्तः** एकभक्तिः ज्ञानी विशिष्यते।
केषां नित्ययुक्तः एकभक्तिः ज्ञानी विशिष्यते ?	**तेषां** नित्ययुक्तः एकभक्तिः ज्ञानी विशिष्यते।
(अस्मि)।	
कः अस्मि ?	**प्रियः** अस्मि।
कस्य प्रियः अस्मि ?	**ज्ञानिनः** प्रियः अस्मि।
ज्ञानिनः **कथं** प्रियः अस्मि ?	ज्ञानिनः **अत्यर्थं** प्रियः अस्मि।
कः ज्ञानिनः अत्यर्थं प्रियः अस्मि ?	**अहं हि** ज्ञानिनः अत्यर्थं प्रियः अस्मि।
(अस्ति)।	
कः अस्ति ?	**सः** अस्ति।
सः **कीदृशः** अस्ति ?	सः **प्रियः** अस्ति।
सः **कस्य** प्रियः अस्ति ?	सः च **मम** प्रियः अस्ति।

तात्पर्यम् - तेषां सततयोगी अनन्यभक्तिः ज्ञानी विशिष्यते। अहं ज्ञानवतः अतीव प्रियः। सः अपि मम अतीव प्रियः।

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम्।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम्॥७.१८॥

पदच्छेदः - उदाराः, सर्वे, एव, एते, ज्ञानी, तु, आत्मा, एव, मे, मतम्।
आस्थितः, सः, हि, युक्तात्मा, माम्, एव, अनुत्तमाम्, गतिम्॥

अन्वयः - एते सर्वे उदाराः एव। ज्ञानी तु मे आत्मा एव (इति) मतम्। सः हि युक्तात्मा अनुत्तमां गतिं माम् एव आस्थितः।

पदार्थः - एते = इमे, सर्वे = सकलाः, उदाराः एव = उत्कृष्टाः एव, ज्ञानी तु = ज्ञानवान् तु, आत्मा एव = आत्मा एव (इति), मे = मम, मतम् = अभिप्रायः, हि = यस्मात्, सः = ज्ञानी, युक्तात्मा = समाहितचित्तः, अनुत्तमाम् = उत्कृष्टाम्, गतिम् = पदम्, मामेव आस्थितः = माम् एव मत्वा प्राप्तः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
एते	एतद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	सर्वे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)
उदाराः	अ. पुं. प्र. बहु. (विशेष्यम्)	एव	अव्ययम्
ज्ञानी	ज्ञानिन्- न. पुं. प्र. एक. (विशेषणम्)	तु	अव्ययम्
मे	अस्मद्- द. सर्व. ष. एक.	आत्मा	आत्मन्- न. पुं. प्र. एक.
मतम्	अ. नपुं. प्र. एक.	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
हि	अव्ययम्	युक्तात्मा	युक्तात्मन्- न. पुं. प्र. एक. (विशेषणम्)
अनुत्तमाम्	आ. स्त्री. द्वि. एक. (विशेषणम्)	गतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)
माम्	अस्मद्- द. सर्व. द्वि. एक.	आस्थितः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	सर्व एव	सर्वे + एव	यान्तवान्तादेशसन्धिः (यलोपः)।
	एवैते	एव + एते	वृद्धिसन्धिः।
	त्वात्मा	तु + आत्मा	यण्सन्धिः।
	आत्मैव	आत्मा + एव	वृद्धिसन्धिः।
	स हि	सः + हि	विसर्गसन्धिः (लोपः)।

	एवानुत्तमाम्	एव + अनुत्तमाम् सवर्णदीर्घसन्धिः ।
(ख) समासः	युक्तात्मा	युक्तः आत्मा यस्य सः युक्तात्मा - बहुव्रीहिः ।
	अनुत्तमाम्	न विद्यते उत्तमा यस्याः (यतः) सा अनुत्तमा, ताम् - बहुव्रीहिः ।
(ग) कृदन्तः	मतम्	मन् (मन - ज्ञाने) - क्त (कर्मणि) ।
	आस्थितः	आ + स्था (ष्ठा - गतिनिवृत्तौ) + क्त (कर्मणि) ।
	युक्तः	युज् (युजिर् - योगे) + क्त (कर्मणि) ।
	गतिम्	गम् (गम्लृ - गतौ) + क्तिन् (भावे), ताम् ।
(घ) तद्धितान्तः	**ज्ञानी**	ज्ञान + इनि (मतुबर्थे) । ज्ञानम् अस्य अस्मिन् वा अस्ति ।

भावस्पष्टीकरणम् -

(सन्ति) ।	
के सन्ति ?	**उदाराः एव** सन्ति ।
कति उदाराः एव सन्ति ?	**सर्वे** उदाराः एव सन्ति ।
के सर्वे उदाराः एव सन्ति ?	**एते** सर्वे उदाराः एव सन्ति ।
(अस्ति) ।	
किम् अस्ति ?	**मतम्** अस्ति ।
कस्य मतम् अस्ति ?	**मे** मतम् अस्ति ।
मे **कः** मतम् अस्ति ?	मे **आत्मा एव (इति)** मतम् अस्ति ।
कः मे आत्मा एव इति मतम् अस्ति ?	**ज्ञानी तु** मे आत्मा एव (इति) मतम् अस्ति ।
आस्थितः ।	
कः आस्थितः ?	**युक्तात्मा** आस्थितः ।
कः युक्तात्मा आस्थितः ?	**सः हि** युक्तात्मा आस्थितः ।
सः हि युक्तात्मा **काम्** आस्थितः ?	सः हि युक्तात्मा **गतिम्** आस्थितः ।
सः हि युक्तात्मा **कीदृशीं** गतिम् आस्थितः ?	सः हि युक्तात्मा **अनुत्तमां** गतिम् आस्थितः ।
सः हि युक्तात्मा अनुत्तमां गतिं **कम्** आस्थितः ?	सः हि युक्तात्मा अनुत्तमां गतिं **माम् एव** आस्थितः ।

तात्पर्यम् - एते सर्वे उत्कृष्टाः एव । ज्ञानवान् तु मत्तः अन्यः न, अपि तु मत्स्वरूपः एव इति मम अभिप्रायः । यतः सः ज्ञानवान् प्राप्यं पदं भगवान् एव इति मामेव आश्रितवान् ।

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥७.१९॥

पदच्छेदः - बहूनाम्, जन्मनाम्, अन्ते, ज्ञानवान्, माम्, प्रपद्यते।
वासुदेवः, सर्वम्, इति, सः, महात्मा, सुदुर्लभः ॥

अन्वयः - बहूनां जन्मनाम् अन्ते वासुदेवः सर्वम् इति (यः) ज्ञानवान् मां प्रपद्यते सः महात्मा सुदुर्लभः।

पदार्थः - बहूनाम् = असङ्ख्यानाम्, जन्मनाम् = जन्मनाम्, अन्ते = अवसाने, वासुदेवः = नारायणः, सर्वम् इति = निखिलम् इति, (यः = यः पुरुषः) ज्ञानवान् = ज्ञानयुक्तः, मां प्रपद्यते = मां प्राप्नोति, सः = तादृशः, महात्मा = महानुभावः, सुदुर्लभः = अत्यन्तं दुष्प्रापः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
बहूनाम्	उ. नपुं. ष. बहु. (विशेषणम्)	जन्मनाम्	जन्मन्- न. नपुं. ष. बहु. (विशेष्यम्)
अन्ते	अव्ययम्	वासुदेवः	अ. पुं. प्र. एक.
सर्वम्	अ. सर्व. नपुं. प्र. एक.	इति	अव्ययम्
ज्ञानवान्	ज्ञानवत्- त. पुं. प्र. एक. (विशेषणम्)	माम्	अस्मद्- द. सर्व. द्वि. एक.
प्रपद्यते	प्र + पद् (पद - गतौ) आत्म. कर्तरि लट्. प्रपु. एक.	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
महात्मा	महात्मन्- न. पुं. प्र. एक. (विशेष्यम्)	सुदुर्लभः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः स महात्मा — सः + महात्मा — विसर्गसन्धिः (लोपः)।

(ख) समासः महात्मा — महान् आत्मा यस्य सः महात्मा - बहुव्रीहिः।

(ग) कृदन्तः सुदुर्लभः — सु + दुर् + लभ् (डुलभष् - प्राप्तौ) + खल् (कर्मणि)। दुःखेन लभ्यते (अत्यन्तं कृच्छ्रेण लब्धुं शक्यः) इत्यर्थः।

(घ) तद्धितान्तः ज्ञानवान् — ज्ञान + मतुप्। ज्ञानम् अस्य अस्मिन् वा अस्ति।
वासुदेवः — वसुदेव + अण् (अपत्यार्थे)। वसुदेवस्य अपत्यं पुमान् वासुदेवः।

भावस्पष्टीकरणम् -

प्रपद्यते।	
कं प्रपद्यते ?	**मां प्रपद्यते।**

कः मां प्रपद्यते ?	**ज्ञानवान्** मां प्रपद्यते ।
कदा ज्ञानवान् मां प्रपद्यते ?	**अन्ते** ज्ञानवान् मां प्रपद्यते ।
केषाम् अन्ते ज्ञानवान् मां प्रपद्यते ?	**जन्मनाम्** अन्ते ज्ञानवान् मां प्रपद्यते ।
कतीनां जन्मनाम् अन्ते ज्ञानवान् मां प्रपद्यते ?	**बहूनां** जन्मनाम् अन्ते ज्ञानवान् मां प्रपद्यते ।
बहूनां जन्मनाम् अन्ते **किम् इति** ज्ञानवान् मां प्रपद्यते ?	बहूनां जन्मनाम् अन्ते **वासुदेवः सर्वम् इति** ज्ञानवान् मां प्रपद्यते ?
बहूनां जन्मनाम् अन्ते वासुदेवः सर्वम् इति **(यः)** ज्ञानवान् मां प्रपद्यते **सः कीदृशः** ?	बहूनां जन्मनाम् अन्ते वासुदेवः सर्वम् इति यः ज्ञानवान् मां प्रपद्यते **सः सुदुर्लभः** ।
बहूनां जन्मनाम् अन्ते वासुदेवः सर्वम् इति यः ज्ञानवान् मां प्रपद्यते सः **कः** सुदुर्लभः ?	बहूनां जन्मनाम् अन्ते वासुदेवः सर्वम् इति यः ज्ञानवान् मां प्रपद्यते सः **महात्मा** सुदुर्लभः ।

तात्पर्यम् - असङ्ख्यानां जन्मनां समाप्तौ सत्यां सर्वमपि एतत् वासुदेवः इति यः ज्ञानयुक्तः भवति सः मां प्राप्नोति । तादृशः पुरुषः अत्यन्तं दुष्प्रापः ।

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥७.२०॥

पदच्छेदः - कामैः, तैः, तैः, हृतज्ञानाः, प्रपद्यन्ते, अन्यदेवताः ।
तम्, तम्, नियमम्, आस्थाय, प्रकृत्या, नियताः, स्वया ॥

अन्वयः - तैः तैः कामैः हृतज्ञानाः स्वया प्रकृत्या नियताः तं तं नियमम् आस्थाय अन्यदेवताः प्रपद्यन्ते ।

पदार्थः - तैः तैः = अनेकविधैः, कामैः = अभिलाषैः, हृतज्ञानाः = अपगतविवेकाः, स्वया = स्वकीयेन, प्रकृत्या = स्वभावेन, नियताः = नियन्त्रिताः, तं तम् = बहुप्रकारकम्, नियमम् = जपोपवासरूपं नियमम्, आस्थाय = आश्रित्य, अन्यदेवताः = इतरदेवताः, प्रपद्यन्ते = भजन्ते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तैः	तद्- द. सर्व. पुं. तृ. बहु. (विशेषणम्)	कामैः	अ. पुं. तृ. बहु. (विशेष्यम्)
हृतज्ञानाः	अ. पुं. प्र. बहु. (विशेषणम्)	स्वया	आ. स्त्री. तृ. एक. (विशेषणम्)
प्रकृत्या	इ. स्त्री. तृ. एक. (विशेष्यम्)	नियताः	अ. पुं. प्र. बहु. (विशेषणम्)

तम्	तद्- द. सर्व. पुं. द्वि. एक. (विशेषणम्)	नियमम्	अ. पुं. द्वि. एक. (विशेष्यम्)
आस्थाय	ल्यबन्तम् अव्ययम्	अन्यदेवताः	आ. स्त्री. द्वि. बहु.
प्रपद्यन्ते	प्र + पद् (पद - गतौ) आत्म. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः कामैस्तैस्तैर्हृतज्ञानाः — कामैः + तैः — विसर्गसन्धिः (सकारः)।
तैः + तैः — विसर्गसन्धिः (सकारः)।
तैः + हृतज्ञानाः — विसर्गसन्धिः (रेफः)।
प्रपद्यन्तेऽन्यदेवताः — प्रपद्यन्ते + अन्यदेवताः — पूर्वरूपसन्धिः।

(ख) समासः हृतज्ञानाः — हृतं ज्ञानं येषां ते हृतज्ञानाः - बहुव्रीहिः।
अन्यदेवताः — अन्याः देवताः अन्यदेवताः - कर्मधारयः।

(ग) कृदन्तः कामैः — कम् (कमु - कान्तौ) + घञ् (कर्मणि), तैः।
हृतम् — हृ (हृञ् - हरणे) + क्त (कर्मणि)।
नियमम् — नि + यम् (यम - उपरमे) + अप्, तम्।
आस्थाय — आ + स्था (ष्ठा - गतिनिवृत्तौ) + ल्यप्।
प्रकृत्या — प्र + कृ (डुकृञ् - करणे) + क्तिन्, तया।
नियताः — नि + यम् (यम - उपरमे) + क्त (कर्मणि)।

भावस्पष्टीकरणम् -

प्रपद्यन्ते।	
काः प्रपद्यन्ते ?	**अन्यदेवताः** प्रपद्यन्ते।
किं कृत्वा अन्यदेवताः प्रपद्यन्ते ?	**आस्थाय** अन्यदेवताः प्रपद्यन्ते।
कम् आस्थाय अन्यदेवताः प्रपद्यन्ते ?	**नियमम्** आस्थाय अन्यदेवताः प्रपद्यन्ते।
कं कं नियमम् आस्थाय अन्यदेवताः प्रपद्यन्ते ?	**तं तं** नियमम् आस्थाय अन्यदेवताः प्रपद्यन्ते।
के तं तं नियमम् आस्थाय अन्यदेवताः प्रपद्यन्ते ?	**हृतज्ञानाः** तं तं नियमम् आस्थाय अन्यदेवताः प्रपद्यन्ते।
कैः हृतज्ञानाः तं तं नियमम् आस्थाय अन्यदेवताः प्रपद्यन्ते ?	**कामैः** हृतज्ञानाः तं तं नियमम् आस्थाय अन्यदेवताः प्रपद्यन्ते।
कैः कैः कामैः हृतज्ञानाः तं तं नियमम् आस्थाय अन्यदेवताः प्रपद्यन्ते ?	**तैः तैः** कामैः हृतज्ञानाः तं तं नियमम् आस्थाय अन्यदेवताः प्रपद्यन्ते।

तैः तैः कामैः हृतज्ञानाः **कीदृशाः** तं तं नियमम् आस्थाय अन्यदेवताः प्रपद्यन्ते ?	तैः तैः कामैः हृतज्ञानाः **नियताः** तं तं नियमम् आस्थाय अन्यदेवताः प्रपद्यन्ते ।
तैः तैः कामैः हृतज्ञानाः **कया** नियताः तं तं नियमम् आस्थाय अन्यदेवताः प्रपद्यन्ते ?	तैः तैः कामैः हृतज्ञानाः **प्रकृत्या** नियताः तं तं नियमम् आस्थाय अन्यदेवताः प्रपद्यन्ते ।
तैः तैः कामैः हृतज्ञानाः **कीदृश्या** प्रकृत्या नियताः तं तं नियमम् आस्थाय अन्यदेवताः प्रपद्यन्ते ?	तैः तैः कामैः हृतज्ञानाः **स्वया** प्रकृत्या नियताः तं तं नियमम् आस्थाय अन्यदेवताः प्रपद्यन्ते ।

तात्पर्यम् - अनेकविधैः अभिलाषैः अपगतविवेकाः केचन जनाः स्वस्य स्वभावेन नियन्त्रिताः सन्तः तं तं जपोपवासादिरूपं नियमम् आश्रित्य मां विहाय अन्याः देवताः भजन्ते ।

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥७.२१॥

पदच्छेदः - यः, यः, याम्, याम्, तनुम्, भक्तः, श्रद्धया, अर्चितुम्, इच्छति ।
तस्य, तस्य, अचलाम्, श्रद्धाम्, ताम्, एव, विदधामि, अहम् ॥

अन्वयः - यः यः भक्तः यां यां तनुं श्रद्धया अर्चितुम् इच्छति तस्य तस्य ताम् एव अचलां श्रद्धाम् अहं विदधामि ।

पदार्थः - यः यः भक्तः = यः यः भजनशीलः, यां यां तनुम् = , यां यां मूर्तिम्, श्रद्धया = आसक्त्या, अर्चितुम् = आराधयितुम्, इच्छति = अभिलषति, तस्य तस्य = भक्तस्य, ताम् एव = तादृशीम् एव, अचलाम् = स्थिराम्, श्रद्धाम् = आसक्तिम्, अहं विदधामि = अहं करोमि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	भक्तः	अ. पुं. प्र. एक. (विशेषणम्)
याम्	यद्- द. सर्व. स्त्री. द्वि. एक. (विशेषणम्)	तनुम्	उ. स्त्री. द्वि. एक. (विशेष्यम्)
श्रद्धया	आ. स्त्री. तृ. एक.	अर्चितुम्	तुमुन्नन्तम् अव्ययम्
इच्छति	इष् (इषु इच्छायाम्) पर. कर्तरि लट्. प्रपु. एक.	तस्य	तद्- द. सर्व. पुं. ष. एक. (विशेषणम्)
ताम्	तद्- द. सर्व. स्त्री. द्वि. एक. (विशेषणम्)	एव	अव्ययम्
अचलाम्	आ. स्त्री. द्वि. एक. (विशेषणम्)	श्रद्धाम्	आ. स्त्री. द्वि. एक. (विशेष्यम्)

अहम्	अस्मद्- द. सर्व. प्र. एक.	विदधामि	वि + धा (डुधाञ् धारणपोषणयोः) पर. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः	यो यः	यः + यः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	यो याम्	यः + याम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	श्रद्धयार्चितुम्	श्रद्धया + अर्चितुम्	सवर्णदीर्घसन्धिः ।
	तस्याचलाम्	तस्य + अचलाम्	सवर्णदीर्घसन्धिः ।
	विदधाम्यहम्	विदधामि + अहम्	यण्सन्धिः ।
(ख) समासः	अचलाम्	न चला अचला, ताम् - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	भक्तः	भज् (भज् - सेवायाम्) + क्त (कर्तरि) ।	
	अर्चितुम्	अर्च् (अर्च - पूजायाम्) + तुमुन् ।	
	श्रद्धाम्	श्रत् + धा (डुधाञ् - धारणपोषणयोः) + अङ् (भावे), ताम् ।	

भावस्पष्टीकरणम् -

इच्छति ।	
कः इच्छति ?	**भक्तः** इच्छति ।
कः कः भक्तः इच्छति ?	**यः यः** भक्तः इच्छति ।
यः यः भक्तः **काम्** इच्छति ?	यः यः भक्तः **तनुम्** इच्छति ।
यः यः भक्तः **कां कां** तनुम् इच्छति ?	यः यः भक्तः **यां यां** तनुम् इच्छति ।
यः यः भक्तः यां यां तनुं **किं कर्तुम्** इच्छति ?	यः यः भक्तः यां यां तनुम् **अर्चितुम्** इच्छति ।
यः यः भक्तः यां यां तनुं **कया** अर्चितुम् इच्छति ?	यः यः भक्तः यां यां तनुं **श्रद्धया** अर्चितुम् इच्छति ।
यः यः भक्तः यां यां तनुं श्रद्धया अर्चितुम् इच्छति । **कस्य कस्य किं करोमि ?**	यः यः भक्तः यां यां तनुं श्रद्धया अर्चितुम् इच्छति । **तस्य तस्य अहं विदधामि ।**
यः यः भक्तः यां यां तनुं श्रद्धया अर्चितुम् इच्छति । तस्य तस्य **काम्** अहं विदधामि ?	यः यः भक्तः यां यां तनुं श्रद्धया अर्चितुम् इच्छति । तस्य तस्य **श्रद्धाम्** अहं विदधामि ।
यः यः भक्तः यां यां तनुं श्रद्धया अर्चितुम् इच्छति । तस्य तस्य **कीदृशीं** श्रद्धाम् अहं विदधामि ?	यः यः भक्तः यां यां तनुं श्रद्धया अर्चितुम् इच्छति । तस्य तस्य **अचलां** श्रद्धाम् अहं विदधामि ।

यः यः भक्तः यां यां तनुं श्रद्धया अर्चितुम् इच्छति । तस्य तस्य **काम्** एव अचलां श्रद्धाम् अहं विदधामि ?	यः यः भक्तः यां यां तनुं श्रद्धया अर्चितुम् इच्छति । तस्य तस्य **ताम् एव** अचलां श्रद्धाम् अहं विदधामि ।

तात्पर्यम् - यः यः भक्तः यां यां मूर्तिं श्रद्धया अर्चितुम् इच्छति तस्य भक्तस्य तादृशीम् एव स्थिरां श्रद्धाम् अहं करोमि ।

स तया श्रद्धया युक्तस्तस्या राधन[1]मीहते ।
लभते च ततः कामान्मयैव विहितान्हि तान् ॥७.२२॥

पदच्छेदः - सः, तया, श्रद्धया, युक्तः, तस्याः, राधनम्, ईहते ।
लभते, च, ततः, कामान्, मया, एव, विहितान्, हि, तान् ॥

अन्वयः - सः तया श्रद्धया युक्तः तस्याः राधनम् ईहते । ततः च मया एव विहितान् तान् कामान् हि लभते ।

पदार्थः - सः = सः भक्तः, तया श्रद्धया = तया आसक्त्या, युक्तः = आसक्तः, तस्याः = एतस्य मूर्तेः, राधनम् = सेवनम्, ईहते = करोति, ततः च = पश्चात्, मया एव = भगवता मया एव, विहितान् = निश्चितान्, तान् कामान् = तानि फलानि, लभते हि = प्राप्नोति खलु ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	तया	तद्- द. सर्व. स्त्री. तृ. एक. (विशेषणम्)
श्रद्धया	आ. स्त्री. तृ. एक. (विशेष्यम्)	युक्तः	अ. पुं. प्र. एक. (विशेषणम्)
तस्याः	तद्- द. सर्व. स्त्री. ष. एक. (विशेषणम्)	राधनम्	अ. नपुं. द्वि. एक.
ईहते	ईह् (ईह चेष्टायाम्) आत्म. कर्तरि लट्. प्रपु. एक.	ततः	अव्ययम्
च	अव्ययम्	मया	अस्मद्- द. सर्व. तृ. एक.
एव	अव्ययम्	विहितान्	अ. पुं. द्वि. बहु. (विशेषणम्)
तान्	तद्- द. सर्व. पुं. द्वि. बहु. (विशेषणम्)	कामान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
हि	अव्ययम्	लभते	लभ् (डुलभष् प्राप्तौ) आत्म. कर्तरि लट्. प्रपु. एक

1. क्वचित् 'तस्याराधनम्' इति पाठभेदः । तस्य ईश्वरस्य आराधनं करोमि इति ।

व्याकरणम् -

(क) सन्धिः	स तया	सः + तया	विसर्गसन्धिः (लोपः)।
	युक्तस्तस्या	युक्तः + तस्याः	विसर्गसन्धिः (सकारः)।
	तस्या राधनम्	तस्याः + राधनम्	विसर्गसन्धिः (लोपः)।
	मयैव	मया + एव	वृद्धिसन्धिः।
(ख) कृदन्तः	श्रद्धया	श्रत् + धा (डुधाञ् - धारणपोषणयोः) + अङ् (भावे), तया।	
	युक्तः	युज् (युजिर् - योगे) + क्त (कर्तरि)।	
	राधनम्	राध् (राध - संसिद्धौ) + ल्युट् (भावे), तत्।	
	कामान्	कम् (कमु - कान्तौ) + घञ् (भावे), तान्।	
	विहितान्	वि + धा (डुधाञ् - धारणपोषणयोः) + क्त (कर्तरि), तान्।	
(ग) तद्धितान्तः	ततः	तद् + तसिल् (पञ्चम्यर्थे)।	

भावस्पष्टीकरणम् -

ईहते।	
किम् ईहते ?	**राधनम्** ईहते।
कस्याः राधनम् ईहते ?	**तस्याः** राधनम् ईहते।
सः **कीदृशः** तस्याः राधनम् ईहते ?	**सः युक्तः** तस्याः राधनम् ईहते।
सः **कया** युक्तः तस्याः राधनम् ईहते ?	सः **श्रद्धया** युक्तः तस्याः राधनम् ईहते।
सः **कया** श्रद्धया युक्तः तस्याः राधनम् ईहते ?	सः **तया** श्रद्धया युक्तः तस्याः राधनम् ईहते।
सः तया श्रद्धया युक्तः तस्याः राधनम् ईहते। **ततः च किम् भवति ?**	सः तया श्रद्धया युक्तः तस्याः राधनम् ईहते। **ततः च लभते।**
सः तया श्रद्धया युक्तः तस्याः राधनम् ईहते। ततः च **कान्** लभते ?	सः तया श्रद्धया युक्तः तस्याः राधनम् ईहते। ततः च **कामान्** हि लभते।
सः तया श्रद्धया युक्तः तस्याः राधनम् ईहते। ततः च **कान्** कामान् हि लभते ?	सः तया श्रद्धया युक्तः तस्याः राधनम् ईहते। ततः च **तान्** कामान् हि लभते।
सः तया श्रद्धया युक्तः तस्याः राधनम् ईहते। ततः च **कीदृशान्** तान् कामान् हि लभते ?	सः तया श्रद्धया युक्तः तस्याः राधनम् ईहते। ततः च **विहितान्** तान् कामान् हि लभते।
सः तया श्रद्धया युक्तः तस्याः राधनम् ईहते। ततः च **केन** विहितान् तान् कामान् हि लभते ?	सः तया श्रद्धया युक्तः तस्याः राधनम् ईहते। ततः च **मया एव** विहितान् तान् कामान् हि लभते।

तात्पर्यम् - सः भक्तः तया आसक्त्या युक्तः सन् तस्याः देवतातनोः सेवनं करोति। पश्चात् मया एव दत्तानि तानि फलानि प्राप्नोति।

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्।
देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥७.२३॥

पदच्छेद - अन्तवत्, तु, फलम्, तेषाम्, तत्, भवति, अल्पमेधसाम्।
देवान्, देवयजः, यान्ति, मद्भक्ताः, यान्ति, माम्, अपि ॥

अन्वयः - अल्पमेधसां तेषां तत् फलं तु अन्तवत् भवति। देवयजः देवान् यान्ति। मद्भक्ताः अपि मां यान्ति।

पदार्थः - अल्पमेधसाम् = अल्पमतीनाम्, तेषाम् = भक्तानाम्, तत् फलं तु = तत् प्रयोजनं तु, अन्तवत् = विनाशि, भवति = सम्पद्यते, देवयजः = देवाराधकाः, देवान् = विविधदेवान्, यान्ति = प्राप्नुवन्ति, मद्भक्ताः अपि = मदाराधकाः तु, माम् = माम्, यान्ति = प्राप्नुवन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अल्पमेधसाम्	अल्पमेधस्- सका. पुं. ष. बहु. (विशेषणम्)	तेषाम्	तद्- द. सर्व. पुं. ष. बहु. (विशेषणम्)
तत्	तद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	फलम्	अ. नपुं. प्र. एक. (विशेष्यम्)
तु	अव्ययम्	अन्तवत्	अन्तवत्- त. नपुं. प्र. एक.
भवति	भू (भू - सत्तायाम्) पर. कर्तरि लट्. प्रपु. एक.	देवयजः	देवयज्- ज. पुं. प्र. बहु. (विशेषणम्)
देवान्	अ. पुं. द्वि. बहु.	यान्ति	या (या - प्रापणे) पर. कर्तरि लट्. प्रपु. बहु.
मद्भक्ताः	अ. पुं. प्र. बहु.	अपि	अव्ययम्
माम्	अस्मद्- द. सर्व. द्वि. एक.		

व्याकरणम् -

(क) सन्धिः	तद्भवति	तत् + भवति	जश्त्वसन्धिः।
	भवत्यल्पमेधसाम्	भवति + अल्पमेधसाम्	यण्सन्धिः।
	देवयजो यान्ति	देवयजः + यान्ति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	मद्भक्ता यान्ति	मद्भक्ताः + यान्ति	विसर्गसन्धिः (लोपः)।

(ख) समासः अल्पमेधसाम् — अल्पा मेधा येषां ते अल्पमेधसः, तेषाम् - बहुव्रीहिः ।

मद्भक्ताः — मम भक्ताः मद्भक्ताः - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः देवान् — दिव् (दिवु - क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु) + घञ्, तान् ।

भक्तः — भज् (भज् - सेवायाम्) + क्त (कर्तरि) ।

भावस्पष्टीकरणम् -

भवति ।	
किं भवति ?	**अन्तवत्** भवति ।
किम् अन्तवत् भवति ?	**फलं तु** अन्तवत् भवति ।
केषां फलं तु अन्तवत् भवति ?	**तेषां तत्** फलं तु अन्तवत् भवति ।
केषां तेषां तत् फलं तु अन्तवत् भवति ?	**अल्पमेधसां** तेषां तत् फलं तु अन्तवत् भवति ।
अल्पमेधसां तेषां तत् फलं तु अन्तवत् भवति । **तेन किम्** ?	अल्पमेधसां तेषां तत् फलं तु अन्तवत् भवति । **यान्ति** ।
अल्पमेधसां तेषां तत् फलं तु अन्तवत् भवति । **के** यान्ति ?	अल्पमेधसां तेषां तत् फलं तु अन्तवत् भवति । **देवयजः** यान्ति ।
अल्पमेधसां तेषां तत् फलं तु अन्तवत् भवति । देवयजः **कान्** यान्ति ?	अल्पमेधसां तेषां तत् फलं तु अन्तवत् भवति । देवयजः **देवान्** यान्ति ।
अल्पमेधसां तेषां तत् फलं तु अन्तवत् भवति । देवयजः देवान् यान्ति । **पुनश्च के यान्ति** ?	अल्पमेधसां तेषां तत् फलं तु अन्तवत् भवति । देवयजः देवान् यान्ति । **मद्भक्ताः अपि** यान्ति ।
अल्पमेधसां तेषां तत् फलं तु अन्तवत् भवति । देवयजः देवान् यान्ति । मद्भक्ताः अपि **कं** यान्ति ?	अल्पमेधसां तेषां तत् फलं तु अन्तवत् भवति । देवयजः देवान् यान्ति । मद्भक्ताः अपि **मां** यान्ति ।

तात्पर्यम् - अल्पमतीनां भक्तानां तत् फलं तु विनाशि भवति । देवान् ये आराधयन्ति ते तान् देवान् प्राप्नुवन्ति । ये माम् आराधयन्ति ते तु माम् एव प्राप्नुवन्ति ।

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥७.२४॥

पदच्छेदः - अव्यक्तम्, व्यक्तिम्, आपन्नम्, मन्यन्ते, माम्, अबुद्धयः ।
परम्, भावम्, अजानन्तः, मम, अव्ययम्, अनुत्तमम् ॥

अन्वयः - अबुद्धयः मम अनुत्तमं परम् अव्ययं भावम् अजानन्तः अव्यक्तं मां व्यक्तिम् आपन्नं मन्यन्ते ।

पदार्थः - अबुद्धयः = अविवेकिनः, मम = मे, अनुत्तमम् = उत्तमोत्तमम्, परम् = उत्कृष्टम्, अव्ययम् = नाशरहितम्, भावम् = स्वरूपम्, अजानन्तः = अविदन्तः, अव्यक्तम् = अप्रकाशम्, माम् = माम्, व्यक्तिम् = प्रकाशम्, आपन्नम् = प्राप्तवन्तम्, मन्यन्ते = चिन्तयन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अबुद्धयः	इ. पुं. प्र. बहु. (विशेषणम्)	मम	अस्मद्- द. सर्व. ष. एक.
अनुत्तमम्	अ. पुं. द्वि. एक. (विशेषणम्)	परम्	अ. सर्व. पुं. द्वि. एक. (विशेषणम्)
अव्ययम्	अ. पुं. द्वि. एक. (विशेषणम्)	भावम्	अ. पुं. द्वि. एक. (विशेष्यम्)
अजानन्तः	अजानत्- त. पुं. प्र. बहु.	अव्यक्तम्	अ. पुं. द्वि. एक. (विशेषणम्)
माम्	अस्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)	व्यक्तिम्	इ. स्त्री. द्वि. एक.
आपन्नम्	अ. पुं. द्वि. एक. (विशेषणम्)	मन्यन्ते	मन् (मन ज्ञाने) आत्म. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः
अजानन्तो मम — अजानन्तः + मम — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
ममाव्ययम् — मम + अव्ययम् — सवर्णदीर्घसन्धिः ।

(ख) समासः
अव्यक्तम् — न व्यक्तः अव्यक्तः, तम् - नञ्तत्पुरुषः ।
अबुद्धयः — न विद्यते बुद्धिः येषां ते अबुद्धयः - नञ्बहुव्रीहिः ।
अजानन्तः — न जानन्तः अजानन्तः - नञ्तत्पुरुषः ।
अव्ययम् — न विद्यते व्ययः यस्य सः अव्ययः, तम् - नञ्बहुव्रीहिः ।
अनुत्तमम् — न विद्यते उत्तमः यस्मात् सः अनुत्तमः, तम् - नञ्बहुव्रीहिः ।

(ग) कृदन्तः
व्यक्तम् — वि + अञ्ज् (अञ्जू - व्यक्तिम्रक्षणकान्तिगतिषु) + क्त (कर्तरि) ।
व्यक्तिम् — वि + अञ्ज् (अञ्जू - व्यक्तिम्रक्षणकान्तिगतिषु) + क्तिन् (भावे), ताम् ।
आपन्नम् — आ + पद् (पद - गतौ) + क्त (कर्तरि), तम् ।
बुद्धयः — बुध् (बुध - अवगमने) + क्तिन् ।
भावम् — भू (भू - सत्तायाम्) +णिच् + अच्, तम् ।
व्ययम् — वि + इ (इण् - गतौ) + अच्, तम् ।
जानन्तः — ज्ञा (ज्ञा - अवबोधने) + शतृ (कर्तरि) ।

भावस्पष्टीकरणम् -

मन्यन्ते ।	
के मन्यन्ते ?	**अबुद्धयः** मन्यन्ते ।
अबुद्धयः **कं** मन्यन्ते ?	अबुद्धयः **मां** मन्यन्ते ।
अबुद्धयः **कीदृशं** मां मन्यन्ते ?	अबुद्धयः **अव्यक्तं** मां मन्यन्ते ।
अबुद्धयः अव्यक्तं मां **कथं** मन्यन्ते ?	अबुद्धयः अव्यक्तं माम् **आपन्नं** मन्यन्ते ।
अबुद्धयः अव्यक्तं मां **काम्** आपन्नं मन्यन्ते ?	अबुद्धयः अव्यक्तं मां **व्यक्तिम्** आपन्नं मन्यन्ते ।
अबुद्धयः **किं कुर्वन्तः** अव्यक्तं मां व्यक्तिम् आपन्नं मन्यन्ते ?	अबुद्धयः **अजानन्तः** अव्यक्तं मां व्यक्तिम् आपन्नं मन्यन्ते ।
अबुद्धयः **कम्** अजानन्तः अव्यक्तं मां व्यक्तिम् आपन्नं मन्यन्ते ?	अबुद्धयः **भावम्** अजानन्तः अव्यक्तं मां व्यक्तिम् आपन्नं मन्यन्ते ।
अबुद्धयः **कीदृशं** भावम् अजानन्तः अव्यक्तं मां व्यक्तिम् आपन्नं मन्यन्ते ?	अबुद्धयः **अव्ययं** भावम् अजानन्तः अव्यक्तं मां व्यक्तिम् आपन्नं मन्यन्ते ।
अबुद्धयः **कीदृशम्** अव्ययं भावम् अजानन्तः अव्यक्तं मां व्यक्तिम् आपन्नं मन्यन्ते ?	अबुद्धयः **परम्** अव्ययं भावम् अजानन्तः अव्यक्तं मां व्यक्तिम् आपन्नं मन्यन्ते ।
अबुद्धयः **पुनश्च कीदृशं** परम् अव्ययं भावम् अजानन्तः अव्यक्तं मां व्यक्तिम् आपन्नं मन्यन्ते ?	अबुद्धयः **अनुत्तमं** परम् अव्ययं भावम् अजानन्तः अव्यक्तं मां व्यक्तिम् आपन्नं मन्यन्ते ।
अबुद्धयः **कस्य** अनुत्तमं परम् अव्ययं भावम् अजानन्तः अव्यक्तं मां व्यक्तिम् आपन्नं मन्यन्ते ?	अबुद्धयः **मम** अनुत्तमं परम् अव्ययं भावम् अजानन्तः अव्यक्तं मां व्यक्तिम् आपन्नं मन्यन्ते ।

तात्पर्यम् - अविवेकिनः मम उत्तमोत्तमम् उत्कृष्टं नाशरहितं स्वरूपम् अजानन्तः अप्रकाशं मां मत्स्यकूर्मादिरूपेण प्रकाशं प्राप्तवन्तं चिन्तयन्ति ।

नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥७.२५॥

पदच्छेदः - न, अहम्, प्रकाशः, सर्वस्य, योगमायासमावृतः ।
मूढः, अयम्, न, अभिजानाति, लोकः माम्, अजम्,अव्ययम् ॥

अन्वयः - योगमायासमावृतः अहं सर्वस्य न प्रकाशः । मूढः अयं लोकः अव्ययम् अजं मां न अभिजानाति ।

पदार्थः - योगमायासमावृतः = इच्छाधीनमायया आच्छन्नः, अहम् = अहम्, सर्वस्य = सकलस्य लोकस्य, न प्रकाशः = न प्रकटः, मूढः = मूर्खः, अयं लोकः = एषः जनः, अव्ययम् = नाशरहितम्, अजम् = उत्पत्तिविहीनम्, माम् = माम्, न अभिजानाति = न वेत्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
योगमायासमावृतः	अ. पुं. प्र. एक. (विशेषणम्)	अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)
सर्वस्य	अ. सर्व. पुं. ष. एक. (विशेषणम्)	न	अव्ययम्
प्रकाशः	अ. पुं. प्र. एक (विशेषणम्)	मूढः	अ. पुं. प्र. एक (विशेषणम्)
अयम्	इदम्- म. सर्व. पुं. प्र. एक. (विशेषणम्)	लोकः	अ. पुं. प्र. एक. (विशेष्यम्)
अव्ययम्	अ. पुं. द्वि. एक. (विशेषणम्)	अजम्	अ. पुं. द्वि. एक (विशेषणम्)
माम्	अस्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)	अभिजानाति	अभि + ज्ञा (ज्ञा अवबोधने) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	नाहम्	न + अहम्	सवर्णदीर्घसन्धिः ।
	मूढोऽयं	मूढः + अयम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
	नाभिजानाति	न + अभिजानाति	सवर्णदीर्घसन्धिः ।
	लोको माम्	लोकः + माम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) समासः	योगमायासमावृतः	योगाधीना माया योगमाया - मध्यमपदलोपी तत्पुरुषः । योगमायया समावृतः योगमायासमावृतः - तृतीयातत्पुरुषः ।
	अजम्	न जायते इति अजः, तम् - कर्तरि डः उपपदसमासश्च ।
	अव्ययम्	न विद्यते व्ययः यस्य सः अव्ययः, तम् - नञ्बहुव्रीहिः ।
(ग) कृदन्तः	प्रकाशः	प्र + काश् (काशृ - दीप्तौ) + अच् (कर्तरि) । प्रकाशते इति प्रकाशः ।
	योगः	युज् (युजिर् - योगे) + घञ् ।
	समावृतः	सम् + आ + वृ (वृञ् - वरणे) + क्त (कर्तरि) ।
	मूढः	मुह् (मुह - वैचित्त्ये) + क्त (कर्तरि) ।
	लोकः	लोक् (लोकृ - दर्शने) + घञ् ।
	व्ययम्	वि + इ (इण् - गतौ) + अच्, तम् ।

भावस्पष्टीकरणम् -

न प्रकाशः ।	
कः न प्रकाशः ?	**अहं** न प्रकाशः ।
अहं **कस्य** न प्रकाशः ?	अहं **सर्वस्य** न प्रकाशः ।
कीदृशः अहं सर्वस्य न प्रकाशः ?	**योगमायासमावृतः** अहं सर्वस्य न प्रकाशः ।
न अभिजानाति ।	
कः न अभिजानाति ?	**अयं लोकः** न अभिजानाति ।
कीदृशः अयं लोकः न अभिजानाति ?	**मूढः** अयं लोकः न अभिजानाति ।
मूढः अयं लोकः **कं** न अभिजानाति ?	मूढः अयं लोकः **मां** न अभिजानाति ।
मूढः अयं लोकः **कीदृशं** मां न अभिजानाति ?	मूढः अयं लोकः **अजं** मां न अभिजानाति ।
मूढः अयं लोकः **पुनश्च कीदृशम्** अजं मां न अभिजानाति ?	मूढः अयं लोकः **अव्ययम्** अजं मां न अभिजानाति ।

तात्पर्यम् - सङ्कल्पाधीनया मायया समावृतः अहं सकलस्य लोकस्य दृष्टिगोचरः न भवामि। केषाञ्चिदेव दृष्टिगोचरो भवामि । मूढः तु अयं जनः नाशरहितम् उत्पत्तिरहितं च मां न जानाति ।

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥७.२६॥

पदच्छेदः - वेद, अहम्, समतीतानि, वर्तमानानि, च, अर्जुन ।
भविष्याणि, च, भूतानि, माम्, तु, वेद, न, कश्चन ॥

अन्वयः - अर्जुन ! अहं समतीतानि वर्तमानानि च भविष्याणि च भूतानि वेद । मां तु कश्चन न वेद ।

पदार्थः - अर्जुन = अर्जुन ! अहम् = परमेश्वरः अहम्, समतीतानि = अतिक्रान्तानि, वर्तमानानि च = वर्तमानानि च, भविष्याणि च = आगामीनि अपि, भूतानि = स्थावरजङ्गमानि, वेद = जानामि, मां तु = परमेश्वरं तु, कश्चन = कोऽपि, न वेद = न जानाति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुन	अ. पुं. सम्बो. प्र. एक.	अहम्	अस्मद्- द. सर्व. प्र. एक.
समतीतानि	अ. नपुं. द्वि. बहु. (विशेषणम्)	वर्तमानानि	अ. नपुं. द्वि. बहु. (विशेष्यम्)

च	अव्ययम्	भविष्याणि	अ. नपुं. द्वि. बहु. (विशेष्यम्)
भूतानि	अ. नपुं. द्वि. बहु. (विशेषणम्)	वेद	विद् (विद - ज्ञाने) पर. कर्तरि लट्. उपु. एक.
माम्	अस्मद्- द. सर्व. द्वि. एक.	तु	अव्ययम्
कश्चन	अव्ययम्	न	अव्ययम्
वेद	विद् (विद ज्ञाने) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	वेदाहम्	वेद + अहम्	सवर्णदीर्घसन्धिः।
	चार्जुन	च + अर्जुन	सवर्णदीर्घसन्धिः।
(ख) कृदन्तः	समतीतानि	सम् + अति + इ (इण् - गतौ) + क्त (कर्तरि), तानि।	
	वर्तमानानि	वृत् (वृतु - वर्तने) + शानच् (कर्तरि), तानि।	
	भविष्याणि	भू (भू - सत्तायाम्) + लृट् + स्य + शतृ (कर्तरि), तानि (पृषोदरादित्वात् तकारलोपः)।	
	भूतानि	भू (भू - सत्तायाम्) + क्त (कर्तरि), तानि।	

भावस्पष्टीकरणम् -

वेद।	
कानि वेद ?	**भूतानि** वेद।
पुनश्च कानि भूतानि वेद ?	**भविष्याणि** च भूतानि वेद।
पुनश्च कानि भविष्याणि च भूतानि वेद ?	**वर्तमानानि च** भविष्याणि च भूतानि वेद।
कीदृशानि वर्तमानानि च भविष्याणि च भूतानि वेद ?	**समतीतानि** वर्तमानानि च भविष्याणि च भूतानि वेद।
कः समतीतानि वर्तमानानि च भविष्याणि च भूतानि वेद ?	**अहं** समतीतानि वर्तमानानि च भविष्याणि च भूतानि वेद।
न वेद।	
कः न वेद ?	**कश्चन** न वेद।
कं कश्चन न वेद ?	**मां तु** कश्चन न वेद।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अर्जुन** !

तात्पर्यम् - हे अर्जुन ! अहम् अतिक्रान्तानि वर्तमानानि आगामीनि सर्वाण्यपि भूतानि जानामि। मां तु कोऽपि न जानाति।

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत।
सर्वभूतानि सम्मोहं सर्गे यान्ति परन्तप ॥७.२७॥

पदच्छेदः - इच्छाद्वेषसमुत्थेन, द्वन्द्वमोहेन, भारत।
सर्वभूतानि, सम्मोहम्, सर्गे, यान्ति, परन्तप ॥

अन्वयः - भारत, परन्तप ! सर्गे सर्वभूतानि इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन सम्मोहं यान्ति।

पदार्थः - भारत = अर्जुन ! परन्तप = शत्रुतापन ! सर्गे = देहोत्पत्तौ सत्याम्, सर्वभूतानि = भूतजातम्, इच्छाद्वेषसमुत्थेन = रागद्वेषसम्भूतेन, द्वन्द्वमोहेन = द्वन्द्वव्यामोहेन, सम्मोहम् = मूढत्वम्, यान्ति = लभते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	परन्तप	अ. पुं. सम्बो. एक.
सर्गे	अ. पुं. स. एक.	सर्वभूतानि	अ. नपुं. प्र. बहु.
इच्छाद्वेषसमुत्थेन	अ. पुं. तृ. एक. (विशेषणम्)	द्वन्द्वमोहेन	अ. पुं. तृ. एक. (विशेष्यम्)
यान्ति	या (या प्रापणे) पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) समासः इच्छाद्वेषसमुत्थेन — इच्छा च द्वेषश्च इच्छाद्वेषौ - द्वन्द्वः।
इच्छाद्वेषाभ्यां समुत्थः, तेन - तृतीयातत्पुरुषः।
द्वन्द्वमोहेन — द्वन्द्वानां मोहः द्वन्द्वमोहः, तेन - षष्ठीतत्पुरुषः।
परन्तप — परान् शत्रून् तापयति इति परन्तपः, तत्सम्बुद्धौ - कर्तरि खच् उपपदसमासश्च।

(ख) कृदन्तः इच्छा — इष् (इषु - इच्छायाम्) + श (कर्तरि), स्त्रीत्वे टाप्।
द्वेषः — द्विष् (द्विष - अप्रीतौ) + घञ्।
समुत्थेन — सम् + उद् + स्था (ष्ठा - गतिनिवृत्तौ) + क, तेन।
मोहेन — मुह् (मुह - वैचित्त्ये) + घञ् (भावे), तेन।
भूतानि — भू (भू - सत्तायाम्) + क्त (कर्तरि), तानि।
सर्गे — सृज् (सृज - विसर्गे) + घञ्, तस्मिन्।

(ग) तद्धितान्तः भारत — भरत + अण् (अपत्यार्थे) तत्सम्बुद्धौ, भरतस्य अपत्यं पुमान्।

भावस्पष्टीकरणम् -

यान्ति।	
कं यान्ति ?	**सम्मोहं** यान्ति।
केन सम्मोहं यान्ति ?	**द्वन्द्वमोहेन** सम्मोहं यान्ति।
कीदृशेन द्वन्द्वमोहेन सम्मोहं यान्ति ?	**इच्छाद्वेषसमुत्थेन** द्वन्द्वमोहेन सम्मोहं यान्ति।
कानि इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन सम्मोहं यान्ति ?	**सर्वभूतानि** इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन सम्मोहं यान्ति।
कस्मिन् सर्वभूतानि इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन सम्मोहं यान्ति ?	**सर्गे** सर्वभूतानि इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन सम्मोहं यान्ति।
अस्मिन् श्लोके सम्बोधनपदे के ?	**भारत, परन्तप !**

तात्पर्यम् - यदा स्थूलदेहस्य उत्पत्तिः भवति तदैव विषयेषु रागः द्वेषश्च सम्भवति। तेन च शीतोष्णसुखदुःखादिद्वन्द्वात् जातेन विवेकनाशेन अहं सुखी अहं दुःखी इति जानन्तः सर्वेऽपि प्राणिनः मोहम् आपन्नाः मां न जानन्ति।

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम्।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥७.२८॥

पदच्छेदः - येषाम्, तु, अन्तगतम्, पापम्, जनानाम्, पुण्यकर्मणाम्।
ते, द्वन्द्वमोहनिर्मुक्ताः, भजन्ते, माम्, दृढव्रताः ॥

अन्वयः - येषां तु पुण्यकर्मणां जनानां पापम् अन्तगतं ते द्वन्द्वमोहनिर्मुक्ताः दृढव्रताः मां भजन्ते।

पदार्थः - येषां तु = येषां तु, पुण्यकर्मणाम् = पुण्याचारशीलानाम्, जनानाम् = मानवानाम्, पापम् = कल्मषम्, अन्तगतम् = नष्टप्रायम्, ते = ते मानवाः, द्वन्द्वमोहनिर्मुक्ताः = शीतोष्णादिजन्येन मोहेन रहिताः, दृढव्रताः = गाढसङ्कल्पाः, मां भजन्ते = मां सेवन्ते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
येषाम्	यद्- द. सर्व. पुं. ष. बहु. (विशेषणम्)	तु	अव्ययम्
पुण्यकर्मणाम्	पुण्यकर्मन्- न. पुं. ष. बहु. (विशेषणम्)	जनानाम्	अ. पुं. ष. बहु. (विशेष्यम्)
पापम्	अ. नपुं. प्र. एक. (विशेष्यम्)	अन्तगतम्	अ. नपुं. प्र. एक. (विशेषणम्)

ते	तद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	द्वन्द्वमोहनिर्मुक्ताः	अ. पुं. प्र. बहु. (विशेषणम्)
दृढव्रताः	अ. पुं. प्र. बहु. (विशेषणम्)	माम्	अस्मद्- द. सर्व. द्वि. एक.
भजन्ते	भज् (भज सेवायाम्) आत्म. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः	त्वन्तगतम्	तु + अन्तगतम्	यण्सन्धिः ।
	द्वन्द्वमोहनिर्मुक्ता भजन्ते	द्वन्द्वमोहनिर्मुक्ताः + भजन्ते	विसर्गसन्धिः (लोपः) ।
(ख) समासः	अन्तगतम्	अन्तं गतम् अन्तगतम् - द्वितीयातत्पुरुषः ।	
	पुण्यकर्मणाम्	पुण्यं कर्म येषां ते पुण्यकर्माणः, तेषाम् - बहुव्रीहिः ।	
	द्वन्द्वमोहनिर्मुक्ताः	द्वन्द्वस्य मोहः द्वन्द्वमोहः - षष्ठीतत्पुरुषः ।	
		द्वन्द्वमोहेन निर्मुक्ताः द्वन्द्वमोहनिर्मुक्ताः - तृतीयातत्पुरुषः ।	
	दृढव्रताः	दृढं व्रतं येषां ते दृढव्रताः - बहुव्रीहिः ।	
(ग) कृदन्तः	गतम्	गम् (गम्लृ - गतौ) + क्त ।	
	मोहः	मुह् (मुह - वैचित्त्ये) + घञ् (भावे) ।	
	मुक्तः	मुच् (मुच्लृ - मोक्षणे) + क्त (कर्तरि) ।	
	दृढम्	दृह् (दृह - वृद्धौ) + क्त (कर्तरि) ।	

भावस्पष्टीकरणम् -

भजन्ते ।	
कं भजन्ते ?	**मां** भजन्ते ।
के मां भजन्ते ?	**दृढव्रताः** मां भजन्ते ।
पुनश्च कीदृशाः दृढव्रताः मां भजन्ते ?	**द्वन्द्वमोहनिर्मुक्ताः** दृढव्रताः मां भजन्ते ।
के द्वन्द्वमोहनिर्मुक्ताः दृढव्रताः मां भजन्ते ?	**ते** द्वन्द्वमोहनिर्मुक्ताः दृढव्रताः मां भजन्ते ।
कीदृशाः ते द्वन्द्वमोहनिर्मुक्ताः दृढव्रताः मां भजन्ते ?	**येषां पापम् अन्तगतं** ते द्वन्द्वमोहनिर्मुक्ताः दृढव्रताः मां भजन्ते ।
येषां **केषां** पापम् अन्तगतं ते द्वन्द्वमोहनिर्मुक्ताः दृढव्रताः मां भजन्ते ?	येषां **जनानां** पापम् अन्तगतं ते द्वन्द्वमोहनिर्मुक्ताः दृढव्रताः मां भजन्ते ।

येषां **कीदृशानां** जनानां पापम् अन्तगतं ते द्वन्द्वमोहनिर्मुक्ताः दृढव्रताः मां भजन्ते ?	येषां तु **पुण्यकर्मणां** जनानां पापम् अन्तगतं ते द्वन्द्वमोहनिर्मुक्ताः दृढव्रताः मां भजन्ते ।

तात्पर्यम् - पुण्यं कर्म समाचरतां पापं यदा समाप्तप्रायं भवति तदा ते दृढसङ्कल्पाः शीतोष्णसुख-दुःखादिद्वन्द्वजन्येन मोहेन मुच्यमानाः मां प्राप्नुवन्ति ।

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम्॥७.२९॥

पदच्छेदः - जरामरणमोक्षाय, माम्, आश्रित्य, यतन्ति, ये ।
ते, ब्रह्म, तत्, विदुः, कृत्स्नम्, अध्यात्मम्, कर्म, च, अखिलम्॥

अन्वयः - ये माम् आश्रित्य जरामरणमोक्षाय यतन्ति ते तत् ब्रह्म कृत्स्नम् अध्यात्मम् अखिलं च कर्म विदुः ।

पदार्थः - ये = ये मानवाः, माम् आश्रित्य = माम् अवलम्ब्य, जरामरणमोक्षाय = जरामृत्युहीनाय, यतन्ति = यतन्ते, ते = ते मानवाः, तत् ब्रह्म = प्रसिद्धं परमात्मानम्, कृत्स्नम् = समग्रम्, अध्यात्मम् = आत्मविषयम्, अखिलं च = समस्तं च, कर्म = कर्तव्यम्, विदुः = जानन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ये	यद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	माम्	अस्मद्- द. सर्व. द्वि. एक.
आश्रित्य	ल्यबन्तम् अव्ययम्	जरामरणमोक्षाय	अ. पुं. च. एक.
यतन्ति (यतन्ते)	यत् (यती - प्रयत्ने)[1] आत्म. कर्तरि लट्. प्रपु. बहु.	ते	तद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)
तत्	तद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	ब्रह्म	ब्रह्मन्- न. नपुं. द्वि. एक. (विशेष्यम्)
कृत्स्नम्	अव्ययम्	अध्यात्मम्	अ. नपुं. द्वि. एक. (विशेषणम्)
अखिलम्	अ. नपुं. द्वि. एक. (विशेषणम्)	च	अव्ययम्
कर्म	कर्मन्- न. नपुं. द्वि. एक. (विशेष्यम्)	विदुः	विद् (विद ज्ञाने) पर. कर्तरि लट्. प्रपु. बहु

1. अत्र 'यतन्ति' इति परस्मैपदित्वेन आर्षप्रयोगः ।

व्याकरणम् -

(क) सन्धिः	तद्विदुः	तत् + विदुः	जश्त्वसन्धिः ।
	चाखिलम्	च + अखिलम्	सवर्णदीर्घसन्धिः ।
(ख) समासः	जरामरणमोक्षाय	जरा च मरणं च जरामरणे - द्वन्द्वः ।	
		जरामरणाभ्यां मोक्षः जरामरणमोक्षः, तस्मै - तृतीयतत्पुरुषः ।	
	अध्यात्मम्	आत्मनि इति - अव्ययीभावः ।	
	अखिलम्	न खिलम् अखिलम् - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	मरणम्	मृ (मृङ् - प्राणत्यागे) + ल्युट् ।	
	मोक्षाय	मोक्ष् (मोक्ष - क्षेपे) + घञ् (भावे), तस्मै ।	
	आश्रित्य	आ + श्रि (श्रिञ् - सेवायाम्) + ल्यप् ।	

भावस्पष्टीकरणम् -

यतन्ति ।	
किमर्थं यतन्ति ?	**जरामरणमोक्षाय** यतन्ति ।
किं कृत्वा जरामरणमोक्षाय यतन्ति ?	**आश्रित्य** जरामरणमोक्षाय यतन्ति ।
कम् आश्रित्य जरामरणमोक्षाय यतन्ति ?	**माम्** आश्रित्य जरामरणमोक्षाय यतन्ति ।
के माम् आश्रित्य जरामरणमोक्षाय यतन्ति ?	**ये** माम् आश्रित्य जरामरणमोक्षाय यतन्ति ।
ये माम् आश्रित्य जरामरणमोक्षाय यतन्ति **तेषां किम्** ?	ये माम् आश्रित्य जरामरणमोक्षाय यतन्ति **ते विदुः** ।
ये माम् आश्रित्य जरामरणमोक्षाय यतन्ति ते **किं** विदुः ?	ये माम् आश्रित्य जरामरणमोक्षाय यतन्ति ते **ब्रह्म** विदुः ।
ये माम् आश्रित्य जरामरणमोक्षाय यतन्ति ते **कीदृशं** ब्रह्म विदुः ?	ये माम् आश्रित्य जरामरणमोक्षाय यतन्ति ते **अध्यात्मं** ब्रह्म विदुः ।
ये माम् आश्रित्य जरामरणमोक्षाय यतन्ति ते **कीदृशम्** अध्यात्मं ब्रह्म विदुः ?	ये माम् आश्रित्य जरामरणमोक्षाय यतन्ति ते **तत् कृत्स्नम्** अध्यात्मं ब्रह्म विदुः ।
ये माम् आश्रित्य जरामरणमोक्षाय यतन्ति ते तत् कृत्स्नम् अध्यात्मं ब्रह्म विदुः, **पुनश्च किम् ? (विदुः)**	ये माम् आश्रित्य जरामरणमोक्षाय यतन्ति ते तत् कृत्स्नम् अध्यात्मं ब्रह्म विदुः, **कर्म च** विदुः ।
ये माम् आश्रित्य जरामरणमोक्षाय यतन्ति ते तत् कृत्स्नम् अध्यात्मं ब्रह्म विदुः, **कीदृशं** कर्म च विदुः ?	ये माम् आश्रित्य जरामरणमोक्षाय यतन्ति ते तत् कृत्स्नम् अध्यात्मं ब्रह्म विदुः, **अखिलं** कर्म च विदुः ।

तात्पर्यम् - ये मानवाः माम् अवलम्ब्य जरामरणमोक्षाय प्रयतन्ते ते मानवाः तत् परब्रह्म जानन्ति तथा समग्रम् आत्मविषयं कर्तव्यं च जानन्ति ।

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः॥७.३०॥

पदच्छेदः - साधिभूताधिदैवम्, माम्, साधियज्ञम्, च, ये, विदुः।
प्रयाणकाले, अपि, च, माम्, ते, विदुः, युक्तचेतसः॥

अन्वयः - ये साधिभूताधिदैवं साधियज्ञं च मां विदुः ते युक्तचेतसः प्रयाणकाले अपि च मां विदुः।

पदार्थः - ये = ये मानवाः, साधिभूताधिदैवम् = प्रतिभूतं प्रतिदैवं च वर्तमानम्, साधियज्ञं च = प्रतियज्ञमपि वर्तमानम्, मां विदुः = मां जानन्ति, ते = ते मानवाः, युक्तचेतसः = समाहितमनसः, प्रयाणकाले अपि च = मरणसमये अपि, मां विदुः = मां जानन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ये	यद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	साधिभूताधिदैवम्	अ. पुं. द्वि. एक. (विशेषणम्)
साधियज्ञम्	अ. पुं. द्वि. एक. (विशेषणम्)	च	अव्ययम्
माम्	अस्मद्- द. सर्व. द्वि. एक. (विशेषणम्)	विदुः	विद् (विद ज्ञाने) पर. कर्तरि लट्. प्रपु. बहु.
ते	तद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	युक्तचेतसः	युक्तचेतस्- सका. पुं. प्र. बहु. (विशेषणम्)
प्रयाणकाले	अ. पुं. स. एक.	अपि	अव्ययम्

व्याकरणम् -

(क) सन्धिः प्रयाणकालेऽपि — प्रयाणकाले + अपि — पूर्वरूपसन्धिः।
विदुर्युक्तचेतसः — विदुः + युक्तचेतसः — विसर्गसन्धिः (रेफः)।

(ख) समासः साधिभूताधिदैवम् — भूतेषु इति अधिभूतम् - अव्ययीभावः।
अधिभूतेन सह वर्तते इति साधिभूतः - बहुव्रीहिः।
देवेषु इति अधिदैवम् - अव्ययीभावः।
अधिदैवेन सह वर्तते इति साधिदैवः - बहुव्रीहिः।
साधिभूतः च साधिदैवः च साधिभूताधिदैवः, तम् - कर्मधारयः।

साधियज्ञम् — यज्ञे इति अधियज्ञम् - अव्ययीभावः।
अधियज्ञेन सहितः, तम् - बहुव्रीहिः।

प्रयाणकाले — प्रयाणस्य कालः प्रयाणकालः, तस्मिन् - षष्ठीतत्पुरुषः।

	युक्तचेतसः	युक्तं चेतः येषां ते युक्तचेतसः - बहुव्रीहिः ।
(ग) कृदन्तः	भूतम्	भू (भू - सत्तायाम्) + क्त (कर्तरि) ।
	प्रयाणम्	प्र + या (या - प्रापणे) + ल्युट् ।
	कालः	कल् (कल - सङ्ख्याने) + णिच् + अच् (पचाद्यच्) ।
	युक्तः	युज् (युजिर् - योगे) + क्त (कर्तरि) ।
(घ) तद्धितान्तः	दैवम्	देव + अण् (इदमर्थे) देवस्य इदं दैवम् ।

भावस्पष्टीकरणम् -

विदुः ।	
कं विदुः ?	**मां** विदुः ।
कीदृशं मां विदुः ?	**साधिभूताधिदैवं** च मां विदुः ।
साधिभूताधिदैवं **पुनश्च कीदृशं** च मां विदुः ?	साधिभूताधिदैवं **साधियज्ञं** च मां विदुः ।
के साधिभूताधिदैवं साधियज्ञं च मां विदुः ?	**ये** साधिभूताधिदैवं साधियज्ञं च मां विदुः ।
ये साधिभूताधिदैवं साधियज्ञं च मां विदुः **तेषां किम्** ?	ये साधिभूताधिदैवं साधियज्ञं च मां विदुः **ते विदुः ।**
ये साधिभूताधिदैवं साधियज्ञं च मां विदुः ते **कं** विदुः ?	ये साधिभूताधिदैवं साधियज्ञं च मां विदुः ते **मां** विदुः ।
ये साधिभूताधिदैवं साधियज्ञं च मां विदुः ते **कीदृशाः** मां विदुः ?	ये साधिभूताधिदैवं साधियज्ञं च मां विदुः ते **युक्तचेतसः** मां विदुः ।
ये साधिभूताधिदैवं साधियज्ञं च मां विदुः ते युक्तचेतसः **कदा** मां विदुः ?	ये साधिभूताधिदैवं साधियज्ञं च मां विदुः ते युक्तचेतसः **प्रयाणकाले अपि च** मां विदुः ।

तात्पर्यम् - ये मां प्रतिभूतं प्रतिदैवं प्रतियज्ञं च वर्तमानम् इति जानन्ति ते मानवाः समाहितमनसः मरणसमये अपि मां जानन्ति ।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः ॥७॥

सप्तमाध्यायस्य सारः

विश्वेऽस्मिन् नैकप्रकारकाः विनाशशालिनः पदार्थाः सन्ति। तेषु सर्वेषु एक एव अविनाशी परमेश्वरः व्याप्तः अस्ति इति बोधः 'ज्ञानम्' इति पदेन निर्दिश्यते। तस्मात् एव एकस्मात् नित्यपरमेश्वरात् असङ्ख्याकाः विनाशशालिनः पदार्थाः कथम् उपजायन्ते इत्यस्य ज्ञानं 'विज्ञानम्' इति पदेन निर्दिश्यते। अस्मिन् अध्याये एतयोः सविस्तरं विवरणं कृतमस्ति इति कारणेन अस्य अध्यायस्य नाम 'ज्ञानविज्ञानयोगः' इति अस्ति। एतत् ज्ञातं चेत् ज्ञातव्यम् अन्यत् किमपि न अवशिष्यते। वस्तुतः सः सामान्यानां कृते दुर्ज्ञेयः अस्ति। यतो हि, बहुषु मानवेषु कश्चिद् एव सिद्ध्यर्थं प्रयत्नं करोति। ये च सिद्धिं प्राप्नुवन्ति तेषु अपि कश्चिदेव भगवन्तं यथावत् ज्ञातुं शक्नोति। पृथिवी, जलम्, अग्निः, वायुः, आकाशः, मनः, बुद्धिः, अहङ्कारः च इति भगवतः प्रकृतिः अष्टभिः प्रकारैः भिन्ना अस्ति। (साङ्ख्यदर्शनानुसारं प्रकृतिपुरुषौ अपि मिलित्वा आहत्य २५ तत्त्वानि भवन्ति। तेषु प्रकृतितः २३ तत्त्वानि जायन्ते। गीतायां पञ्चमहाभूतानि, दशेन्द्रियाणि, मनश्च इति षोडश प्रकृतिरूपेण तेषाम् एव उल्लेखः अस्ति।) अस्याः अपेक्षया अन्या अपि भगवतः कृतिः (सृष्टिः) अस्ति। प्रकृष्टा सा एव सर्वेषां प्राणधारिणी अस्ति। तया एव इदं जगत् धार्यते। सर्वाणि भूतानि प्रकृतिसम्भवानि। इदं समग्रं जगत् देवात् एव निर्गच्छति, तस्मिन् एव च लीनं भवति। तस्मात् अन्यत् किमपि उत्कृष्टतरं वस्तु नास्ति।

जगत् सूत्रे मणिगणाः इव तस्मिन् भगवति प्रोतम् अस्ति। चराचरे सर्वत्र तस्य अस्तित्वं वयं द्रष्टुं शक्नुमः। तत् जगत् कैः धर्मैः भगवति प्रोतम् अस्ति इति बोधयितुं कृष्णः प्रतिपादयति यत् - 'अहम् उदकेषु माधुर्यम्, चन्द्रसूर्ययोः कान्तिः, सर्ववेदेषु ओङ्कारः, आकाशे ध्वनिः, मानवेषु पुरुषत्वं च अस्मि। अहं पृथिव्यां गन्धः, सूर्ये कान्तिः च अस्मि। सकलप्राणिषु आयुः तपस्विषु तपः च अस्मि। सकलभूतानां चिरन्तनं बीजं मां जानीहि। अहं धीमतां धीः तेजस्विनां तेजः च अस्मि। अहम् ओजस्विनां तृष्णारागसहितं सामर्थ्यम् अस्मि। प्राणिषु धर्माविरुद्धा इच्छा अस्मि। बलवतां कामरागविवर्जितं बलं, भूतेषु धर्माविरुद्धः कामः च अस्मि। एते भावाः मयि सन्ति चेदपि अहं तेभ्यः लिप्तः न भवामि। अतः 'ये सत्त्वात् समुत्पन्नाः शमदमादयः, ये रजसः समुत्पन्नाः दर्पद्वेषादयः, ये च तमसः समुत्पन्नाः शोकमोहादयः भावाः सन्ति, ते सर्वे मत्तः एव जाताः। तथापि नाहं तेषु अधीनः, ते एव मयि अधीनाः सन्ति' इति।

एतादृशं भगवतः स्वरूपं ज्ञात्वा अपि जनाः किमर्थं भ्रान्ताः भवन्ति ? इति प्रतिपादयन् कृष्णः वदति - "काममोहादयः सत्त्वादीनां ये गुणविकाराः सन्ति तैः जनाः विभ्रान्ताः भवन्ति। ते तान् गुणविकारान् अतीत्य वर्तमानं मां ज्ञातुं न शक्नुवन्ति। एषा लोकोत्तरा गुणत्रयस्वरूपा मम माया केनापि लङ्घयितुं न शक्यते। मम शरणम् आगताः भक्ताः एव इमां मायां लङ्घयितुं शक्नुवन्ति। मायया येषां ज्ञानम् अपहृतं भवति तादृशाः राक्षसानां स्वभावं प्राप्ताः पापकारिणः अविवेकिनः मां न भजन्ति। आर्तः, भगवत्तत्त्वं ज्ञातुम् इच्छुः, धनाभिलाषी, आत्मज्ञानवान् च इत्येते चतुर्विधाः पुण्यकर्माणः जनाः मां भजन्ते। तेषु सततयोगी अनन्यभक्तिः ज्ञानी विशिष्यते। अहं ज्ञानवतः अतीव प्रियः। सः अपि मम अतीव प्रियः। एते सर्वे उत्कृष्टाः एव। ज्ञानवान् तु मत्तः अन्यः न, अपि तु मत्स्वरूपः एव। यतः सः ज्ञानवान् 'प्राप्यं पदं भगवान् एव' इति मामेव आश्रितवान्। असङ्ख्यानां जन्मनां समाप्तौ सत्यां सर्वमपि एतत् वासुदेवः इति यः ज्ञानयुक्तः भवति सः मां प्राप्नोति। तादृशः पुरुषः अत्यन्तं दुष्प्रापः। अनेकविधैः अभिलाषैः अपगतविवेकाः केचन जनाः स्वस्य स्वभावेन नियन्त्रिताः सन्तः तं तं जपोपवासादिरूपं नियमम् आश्रित्य मां विहाय अन्याः देवताः भजन्ते। यः यः भक्तः यां यां

मूर्तिं श्रद्धया अर्चितुम् इच्छति तस्य भक्तस्य तादृशीम् एव स्थिरां श्रद्धाम् अहं करोमि। सः भक्तः तया आसक्त्या युक्तः सन् तस्याः देवतातनोः सेवनं करोति। पश्चात् मया एव दत्तानि तानि फलानि प्राप्नोति। अल्पमतीनां भक्तानां तत् फलं तु विनाशि भवति। देवान् ये आराधयन्ति ते तान् देवान् प्राप्नुवन्ति। ये माम् आराधयन्ति ते तु माम् एव प्राप्नुवन्ति। अविवेकिनः मम उत्तमोत्तमम् उत्कृष्टं नाशरहितं स्वरूपम् अजानन्तः अप्रकाशं मां मत्स्यकूर्मादिरूपेण प्रकाशं प्राप्तवन्तं चिन्तयन्ति। सङ्कल्पाधीनया मायया समावृतः अहं सकलस्य लोकस्य दृष्टिगोचरः न भवामि। केषाञ्चिदेव दृष्टिगोचरो भवामि। अहम् अतिक्रान्तानि वर्तमानानि आगामीनि सर्वाण्यपि भूतानि जानामि। मां तु कोऽपि न जानाति। यदा स्थूलदेहस्य उत्पत्तिः भवति तदैव विषयेषु रागद्वेषौ सम्भवतः। तेन च शीतोष्णसुखदुःखादिद्वन्द्वात् जातेन विवेकनाशेन 'अहं सुखी अहं दुःखी' इति जानन्तः सर्वेऽपि प्राणिनः मोहम् आपन्नाः मां न जानन्ति।"

ततः अग्रे 'के तं भगवन्तं यथार्थं जानन्ति इति संक्षेपेण वदति - 'पुण्यं कर्म समाचरतां पापं यदा समाप्तं भवति तदा ते दृढसङ्कल्पाः शीतोष्णसुखदुःखादिद्वन्द्वजन्येन मोहेन मुच्यमानाः मां प्राप्नुवन्ति। ये मानवाः माम् अवलम्ब्य जरामरणमोक्षाय प्रयतन्ते ते तत् परब्रह्म तथा समग्रम् आत्मविषयं कर्तव्यं च जानन्ति। ये साधिभूताधिदैवं साधियज्ञं च मां विदुः ते युक्तचेतसः प्रयाणकाले अपि मां विदुः' इति।

एवं च अस्मिन् अध्याये ज्ञानविज्ञानशब्दयोः अर्थः, प्रकृतिस्वरूपम्, गुणविपरिणामेन जनानां भ्रान्तिः भगवतः यथार्थज्ञातारः इति केचन अंशाः प्रतिपादिताः सन्ति।

****

अथ अष्टमोऽध्यायः

८

अक्षरब्रह्मयोगः

अर्जुन उवाच - किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥८.१॥
अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥८.२॥

पदच्छेदः -

अर्जुनः, उवाच - किम्, तत्, ब्रह्म, किम्, अध्यात्मम्, किम्, कर्म, पुरुषोत्तम।
अधिभूतम्, च, किम्, प्रोक्तम्, अधिदैवम्, किम्, उच्यते ॥
अधियज्ञः, कथम्, कः, अत्र, देहे, अस्मिन्, मधुसूदन।
प्रयाणकाले, च, कथम्, ज्ञेयः, असि, नियतात्मभिः ॥

अन्वयः - पुरुषोत्तम ! तत् ब्रह्म किम् ? अध्यात्मं किम् ? कर्म किम् ? अधिभूतं च किं प्रोक्तम् ? अधिदैवं किम् उच्यते ? मधुसूदन ! अत्र अस्मिन् देहे अधियज्ञः कः ? कथम् ? नियतात्मभिः प्रयाणकाले कथं च ज्ञेयः असि ?

पदार्थः - पुरुषोत्तम = हे पुरुषश्रेष्ठ ! (कृष्ण), तत् ब्रह्म किम् = ब्रह्मनामकं तत् किम्?, अध्यात्मम् किम् = अध्यात्मं नाम किम् ? कर्म किम् = कर्म नाम किम् ? अधिभूतं च = अधिभूतम् इति, किं प्रोक्तम् = किं स्वरूपं कथितम् ? अधिदैवम् = अधिदैवम् इति, किम् उच्यते = किं स्वरूपं कथ्यते ? मधुसूदन = हे मधुदैत्यनाशक श्रीकृष्ण ! अत्र = अत्र, अस्मिन् देहे = एतस्मिन् शरीरे, अधियज्ञः = अधियज्ञः इत्येषः, कः = किं स्वरूपः ? कथम् = सः केन प्रकारेण भवति ? नियतात्मभिः = संयतचित्तैः योगिभिः, प्रयाणकाले = मरणसमये, कथं च = केन प्रकारेण च, ज्ञेयः असि = ज्ञातुं योग्यः भवसि ?

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पुरुषोत्तम	अ. पुं. सम्बो. एक.	तत्	तद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)
ब्रह्म	ब्रह्मन् - न. नपुं. प्र. एक. (विशेष्यम्)	किम्	किम् - म. सर्व. नपुं. प्र. एक. (विशेषणम्)
अध्यात्मम्	अव्ययम्	कर्म	कर्मन् - न. नपुं. प्र. एक. (विशेष्यम्)
अधिभूतम्	अव्ययम्	च	अव्ययम्
प्रोक्तम्	अ. नपुं. प्र. एक. (विशेषणम्)	अधिदैवम्	अव्ययम्

उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.	मधुसूदन	अ. पुं. सम्बो. एक.
अत्र	अव्ययम्	अस्मिन्	इदम् - म. सर्व. पुं. स. एक. (विशेषणम्)
देहे	अ. पुं. स. एक. (विशेष्यम्)	अधियज्ञः	अ. पुं. प्र. एक. (विशेष्यम्)
कः	किम् - म. सर्व. पुं. प्र. एक. (विशेषणम्)	कथम्	अव्ययम्
नियतात्मभिः	नियतात्मन् - न. पुं. तृ. बहु. (विशेषणम्)	प्रयाणकाले	अ. पुं. स. एक.
ज्ञेयः	अ. पुं. प्र. एक. (विशेषणम्)	असि	अस् (अस भुवि) पर. लट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः तद्ब्रह्म — तत् + ब्रह्म — जश्त्वसन्धिः ।

कोऽत्र — कः + अत्र — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

देहेऽस्मिन् — देहे + अस्मिन् — पूर्वरूपसन्धिः ।

(ख) समासः पुरुषोत्तम — पुरुषेषु उत्तमः, तत्सम्बुद्धौ - सप्तमीतत्पुरुषः ।

नियतात्मभिः — नियतः आत्मा यैः ते, तैः - बहुव्रीहिः ।

अध्यात्मम् — आत्मनि इति अध्यात्मम् - अव्ययीभावः ।

प्रयाणकाले — प्रयाणस्य कालः प्रयाणकालः, तस्मिन् - षष्ठीतत्पुरुषः ।

मधुसूदन — मधुं (तन्नामकं) दैत्यं सूदयति इति मधुसूदनः ।
मधु + सूद् + णिच् (स्वार्थे) + ल्यु (अन) सम्बोधने ।

(ग) कृदन्तः प्रोक्तम् — प्र + वच् (वच परिभाषणे) + क्त (कर्मणि) ।

ज्ञेयः — ज्ञा (ज्ञा अवबोधने) + यत् । (कर्मणि)

अधिभूतम् — अधि + भू (भू सत्तायाम्) + क्त ।

देहे — दिह् (दिह उपचये) + अच् ।

(घ) तद्धितान्तः अधियज्ञः — अधि + यज्ञ + अच् (मतुबर्थे) अधियज्ञम् अस्य अस्मिन् वा अस्ति ।

भावस्पष्टीकरणम् -

अर्जुनः श्रीकृष्णं किं किं पृच्छति ?	**नियतात्मभिः प्रयाणकाले कथं च ज्ञेयः असि ?** **अधियज्ञः कः ?** **देहे अधियज्ञः कः ?** **अत्र अस्मिन् देहे अधियज्ञः कः ?** **अधिदैवं किम् उच्यते ?** **अधिभूतं च किं प्रोक्तम् ?** **कर्म किम् ?** **अध्यात्मं किम् ?** **तत् ब्रह्म किम् ? इति पृच्छति ।**
अस्मिन् श्लोके सम्बोधनपदे के ?	**पुरुषोत्तम ! मधुसूदन !**

तात्पर्यम् - पुरुषोत्तम ! ब्रह्म किम् ? अध्यात्मं किम् ? कर्म किम् ? अधिभूतं किम् ? अधिदैवं किम् उच्यते ? मधुसूदन ! अत्र अधियज्ञः कः ? केन प्रकारेण संयतचित्तैः योगिभिः अन्तकाले त्वं स्मरणीयः भवसि ?

श्रीभगवानुवाच - **अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।**
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥८.३॥

पदच्छेदः -

श्रीभगवान्, उवाच - अक्षरम्, ब्रह्म, परमम्, स्वभावः, अध्यात्मम्, उच्यते ।
भूतभावोद्भवकरः, विसर्गः, कर्मसंज्ञितः ॥

अन्वयः - परमम् अक्षरं ब्रह्म, स्वभावः अध्यात्मम् उच्यते । भूतभावोद्भवकरः विसर्गः कर्मसंज्ञितः ।

पदार्थः - परमम् = अत्युत्तमम्, अक्षरम् = विनाशरहितः, ब्रह्म = ब्रह्म (उच्यते), स्वभावः = जीवरूपेण देहे भवनम्, अध्यात्मम् = अध्यात्मम्, उच्यते = कथ्यते, भूतभावोद्भवकरः = भूतानाम् उत्पत्तेः वृद्धेः च कारणम्, विसर्गः = यज्ञः (त्यागः), कर्मसंज्ञितः = कर्मनामकः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अक्षरम्	अ. नपुं. प्र. एक. (विशेषणम्)	ब्रह्म	ब्रह्मन्- न. नपुं. प्र. एक. (विशेष्यम्)
परमम्	अ. नपुं. प्र. एक. (विशेषणम्)	स्वभावः	अ पुं. प्र. एक.

अध्यात्मम्	अव्ययम्	उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.
भूतभावोद्भवकरः	अ. पुं. प्र. एक. (विशेषणम्)	विसर्गः	अ. पुं. प्र. एक. (विशेष्यम्)
कर्मसंज्ञितः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः स्वभावोऽध्यात्मम् — स्वभावः + अध्यात्मम् — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

भूतभावोद्भवकरो विसर्गः — भूतभावोद्भवकरः + विसर्गः — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) समासः भूतभावोद्भवकरः — भावश्च उद्भवश्च - भावोद्भवौ - द्वन्द्वः ।

भूतानां भावोद्भवौ भूतभावोद्भवौ - षष्ठीतत्पुरुषः ।

करोति इति - करः, कर्तरि अच् ।

भूतभावोद्भवयोः करः - षष्ठीतत्पुरुषः ।

कर्मसंज्ञितः — कर्म इति संज्ञा - कर्मसंज्ञा - कर्मधारयः ।

कर्मसंज्ञा अस्य सञ्जाता - कर्मसंज्ञितः ।

(अस्य सञ्जाता इत्यर्थे इतच्प्रत्ययः)

अध्यात्मम् — आत्मनि इति अध्यात्मम् - अव्ययीभावः ।

अधिभूतम् — भूतेषु इति अधिभूतम् - अव्ययीभावः ।

अक्षरम् — न क्षरम् अक्षरम् - नञ्तत्पुरुषः ।

(ग) कृदन्तः विसर्गः — वि + सृज् (सृज विसर्गे) + घञ् ।

भावस्पष्टीकरणम् -

उच्यते ।	
किम् उच्यते ?	**अध्यात्मम्** उच्यते ।
कः अध्यात्मम् उच्यते ?	**स्वभावः** अध्यात्मम् उच्यते ।
किं स्वभावः अध्यात्मम् उच्यते ?	**ब्रह्म** स्वभावः अध्यात्मम् उच्यते ।
कीदृशं ब्रह्म स्वभावः अध्यात्मम् उच्यते ?	**अक्षरं** ब्रह्म स्वभावः अध्यात्मम् उच्यते ।
पुनः कीदृशम् अक्षरं ब्रह्म स्वभावः अध्यात्मम् उच्यते ?	**परमम्** अक्षरं ब्रह्म स्वभावः अध्यात्मम् उच्यते ।
परमम् अक्षरं ब्रह्म स्वभावः अध्यात्मम् उच्यते **अन्यः कः** (उच्यते) ?	**कर्मसंज्ञितः (उच्यते) ।**

कः कर्मसंज्ञितः ?	**विसर्गः** कर्मसंज्ञितः ।
कीदृशः विसर्गः कर्मसंज्ञितः ?	**भूतभावोद्भवकरः** विसर्गः कर्मसंज्ञितः ।

तात्पर्यम् - अत्युत्तमं विनाशरहितं सर्वव्यापकं च ब्रह्म इत्युच्यते। तादृशस्य ब्रह्मणः जीवरूपेण शरीरे अवस्थानम् अध्यात्मं कथ्यते। सर्वेषां भूतानाम् उत्पत्तौ वृद्धौ च कारणीभूतः यज्ञः कर्म इति उच्यते। अस्मिन् श्लोके ब्रह्म, अध्यात्मम्, कर्म च किं भवति इति वर्णितम् अस्ति। अस्य जगतः अत्युत्तमं विनाशरहितं सर्वव्यापकं च यत् तत्त्वं वर्तते तदेव 'ब्रह्म' इति निर्दिश्यते। तस्य ब्रह्मणः जीवरूपेण शरीरे स्थितिः अध्यात्मम् इति कथ्यते। सर्वेषां भूतानाम् उत्पत्तौ वृद्धौ च कारणीभूतः यज्ञः (देवतोद्देशेन चरुपुरोडाशादेः द्रव्यस्य विसर्जनम्) कर्म इति उच्यते।

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥८.४॥

पदच्छेदः - अधिभूतम्, क्षरः, भावः, पुरुषः, च, अधिदैवतम्।
अधियज्ञः, अहम्, एव, अत्र, देहे, देहभृताम्, वर ॥

अन्वयः - क्षरः भावः अधिभूतम्, पुरुषः च अधिदैवतम्। देहभृतां वर ! अत्र देहे अहम् एव अधियज्ञः।

पदार्थः - क्षरः = विनाशशीलः, भावः = पदार्थः, अधिभूतम् = अधिभूतम् इति व्यवह्रियते, पुरुषः च = हिरण्यगर्भः च, अधिदैवतम् = अधिदैवतम् इति कथ्यते, देहभृतां वर = शरीरिणां श्रेष्ठ ! (हे अर्जुन), अत्र = अस्मिन्, देहे = शरीरे, अहम् एव = अहं केवलम्, अधियज्ञः = अधियज्ञः अस्मि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
क्षरः	अ. पुं. प्र. एक. (विशेषणम्)	भावः	अ. पुं. प्र. एक. (विशेष्यम्)
अधिभूतम्	अव्ययम्	पुरुषः	अ. पुं. प्र. एक.
च	अव्ययम्	अधिदैवतम्	अव्ययम्
देहभृताम्	देहभृत् - त. पुं. ष. बहु.	वर	अ. पुं. सम्बो. एक.
अत्र	अव्ययम्	देहे	अ. पुं. स. एक.
अहम्	अस्मद् - द. सर्व. प्र. एक. (विशेष्यम्)	एव	अव्ययम्
अधियज्ञः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	क्षरो भावः	क्षरः + भावः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	पुरुषश्च	पुरुषः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्
	चाधिदैवतम्	च + अधिदैवतम्	सवर्णदीर्घसन्धिः।
	अधियज्ञोऽहम्	अधियज्ञः + अहम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
(ख) समासः	अधिभूतम्	भूतेषु इति अधिभूतम् - अव्ययीभावः।	
	अधिदैवतम्	दैवतेषु इति अधिदैवतम् - अव्ययीभावः।	
	देहभृताम्	देहं बिभ्रति इति - देहभृतः, तेषाम् - कर्तरि क्विप् उपपदसमासश्च।	
(ग) कृदन्तः	क्षरः	क्षर् (क्षर सञ्चलने) + अच्।	
	भावः	भू (भू सत्तायाम्) + घञ्।	
	देहे	दिह् (दिह उपचये) + घञ्, तस्मिन्।	

भावस्पष्टीकरणम् -

अधियज्ञः।	
कः अधियज्ञः ?	**अहम् एव।**
कस्मिन् अहम् एव अधियज्ञः ?	**देहे** अहम् एव अधियज्ञः।
पुनश्च **कुत्र** देहे अहम् एव अधियज्ञः ?	**अत्र** देहे अहम् एव अधियज्ञः।
अधिदैवतम्।	
कश्च अधिदैवतम् ?	**पुरुषः** च अधिदैवतम्।
अधिभूतम्।	
कः अधिभूतम् ?	**भावः** अधिभूतम्।
कीदृशः भावः अधिभूतम् ?	**क्षरः** भावः अधिभूतम्।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**देहभृतां वर।**

तात्पर्यम् - विनाशशीलः वस्तुसमुदायः अधिभूतम् इति उच्यते। सर्वप्राणीन्द्रियाणाम् अनुग्राहकः हिरण्यगर्भः च अधिदैवतम् इति कथ्यते। अर्जुन ! अत्र शरीरे अहमेव अधियज्ञः इति ज्ञातव्यम्।

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम्।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥८.५ ॥

पदच्छेदः - अन्तकाले, च, माम्, एव, स्मरन्, मुक्त्वा, कलेवरम्।
यः, प्रयाति, सः, मद्भावम्, याति, न, अस्ति, अत्र, संशयः ॥

अन्वयः - यः अन्तकाले च माम् एव स्मरन् कलेवरं मुक्त्वा प्रयाति सः (पुरुषः) मद्भावं याति। अत्र संशयः न अस्ति।

पदार्थः - यः = यः पुरुषः, अन्तकाले च = मरणसमये, माम् एव = मामेव, स्मरन् = चिन्तयन्, कलेवरम् = देहम्, मुक्त्वा = परित्यज्य, प्रयाति = गच्छति, सः = सः पुरुषः, मद्भावम् = मद्रूपताम्, याति = प्रयाति, अत्र = अस्मिन् विषये, संशयः = सन्देहः, न अस्ति = न वर्तते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद् - द. सर्व. पुं. प्र. एक.	अन्तकाले	अ. पुं. स. एक.
च	अव्ययम्	माम्	अस्मद् - द. सर्व. द्वि. एक.
एव	अव्ययम्	स्मरन्	स्मरत् - त. पुं. प्र.एक. (विशेषणम्)
कलेवरम्	अ. नपुं. द्वि. एक.	मुक्त्वा	क्त्वान्तम् अव्ययम्
प्रयाति	प्र. + या (या प्रापणे) पर. लट्. प्रपु. एक.	सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)
मद्भावम्	अ. पुं. द्वि. एक.	याति	या (या प्रापणे) पर. कर्तरि लट्. प्रपु. एक.
अत्र	अव्ययम्	संशयः	अ. पुं. प्र. एक.
न	अव्ययम्	अस्ति	अस् (अस भुवि) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	स मद्भावम्	सः + मद्भावम्	विसर्गसन्धिः (लोपः)।
	नास्ति	न + अस्ति	सवर्णदीर्घसन्धिः।
	नास्त्यत्र	नास्ति + अत्र	यण्सन्धिः।
(ख) समासः	अन्तकाले	अन्तस्य कालः, तस्मिन् - षष्ठीतत्पुरुषः।	
	कलेवरम्	कले वरं - अलुक्समासः।	
	मद्भावम्	मम भावः, तम् - षष्ठीतत्पुरुषः।	

(ग) कृदन्तः स्मरन् स्मृ (स्मृ चिन्तायाम्) + शतृ (कर्तरि)।
मुक्त्वा मुच् (मुच्लृ मोक्षणे) + क्त्वा।
संशयः सम् + शी (शीङ् स्वप्ने) + अच् (भावे)।

भावस्पष्टीकरणम् -

प्रयाति।	
किं कृत्वा प्रयाति ?	**मुक्त्वा** प्रयाति।
किं मुक्त्वा प्रयाति ?	**कलेवरं** मुक्त्वा प्रयाति।
किं कुर्वन् कलेवरं मुक्त्वा प्रयाति ?	**स्मरन्** कलेवरं मुक्त्वा प्रयाति।
कं स्मरन् कलेवरं मुक्त्वा प्रयाति ?	**माम्** एव स्मरन् कलेवरं मुक्त्वा प्रयाति।
कदा च माम् एव स्मरन् कलेवरं मुक्त्वा प्रयाति ?	**अन्तकाले** च माम् एव स्मरन् कलेवरं मुक्त्वा प्रयाति।
कः अन्तकाले च माम् एव स्मरन् कलेवरं मुक्त्वा प्रयाति ?	**यः** अन्तकाले च माम् एव स्मरन् कलेवरं मुक्त्वा प्रयाति।
यः अन्तकाले च माम् एव स्मरन् कलेवरं मुक्त्वा प्रयाति सः **किं करोति** ?	यः अन्तकाले च माम् एव स्मरन् कलेवरं मुक्त्वा प्रयाति। **सः याति।**
यः अन्तकाले च माम् एव स्मरन् कलेवरं मुक्त्वा प्रयाति सः **कं** याति ?	यः अन्तकाले च माम् एव स्मरन् कलेवरं मुक्त्वा प्रयाति **सः मद्भावं** याति।
यः अन्तकाले च माम् एव स्मरन् कलेवरं मुक्त्वा प्रयाति सः मद्भावं याति **अत्र कः नास्ति ?**	यः अन्तकाले च माम् एव स्मरन् कलेवरं मुक्त्वा प्रयाति सः मद्भावं याति। **अत्र संशयः नास्ति।**

तात्पर्यम् - यः अन्तकाले माम् एव चिन्तयन् शरीरं परित्यजति सः पुरुषः अवश्यं मद्भावं प्राप्नोति। अस्मिन् विषये सन्देहः न वर्तते।

यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥८.६ ॥

पदच्छेदः - यम्, यम्, वा, अपि, स्मरन्, भावम्, त्यजति, अन्ते, कलेवरम्।
तम्, तम्, एव, एति, कौन्तेय, सदा, तद्भावभावितः ॥

अन्वयः - कौन्तेय ! अन्ते यं यं वा अपि भावं स्मरन् कलेवरं त्यजति (सः) सदा तद्भावभावितः तं तम् एव एति।

पदार्थः - कौन्तेय = हे कुन्तीपुत्र ! (अर्जुन), अन्ते = अन्तकाले, यं यं वा अपि = यादृशम्, भावम् = देवताविशेषम्, स्मरन् = चिन्तयन्, कलेवरम् = शरीरम्, त्यजति = मुञ्चति, (सः) सदा = सततम्, तद्भावभावितः = तदनुसन्धानसंस्कृतचित्तः सन्, तं तम् एव = तादृशं देवताविशेषम् एव, एति = प्राप्नोति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	अन्ते	अ. पुं. स. एक.
यम्	यद् - द. सर्व. पुं. द्वि. एक. (विशेषणम्)	वा	अव्ययम्
अपि	अव्ययम्	भावम्	अ. पुं. द्वि. एक. (विशेष्यम्)
स्मरन्	स्मरत् - त. पुं. प्र. एक. (विशेषणम्)	कलेवरम्	अ. नपुं. द्वि. एक.
त्यजति	त्यज् (त्यज हानौ) पर. कर्तरि लट्. प्रपु. एक.	सदा	अव्ययम्
तद्भावभावितः	अ. पुं. प्र. एक. (विशेषणम्)	तम्	तद् - द. सर्व. पुं. द्वि. एक. (विशेषणम्)
एव	अव्ययम्	एति	इ (इण् गतौ) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	वापि	वा + अपि	सवर्णदीर्घसन्धिः ।
	त्यजत्यन्ते	त्यजति + अन्ते	यण्सन्धिः ।
	एवैति	एव + एति	वृद्धिसन्धिः ।
(ख) समासः	तद्भावभावितः	तस्य भावः - तद्भावः - षष्ठीतत्पुरुषः ।	
		तद्भावेन भावितः - तृतीयातत्पुरुषः।	
	कलेवरम्	कले वरं कलेवरम् - अलुक्समासः ।	
(ग) कृदन्तः	स्मरन्	स्मृ (स्मृ चिन्तायाम्) + शतृ ।	
	भावम्	भू (भू सत्तायाम्) + णिच् + अच्, तम् ।	
	भावितः	भू (भू सत्तायाम्) + णिच् + क्त ।	
(घ) तद्धितान्तः	कौन्तेय	कुन्ती + अण् (अपत्यार्थे) कुन्त्याः अपत्यं पुमान्, तत्सम्बुद्धौ ।	

भावस्पष्टीकरणम् -

त्यजति ।	
किं त्यजति ?	**कलेवरं त्यजति ।**

किं कुर्वन् कलेवरं त्यजति ?	**स्मरन्** कलेवरं त्यजति ।
कं स्मरन् कलेवरं त्यजति ?	**भावं** स्मरन् कलेवरं त्यजति ।
कं भावं स्मरन् कलेवरं त्यजति ?	**यं यं वापि** भावं स्मरन् कलेवरं त्यजति ।
कदा यं यं वापि भावं स्मरन् कलेवरं त्यजति ?	**अन्ते** यं यं वापि भावं स्मरन् कलेवरं त्यजति ।
अन्ते यं यं वापि भावं स्मरन् कलेवरं त्यजति **तेन किम्** ?	**एति** ।
कम् एति ?	**तं** तम् एव एति ।
कीदृशः तं तम् एव एति ?	**तद्भावभावितः** तं तम् एव एति ।
कदा तद्भावभावितः तं तम् एव एति ?	**सदा** तद्भावभावितः तं तम् एव एति ।

तात्पर्यम् - कौन्तेय ! जीवः स्वस्य अन्तकाले यादृशं भावं चिन्तयन् शरीरं त्यजति यस्यानुसन्धानं तेन पुनः पुनः कृतम्, सः तस्य एव भावं प्राप्नोति ।

तस्मात्सर्वेषु कालेषु मामनुस्मर युद्ध्य च ।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥८.७॥

पदच्छेदः - तस्मात्, सर्वेषु, कालेषु, माम्, अनुस्मर, युद्ध्य, च ।
मयि, अर्पितमनोबुद्धिः, माम्, एव, एष्यसि, असंशयः ॥

अन्वयः - तस्मात् सर्वेषु कालेषु माम् अनुस्मर युद्ध्य च । मयि अर्पितमनोबुद्धिः माम् एव एष्यसि असंशयः ।

पदार्थः - तस्मात् =ततः हेतोः, सर्वेषु कालेषु = सकलेषु समयेषु, माम् = माम्, अनुस्मर = ध्याय, युद्ध्य च = युद्धं च कुरु, मयि = परमात्मनि, अर्पितमनोबुद्धिः = समर्पितचित्तः, माम् एव = परमात्मानम् एव, एष्यसि = प्राप्नोषि, असंशयः = संशयः नास्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तस्मात्	तद् - द. सर्व. पुं. पं. एक. (विशेषणम्)	सर्वेषु	अ. सर्व. पुं. स. बहु. (विशेषणम्)
कालेषु	अ. पुं. स. बहु. (विशेष्यम्)	माम्	अस्मद् - द. सर्व. द्वि. एक.
अनुस्मर	अनु + स्मृ (स्मृ चिन्तायाम्) पर. कर्तरि लोट्. मपु. एक.	युद्ध्य (युध्यस्व)	युध् (युध संप्रहारे)[1] आत्म. कर्तरि लोट्. मपु. एक.

च	अव्ययम्	मयि	अस्मद्- द. सर्व. स. एक
अर्पितमनोबुद्धिः	इ. पुं. प्र. एक. (विशेषणम्)	एव	अव्ययम्
एष्यसि	इ (इण् गतौ) पर. कर्तरि लृट्. मपु. एक.	असंशयः	अ. पुं. प्र. एक.

व्याकरणम् -

(क) सन्धिः	मय्यर्पितमनोबुद्धिः	मयि + अर्पितमनोबुद्धिः	यण्सन्धिः ।
	अर्पितमनोबुद्धिर्माम्	अर्पितमनोबुद्धिः + माम्	विसर्गसन्धिः (रेफः) ।
	एवैष्यसि	एव + एष्यसि	वृद्धिसन्धिः ।
	एष्यस्यसंशयः	एष्यसि + असंशयः	यण्सन्धिः ।
(ख) समासः	अर्पितमनोबुद्धिः	मनः च बुद्धिश्च मनोबुद्धी - द्वन्द्वः ।	
	अर्पिते मनोबुद्धी येन सः	अर्पितमनोबुद्धिः - बहुव्रीहिः ।	
	असंशयः	न संशयः असंशयः - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	अर्पितः	ऋ (ऋ गतौ) + णिच् + क्त ।	
	बुद्धिः	बुध् (बुध अवगमने) + क्तिन् (भावे)	
	संशयः	सम् + शी (शीङ् स्वप्ने) + अच् ।	

भावस्पष्टीकरणम् -

युद्ध्य च ।	
कस्मात् युद्ध्य च ?	**तस्मात्** युद्ध्य च ।
तस्मात् **केषु** युद्ध्य च ?	तस्मात् **सर्वेषु कालेषु** युद्ध्य च ।
तस्मात् सर्वेषु कालेषु **किं कुरु** युद्ध्य च ?	तस्मात् सर्वेषु कालेषु **माम् अनुस्मर** युद्ध्य च ।
एष्यसि ।	
कम् एष्यसि ?	**माम्** एव एष्यसि ।
कीदृशः माम् एव एष्यसि ?	**अर्पितमनोबुद्धिः** माम् एव एष्यसि ।
कस्मिन् अर्पितमनोबुद्धिः माम् एव एष्यसि ?	**मयि** अर्पितमनोबुद्धिः माम् एव एष्यसि । **असंशयः** ।
मयि अर्पितमनोबुद्धिः माम् एव एष्यसि । **तत्र किम् ?**	मयि अर्पितमनोबुद्धिः माम् एव एष्यसि। (तत्र) **असंशयः** ।

1. अत्र 'युद्ध्य' इति परस्मैपदित्वेन आर्षप्रयोगः ।

तात्पर्यम् - तस्मात् सकलेषु समयेषु अर्थात् सर्वदा माम् अनुस्मर। मम (भगवतः कृष्णस्य) अनुस्मरणं कृत्वा युद्धं कुरु। यदि मयि एव (भगवति एव) मनः समर्पयसि तर्हि मामेव प्राप्नोषि, अत्र संशयः नास्ति। अर्थात् यः भक्तः भगवन्तं सर्वदा मनसि निधाय (युद्धादीनि) स्वकर्तव्यानि करोति, मनः च तस्मै समर्पयति सः देवम् अवश्यं प्राप्नोति।

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन्॥८.८॥

पदच्छेदः - अभ्यासयोगयुक्तेन, चेतसा, नान्यगामिना।
परमम्, पुरुषम्, दिव्यम्, याति, पार्थ, अनुचिन्तयन्॥

अन्वयः - पार्थ! अभ्यासयोगयुक्तेन नान्यगामिना चेतसा अनुचिन्तयन् दिव्यं परमं पुरुषं याति।

पदार्थः - पार्थ = अर्जुन! अभ्यासयोगयुक्तेन = आवर्तनरूपेण उपायेन सहितः, नान्यगामिना = अनन्यगतेन, चेतसा = मनसा, अनुचिन्तयन् = अनुध्यायन्, दिव्यम् = दिवि वर्तमानम्, परमं पुरुषम् = निरतिशयं पुरुषम्, याति = गच्छति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	अभ्यासयोगयुक्तेन	अ. पुं. तृ. एक. (विशेषणम्)
नान्यगामिना	नान्यगामिन् - न. पुं. तृ. एक. (विशेषणम्)	चेतसा	चेतस् - सका. पुं. तृ. एक. (विशेष्यम्)
अनुचिन्तयन्	अनुचिन्तयत् - त. पुं. प्र. एक. (विशेषणम्)	दिव्यम्	अ. पुं. द्वि. एक. (विशेषणम्)
परमम्	अ. पुं. द्वि. एक. (विशेषणम्)	पुरुषम्	अ. पुं. द्वि. एक. (विशेष्यम्)
याति	या (या प्रापणे) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः पार्थानुचिन्तयन् पार्थ + अनुचिन्तयन् सवर्णदीर्घसन्धिः।

(ख) समासः अभ्यासयोगयुक्तेन अभ्यासः एव योगः अभ्यासयोगः - कर्मधारयः।
अभ्यासयोगेन युक्तः, तेन - तृतीयातत्पुरुषः।

	नान्यगामिना	अन्यं गामी अन्यगामी - द्वितीयातत्पुरुषः । न अन्यगामी, तेन - सुप्सुपा-समासः । अत्र नञर्थे न इति शब्दः ।
(ग) कृदन्तः	अनुचिन्तयन्	अनु + चिन्त् (चिति स्मृत्याम्) + शतृ ।
(घ) तद्धितान्तः	पार्थ	पृथा + अण् (अप्यत्यार्थे) पृथायाः अपत्यं पुमान्, तत्सम्बुद्धौ ।
	दिव्यम्	दिव् + यत् । (भवार्थे)

भावस्पष्टीकरणम् -

याति ।	
कं याति ?	**पुरुषं** याति ।
कीदृशं पुरुषं याति ?	**परमं** पुरुषं याति ।
पुनश्च कीदृशं परमं पुरुषं याति ?	**दिव्यं** परमं पुरुषं याति ।
किं कुर्वन् दिव्यं परमं पुरुषं याति ?	**अनुचिन्तयन्** दिव्यं परमं पुरुषं याति ।
केन अनुचिन्तयन् दिव्यं परमं पुरुषं याति ?	**चेतसा** अनुचिन्तयन् दिव्यं परमं पुरुषं याति ।
कीदृशेन चेतसा अनुचिन्तयन् दिव्यं परमं पुरुषं याति ?	**नान्यगामिना** चेतसा अनुचिन्तयन् दिव्यं परमं पुरुषं याति ।
पुनश्च कीदृशेन नान्यगामिना चेतसा अनुचिन्तयन् दिव्यं परमं पुरुषं याति ?	**अभ्यासयोगयुक्तेन** नान्यगामिना चेतसा अनुचिन्तयन् दिव्यं परमं पुरुषं याति ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ !**

तात्पर्यम् - अर्जुन ! यः अभ्यासरूपम् उपायम् अवलम्ब्य एकाग्रेण चित्तेन ध्यायति सः दिव्यं पुरुषं प्राप्नोति ।

कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात् ॥८.९॥

पदच्छेदः - कविम्, पुराणम्, अनुशासितारम्, अणोः, अणीयांसम्, अनुस्मरेत्, यः ।
सर्वस्य, धातारम्, अचिन्त्यरूपम्, आदित्यवर्णम्, तमसः, परस्तात् ॥

अन्वयः - यः कविं पुराणम् अनुशासितारम् अणोः अणीयांसं सर्वस्य धातारम् अचिन्त्यरूपम् आदित्यवर्णं तमसः परस्तात् अनुस्मरेत् ।

पदार्थः - यः = जनः, कविम् = सर्वज्ञम्, पुराणम् = पुरातनम्, , अनुशासितारम् = जगन्नियामकम्, अणोः = सूक्ष्मात् अपि, अणीयांसम् = सूक्ष्मतरम्, सर्वस्य = सकलस्य, धातारम् = पोषकम्, अचिन्त्यरूपम् =

दुर्ज्ञेयम्, आदित्यवर्णम् = सूर्यसमानवर्णम्, तमसः = अज्ञानान्धकारात्, परस्तात् = परतः विद्यमानम्, अनुस्मरेत् = ध्यायेत् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	कविम्	इ. पुं. द्वि. एक. (विशेषणम्)
पुराणम्	अ. पुं. द्वि. एक. (विशेषणम्)	अनुशासितारम्	ऋ. पुं. द्वि. एक. (विशेषणम्)
अणोः	उ. पुं. पं. एक.	अणीयांसम्	अणीयस्- सका. पुं. द्वि. एक. (विशेषणम्)
सर्वस्य	अ. सर्व. नपुं. ष. एक. (विशेषणम्)	धातारम्	ऋ. पुं. द्वि. एक. (विशेषणम्)
अचिन्त्यरूपम्	अ. पुं. द्वि. एक. (विशेषणम्)	आदित्यवर्णम्	अ. पुं. द्वि. एक. (विशेषणम्)
तमसः	तमस्- सका. नपुं. पं. एक.	परस्तात्	अव्ययम्
अनुस्मरेत्	अनु + स्मृ (स्मृ आध्याने) पर. कर्तरि विधिलिङ्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	अणोरणीयांसम्	अणोः + अणीयांसम्	विसर्गसन्धिः (रेफः) ।
	अनुस्मरेद्यः	अनुस्मरेत् + यः	जश्त्वसन्धिः ।
(ख) समासः	अचिन्त्यरूपम्	न चिन्त्यम् अचिन्त्यम् - नञ्तत्पुरुषः ।	
		अचिन्त्यं रूपं यस्य सः अचिन्त्यरूपः, तम् - बहुव्रीहिः ।	
	आदित्यवर्णम्	आदित्यस्य वर्णः इव वर्णः यस्य सः, तम् - बहुव्रीहिः ।	
(ग) कृदन्तः	अनुशासितारम्	अनु + शास् (शासु अनुशिष्टौ) + (इट्) + तृच् (कर्तरि) तम् ।	
	धातारम्	धा + (डुधाञ् धारणपोषणयोः) तृच् (कर्तरि) तम् ।	
	चिन्त्यम्	चिन्त (चिति स्मृत्याम्) + यत् (कर्मणि) ।	
(घ) तद्धितान्तः	अणीयान्सम्	अणु + ईयसुन् । (अतिशये) अतिशयेन अणुः इत्यर्थः, तम् ।	

भावस्पष्टीकरणम् -

यः अनुस्मरेत् ।	
यः **कम्** अनुस्मरेत् ?	यः **कविम्** अनुस्मरेत् ।
यः कविं **कीदृशम्** अनुस्मरेत् ?	यः कविं **पुराणम्** अनुस्मरेत् ।

यः कविं पुराणं **पुनश्च कीदृशम्** अनुस्मरेत् ?	यः कविं पुराणम् **अनुशासितारम्** अनुस्मरेत् ।
यः कविं पुराणम् अनुशासितारं **पुनश्च कीदृशम्** अनुस्मरेत् ?	यः कविं पुराणम् अनुशासितारम् **अणीयांसम्** अनुस्मरेत् ।
यः कविं पुराणम् अनुशासितारं **कस्मात्** अणीयांसम् अनुस्मरेत् ?	यः कविं पुराणम् अनुशासितारम् **अणोः** अणीयांसम् अनुस्मरेत् ।
यः कविं पुराणम् अनुशासितारम् अणोः अणीयांसं **पुनश्च कीदृशम्** अनुस्मरेत् ?	यः कविं पुराणम् अनुशासितारम् अणोः अणीयांसं **धातारम्** अनुस्मरेत् ।
यः कविं पुराणम् अनुशासितारम् अणोः अणीयांसं **कस्य** धातारम् अनुस्मरेत् ?	यः कविं पुराणम् अनुशासितारम् अणोः अणीयांसं **सर्वस्य** धातारम् अनुस्मरेत्
यः कविं पुराणम् अनुशासितारम् अणोः अणीयांसं सर्वस्य धातारं **पुनश्च कीदृशम्** अनुस्मरेत् ?	यः कविं पुराणम् अनुशासितारम् अणोः अणीयांसं सर्वस्य धातारं **अचिन्त्यरूपम्** अनुस्मरेत् ।
यः कविं पुराणम् अनुशासितारम् अणोः अणीयांसं सर्वस्य धातारम् अचिन्त्यरूपं **पुनश्च कीदृशम्** अनुस्मरेत् ?	यः कविं पुराणम् अनुशासितारम् अणोः अणीयांसं सर्वस्य धातारम् अचिन्त्यरूपम् **आदित्यवर्णम्** अनुस्मरेत् ।
यः कविं पुराणम् अनुशासितारम् अणोः अणीयांसं सर्वस्य धातारम् अचिन्त्यरूपम् आदित्यवर्णं **कुतः** अनुस्मरेत् ?	यः कविं पुराणम् अनुशासितारम् अणोः अणीयांसं सर्वस्य धातारम् अचिन्त्यरूपम् आदित्यवर्णं **तमसः परस्तात्** अनुस्मरेत् ।

तात्पर्यम् - यः सर्वज्ञं पुरातनं जगन्नियन्तारं सूक्ष्मात् सूक्ष्मतरं सकलस्य धातारम् अगम्यरूपं सूर्यसमप्रभम् अज्ञानान्धकारात् परतः विद्यमानं ध्यायति । (सः दिव्यं पुरुषं याति ।)

प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम्॥८.१०॥

पदच्छेदः - प्रयाणकाले, मनसा, अचलेन, भक्त्या, युक्तः, योगबलेन, च, एव ।
भ्रुवोः, मध्ये, प्राणम्, आवेश्य, सम्यक्, सः, तम्, परम्, पुरुषम्, उपैति, दिव्यम् ॥

अन्वयः - सः भक्त्या युक्तः प्रयाणकाले योगबलेन च एव भ्रुवोः मध्ये प्राणं सम्यक् आवेश्य अचलेन मनसा (स्मरन्) दिव्यं परं तं पुरुषम् उपैति ।

पदार्थः - सः = सः योगी, भक्त्या युक्तः = भक्त्या सहितः, प्रयाणकाले = मरणसमये, योगबलेन च एव = समाधिबलेन, भ्रुवोः मध्ये = भ्रुवोः मध्यदेशे, प्राणम् = प्राणवायुम्, सम्यक् = साधु, आवेश्य = स्थापयित्वा, अचलेन मनसा = निश्चलेन चित्तेन (स्मरन्) दिव्यम् = लोकोत्तरम् , परम् = उत्तमम्, तं पुरुषम् = तं प्रसिद्धं पुरुषम्, उपैति = प्राप्नोति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	भक्त्या	इ. स्त्री. तृ. एक.
युक्तः	अ. पुं. प्र. एक. (विशेषणम्)	प्रयाणकाले	अ. पुं. स. एक.
योगबलेन	अ. नपुं. तृ. एक.	च	अव्ययम्
एव	अव्ययम्	भ्रुवोः	ऊ. स्त्री. ष. द्विव.
मध्ये	अव्ययम्	प्राणम्	अ. पुं. द्वि. एक.
सम्यक्	अव्ययम्	आवेश्य	अव्ययम्
अचलेन	अ. नपुं. तृ. एक. (विशेषणम्)	मनसा	मनस् - सका. नपुं. तृ. एक. (विशेषणम्)
दिव्यम्	अ. पुं. द्वि. एक. (विशेषणम्)	परम्	अ. सर्व. पुं. द्वि. एक. (विशेषणम्)
तम्	तद् - द. सर्व. पुं. द्वि. एक. (विशेषणम्)	पुरुषम्	अ. पुं. द्वि. एक. (विशेष्यम्)
उपैति	उप + इ (इण् गतौ) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः
- मनसाचलेन — मनसा + अचलेन — सवर्णदीर्घसन्धिः ।
- युक्तो योगबलेन — युक्तः + योगबलेन — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
- चैव — च + एव — वृद्धिसन्धिः ।
- भ्रुवोर्मध्ये — भ्रुवोः + मध्ये — विसर्गसन्धिः (रेफः) ।
- स तम् — सः + तम् — विसर्गसन्धिः (लोपः) ।

(ख) समासः
- प्रयाणकाले — प्रयाणस्य कालः प्रयाणकालः, तस्मिन् - षष्ठीतत्पुरुषः।
- अचलेन — न चलम् अचलम्, तेन - नञ्तत्पुरुषः ।
- योगबलेन — योगस्य बलं योगबलं तेन - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः
- भक्त्या — भज् (भज सेवायाम्) + क्तिन्, तया ।

(घ) तद्धितान्तः
- दिव्यम् — दिव् + यत् (भवार्थे) दिवि भवम् इत्यर्थः ।

भावस्पष्टीकरणम् -

उपैति।	
कः उपैति ?	**सः** उपैति।
सः **कम्** उपैति ?	सः **पुरुषम्** उपैति।
सः **कीदृशं** पुरुषम् उपैति ?	सः **परं तं** पुरुषम् उपैति।
सः **कीदृशं** परं तं पुरुषम् उपैति ?	सः **दिव्यं** परं तं पुरुषम् उपैति।
सः **केन** दिव्यं परं तं पुरुषम् उपैति ?	सः **मनसा** दिव्यं परं तं पुरुषम् उपैति।
सः **कीदृशेन** मनसा दिव्यं परं तं पुरुषम् उपैति ?	सः **अचलेन** मनसा दिव्यं परं तं पुरुषम् उपैति।
सः **किं कृत्वा** अचलेन मनसा दिव्यं परं तं पुरुषम् उपैति ?	सः **आवेश्य** अचलेन मनसा दिव्यं परं तं पुरुषम् उपैति।
सः **कम्** आवेश्य अचलेन मनसा दिव्यं परं तं पुरुषम् उपैति ?	सः **प्राणम्** आवेश्य अचलेन मनसा दिव्यं परं तं पुरुषम् उपैति।
सः प्राणं **कथम्** आवेश्य अचलेन मनसा दिव्यं परं तं पुरुषम् उपैति।	सः प्राणं **सम्यक्** आवेश्य अचलेन मनसा दिव्यं परं तं पुरुषम् उपैति।
सः **कयोः** मध्ये प्राणं सम्यक् आवेश्य अचलेन मनसा दिव्यं परं तं पुरुषम् उपैति ?	सः **भ्रुवोः** मध्ये प्राणं सम्यक् आवेश्य अचलेन मनसा दिव्यं परं तं पुरुषम् उपैति।
सः **केन** प्राणं सम्यक् आवेश्य अचलेन मनसा दिव्यं परं तं पुरुषम् उपैति ?	सः **योगबलेन** च एव प्राणं सम्यक् आवेश्य अचलेन मनसा दिव्यं परं तं पुरुषम् उपैति।
सः **कदा** योगबलेन च एव प्राणं सम्यक् आवेश्य अचलेन मनसा दिव्यं परं तं पुरुषम् उपैति ?	सः **प्रयाणकाले** योगबलेन च एव प्राणं सम्यक् आवेश्य अचलेन मनसा दिव्यं परं तं पुरुषम् उपैति।
सः **कीदृशः** प्रयाणकाले योगबलेन च एव प्राणं सम्यक् आवेश्य अचलेन मनसा दिव्यं परं तं पुरुषम् उपैति ?	सः **युक्तः** प्रयाणकाले योगबलेन च एव प्राणं सम्यक् आवेश्य अचलेन मनसा दिव्यं परं तं पुरुषम् उपैति।
सः **कया** युक्तः प्रयाणकाले योगबलेन च एव प्राणं सम्यक् आवेश्य अचलेन मनसा दिव्यं परं तं पुरुषम् उपैति ?	सः **भक्त्या** युक्तः प्रयाणकाले योगबलेन च एव भ्रुवोः मध्ये प्राणं सम्यक् आवेश्य अचलेन मनसा (स्मरन्) दिव्यं परं तं पुरुषम् उपैति।

तात्पर्यम् - सः अनन्यभावेन सहितः मरणसमये समाधिबलेन भ्रुवोः मध्ये प्राणवायुं सम्यक् स्थापयित्वा निश्चलेन चित्तेन स्मरन् लोकोत्तरम् उत्तमं तमेव पुरुषं प्राप्नोति ।

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये ॥८.११॥

पदच्छेदः - यत्, अक्षरम्, वेदविदः, वदन्ति, विशन्ति, यत्, यतयः, वीतरागाः ।
यत्, इच्छन्तः, ब्रह्मचर्यम्, चरन्ति, तत्, ते, पदम्, सङ्ग्रहेण, प्रवक्ष्ये ॥

अन्वयः - वेदविदः यत् अक्षरं वदन्ति, वीतरागाः यतयः यत् विशन्ति, यत् इच्छन्तः ब्रह्मचर्यं चरन्ति, तत् पदं ते सङ्ग्रहेण प्रवक्ष्ये ।

पदार्थः - वेदविदः = वेदज्ञाः, यत् = यद्वस्तु, अक्षरम् = अविनाशि, वदन्ति = कथयन्ति, वीतरागाः = नष्टाभिलाषाः, यतयः = संन्यासिनः, यत् विशन्ति = यत् प्रविशन्ति, यत् इच्छन्तः = यत् अभिलषन्तः, ब्रह्मचर्यम् = ब्रह्मचर्यव्रतम्, चरन्ति = आचरन्ति, तत् पदम् = तत्स्थानम्, ते = तुभ्यम्, सङ्ग्रहेण = संक्षेपेण, प्रवक्ष्ये = वदिष्यामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
वेदविदः	वेदविद्- द. पुं. प्र. बहु. (विशेषणम्)	यत्	यद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
अक्षरम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	वदन्ति	वद् (वद व्यक्तायां वाचि) पर. कर्तरि लट्. प्रपु. बहु.
वीतरागाः	अ. पुं. प्र. बहु. (विशेषणम्)	यतयः	इ. पुं. प्र. बहु. (विशेष्यम्)
विशन्ति	विश् (विश प्रवेशने) पर. कर्तरि लट्. प्रपु. बहु.	इच्छन्तः	इच्छत् - त. पुं. प्र. बहु. (विशेषणम्)
ब्रह्मचर्यम्	अ. नपुं. द्वि. एक.	चरन्ति	चर् (चर गतिभक्षणयोः) पर. कर्तरि लट्. प्रपु. बहु.
तत्	तद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	पदम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
ते	युष्मद्- द. सर्व. च. एक. (विशेषणम्)	सङ्ग्रहेण	अ. पुं. तृ. एक. प्रवक्ष्ये
(प्रवक्ष्ये)	प्र + वच् (वच परिभाषणे)[1] पर. कर्तरि लृट्. उपु. एक.		

व्याकरणम् -

(क) सन्धिः	यदक्षरम्	यत् + अक्षरम्	जश्त्वसन्धिः ।
	वेदविदो वदन्ति	वेदविदः + वदन्ति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	यद्यतयो वीतरागाः	यत् + यतयः	जश्त्वसन्धिः ।
		यतयः + वीतरागाः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	यदिच्छन्तो ब्रह्मचर्यम्	यत् + इच्छन्तः	जश्त्वसन्धिः ।
		इच्छन्तः + ब्रह्मचर्यम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
(ख) समासः	अक्षरम्	न क्षरम्, अक्षरम् - नञ्तत्पुरुषः।	
	वेदविदः	वेदान् विदन्ति वेदविदः, कर्तरि क्विप् उपपदसमासश्च ।	
	वीतरागाः	वीतः रागः येभ्यः ते वीतरागाः - बहुव्रीहिः ।	
(ग) कृदन्तः	इच्छन्तः	इष् (इषु इच्छायाम्) + शतृ (कर्तरि) ।	
	सङ्ग्रहेण	सम् + ग्रह् (ग्रह उपादाने) + अप्, तेन ।	

भावस्पष्टीकरणम् -

प्रवक्ष्ये ।	
किं प्रवक्ष्ये ?	**यत् वदन्ति तत्** प्रवक्ष्ये ।
के यत् वदन्ति तत् प्रवक्ष्ये	**वेदविदः** यत् वदन्ति तत् प्रवक्ष्ये ।
वेदविदः यत् **कीदृशं** वदन्ति तत् प्रवक्ष्ये ?	वेदविदः यत् **अक्षरं** वदन्ति तत् प्रवक्ष्ये ।
वेदविदः यत् अक्षरं वदन्ति **पुनश्च किं कुर्वन्ति** तत् प्रवक्ष्ये ?	वेदविदः यत् अक्षरं वदन्ति **यत् विशन्ति**, तत् प्रवक्ष्ये ।
वेदविदः यत् अक्षरं वदन्ति **के यत् विशन्ति**, तत् प्रवक्ष्ये ?	वेदविदः यत् अक्षरं वदन्ति, **यतयः यत् विशन्ति**, तत् प्रवक्ष्ये ।
वेदविदः यत् अक्षरं वदन्ति, **कीदृशाः** यतयः यत् विशन्ति, तत् प्रवक्ष्ये ?	वेदविदः यत् अक्षरं वदन्ति, **वीतरागाः** यतयः यत् विशन्ति, तत् प्रवक्ष्ये ।
वेदविदः यत् अक्षरं वदन्ति, वीतरागाः यतयः यत् विशन्ति, **पुनश्च किं कुर्वन्ति** तत् प्रवक्ष्ये ?	वेदविदः यत् अक्षरं वदन्ति, वीतरागाः यतयः यत् विशन्ति, **चरन्ति** तत् प्रवक्ष्ये ।
वेदविदः यत् अक्षरं वदन्ति, वीतरागाः यतयः यत् विशन्ति, **किं** चरन्ति तत् प्रवक्ष्ये ?	वेदविदः यत् अक्षरं वदन्ति, वीतरागाः यतयः यत् विशन्ति, **ब्रह्मचर्यं** चरन्ति तत् प्रवक्ष्ये ।

1. अत्र 'प्रवक्ष्ये' इति आत्मनेपदित्वेन आर्षप्रयोगः ।

वेदविदः यत् अक्षरं वदन्ति, वीतरागाः यतयः यत् विशन्ति, **किं कुर्वन्तः** ब्रह्मचर्यं चरन्ति तत् प्रवक्ष्ये ?	वेदविदः यत् अक्षरं वदन्ति, वीतरागाः यतयः यत् विशन्ति, **यत् इच्छन्तः** ब्रह्मचर्यं चरन्ति तत् प्रवक्ष्ये ।
वेदविदः यत् अक्षरं वदन्ति, वीतरागाः यतयः यत् विशन्ति, यत् इच्छन्तः ब्रह्मचर्यं चरन्ति तत् **केन** प्रवक्ष्ये ?	वेदविदः यत् अक्षरं वदन्ति, वीतरागाः यतयः यत् विशन्ति, यत् इच्छन्तः ब्रह्मचर्यं चरन्ति तत् **सङ्ग्रहेण** प्रवक्ष्ये ।
वेदविदः यत् अक्षरं वदन्ति, वीतरागाः यतयः यत् विशन्ति, यत् इच्छन्तः ब्रह्मचर्यं चरन्ति तत् **कस्मै** सङ्ग्रहेण प्रवक्ष्ये ?	वेदविदः यत् अक्षरं वदन्ति, वीतरागाः यतयः यत् विशन्ति, यत् इच्छन्तः ब्रह्मचर्यं चरन्ति तत् **ते** सङ्ग्रहेण प्रवक्ष्ये ।
वेदविदः यत् अक्षरं वदन्ति, वीतरागाः यतयः यत् विशन्ति, यत् इच्छन्तः ब्रह्मचर्यं चरन्ति तत् **किं** ते सङ्ग्रहेण प्रवक्ष्ये ?	वेदविदः यत् अक्षरम् वदन्ति, वीतरागाः यतयः यत् विशन्ति, यत् इच्छन्तः ब्रह्मचर्यं चरन्ति, **तत् पदं** ते सङ्ग्रहेण प्रवक्ष्ये ।

तात्पर्यम् - वेदज्ञाः यत् वस्तु अविनाशि इति वदन्ति, वीतरागाः संन्यासिनः यत् प्रविशन्ति, पुरुषाश्च यत् वस्तु अभिलषन्तः ब्रह्मचर्यव्रतम् आचरन्ति तत् प्रसिद्धं स्थानं तुभ्यं संक्षेपेण वदिष्यामि ।

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥८.१२॥
ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥८.१३॥

पदच्छेदः - सर्वद्वाराणि, संयम्य, मनः, हृदि, निरुध्य, च ।
मूर्ध्नि, आधाय, आत्मनः, प्राणम्, आस्थितः, योगधारणाम् ॥
ओम्, इति, एकाक्षरम्, ब्रह्म, व्याहरन्, माम्, अनुस्मरन् ।
यः, प्रयाति, त्यजन्, देहम्, सः, याति, परमाम्, गतिम् ॥

अन्वयः - सर्वद्वाराणि संयम्य मनः हृदि निरुध्य च आत्मनः प्राणं मूर्ध्नि आधाय योगधारणाम् आस्थितः ओम् इति एकाक्षरं ब्रह्म व्याहरन् माम् अनुस्मरन् यः त्यजन् देहं प्रयाति सः परमां गतिं याति ।

पदार्थः - सर्वद्वाराणि = सर्वाणि इन्द्रियाणि, संयम्य = निगृह्य, मनः = चित्तम्, हृदि = हृदयपद्मे, निरुध्य च = नियम्य च, आत्मनः = स्वस्य, प्राणम् = वायुम्, मूर्ध्नि = शिरसि, आधाय = स्थापयित्वा, योगधारणाम् = समाधिम्, आस्थितः = प्राप्तः, ओम् इति एकाक्षरम् = एकाक्षरम् ओङ्कारम्,

व्याहरन् = उच्चारयन्, माम् अनुस्मरन् = मां ध्यायन्, यः = यः मानवः, देहम् = शरीरम्, त्यजन् = मुञ्चन्, प्रयाति = गच्छति, सः = सः मानवः, परमाम् = उत्कृष्टाम्, गतिम् = स्थितिम्, याति = लभते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सर्वद्वाराणि	अ. नपुं. द्वि. एक.	संयम्य	ल्यबन्तम् अव्ययम्
मनः	मनस्- सका. नपुं. द्वि. एक.	हृदि	हृद्- द. नपुं. स. एक.
निरुध्य	ल्यबन्तम् अव्ययम्	च	अव्ययम्
आत्मनः	आत्मन्- न. पुं. ष. एक.	प्राणम्	अ. पुं. द्वि. एक.
मूर्ध्नि	मूर्धन्- न. नपुं. स. एक.	आधाय	ल्यबन्तम् अव्ययम्
योगधारणाम्	आ. स्त्री. द्वि. एक.	आस्थितः	अ. पुं. प्र. एक. (विशेषणम्)
ओम्	अव्ययम्	इति	अव्ययम्
एकाक्षरम्	अ. पुं. द्वि. एक. (विशेषणम्)	ब्रह्म	ब्रह्मन्- न. नपुं. द्वि. एक. (विशेष्यम्)
व्याहरन्	व्याहरत्- त. पुं. प्र. एक. (विशेषणम्)	माम्	अस्मद्- द. सर्व. द्वि. एक.
अनुस्मरन्	अनुस्मरत्- त. पुं. प्र. एक. (विशेषणम्)	यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
त्यजन्	त्यजत् - त. पुं. प्र. एक. (विशेषणम्)	देहम्	अ. पुं. द्वि. एक.
प्रयाति	प्र + या (या प्रापणे) + पर. कर्तरि लट्. प्रपु. एक.	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
परमाम्	आ. स्त्री. द्वि. एक. (विशेषणम्)	गतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)
याति	या (या प्रापणे) + पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	मूर्ध्न्याधायात्मनः	मूर्ध्नि + आधाय	यण्सन्धिः।
		आधाय + आत्मनः	सवर्णदीर्घसन्धिः।
	आस्थितो योगधारणाम्	आस्थितः + योगधारणाम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	इत्येकाक्षरम्	इति + एकाक्षरम्	यण्सन्धिः।
	स याति	सः + याति	विसर्गसन्धिः (लोपः)।
(ख) समासः	सर्वद्वाराणि	सर्वाणि द्वाराणि सर्वद्वाराणि - कर्मधारयः।	

	योगधारणाम्	योगस्य धारणा योगधारणा, ताम् - षष्ठीतत्पुरुषः।
	एकाक्षरम्	एकम् अक्षरम् यस्य तत् एकाक्षरम् - बहुव्रीहिः।
(ग) कृदन्तः	संयम्य	सम् + यम् (यम उपरमे) + ल्यप्।
	निरुध्य	नि + रुध् (रुधिर् आवरणे) + ल्यप्।
	आधाय	आ + धा (डुधाञ् धारणपोषणयोः) + ल्यप्।
	आस्थितः	आ + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि)।
	धारणाम्	धा (डुधाञ् धारणपोषणयोः) + णिच् + युच्, (स्त्रीत्वे टाप्), ताम्।
	व्याहरन्	वि + आ + हृ (हृञ् - हरणे) + शतृ।
	अनुस्मरन्	अनु + स्मृ (स्मृ चिन्तायाम्) + शतृ।
	त्यजन्	त्यज् (त्यज हानौ) + शतृ।
	देहम्	दिह् (दिह उपचये) + घञ् (भावार्थे), तम्।
	गतिम्	गम् + (गम्लृ गतौ) + क्तिन्, ताम्।

भावस्पष्टीकरणम् -

आस्थितः (वर्तते)।	
किं कृत्वा आस्थितः ?	**संयम्य** आस्थितः।
कानि संयम्य आस्थितः ?	**सर्वद्वाराणि** संयम्य आस्थितः।
सर्वद्वाराणि संयम्य **किं कृत्वा** आस्थितः ?	सर्वद्वाराणि संयम्य **निरुध्य** च आस्थितः।
सर्वद्वाराणि संयम्य **किं** निरुध्य च आस्थितः ?	सर्वद्वाराणि संयम्य **मनः** निरुध्य च आस्थितः
सर्वद्वाराणि संयम्य मनः **कुत्र** निरुध्य च आस्थितः ?	सर्वद्वाराणि संयम्य मनः **हृदि** निरुध्य च आस्थितः।
सर्वद्वाराणि संयम्य मनः हृदि निरुध्य च **काम्** आस्थितः ?	सर्वद्वाराणि संयम्य मनः हृदि निरुध्य च **योगधारणाम्** आस्थितः।
सर्वद्वाराणि संयम्य मनः हृदि निरुध्य च **किं कृत्वा** योगधारणाम् आस्थितः ?	सर्वद्वाराणि संयम्य मनः हृदि निरुध्य च **आधाय** योगधारणाम् आस्थितः।
सर्वद्वाराणि संयम्य मनः हृदि निरुध्य च **कम्** आधाय योगधारणाम् आस्थितः ?	सर्वद्वाराणि संयम्य मनः हृदि निरुध्य च **प्राणम्** आधाय योगधारणाम् आस्थितः।
सर्वद्वाराणि संयम्य मनः हृदि निरुध्य च प्राणं **कस्मिन्** आधाय योगधारणाम् आस्थितः ?	सर्वद्वाराणि संयम्य मनः हृदि निरुध्य च प्राणं **मूर्ध्नि** आधाय योगधारणाम् आस्थितः।
यः प्रयाति।	
यः **कं** प्रयाति ?	यः **देहं** प्रयाति।

यः **किं कुर्वन्** देहं प्रयाति ?	यः **त्यजन्** देहं प्रयाति ।
किं कुर्वन् यः त्यजन् देहं प्रयाति ?	**अनुस्मरन्** यः त्यजन् देहं प्रयाति ।
कम् अनुस्मरन् यः त्यजन् देहं प्रयाति ?	**माम्** अनुस्मरन् यः त्यजन् देहं प्रयाति ।
किं कुर्वन् माम् अनुस्मरन् यः त्यजन् देहं प्रयाति ?	**व्याहरन्** माम् अनुस्मरन् यः त्यजन् देहं प्रयाति ।
किं व्याहरन् माम् अनुस्मरन् यः त्यजन् देहं प्रयाति ?	**ब्रह्म** व्याहरन् माम् अनुस्मरन् यः त्यजन् देहं प्रयाति ।
कीदृशं ब्रह्म व्याहरन् माम् अनुस्मरन् यः त्यजन् देहं प्रयाति ?	**एकाक्षरं** ब्रह्म व्याहरन् माम् अनुस्मरन् यः त्यजन् देहं प्रयाति ।
किम् इति एकाक्षरं ब्रह्म व्याहरन् माम् अनुस्मरन् यः त्यजन् देहं प्रयाति ।	**ओम्** इति एकाक्षरं ब्रह्म व्याहरन् माम् अनुस्मरन् यः त्यजन् देहं प्रयाति ।
ओम् इति एकाक्षरं ब्रह्म व्याहरन् माम् अनुस्मरन् यः त्यजन् देहं प्रयाति । **तस्य किम् ?**	ओम् इति एकाक्षरं ब्रह्म व्याहरन् माम् अनुस्मरन् यः त्यजन् देहं प्रयाति । **सः याति ।**
ओम् इति एकाक्षरं ब्रह्म व्याहरन् माम् अनुस्मरन् यः त्यजन् देहं प्रयाति सः **कां** याति ?	ओम् इति एकाक्षरं ब्रह्म व्याहरन् माम् अनुस्मरन् यः त्यजन् देहं प्रयाति सः **गतिं** याति ।
ओम् इति एकाक्षरं ब्रह्म व्याहरन् माम् अनुस्मरन् यः त्यजन् देहं प्रयाति सः **कीदृशीं** गतिं याति ?	ओम् इति एकाक्षरं ब्रह्म व्याहरन् माम् अनुस्मरन् यः त्यजन् देहं प्रयाति सः **परमां** गतिं याति ।

तात्पर्यम् - सकलप्रवेशद्वाराणि (नवद्वाराणि) निगृह्य (इन्द्रियाणां संयमनं कृत्वा) चित्तं हृदये संस्थाप्य (हृद्देशे मनः एकाग्रं कृत्वा) च स्वस्य प्राणं शिरसि स्थापयित्वा समाधिं प्राप्तः (योगी) एकाक्षरं ब्रह्मवाचकत्वात् साक्षात् ब्रह्मरूपम् ओङ्कारम् उच्चारयन् (ब्रह्मतत्त्वस्य वाचकम् ओङ्कारम् उच्चार्य अर्थात् ईश्वरस्य ध्यानं कुर्वन्, यः मानवः शरीरं मुञ्चति सः उत्कृष्टां गतिं लभते ।

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥८.१४॥

पदच्छेदः - अनन्यचेताः, सततम्, यः, माम्, स्मरति, नित्यशः ।
तस्य, अहम्, सुलभः, पार्थ, नित्ययुक्तस्य, योगिनः ॥

अन्वयः - पार्थ ! यः अनन्यचेताः नित्यशः सततं मां स्मरति तस्य नित्ययुक्तस्य योगिनः अहं सुलभः ।

पदार्थः - पार्थ = अर्जुन ! यः = यः मानवः, अनन्यचेताः = अनन्यमनस्कः, नित्यशः = प्रतिदिनम्, सततम् = सर्वदा, मां स्मरति = मां ध्यायति, तस्य = मानवस्य, नित्ययुक्तस्य = सततं युक्तस्य, योगिनः = मुनेः, अहं सुलभः = अहं सुखेन लभ्यः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
अनन्यचेताः	अनन्यचेतस् - सका. पुं. प्र. एक. (विशेषणम्)	नित्यशः	अव्ययम्
सततम्	अव्ययम्	माम्	अस्मद्- द. सर्व. द्वि. एक.
स्मरति	स्मृ (स्मृ चिन्तायाम्) पर. कर्तरि लट्. प्रपु. एक.	तस्य	तद्- द. सर्व. पुं. ष. एक. (विशेषणम्)
नित्ययुक्तस्य	अ. पुं. ष. एक. (विशेषणम्)	योगिनः	योगिन्- न. पुं. ष. एक. (विशेष्यम्)
अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)	सुलभः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	यो माम्	यः + माम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः,
	तस्याहम्	तस्य + अहम्	सवर्णदीर्घसन्धिः।
(ख) समासः	अनन्यचेताः	अन्यस्मिन् चेतः यस्य सः अन्यचेताः - बहुव्रीहिः। न अन्यचेताः अनन्यचेताः - नञ्तत्पुरुषः।	
	नित्ययुक्तस्य	नित्यं युक्तः नित्ययुक्तः, तस्य - द्वितीयातत्पुरुषः।	
(ग) कृदन्तः	सुलभः	सु + लभ् (डुलभष् प्राप्तौ) + खल्। (कर्मणि) अकृच्छ्रेण लब्धुं शक्यः इत्यर्थः।	
(घ) तद्धितान्तः	नित्यशः	नित्य + शस्। (स्वार्थे)।	
	पार्थ	पृथा + अण्, (अपत्यार्थे) पृथायाः अपत्यं पुमान्, तत्सम्बुद्धौ।	
	योगिनः	योग + इनि (मतुबर्थे) योगः अस्य अस्मिन् वा अस्ति, तस्य।	

भावस्पष्टीकरणम् -

स्मरति।	
कं स्मरति ?	**मां** स्मरति।
कदा मां स्मरति ?	**सततं** मां स्मरति।
कथं सततं मां स्मरति ?	**नित्यशः** सततं मां स्मरति।
कीदृशः नित्यशः सततं मां स्मरति ?	**अनन्यचेताः** नित्यशः सततं मां स्मरति।
कः अनन्यचेताः नित्यशः सततं मां स्मरति ?	**यः** अनन्यचेताः नित्यशः सततं मां स्मरति।

यः अनन्यचेताः नित्यशः सततं मां स्मरति। **तस्य किम्?**	यः अनन्यचेताः नित्यशः सततं मां स्मरति। **तस्य अहं सुलभः।**
यः अनन्यचेताः नित्यशः सततं मां स्मरति। तस्य **कस्य** अहं सुलभः ?	यः अनन्यचेताः नित्यशः सततं मां स्मरति। तस्य **योगिनः** अहं सुलभः।
यः अनन्यचेताः नित्यशः सततं मां स्मरति। तस्य **कीदृशस्य** योगिनः अहं सुलभः ?	यः अनन्यचेताः नित्यशः सततं मां स्मरति तस्य **नित्ययुक्तस्य** योगिनः अहं सुलभः।
अस्मिन् श्लोके सम्बोधनपदं किम्?	**पार्थ!**

तात्पर्यम् - पार्थ ! यः मानवः अनन्यमनस्कः सन् प्रतिदिनं सर्वदा मां ध्यायति तस्य सततयुक्तस्य योगवतः अहं सुखेन लभ्यः भवामि।

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥८.१५॥

पदच्छेदः - माम्, उपेत्य, पुनर्जन्म, दुःखालयम्, अशाश्वतम्।
न, आप्नुवन्ति, महात्मानः, संसिद्धिम्, परमाम्, गताः ॥

अन्वयः - परमां संसिद्धिं गताः महात्मानः माम् उपेत्य अशाश्वतं दुःखालयं पुनर्जन्म न आप्नुवन्ति।

पदार्थः - परमाम् = उत्कृष्टाम्, संसिद्धिम् = सिद्धिम्, गताः = प्राप्ताः, महात्मानः = महापुरुषाः, माम् उपेत्य = मां लब्ध्वा, अशाश्वतम् = अस्थिरम्, दुःखालयम् = दुःखस्थानम्, पुनर्जन्म = पुनर्जन्म, न आप्नुवन्ति = न लभन्ते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
परमाम्	आ. स्त्री. द्वि. एक. (विशेषणम्)	संसिद्धिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)
गताः	अ. पुं. प्र. बहु. (विशेषणम्)	महात्मानः	महात्मन् - न. पुं. प्र. बहु. (विशेष्यम्)
माम्	अस्मद् - द. सर्व. द्वि. एक.	उपेत्य	ल्यबन्तम् अव्ययम्
अशाश्वतम्	अ. नपुं. द्वि. एक. (विशेषणम्)	दुःखालयम्	अ. नपुं. द्वि. एक. (विशेषणम्)

पुनर्जन्म	पुनर्जन्मन् - न. नपुं. द्वि. एक. (विशेष्यम्)	न	अव्ययम्
आप्नुवन्ति	आप् (आप्लृ व्याप्तौ) पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः	नाप्नुवन्ति	न + आप्नुवन्ति	सवर्णदीर्घसन्धिः ।
(ख) समासः	महात्मानः	महान् आत्मा येषां ते महात्मानः - बहुव्रीहिः ।	
	दुःखालयम्	दुःखानाम् आलयः दुःखालयः, तत् - षष्ठीतत्पुरुषः ।	
	अशाश्वतम्	न शाश्वतम् अशाश्वतम्, तत् - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	उपेत्य	उप + (इण् गतौ) + ल्यप् ।	
	संसिद्धिम्	सम् + सिध् (षिधु संराद्धौ) + क्तिन्, ताम् ।	
	गताः	गम् (गम्लृ गतौ) + क्त, ते ।	

भावस्पष्टीकरणम् -

न आप्नुवन्ति ।	
किं न आप्नुवन्ति ?	**पुनर्जन्म** न आप्नुवन्ति ।
कीदृशं पुनर्जन्म न आप्नुवन्ति ?	**दुःखालयं** पुनर्जन्म न आप्नुवन्ति ।
पुनश्च कीदृशं दुःखालयं पुनर्जन्म न आप्नुवन्ति ?	**अशाश्वतं** दुःखालयं पुनर्जन्म न आप्नुवन्ति ।
किं कृत्वा अशाश्वतं दुःखालयं पुनर्जन्म न आप्नुवन्ति ?	**उपेत्य** अशाश्वतं दुःखालयं पुनर्जन्म न आप्नुवन्ति ।
कम् उपेत्य अशाश्वतं दुःखालयं पुनर्जन्म न आप्नुवन्ति ?	**माम्** उपेत्य अशाश्वतं दुःखालयं पुनर्जन्म न आप्नुवन्ति ।
के माम् उपेत्य अशाश्वतं दुःखालयं पुनर्जन्म न आप्नुवन्ति ?	**महात्मानः** माम् उपेत्य अशाश्वतं दुःखालयं पुनर्जन्म न आप्नुवन्ति ।
कीदृशाः महात्मानः माम् उपेत्य अशाश्वतं दुःखालयं पुनर्जन्म न आप्नुवन्ति ?	**संसिद्धिं गताः** महात्मानः माम् उपेत्य अशाश्वतं दुःखालयं पुनर्जन्म न आप्नुवन्ति ।
कीदृशीं संसिद्धिं गताः महात्मानः माम् उपेत्य अशाश्वतं दुःखालयं पुनर्जन्म न आप्नुवन्ति ?	**परमां** संसिद्धिं गताः महात्मानः माम् उपेत्य अशाश्वतं दुःखालयं पुनर्जन्म न आप्नुवन्ति ।

तात्पर्यम् - उत्कृष्टां मोक्षरूपां सिद्धिं प्राप्तवन्तः महापुरुषाः यदा मां लभन्ते पश्चात् ते क्षणिकं दुःखस्थानम् इदं पुनर्जन्म न आप्नुवन्ति ।

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते॥८.१६॥

पदच्छेदः - आ, ब्रह्मभुवनात्, लोकाः, पुनः, आवर्तिनः, अर्जुन।
माम्, उपेत्य, तु, कौन्तेय, पुनर्जन्म, न, विद्यते॥

अन्वयः - अर्जुन ! आ ब्रह्मभुवनात् लोकाः पुनरावर्तिनः। कौन्तेय ! माम् उपेत्य तु पुनर्जन्म न विद्यते।

पदार्थः - अर्जुन = हे कौन्तेय ! आ ब्रह्मभुवनात् = ब्रह्मलोकपर्यन्तम्, लोकाः = भुवनानि, पुनरावर्तिनः = आवर्तनशीलानि, कौन्तेय = हे अर्जुन ! माम् उपेत्य = मां प्राप्य (स्थितस्य), तु = हि, पुनर्जन्म = पुनर्जन्म, न विद्यते = नास्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुन	अ. पुं. सम्बो. एक.	आ	अव्ययम्
ब्रह्मभुवनात्	अ. नपुं. पं. एक.	लोकाः	अ. पुं. प्र. बहु. (विशेष्यम्)
पुनरावर्तिनः	पुनरावर्तिन् - न. पुं. प्र. बहु. (विशेषणम्)	कौन्तेय	अ. पुं. सम्बो. एक.
माम्	अस्मद् - द. सर्व. द्वि. एक.	उपेत्य	ल्यबन्तम् अव्ययम्
तु	अव्ययम्	पुनर्जन्म	पुनर्जन्मन् - न. नपुं. प्र. एक.
न	अव्ययम्	विद्यते	विद् (विद् - सत्तायाम्) पर. कर्तरि लट् प्रपु. एक.

व्याकरणम् -

(क) सन्धिः भुवनाल्लोकाः — भुवनात् + लोकाः — परसवर्णसन्धिः।
पुनरावर्तिनोऽर्जुन — पुनः + आवर्तिनः — विसर्गसन्धिः (रेफः)।
आवर्तिनः + अर्जुन — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।

(ख) समासः ब्रह्मभुवनात् — ब्रह्मणः भुवनम् ब्रह्मभुवनम्, तस्मात् - षष्ठीतत्पुरुषः।

(ग) कृदन्तः आवर्तिनः — आ + वृत् (वृतु वर्तने) + णिनि। (ताच्छिलिके कर्तरि) आवर्तनशीलाः इत्यर्थः।

(घ) तद्धितान्तः कौन्तेय — कुन्ती + ढक्, (अपत्यार्थे), कुन्त्याः अपत्यं पुमान्, तत्सम्बुद्धौ।

भावस्पष्टीकरणम् -

पुनरावर्तिनः सन्ति ।	
के पुनरावर्तिनः सन्ति ?	**लोकाः** पुनरावर्तिनः सन्ति ।
कुतः (आरभ्य) लोकाः पुनरावर्तिनः सन्ति ?	**आ ब्रह्मभुवनात्** लोकाः पुनरावर्तिनः सन्ति ।
न विद्यते ।	
किं न विद्यते ?	**पुनर्जन्म** न विद्यते ।
किं कृत्वा पुनर्जन्म न विद्यते ?	**उपेत्य** तु पुनर्जन्म न विद्यते ।
कम् उपेत्य तु पुनर्जन्म न विद्यते ?	**माम्** उपेत्य तु पुनर्जन्म न विद्यते ।
अस्मिन् श्लोके सम्बोधनपदे के ?	**अर्जुन ! कौन्तेय !**

तात्पर्यम् - अर्जुन ! आ ब्रह्मलोकात् सर्वेऽपि लोकाः आवर्तनशीलाः (पुनः पुनः उत्पत्तिलयशालिनः भवन्ति) इति हेतोः (कारणेन) ते न शाश्वताः (अनित्याः) । कौन्तेय ! परन्तु मां प्राप्तवतः जनस्य तु सर्वथा पुनर्जन्म नास्ति ।

सहस्रयुगपर्यन्तमहर्यद् ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥८.१७॥

पदच्छेदः - सहस्रयुगपर्यन्तम्, अहः, यद्, ब्रह्मणः, विदुः ।
रात्रिम्, युगसहस्रान्ताम्, ते, अहोरात्रविदः, जनाः ॥

अन्वयः - ब्रह्मणः यद् अहः सहस्रयुगपर्यन्तम् (ये) विदुः ते अहोरात्रविदः जनाः रात्रिं युगसहस्रान्तां विदुः ।

पदार्थः - ब्रह्मणः = प्रजापतेः, यद् अहः = यत् दिनम्, सहस्रयुगपर्यन्तम् = युगसहस्रावधिकम्, (ये) विदुः = ये जानन्ति, ते अहोरात्रविदः = ते कालज्ञाः, जनाः = मानवाः, रात्रिम् = निशाम्, युगसहस्रान्ताम् = युगसहस्रावधिकीम्, विदुः = जानन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ब्रह्मणः	ब्रह्मन् - न. पुं. ष. एक.	यद्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
अहः	अहन् - न. नपुं. प्र. एक. (विशेष्यम्)	सहस्रयुगपर्यन्तम्	अ. नपुं. प्र. एक. (विशेषणम्)

ते	तद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)	अहोरात्रविदः	अहोरात्रविद् - द. पुं. प्र. बहु. (विशेषणम्)
जनाः	अ. पुं. प्र. बहु. (विशेष्यम्)	रात्रिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)
युगसहस्रान्ताम्	आ. स्त्री. द्वि. एक. (विशेषणम्)	विदुः	विद् (विद ज्ञाने) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः अहर्यत् — अहः + यत् — विसर्गसन्धिः (रेफः)।
ब्रह्मणो विदुः — ब्रह्मणः + विदुः — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
तेऽहोरात्रविदो जनाः — ते + अहोरात्रविदः — पूर्वरूपसन्धिः।
अहोरात्रविदः + जनाः — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।

(ख) समासः सहस्रयुगपर्यन्तम् — सहस्रसंख्याकानि युगानि सहस्रयुगानि - मध्यमपदलोपी समासः।
युगसहस्रान्ताम् — युगानां सहस्रं युगसहस्रम् - षष्ठीतत्पुरुषः।
युगसहस्रम् अन्तः यस्याः सा युगसहस्रान्ता, ताम् -- बहुव्रीहिः।
अहोरात्रविदः — अहश्च रात्रिश्च अहोरात्रम् - द्वन्द्वः।
अहोरात्रं विदन्ति इति - कर्तरि क्विप् उपपदसमासश्च।

भावस्पष्टीकरणम् -

(ये) विदुः।	
(ये) **किं** विदुः ?	(ये) **अहः** विदुः।
(ये) **कस्य** अहः विदुः ?	(ये) **ब्रह्मणः** अहः विदुः।
(ये) ब्रह्मणः अहः **कीदृशं** विदुः ?	(ये) ब्रह्मणः अहः **सहस्रयुगपर्यन्तं** विदुः।
(ये) ब्रह्मणः अहः सहस्रयुगपर्यन्तं विदुः। **ते के ?**	(ये) ब्रह्मणः अहः सहस्रयुगपर्यन्तं विदुः **ते जनाः।**
(ये) ब्रह्मणः अहः सहस्रयुगपर्यन्तं विदुः ते **कीदृशाः** जनाः।	(ये) ब्रह्मणः अहः सहस्रयुगपर्यन्तं विदुः ते **अहोरात्रविदः** जनाः।
(ये) ब्रह्मणः अहः सहस्रयुगपर्यन्तं विदुः ते अहोरात्रविदः जनाः **किं कुर्वन्ति** ?	(ये) ब्रह्मणः अहः सहस्रयुगपर्यन्तं विदुः ते अहोरात्रविदः जनाः **विदुः।**
(ये) ब्रह्मणः अहः सहस्रयुगपर्यन्तं विदुः ते अहोरात्रविदः जनाः **कां** विदुः ?	(ये) ब्रह्मणः अहः सहस्रयुगपर्यन्तं विदुः ते अहोरात्रविदः जनाः **रात्रिं** विदुः।

(ये) ब्रह्मणः अहः सहस्रयुगपर्यन्तं विदुः। ते अहोरात्रविदः जनाः रात्रिं **कीदृशीं** विदुः ?	ब्रह्मणः यद् अहः सहस्रयुगपर्यन्तं (ये) विदुः ते अहोरात्रविदः जनाः रात्रिं **युगसहस्रान्तां** विदुः।

तात्पर्यम् - कालज्ञाः जनाः प्रजापतेः दिनं युगसहस्रमिति वदन्ति, तथा रात्रिं युगसहस्रम् इति वदन्ति। तस्मात् ब्रह्मलोकादयः क्षणिकाः। (अर्थात् प्रजापतेः दिनस्य रात्रेः युगसहस्रम् इति च कालमर्यादा तु अस्ति एव इति कारणेन बह्मलोकः अनित्यः। तथैव अन्ये सर्वेऽपि लोकाः अनित्याः भवन्ति।)

अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके॥८.१८॥

पदच्छेदः - अव्यक्ताद्, व्यक्तयः, सर्वाः, प्रभवन्ति, अहरागमे।
रात्र्यागमे, प्रलीयन्ते, तत्र, एव, अव्यक्तसंज्ञके॥

अन्वयः - अहरागमे अव्यक्ताद् सर्वाः व्यक्तयः प्रभवन्ति। रात्र्यागमे अव्यक्तसंज्ञके तत्र एव प्रलीयन्ते।

पदार्थः - अहरागमे = दिनारम्भे, अव्यक्ताद् = कारणीभूतात्, सर्वाः = सकलाः, व्यक्तयः = स्थावरजङ्गमाः भावाः, प्रभवन्ति = उत्पद्यन्ते, रात्र्यागमे = निशारम्भे, अव्यक्तसंज्ञके = अव्यक्तनामके, तत्र एव = तस्मिन् एव प्रजापतौ, प्रलीयन्ते = विलीनाः भवन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहरागमे	अ. पुं. स. एक.	अव्यक्ताद्	अ. पुं. पं. एक.
सर्वाः	आ. सर्व. स्त्री. प्र. बहु. (विशेषणम्)	व्यक्तयः	इ. स्त्री. प्र. बहु. (विशेष्यम्)
प्रभवन्ति	प्र + भू (भू सत्तायाम्) पर. कर्तरि लट्. प्रपु. बहु.	रात्र्यागमे	अ. पुं. स. एक. (विशेष्यम्)
अव्यक्तसंज्ञके	अ. पुं. स. एक. (विशेषणम्)	तत्र	अव्ययम्
एव	अव्ययम्	प्रलीयन्ते	प्र + (लीङ् श्लेषणे) आत्म. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः	अव्यक्ताद् व्यक्तयः	अव्यक्तात् + व्यक्तयः	जश्त्वसन्धिः।
	प्रभवन्त्यहरागमे	प्रभवन्ति + अहरागमे	यण्सन्धिः।
	तत्रैव	तत्र + एव	वृद्धिसन्धिः।
	एवाव्यक्तसंज्ञके	एव + अव्यक्तसंज्ञके	सवर्णदीर्घसन्धिः।

(ख) समासः	अव्यक्ताद्	न व्यक्तः अव्यक्तः, तस्मात् - नञ्-तत्पुरुषः ।
	अहरागमे	अह्नः आगमः अहरागमः, तस्मिन् - षष्ठीतत्पुरुषः ।
	रात्र्यागमे	रात्र्याः आगमः रात्र्यागमः, तस्मिन् - षष्ठीतत्पुरुषः ।
	अव्यक्तसंज्ञके	न व्यक्तः अव्यक्तः - नञ्-तत्पुरुषः ।
		अव्यक्ता संज्ञा यस्य सः अव्यक्तसंज्ञकः, तस्मिन् - बहुव्रीहिः ।
(ग) कृदन्तः	व्यक्ताद्	वि + अञ्ज् (अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु)+ क्त, तस्माद् ।
	व्यक्तयः	वि + अञ्ज् (अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु)+ क्तिन्, ताः ।
	आगमे	आ + गम् (गम्लृ + घञ्), तस्मिन् ।
(घ) तद्धितान्तः	तत्र	तद् + त्रल् (सप्तम्यर्थे) ।

भावस्पष्टीकरणम् -

प्रभवन्ति ।	
काः प्रभवन्ति ?	**व्यक्तयः** प्रभवन्ति ।
कीदृश्यः व्यक्तयः प्रभवन्ति ?	**सर्वाः** व्यक्तयः प्रभवन्ति ।
कस्मात् सर्वाः व्यक्तयः प्रभवन्ति ?	**अव्यक्तात्** सर्वाः व्यक्तयः प्रभवन्ति ।
कदा अव्यक्तात् सर्वाः व्यक्तयः प्रभवन्ति ?	**अहरागमे** अव्यक्तात् सर्वाः व्यक्तयः प्रभवन्ति ।
प्रलीयन्ते ।	
कदा प्रलीयन्ते ?	**रात्र्यागमे** प्रलीयन्ते ।
रात्र्यागमे **कस्मिन्** प्रलीयन्ते ?	रात्र्यागमे **अव्यक्तसंज्ञके** प्रलीयन्ते ।
रात्र्यागमे अव्यक्तसंज्ञके **कुत्र** प्रलीयन्ते ?	रात्र्यागमे अव्यक्तसंज्ञके **तत्र एव** प्रलीयन्ते ।

तात्पर्यम् - यदा दिनस्य आरम्भः भवति तदा कारणीभूतात् प्रजापतेः सर्वे स्थावरजङ्गमात्मकाः प्राणिनः सम्भवन्ति । यदा पुनः रात्रेः आरम्भः भवति तदा कारणीभूते अव्यक्ते तस्मिन् एव प्रजापतौ सर्वेऽपि एते प्रलीनाः भवन्ति ।

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥८.१९॥

पदच्छेदः - भूतग्रामः, सः, एव, अयम्, भूत्वा, भूत्वा, प्रलीयते ।
रात्र्यागमे, अवशः, पार्थ, प्रभवति, अहरागमे ॥

अन्वयः - पार्थ ! सः एव अयं भूतग्रामः अवशः भूत्वा भूत्वा रात्र्यागमे प्रलीयते । अहरागमे प्रभवति ।

पदार्थः - पार्थ = अर्जुन ! सः अयं एव = सः एव एषः, भूतग्रामः = भूतसमुदायः, अवशः = कर्मपरवशः सन्, भूत्वा भूत्वा = पुनः पुनः उत्पद्य, रात्र्यागमे = निशारम्भे, प्रलीयते = निलीयते, अहरागमे = दिनारम्भे, प्रभवति = उत्पद्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)
एव	अव्ययम्	अयम्	इदम्- म. सर्व. पुं. प्र. एक. (विशेषणम्)
भूतग्रामः	अ. पुं. प्र. एक. (विशेष्यम्)	अवशः	अ. पुं. प्र. एक. (विशेषणम्)
भूत्वा	क्त्वान्तम् अव्ययम्	रात्र्यागमे	अ. पुं. स. एक.
प्रलीयते	प्र + ली (लीङ् श्लेषणे) आत्म. कर्तरि लट्. प्रपु. एक.	अहरागमे	अ. पुं. स. एक.
प्रभवति	प्र + भू (भू सत्तायाम्) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	स एवायम्	सः + एव	विसर्गसन्धिः (लोपः) ।
		एव + अयम्	सवर्णदीर्घसन्धिः ।
	रात्र्यागमेऽवशः	रात्र्यागमे + अवशः	पूर्वरूपसन्धिः ।
	प्रभवत्यहरागमे	प्रभवति + अहरागमे	यण्सन्धिः ।
(ख) समासः	भूतग्रामः	भूतानां ग्रामः भूतग्रामः - षष्ठीतत्पुरुषः ।	
	रात्र्यागमे	रात्रेः आगमः रात्र्यागमः, तस्मिन् - षष्ठीतत्पुरुषः ।	
	अहरागमे	अह्नाम् आगमः अहरागमः, तस्मिन् - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	भूत्वा	भू (भू सत्तायाम्) + क्त्वा ।	
(घ) तद्धितान्तः	पार्थ	पृथा + अण् (अपत्यार्थे), पृथायाः अपत्यं पुमान्, तत्सम्बुद्धौ ।	

भावस्पष्टीकरणम् -

प्रलीयते ।	
कदा प्रलीयते ?	**रात्र्यागमे प्रलीयते ।**
किं कृत्वा रात्र्यागमे प्रलीयते ?	**भूत्वा भूत्वा रात्र्यागमे प्रलीयते ।**

कीदृशः भूत्वा भूत्वा रात्र्यागमे प्रलीयते ?	अवशः भूत्वा भूत्वा रात्र्यागमे प्रलीयते।
कीदृशः अवशः भूत्वा भूत्वा रात्र्यागमे प्रलीयते ?	भूतग्रामः अवशः भूत्वा भूत्वा रात्र्यागमे प्रलीयते।
कः अवशः भूत्वा भूत्वा रात्र्यागमे प्रलीयते ?	अयं सः एव भूतग्रामः अवशः भूत्वा भूत्वा रात्र्यागमे प्रलीयते।
प्रभवति।	
कदा प्रभवति ?	रात्र्यागमे प्रभवति।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	पार्थ !

तात्पर्यम् - अर्जुन ! सः एषः भूतसमुदायः कर्माधीनः सन् पुनः पुनः उत्पद्य निशारम्भे निलीयते। दिनारम्भे प्रभवति।

परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥८.२०॥

पदच्छेदः - परः, तस्मात्, तु, भावः, अन्यः, अव्यक्तः, अव्यक्तात्, सनातनः।
यः, सः, सर्वेषु, भूतेषु, नश्यत्सु, न, विनश्यति ॥

अन्वयः - तस्मात् अव्यक्तात् परः यः अन्यः अव्यक्तः भावः (सः) सनातनः। सः सर्वेषु भूतेषु नश्यत्सु न विनश्यति।

पदार्थः - तस्मात् = पूर्वोक्तात्, अव्यक्तात् = कारणीभूतात् प्रजापतेः, परः = कारणत्वात् उत्कृष्टः, यः अन्यः = यः विलक्षणः, भावः = पदार्थः, अव्यक्तः = इन्द्रियगोचरः, सः सनातनः = सः चिरन्तनः, सः = सः भावः, सर्वेषु = सकलेषु, भूतेषु = भूतग्रामेषु, नश्यत्सु = विनाशं गतेषु, न विनश्यति = नैव नाशं प्राप्नोति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तस्मात्	तद् - द. सर्व. पुं. पं. एक. (विशेषणम्)	अव्यक्तात्	अ. पुं. पं. एक. (विशेषणम्)
परः	अ. सर्व. पुं. प्र. एक. (विशेषणम्)	अन्यः	अ. सर्व. पुं. प्र. एक. (विशेषणम्)
अव्यक्तः	अ. पुं. प्र. एक. (विशेषणम्)	भावः	अ. पुं. प्र. एक. (विशेष्यम्)
सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	नश्यत्सु	नश्यत् - त. नपुं. स. बहु. (विशेषणम्)
सर्वेषु	अ. सर्व. नपुं. स. बहु. (विशेषणम्)	भूतेषु	अ. नपुं. स. बहु. (विशेष्यम्)
न	अव्ययम्	विनश्यति	वि + नश् (णश अदर्शने) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	परस्तस्मात्तु	परः + तस्मात्	विसर्गसन्धिः, सकारः ।
	भावोऽन्योऽव्यक्तात्	भावः + अन्यः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
		अन्यः + अव्यक्तात्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
	स सर्वेषु	सः + सर्वेषु	विसर्गसन्धिः (लोपः) ।
(ख) समासः	अव्यक्तात्	न व्यक्तः अव्यक्तः, तस्मात् - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	भावः	भू (भू सत्तायाम्) णिच् + घञ् ।	
	व्यक्तात्	वि + अञ्ज् (अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु) + क्त, तस्मात् ।	
	भूतेषु	भू (भू सत्तायाम्) + क्त, तेषु ।	
	नश्यत्सु	नश् (णश अदर्शने) + शतृ, तेषु ।	
(घ) तद्धितान्तः	सनातनः	सदा + ट्युल्, तुट् च (भवार्थे) सदा भवः, सनातनः इत्यर्थः ।	

भावस्पष्टीकरणम् -

न विनश्यति ।	
किं कुर्वत्सु न विनश्यति ?	**नश्यत्सु** न विनश्यति ।
केषु नश्यत्सु न विनश्यति ?	**भूतेषु** नश्यत्सु न विनश्यति ।
कतिषु भूतेषु नश्यत्सु न विनश्यति ?	**सर्वेषु** भूतेषु नश्यत्सु न विनश्यति ।
कः सर्वेषु भूतेषु नश्यत्सु न विनश्यति ?	**सः** सर्वेषु भूतेषु नश्यत्सु न विनश्यति ।
कः सः सर्वेषु भूतेषु नश्यत्सु न विनश्यति ?	**सः अन्यः भावः** (सः) सर्वेषु भूतेषु नश्यत्सु न विनश्यति ।
कीदृशः सः अन्यः भावः (सः) सर्वेषु भूतेषु नश्यत्सु न विनश्यति ?	**परः** सः अन्यः भावः (सः) सर्वेषु भूतेषु नश्यत्सु न विनश्यति ।
कस्मात् परः सः अन्यः भावः (सः) सर्वेषु भूतेषु नश्यत्सु न विनश्यति ?	**तस्मात् अव्यक्तात्** परः सः अन्यः भावः (सः) सर्वेषु भूतेषु नश्यत्सु न विनश्यति ।

तात्पर्यम् - स्थावरजङ्गमानां सर्वेषामपि पदार्थानाम् उत्पत्तौ कारणीभूतः यः अव्यक्तः प्रजापतिः वर्तते तस्यापि कारणीभूतः कश्चित्पदार्थो वर्तते । तदेव ब्रह्म । तच्च सर्वदा भवम् । तच्च ब्रह्म पदार्थान्तरेषु नाशं गतेषु अपि न नश्यति, उत्पद्यमानेषु अपि न उत्पद्यते ।

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम॥८.२१॥

पदच्छेदः - अव्यक्तः, अक्षरः, इति, उक्तः, तम्, आहुः, परमाम्, गतिम्।
यम्, प्राप्य, न, निवर्तन्ते, तत्, धाम, परमम्, मम॥

अन्वयः - अव्यक्तः अक्षरः इति उक्तः तं परमां गतिम् आहुः। यं प्राप्य न निवर्तन्ते तत् मम परमं धाम।

पदार्थः - अव्यक्तः = परमात्मा, अक्षरः इति = अविनाशी इति, उक्तः = कथितः, तम् = अक्षरम्, परमाम् = उत्तमाम्, गतिम् = स्थितिम्, आहुः = वर्णयन्ति। यम् = अक्षरम्, प्राप्य = गत्वा, न निवर्तन्ते = न प्रत्यागच्छन्ति, तत् मम = तत् मे, परमं धाम = उत्कृष्टं स्थानम्॥

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अव्यक्तः	अ. पुं. प्र. एक. (विशेषणम्)	अक्षरः	अ. पुं. प्र. एक. (विशेषणम्)
इति	अव्ययम्	उक्तः	अ. पुं. प्र. एक. (विशेषणम्)
तम्	तत् - द. सर्व. पुं. द्वि. एक. (विशेषणम्)	परमाम्	आ. स्त्री. द्वि. एक. (विशेषणम्)
गतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)	आहुः	ब्रू (व्यक्तायां वाचि) पर. कर्तरि लट्. प्रपु. बहु.
यम्	यद् - द. पुं. द्वि. एक. (विशेषणम्)	प्राप्य	ल्यबन्तम् अव्ययम्
न	अव्ययम्	निवर्तन्ते	नि + वृत् (वृतु वर्तने) आत्म. कर्तरि लट्. प्रपु. बहु.
तत्	तत् - द. सर्व. नपुं. एक. (विशेषणम्)	मम	अस्मद् - द. सर्व. ष. एक.
परमम्	अ. नपुं. प्र. एक. (विशेषणम्)	धाम	धामन् - न. नपुं. प्र. एक. (विशेष्यम्)

व्याकरणम् -

(क) सन्धिः

अव्यक्तोऽक्षरः	अव्यक्तः + अक्षरः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
इत्युक्तः	इति + उक्तः	यण्सन्धिः।
उक्तस्तम्	उक्तः + तम्	विसर्गसन्धिः (सकारः)।
तद्धाम	तत् + धाम	जश्त्वसन्धिः।

(ख) समासः

अव्यक्तः	न व्यक्तः अव्यक्तः नञ्तत्पुरुषः।
अक्षरः	न क्षरः अक्षरः नञ्तत्पुरुषः।

(ग) कृदन्तः

उक्तः		वच् (वच परिभाषणे) + क्त (कर्मणि) ।
गतिम्		गम् (गम्लृ गतौ) + क्तिन्,ताम् ।
प्राप्य		प्र + आप् (आप्लृ व्याप्तौ) + ल्यप् ।

भावस्पष्टीकरणम् -

आहुः ।	
काम् आहुः ?	**गतिम्** आहुः ।
कीदृशीं गतिम् आहुः ?	**परमां** गतिम् आहुः ।
कं परमां गतिम् आहुः ?	**तं** परमां गतिम् आहुः ।
किं कृतः तं परमां गतिम् आहुः ?	**इति उक्तः** तं परमां गतिम् आहुः ।
कीदृशः इति उक्तः तं परमां गतिम् आहुः ?	**अक्षरः** इति उक्तः तं परमां गतिम् आहुः ।
कीदृशः अक्षरः इति उक्तः तं परमां गतिम् आहुः ।	**अव्यक्तः** अक्षरः इति उक्तः तं परमां गतिम् आहुः ।

तात्पर्यम् - परमात्मा अक्षरः इति कथितः । सः परमात्मा एव उत्तमा गतिरिति वर्णयन्ति । तम् अक्षरं परमात्मानं प्राप्य पुरुषाः न पुनः आगच्छन्ति, तदेव मम उत्कृष्टं स्थानम् ।

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥८.२२॥

पदच्छेदः - पुरुषः, सः, परः, पार्थ, भक्त्या, लभ्यः, तु, अनन्यया ।
यस्य, अन्तःस्थानि, भूतानि, येन, सर्वम्, इदम्, ततम् ॥

अन्वयः - पार्थ ! भूतानि यस्य अन्तःस्थानि, येन इदं सर्वं ततम्, सः तु अनन्यया भक्त्या लभ्यः ।

पदार्थः - पार्थ = अर्जुन ! भूतानि = भूतसमुदायः, यस्य अन्तःस्थानि = यस्य अन्तः, येन = येन (परमतत्त्वेन), इदं सर्वम् = इदं कृत्स्नम्, ततम् = व्याप्तम्, सः तु = प्रसिद्धः, अनन्यया भक्त्या = एकान्तभक्त्या, लभ्यः = प्राप्यः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	भूतानि	अ. नपुं. प्र. बहु. (विशेष्यम्)
यस्य	यद् - द. सर्व. पुं. ष. एक. (विशेषणम्)	अन्तःस्थानि	अ. नपुं. प्र. बहु. (विशेषणम्)
येन	यद् - द. सर्व. पुं. तृ. एक. (विशेषणम्)	इदम्	म. सर्व. नपुं. प्र. एक. (विशेषणम्)

सर्वम्	अ. सर्व. नपुं. प्र. एक. (विशेषणम्)	ततम्	अ. नपुं. प्र. एक. (विशेषणम्)
सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	तु	अव्ययम्
अनन्यया	आ. स्त्री. तृ. एक. (विशेषणम्)	भक्त्या	इ. स्त्री. तृ. एक. (विशेष्यम्)
लभ्यः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	स परः	सः + परः	विसर्गसन्धिः (लोपः)।
	लभ्यस्त्वनन्यया	लभ्यः + तु	विसर्गसन्धिः (सकारः)।
		तु + अनयया	यण्सन्धिः।
	यस्यान्तःस्थानि	यस्य + अन्तःस्थानि	सवर्णदीर्घसन्धिः।
(ख) समासः	अन्तःस्थानि	अन्तः तिष्ठन्ति इति अन्तःस्थानि कर्तरि अच् उपपदसमासश्च।	
	अनन्यया	न अन्या अनन्या, तया - नञ्तत्पुरुषः।	
(ग) कृदन्तः	भक्त्या	भज् (भज सेवायाम्) + क्तिन्, तया (करणे)।	
	ततम्	तन् (तनु विस्तारे) + क्त (कर्मणि)।	
	भूतानि	भू + (भू सत्तायाम्) + क्त (कर्तरि)।	
	लभ्यः	लभ् (डुलभष् प्राप्तौ) + यत् (कर्मणि)।	
(घ) तद्धितान्तः	पार्थ	पृथा + अण् (अपत्यार्थे) पृथायाः अपत्यं पुमान्, तत्सम्बुद्धौ।	

भावस्पष्टीकरणम् -

लभ्यः।	
कया लभ्यः ?	**भक्त्या** लभ्यः।
कीदृश्या भक्त्या लभ्यः ?	**अनन्यया** भक्त्या लभ्यः।
कः अनन्यया भक्त्या लभ्यः ?	**सः** तु अनन्यया भक्त्या लभ्यः।
कः सः तु अनन्यया भक्त्या लभ्यः ?	**येन ततम्,** सः तु अनन्यया भक्त्या लभ्यः।
येन किं ततम्, सः तु अनन्यया भक्त्या लभ्यः।	**येन इदं सर्वं ततम्,** सः तु अनन्यया भक्त्या लभ्यः।
तस्य किं येन इदं सर्वम् ततम्, सः तु अनन्यया भक्त्या लभ्यः ?	**यस्य भूतानि** येन इदं सर्वं ततम्, सः तु अनन्यया भक्त्या लभ्यः।
यस्य **कीदृशानि** भूतानि येन इदं सर्वं ततम्, सः तु अनन्यया भक्त्या लभ्यः ?	यस्य **अन्तःस्थानि** भूतानि येन इदं सर्वं ततम्, सः तु अनन्यया भक्त्या लभ्यः।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ !**

तात्पर्यम् - अर्जुन ! सर्वाणि भूतानि यस्मिन् अन्तर्गतानि सन्ति, येन च सर्वमिदं व्याप्तं वर्तते तादृशं तत् ब्रह्म केवलम् एकान्तभक्त्या एव लभ्यम्।

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥८.२३॥

पदच्छेदः - यत्र, काले, तु, आवृत्तिम्, अनावृत्तिम्, च, एव, योगिनः।
प्रयाताः, यान्ति, तम्, कालम्, वक्ष्यामि, भरतर्षभ ॥

अन्वयः - भरतर्षभ ! योगिनः यत्र काले तु प्रयाताः आवृत्तिम् अनावृत्तिं चैव यान्ति तं कालं वक्ष्यामि।

पदार्थः - भरतर्षभ = भरतश्रेष्ठ ! योगिनः = कर्मिणः (अष्टाङ्गयोगिनः), यत्र = यस्मिन्, काले तु = समये, प्रयाताः = मृताः, आवृत्तिम् = प्रत्यागमनम्, अनावृत्तिम् च एव = आगमनं च एव, यान्ति = प्राप्नुवन्ति, तं कालम् = तं समयम्, वक्ष्यामि = वदिष्यामि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भरतर्षभ	अ. पुं. सम्बो. एक.	योगिनः	योगिन् - न. पुं. प्र. बहु. (विशेष्यम्)
यत्र	अव्ययम्	काले	अ. पुं. स. एक.
तु	अव्ययम्	प्रयाताः	अ. पुं. प्र. बहु. (विशेषणम्)
आवृत्तिम्	इ. स्त्री. द्वि. एक.	अनावृत्तिम्	इ. स्त्री. द्वि. एक.
च	अव्ययम्	एव	अव्ययम्
यान्ति	या (या प्रापणे) पर. कर्तरि लट्. प्रपु. बहु.	तम्	तद् - द. सर्व. पुं. द्वि. एक. (विशेषणम्)
कालम्	अ. पुं. द्वि. एक. (विशेष्यम्)	वक्ष्यामि	वच् (वच परिभाषणे) पर. कर्तरि लृट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः	त्वनावृत्तिम्	तु + अनावृत्तिम्	यण्सन्धिः।
	चैव	च + एव	वृद्धिसन्धिः।
	प्रयाता यान्ति	प्रयाताः + यान्ति	विसर्गसन्धिः (लोपः)।
(ख) समासः	अनावृत्तिम्	न आवृत्तिः अनावृत्तिः, ताम् - नञ्तत्पुरुषः।	
	भरतर्षभ	भरतानाम् ऋषभः भरतर्षभः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः।	

(ग) कृदन्तः आवृत्तिम् आ + वृ (वृतु वर्तने) + क्तिन्, ताम्।
प्रयाताः प्र + या (या प्रापणे) + क्त (कर्तरि)।
(घ) तद्धितान्तः योगिनः योग + इनि, तस्य। योगः अस्य अस्मिन् वा अस्तीति।

भावस्पष्टीकरणम् -

वक्ष्यामि।	
कं वक्ष्यामि ?	**कालं** वक्ष्यामि।
कं कालं वक्ष्यामि ?	**यत्र यान्ति तं** कालं वक्ष्यामि।
यत्र **कां** यान्ति तं कालं वक्ष्यामि ?	यत्र **आवृत्तिम् अनावृत्तिं चैव** यान्ति तं कालं वक्ष्यामि।
यत्र **के** आवृत्तिम् अनावृत्तिं चैव यान्ति तं कालं वक्ष्यामि ?	यत्र **प्रयाताः** आवृत्तिम् अनावृत्तिं चैव यान्ति तं कालं वक्ष्यामि।
यत्र **कस्मिन्** प्रयाताः आवृत्तिम् अनावृत्तिं चैव यान्ति तं कालं वक्ष्यामि ?	यत्र **काले** तु प्रयाताः आवृत्तिम् अनावृत्तिं चैव यान्ति तं कालं वक्ष्यामि।
यत्र **के** काले तु प्रयाताः आवृत्तिम् अनावृत्तिं चैव यान्ति तं कालं वक्ष्यामि ?	यत्र **योगिनः** काले तु प्रयाताः आवृत्तिम् अनावृत्तिं चैव यान्ति तं कालं वक्ष्यामि।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भरतर्षभ !**

तात्पर्यम् - भरतश्रेष्ठ ! यस्मिन् समये मृताः कर्मिणः आवृत्तिं अनावृत्तिम् चैव यान्ति तं कालं वक्ष्यामि।

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥८.२४॥

पदच्छेदः - अग्निः, ज्योतिः, अहः, शुक्लः, षण्मासाः, उत्तरायणम्।
तत्र, प्रयाताः, गच्छन्ति, ब्रह्म, ब्रह्मविदः, जनाः ॥

अन्वयः - अग्निः ज्योतिः अहः शुक्लः षण्मासाः उत्तरायणं तत्र प्रयाताः ब्रह्मविदः जनाः ब्रह्म गच्छन्ति।

पदार्थः - अग्निः = अनलः (देवता), ज्योतिः = कान्तिः, अहः = दिवसः, शुक्लः = शुक्लपक्षः, षण्मासाः उत्तरायणम् = षण्मासावधियावत् उत्तरायणम्, तत्र = तस्मिन् काले, प्रयाताः = गताः, ब्रह्मविदः = ब्रह्मणः उपासकाः, जनाः = मनुष्याः, ब्रह्म = परं वस्तु (परमात्मानम्), गच्छन्ति = यान्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अग्निः	इ. पुं. प्र. एक.	ज्योतिः	ज्योतिस्- स. नपुं. प्र. एक.
अहः	अहन् - न. नपुं. प्र. एक.	शुक्लः	अ. पुं. प्र. एक.
षण्मासाः	अ. पुं. प्र. बहु.	उत्तरायणं	अ. नपुं. प्र. एक.
तत्र	अव्ययम्	प्रयाताः	अ. पुं. प्र. बहु. (विशेषणम्)
ब्रह्मविदः	ब्रह्मविद् - द. पुं. प्र. बहु. (विशेषणम्)	जनाः	अ. पुं. प्र. बहु. (विशेष्यम्)
ब्रह्म	ब्रह्मन् - न. नपुं. द्वि. एक.	गच्छन्ति	गम् (गम्लृ गतौ) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः	अग्निर्ज्योतिः	अग्निः + ज्योतिः	विसर्गसन्धिः (रेफः)।
	ज्योतिरहः	ज्योतिः + अहः	विसर्गसन्धिः (रेफः)।
	षण्मासा उत्तरायणं	षण्मासाः + उत्तरायणं	विसर्गसन्धिः (लोपः)।
	प्रयाता गच्छन्ति	प्रयाताः + गच्छन्ति	विसर्गसन्धिः (लोपः)।
	ब्रह्मविदो जनाः	ब्रह्मविदः + जनाः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) समासः	षण्मासाः	षट् मासाः षण्मासाः - कर्मधारयः।	
	उत्तरायणं	उत्तरम् अयनम् उत्तरायणं - कर्मधारयः। अयन्ते (गच्छन्ति) अनेन इति अयनं मार्गः।	
	ब्रह्मविदः	ब्रह्म विदन्ति इति ब्रह्मविदः - कर्तरि क्विप् उपपदसमाश्च।	
(ग) कृदन्तः	प्रयाता	प्र + या (या प्रापणे) + क्त।	

भावस्पष्टीकरणम् -

उत्तरायणं भवति।	
किम् उत्तरायणं भवति ?	**अग्निः ज्योतिः अहः शुक्लः षण्मासाः** उत्तरायणं भवति।
अग्निः ज्योतिः अहः शुक्लः षण्मासाः उत्तरायणं भवति। **तत्र किं ?**	अग्निः ज्योतिः अहः शुक्लः षण्मासाः उत्तरायणं भवति। **तत्र गच्छन्ति।**
अग्निः ज्योतिः अहः शुक्लः षण्मासाः उत्तरायणं भवति। तत्र **किं** गच्छन्ति ?	अग्निः ज्योतिः अहः शुक्लः षण्मासाः उत्तरायणं भवति। तत्र **ब्रह्म** गच्छन्ति।

अग्निः ज्योतिः अहः शुक्लः षण्मासाः उत्तरायणं भवति। तत्र **के** ब्रह्म गच्छन्ति ?	अग्निः ज्योतिः अहः शुक्लः षण्मासाः उत्तरायणं भवति। तत्र **जनाः** ब्रह्म गच्छन्ति।
अग्निः ज्योतिः अहः शुक्लः षण्मासाः उत्तरायणं भवति। तत्र **कीदृशाः** जनाः ब्रह्म गच्छन्ति ?	अग्निः ज्योतिः अहः शुक्लः षण्मासाः उत्तरायणं भवति। तत्र **ब्रह्मविदः** जनाः ब्रह्म गच्छन्ति।
अग्निः ज्योतिः अहः शुक्लः षण्मासाः उत्तरायणं भवति। तत्र **कीदृशाः** ब्रह्मविदः जनाः ब्रह्म गच्छन्ति ?	अग्निः ज्योतिः अहः शुक्लः षण्मासाः उत्तरायणं भवति। तत्र **प्रयाताः** ब्रह्मविदः जनाः ब्रह्म गच्छन्ति।

तात्पर्यम् - यः अनलः (देवता) कान्तिः (देवता) दिवसः (देवता) शुक्लपक्षः षण्मासावधिकम् उत्तरायणं (देवता) तस्मिन् काले गताः ब्रह्मोपासकाः जनाः ब्रह्म गच्छन्ति।

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते॥८.२५॥

पदच्छेदः - धूमः, रात्रिः, तथा, कृष्णः, षण्मासाः, दक्षिणायनम्।
तत्र, चान्द्रमसम्, ज्योतिः, योगी, प्राप्य, निवर्तते॥

अन्वयः - धूमः रात्रिः कृष्णः तथा षण्मासाः दक्षिणायनं तत्र योगी चान्द्रमसं ज्योतिः प्राप्य निवर्तते।

पदार्थः - धूमः = धूमः (देवता) , रात्रिः = निशा (देवता), कृष्णः = कृष्णपक्षः (देवता), तथा = एवम्, षण्मासा दक्षिणायनम् = षण्मासावधिकं दक्षिणायनम्, तत्र = तस्मिन् समये, योगी = कर्म योगी च, चान्द्रमसम् = चन्द्रसम्बन्धि, ज्योतिः = अर्चिः (कान्तिम्) प्राप्य = लब्ध्वा, निवर्तते = पुनः आगच्छति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
धूमः	अ. पुं. प्र. एक.	रात्रिः	इ. स्त्री. प्र. एक.
कृष्णः	अ. पुं. प्र. एक.	तथा	अव्ययम्
षण्मासाः	अ. पुं. प्र. बहु.	दक्षिणायनम्	अ. नपुं. प्र. एक.
तत्र	अव्ययम्	योगी	योगिन् - न. पुं. प्र. एक.
चान्द्रमसम्	अ. नपुं. द्वि. एक. (विशेषणम्)	ज्योतिः	ज्योतिस्- सका. नपुं. द्वि. एक. (विशेष्यम्)
प्राप्य	ल्यबन्तम् अव्ययम्	निवर्तते	नि + वृत् (वृतु वर्तने) आत्म. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	धूमो रात्रिः	धूमः + रात्रिः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	रात्रिस्तथा	रात्रिः + तथा	विसर्गसन्धिः (सकारः) ।
	ज्योतिर्योगी	ज्योतिः + योगी	विसर्गसन्धिः (रेफः) ।
(ख) समासः	षण्मासाः	षट् मासाः, षण्मासाः - कर्मधारयः ।	
	दक्षिणायनम्	दक्षिणम् अयनं दक्षिणायनम् - कर्मधारयः ।	
(ग) कृदन्तः	प्राप्य	प्र + आप् (आप्लृ व्याप्तौ) + ल्यप् ।	
(घ) तद्धितान्तः	चान्द्रमसम्	चन्द्रमस् + अण् (इदमर्थे) चन्द्रमसः अयं, तत् ।	
	योगी	योग + इनि (मतुबर्थे) योगः अस्य अस्मिन् वा अस्ति इति ।	

भावस्पष्टीकरणम् -

दक्षिणायनं भवति ।	
किं दक्षिणायनं भवति ?	**धूमः रात्रिः कृष्णः तथा षण्मासाः दक्षिणायनं भवति ।**
धूमः रात्रिः कृष्णः तथा षण्मासाः दक्षिणायनं भवति । **तत्र किम् ?**	धूमः रात्रिः कृष्णः तथा षण्मासाः दक्षिणायनं भवति । **तत्र निवर्तते ।**
धूमः रात्रिः कृष्णः तथा षण्मासाः दक्षिणायनं भवति । तत्र **किं कृत्वा** निवर्तते ?	धूमः रात्रिः कृष्णः तथा षण्मासाः दक्षिणायनं भवति । तत्र **प्राप्य** निवर्तते ।
धूमः रात्रिः कृष्णः तथा षण्मासाः दक्षिणायनं भवति । तत्र **किं** प्राप्य निवर्तते ?	धूमः रात्रिः कृष्णः तथा षण्मासाः दक्षिणायनं भवति । तत्र **ज्योतिः** प्राप्य निवर्तते ।
धूमः रात्रिः कृष्णः तथा षण्मासाः दक्षिणायनं भवति । तत्र **कीदृशं** ज्योतिः प्राप्य निवर्तते ?	धूमः रात्रिः कृष्णः तथा षण्मासाः दक्षिणायनं भवति । तत्र **चान्द्रमसं** ज्योतिः प्राप्य निवर्तते ।
धूमः रात्रिः कृष्णः तथा षण्मासाः दक्षिणायनं भवति । तत्र **कः** चान्द्रमसं ज्योतिः प्राप्य निवर्तते ?	धूमः रात्रिः कृष्णः तथा षण्मासाः दक्षिणायनं भवति । तत्र **योगी** चान्द्रमसं ज्योतिः प्राप्य निवर्तते ।

तात्पर्यम् - यत्र धूमः (देवता) रात्रिः (देवता) एवं कृष्णपक्षः (देवता) षण्मासाः दक्षिणायनं (देवता) तत्र काले गतः योगी चन्द्रलोकं प्राप्य निवर्तते ।

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययावर्तते पुनः ॥८.२६॥

पदच्छेदः - शुक्लकृष्णे, गती, हि, एते, जगतः, शाश्वते, मते ।
एकया, याति, अनावृत्तिम्, अन्यया, आवर्तते, पुनः ॥

अन्वयः - एते हि शुक्लकृष्णे गती जगतः शाश्वते मते। एकया अनावृत्तिं याति अन्यया पुनः आवर्तते।

पदार्थः - एते हि = इमे, शुक्लकृष्णे = शुक्ला कृष्णा चेति, गती = मार्गौ, जगतः = प्रपञ्चस्य, शाश्वते = नित्यौ, मते = अभीष्टौ, एकया = एकेन मार्गेण, अनावृत्तिम् = अनागमनम्, याति = प्राप्नोति, अन्यया = अपरेण मार्गेण, पुनः = भूयः, आवर्तते = आवृत्तिं प्राप्नोति (आगमनं भवति)।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
एते	एतद्- द. सर्व. स्त्री. प्र. द्विव. (विशेषणम्)	हि	अव्ययम्
शुक्लकृष्णे	आ. स्त्री. प्र. द्विव. (विशेष्यम्)	गती	इ. स्त्री. प्र. द्विव. (विशेषणम्)
जगतः	जगत्- त. नपुं. ष. एक.	शाश्वते	आ. स्त्री. प्र. द्विव. (विशेषणम्)
मते	आ. स्त्री. प्र. द्विव. (विशेषणम्)	एकया	आ. सर्व. स्त्री. तृ. एक. (विशेषणम्)
अनावृत्तिम्	इ. स्त्री. द्वि. एक.	याति	या (या प्रापणे) पर. कर्तरि लट्. प्रपु. एक.
अन्यया	आ. सर्व. स्त्री. तृ. एक. (विशेषणम्)	पुनः	अव्ययम्
आवर्तते	आ वृत् (वृतु वर्तने) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	ह्येते	हि + एते	यण्सन्धिः।
	यात्यनावृत्तिम्	याति + अनावृत्तिम्	यण्सन्धिः।
	अन्ययावर्तते	अन्यया + आवर्तते	सवर्णदीर्घसन्धिः।
(ख) समासः	शुक्लकृष्णे	शुक्ला च कृष्णा च - द्वन्द्वः।	
	अनावृत्तिम्	न आवृत्तिः अनावृत्तिः, ताम् - नञ्तत्पुरुषः।	
	गती	गम् (गम्लृ गतौ) + क्तिन् (करणे)। गम्यते आभ्याम् इति गती।	
(ग) कृदन्तः	मते	मन् (मन ज्ञाने) + क्त।	
(घ) तद्धितान्तः	शाश्वते	शश्वत् + अण् (भवार्थे) शश्वद् भवे इत्यर्थः, ।	

भावस्पष्टीकरणम् -

मते।	
कीदृश्यौ मते ?	**शाश्वते** मते।
कस्य शाश्वते मते ?	**जगतः** शाश्वते मते।

के जगतः शाश्वते मते ?	एते हि शुक्लकृष्णे गती जगतः शाश्वते मते ।
आवर्तते ।	
कदा आवर्तते ?	पुनः आवर्तते ।
कया पुनः आवर्तते ?	अन्यया पुनः आवर्तते ।
याति ।	
कां याति ?	अनावृत्तिं याति ।
कया अनावृत्तिं याति ?	एकया अनावृत्तिं याति ।

तात्पर्यम् - एवं शुक्लः कृष्णः चेति द्वौ मार्गौ स्तः । तत्र शुक्लमार्गेण ये गच्छन्ति ते न पुनरायान्ति ।

नैते सृती पार्थ जानन्योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥८.२७॥

पदच्छेदः - न, एते, सृती, पार्थ, जानन्, योगी, मुह्यति, कश्चन ।
तस्मात्, सर्वेषु, कालेषु, योगयुक्तः, भव, अर्जुन ॥

अन्वयः - पार्थ ! एते सृती जानन् कश्चन योगी न मुह्यति । तस्मात् अर्जुन ! सर्वेषु कालेषु योगयुक्तः भव ।

पदार्थः - पार्थ = अर्जुन ! एते = इमे, सृती = गती, जानन् = विदन्, कश्चन = कोऽपि, योगी = समाहितचित्तः, न मुह्यति = भ्रान्तो न भवति, तस्मात् = ततः हेतोः, अर्जुन = पार्थ ! सर्वेषु = निखिलेषु, कालेषु = समयेषु, योगयुक्तः = समाधिविशिष्टः, भव = वर्तस्व ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	एते	एतद् - द. सर्व. स्त्री. द्वि. द्विव.
सृती	इ. स्त्री. द्वि. द्विव.	जानन्	जानत्- त. पुं. प्र. एक. (विशेषणम्)
कश्चन	अव्ययम्	योगी	योगिन्- न. पुं. प्र. एक. (विशेष्यम्)
न	अव्ययम्	मुह्यति	मुह् (मुह वैचित्ये) पर. कर्तरि लट्. प्रपु. एक.
तस्मात्	तद्- द. सर्व. पुं. पं. एक. (विशेषणम्)	अर्जुन	अ. पुं. सम्बो. एक.
सर्वेषु	अ. सर्व. पुं. स. बहु. (विशेषणम्)	कालेषु	अ. पुं. स. बहु. (विशेष्यम्)
योगयुक्तः	अ. पुं. प्र. एक. (विशेषणम्)	भव	भू (भू सत्तयाम्) पर. कर्तरि लोट् मपु. एक

व्याकरणम् -

(क) सन्धिः	नैते	न + एते	वृद्धिसन्धिः।
(ख) समासः	योगयुक्तः	योगेन युक्तः योगयुक्तः - तृतीयातत्पुरुषः।	
(ग) कृदन्तः	सृती	सृ (सृ गतौ) + क्तिन् (करणे)। सरन्ति आभ्याम् इति सृती।	
	जानन्	ज्ञा (ज्ञा अवबोधने) + शतृ।	
(घ) तद्धितान्तः	पार्थ	पृथा + अण् (अपत्यार्थे) पृथायाः अपत्यं पुमान्, तत्सम्बुद्धौ।	
	योगी	योग + इनि (मतुबर्थे) योगः अस्य अस्मिन् वा अस्ति इति।	

भावस्पष्टीकरणम् -

न मुह्यति।	
कः न मुह्यति ?	योगी न मुह्यति।
कः योगी न मुह्यति ?	**कश्चन** योगी न मुह्यति।
किं कुर्वन् कश्चन योगी न मुह्यति ?	**जानन्** कश्चन योगी न मुह्यति।
के जानन् कश्चन योगी न मुह्यति ?	**एते सृती** जानन् कश्चन योगी न मुह्यति।
एते सृती जानन् कश्चन योगी न मुह्यति। **तस्मात् किम् ?**	एते सृती जानन् कश्चन योगी न मुह्यति। **तस्मात् भव।**
एते सृती जानन् कश्चन योगी न मुह्यति। **कीदृशः भव ?**	एते सृती जानन् कश्चन योगी न मुह्यति। **तस्मात् योगयुक्तः भव।**
एते सृती जानन् कश्चन योगी न मुह्यति। **केषु योगयुक्तः भव ?**	एते सृती जानन् कश्चन योगी न मुह्यति। **तस्मात् सर्वेषु कालेषु योगयुक्तः भव।**
अस्मिन् श्लोके सम्बोधनपदे के ?	**पार्थ ! अर्जुन !**

तात्पर्यम् - अर्जुन ! एतौ मार्गौ (शुक्लः कृष्णः चेति द्वौ मार्गौ) जानन् (ज्ञात्वा) कोऽपि योगी भ्रान्तो न भवति। तस्मात् सर्वेषु कालेषु समाहितचित्तः भव। (समाधिरतो भव।)

वेदेषु यज्ञेषु तपस्सु चैव दानेषु यत्पुण्यफलं प्रदिष्टम्।
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम्॥८.२८॥

पदच्छेदः - वेदेषु, यज्ञेषु, तपस्सु, च, एव, दानेषु, यत्, पुण्यफलम्, प्रदिष्टम्।
अत्येति, तत्, सर्वम्, इदम्, विदित्वा, योगी, परम्, स्थानम्, उपैति, च, आद्यम्॥

अन्वयः - योगी इदं सर्वं विदित्वा वेदेषु यज्ञेषु तपस्सु दानेषु च एव यत् पुण्यफलं प्रदिष्टं तत् अत्येति परम् आद्यं स्थानम् उपैति।

